श्रीमत्सिद्धिकरं कान्तं रमोमारमणात्मकम् ।
दयासिन्धुं चिदानन्दं सितासितमुपास्महे ॥

इह खलु चतुर्थपुरुषार्थहेतुभूतमात्मतत्त्वज्ञानमामनन्ति । तच्च पदार्थतत्त्वनिर्णयाधीनमिति पदार्थतत्त्वमत्र विविच्यते । तत्र प्रमितिविषयः पदार्थः । स द्वेधा—भावोऽभावश्च । भावः षडेव—द्रव्यगुणकर्मसामान्यविशेषसमवायभेदात् । तत्र द्रव्यत्वजातिमत् गुणाश्रयो वा द्रव्यम् ।

Colophon:

इति कोण्डुभट्टीये उपमानखण्डः समाप्तः ॥

End:

ध्वंसोऽप्यावश्यकः । तथाहि—न तावन्नित्यसुखाभिव्यक्तिर्मुक्तिः, सुखवदाभिव्यक्तेः नित्यत्वे इदानीमपि सत्त्वेन तदभावान्न युक्ता, मुक्तिसंसारयोरविशेषप्रसङ्गात् ।

R. No. **75.**

Śrītāla. 9¼ × 1¾ inches. Foll. 39. Lines, 10 in a page. Grantha. Good.

Purchased in 1910–11 from S. Rāmakṛṣṇavādhyār of Palghat.

(*a*) सामवेदमन्त्रखण्डपदपाठः.

SĀMAVĒDAMANTRAKHAṆḌAPADAPĀṬHAḤ.

Foll. 1*a*—18*b*.

Gives the Pada text of the Mantras which form part of the Upaniṣad Brāhmaṇa of the Sāmavēda. These Mantras are intended to be repeated in the domestic rites performed on auspicious occasions.

Contains Khaṇḍas 3, 4, 5 and 7 only. Wants beginning and end.

Beginning:

अदिते । अनुमन्यस्व । अनुमते । अनुमन्यस्व । सरस्वते । अनुमन्यस्व । देव । सवितः । प्रसुव । यज्ञम् । प्रसुव । यज्ञपतिम् । भगाय । दिव्यः । गन्धर्वः । केतपूः । केतम् । नः । पुनातु । वाचस्पतिः । वाचम् । नः । स्वदतु ।

End:

त्वम् । आदित्यान् । आवह । तान् । उश्मासि । अग्ने । सख्ये । मारिषाम । वा । यम् । ता । वा ।

(*b*) खादिरगृह्यसूत्रम्.

KHĀDIRAGṚHYASŪTRAM.

Foll. 19*a*—39*b*.

Same work as the one described under No. 1171 of the D.C.S. MSS., Vol. II.

Complete.

R. No. 76

Śrītāla. 7¾ × 1⅞ inches. Foll. 24. Lines, 10 in a page. Grantha. Good.

Purchased in 1910-11 from Minākṣiyammāḷ of Koḍuvāyūr.

गोविन्दचरितम्.

GŌVINDACARITAM.

Foll. 1*a*—17*a*. Foll. 18 and 24 contain some passages relating to Jyautiṣa. Others are blank.

A poem about the life and doings of Kṛṣṇa: by Vāsudēva. He states that it was composed with a view to please the king Ravivarman of Prakāśēndra family.

Contains cantos 1—4 complete; 5th incomplete.

Beginning:

श्रीमद्विघ्नेशवाग्देवीकार्त्तिकेयादिमूर्तये ।
नमोऽस्तु पत्ये भूतानां सदानन्दचिदात्मने ॥

कुन्दसूनमनोहारिमन्दहासविराजितम् ।
नन्दगोपकुलोत्तंसमिन्दिरारमणं भजे ॥
नमो भगवते तस्मै व्यासरूपाय विष्णवे ।
यत्प्रसादेन हि ज्ञेयं वस्तु जानन्ति मानवाः ॥
अस्ति श्रीमत्प्रकाशेन्द्रवंशमङ्गल्यभूषणः ।
रविवर्ममहीपालः सतां सुकृतमाधुरी ॥
यं सर्वगुणसंपन्नं समाश्रित्य सरस्वती ।
श्रीश्च न स्मरतो जातु प्रियावेकगुणाश्रयौ ॥
तस्य धर्मात्मनः प्रीत्यै गोविन्दचरितं वयः(म्) ।
ब्रूमः संक्षिप्य सुतरां प्रसीदन्त्विह देशिकाः ॥
श्रीमती शूरसेनेसु बभूवातिमनोहरा ।
मधुरा नाम नगरी यदूनां पुण्यकर्मणाम् ॥
उग्रसेनो वसंस्तस्यां वसन् राज्यमपालयत् ।
अनुजेन सह श्रीमान् देवकेन महात्मना ॥

* * * *

इति गोविन्दचरिते वासुदेवकृते प्रथमः सर्गः ।

End:

रूपामृतेन नयनानि शरीरभाजां
लीलायितेन हृदयेन विलासिनीनाम् ।
शौरिर्व्रजे स विजहार हरन्नरीणां
प्राणांस्तथा भुजबलेन बलेन सार्धम् ॥

Colophon:

इति गोविन्दचरिते चतुर्थः सर्गः ॥

अथ कंसाज्ञया कश्चिदरिष्टो नाम दानवः ।
महोक्षरूपः संप्राप्य त्रासयामास गोकुलम् ॥

* * * *

ततः क्रोधाकुलः शौरिर्मश्चाग्रेऽदृश्यत क्षणात् ।
अग्रहीच्चाशु तन्मौलौ उग्रतेजाः खलं बलात् ॥

R. No. 77.

Paper. $7\frac{3}{4} \times 6\frac{1}{2}$ inches. Foll. 92. Lines, 19 in a page. Telugu. Good.

छान्दोग्योपनिषद्व्याख्या.

CHĀNDŌGYŌPANIṢADVYĀKHYĀ.

Purchased in 1910–11 from A. V. Narasiṁhācāriyar of Triplicane.

This is a commentary on Chāndōgyōpaniṣad in accordance with Viśiṣṭādvaita Vēdānta: probably by Muḍumbai Narasiṁhārya.

Contains Prapāṭhakas one to three complete.

Beginning:

त्वत्प्रेरितेन ज्ञानेन किंचिज्ज्ञोऽप्याखिलांशवित् ।
छान्दोग्योपनिषद्व्याख्यां कुर्यां नरहरे शृणु ॥

उपनिषदियं परमात्मनो भवत एवोपासना उपदिशति उपास्यस्य तव विश्रान्ताखिललीलासंरम्भं सुचिरविनोदरससंभूतसंतुष्टचुपसंहृतप्राक्तनबहुभवननिमित्तनिजेक्षणं साविद्यदृगस्मदाद्यूहादवीयस्स्वप्रतिष्ठानन्दास्वादतया यथाकथंचिन्निबोधनाय प्रसुप्तात्मवदसद्व्यावृत्त्या सदिति श्रूयमाणं . . .

बोद्धणां निजपरिचितपुमर्थगन्धास्फुरणात् सुषुप्तात्मवत् शून्यसहोदरतासंप्रत्ययादरुचिर्मा भूदिति तदेवाधिकृत्य,

तदेतदिति मन्यन्तेऽनिर्देश्यं परमं सुखम् ।

आनन्दो ब्रह्मविज्ञानमानन्दं ब्रह्म—इत्यादिना निरन्तरसुखरूपमुक्त्वा सुखरूपस्यापि स्वादनविरहे अननुभव एवेति न पुमर्थसिद्धिः इति मत्वा तन्निबोधनाय यदेव सद्रूपमुक्तं तत् सुखरूपेणैव सत्.

End:

वायुप्राणान्नविराट्परम्परया ब्रह्मनिष्ठो भवतीत्येतदाशयः.

Colophon:

इति तृतीयः खण्डः ॥

R. No. 78.

Paper. 7⅝ × 6⅝ inches. Foll. 92. Lines, 22 in a page. Telugu. Good.

Purchased in 1910–11 from A. V. Narasiṁhācāriyar of Triplicane.

छान्दोग्योपनिषद्व्याख्या.

CHĀNDŌGYŌPANIṢADVYĀKHYĀ.

Foll. 1*a*—82*a*. The remaining foll. are blank.

Same work as the above.

Contains Prapāṭhakas seven and eight only.

Beginning:

अर्वाक् षष्ठे विकृतिरूपमखिलमपि जगत् मन्मूलकं सदायत्तं चरमे सति लयं यास्यति : तावदपि सदात्मकमेव वर्तते । अत्र निखिलविकाराणामपि जीवात्मनां भोगे विनियोगानुभवात् ॥

Colophon:

इति छान्दोग्योपनिषदि अष्टमप्रपाठकः समाप्तः । उपनिषत् सर्वापि पूर्णा ॥

End:

आप्यायन्तु तृप्तानि भवन्तु । अङ्गान्यारभ्य ब्रह्मोपनिषदान्तं सर्वाणि हृष्टानि भूयासुः ।

* * * *

ते मयि सन्तु, ते मयि सन्तु । आदरात् द्विरुक्तिः । अहमपि ब्रह्मवित् भूयासमित्याशंसनम् ॥ ओं शान्तिः ॥

R. No. 79.

Paper. 8¼ × 5½ inches. Foll. 81. Lines, 15 on a page. Telugu. Good.

Transcribed in 1910-11 and 1911-12 from a MS. of M. O. Anandāḷvār of Bangalore.

सुदर्शनकल्पसारसमुच्चयः.

SUDARŚANAKALPASĀRASAMUCCAYAḤ.

This work consists of 24 Adhyāyas. It is a collection of all the Sudarśana Mantras gleaned from various Saṁhitās of the Pāñcarātrāgama. The Mantras are systematically treated.

Complete

Beginning:

दीप्तिव्याप्तान्तरिक्षक्षरदरुणनिभाभासिताशान्तराला(लं)
दंष्ट्रानिष्ठ्यूतवह्निस्रवदविरल(ति)बहुलादभ्रशुभ्राट्टहासम् ।
शङ्खारिश्रीगदाम्भोरुहमुसलधनुष्पाशदीप्ताङ्कुशाङ्कैः
दोर्भिः पिङ्गाक्षिकेशं प्रणमत शिरसा विष्णुचक्राभिधानम् ॥

सुदर्शनस्य मन्त्रस्य कल्पसारसमुच्चये(यम्)।
करिष्यामि सहस्रेण यथादृष्टं यथाश्रुतम् ॥
गार्ग्यं बोधायनीयं च तथा परमसंहिताम् ।
नारायणीयं सव्याख्यं विहगेन्द्रस्य संहिताम् ॥
त्रिलोचनस्य शिष्येण दूर्वासाख्येन सूरिणा ।
वाचस्पतिमतं चैव बृहस्पतिमतं तथा ॥
गुरूपदेशेनान्यं च यथासारं वदाम्यहम् ।
प्रथमं मन्त्रमाहात्म्यं मन्त्रोद्धारमतः परम् ॥
ऋष्याद्यङ्गविधिं चैव वशीकारविधिं तथा ।
दिग्बन्धनविधिं चैव मुद्राण्यावरणानि च ॥
मन्त्रध्यानविधिं चैव हृदयोपासनाविधिम् ।
सुदर्शनविधिं चैव पूर्वसेवाविधिं तथा ॥
आत्मरक्षाविधिं चैव क्षुद्रकर्मविधिं तथा ।
यक्षिवाद्यविधिं चैव विष्णुलोकप्रदर्शनम् ॥

एते चान्ये च विधयः परमार्थसमन्विताः ।
चतुर्विंशद्भिरध्यायैः प्रोच्यन्ते संग्रहः कृतेः ॥

End:

सुदर्शनस्य मन्त्रस्य कपिलायास्तु विंशतिः ।
दक्षिणा दक्षिणेत्युक्तमलाभे मूल्यमेव वा ॥
अशक्तः शक्तितो दद्यान्मन्त्रस्य गुरुदक्षिणाम् ।
वित्तशाठ्यं न कुर्वीत यदि कुर्यादनर्थकृत् ॥
चक्रं शङ्खं च चापं परशुमसिमिषुं शूलपाशाङ्कुशाब्जं
बिभ्राणं वज्रखेटं हलमुसलगदाकुन्तमत्युग्रदंष्ट्रम् ।
ज्वालाकेशं त्रिनेत्रं ज्वलदनलनिभं हारकेयूरभूषं
ध्यायेत् षट्कोणसंस्थं सकलरिपुजनप्राणसंहारि चक्रम् ॥

Colophon:

इति श्रीसुदर्शनकल्पसारसमुच्चये मोक्षोपायविधिर्नाम चतुर्विंशोऽध्यायः ॥

षट्कोणाङ्कितताराम्बुनिलयं स्वच्छेद्यदंष्ट्राननं
चक्राद्यायुधचारुषोडशभुजं सज्वालकेशोज्ज्वलम् ।
वस्त्रालेपनमाल्यभूषणगुणैस्तं बालमित्रारुणं
प्रत्यालीढपदाम्बुजं त्रिनयनं चक्राधिराजं भजे ॥

R. No. 80.

Paper. 7⅝ × 6¼ inches. Foll. 138. Lines, 14 in a page. Telugu. Good.

Purchased in 1910-11 from A. V. Narasimhācāriyar of Triplicane.

---

१. कृष्णलानां तु.

तैत्तिरीयोपनिषद्व्याख्या.

TAITTIRĪYŌPANIṢADVYĀKHYĀ.

This is a commentary on the Taittirīyōpaniṣad : probably by Muḍumbai Narasiṁhācārya.

Contains Anuvākas 1—12 only.

Beginning :

नृसिंह सर्वलोकेश सिंहशैलनिकेतन ।
व्याख्यापयाब्धिदासेन तैत्तिरीयान्तराशयम् ॥

प्राक् प्रथमाध्यायगतं पुंसूक्तं व्याख्यातम् । तदतिशिष्टं शीक्षाख्योऽप्यध्यायश्च साक्षात् ब्रह्मस्वरूपयाथात्म्यतदुपासनादिकं न प्रतिपादयतीति सद्यः तदुपेक्ष्य ब्रह्मवल्लीमारभ्यैव तैत्तिरीयोपनिषत् व्याख्यायते । हरिः ओम् । सह नाववतु । सह नौ भुनक्तु । . . . . . ब्रह्मवित् परम् आप्नोति । अनने परम् आप्नोतीति फलश्रवणात् परप्राप्तिगामी ब्रह्मवेदनं कुर्यादिति पर्यवस्यति ।

See under the next R. No. for the end.

R. No **81**

Paper. 8¼ × 6¾ inches. Foll. 233. Lines, 20 in a page. Telugu. Good.

Purchased in 1910-11 from A. V. Narasiṁhācāriyar of Triplicane.

(*a*) तैत्तिरयोपनिषद्व्याख्या.

TAITTIRĪYŌPANIṢADVYĀKHYĀ.

Foll. 1*a*—37*a*. Fol. 37*b* is left blank.

Contains from the 13th Anuvāka to the end.

Same work as the above.

The MS. is dated : 13th of Jyēṣṭha of the bright fortnight in the year Krōdhi.

See under the previous R. No. for the beginning.

End:

एवमवान्तरविद्याफलमुक्त्वा पुनरपि तामेव विद्यां फलोपदेशेनोपसंहरति—तस्मादिति । येन वाक्येन प्रागुपसंहारः कृतः तदेव वाक्यमिदमिति प्रागुपसंहृतविद्याविषयमेवेदमिति विज्ञायते । मुमुक्षोरप्रतिहतसाधनं न्यासविद्येति अवान्तरतद्विषयकविद्याफलं श्रुत्याशयः । इत्युपनिषत्, उपनिषदियं समस्ते(माप्ते)त्यर्थः ।

सिंहाद्रिनाथ भगवन् नारायण महाप्रभो ।
समर्पितं ते व्याख्याय स्वीकुरुष्व रमापते ॥

(*b*) ऐतरेयोपनिषद्व्याख्या.

AITAREYOPANIṢADVYĀKHYĀ.

Foll. 38*a*—84*b*.

This is a commentary on the Aitarēyōpaniṣad: by Muḍumbai Narasiṁhārya.

Complete.

Beginning:

सिंहाद्रिनाथ भगवन् नारसिंह जगत्पते ।
ऐतरेयं शृणुष्वाद्य व्याख्यास्यत्याङ्किंकरः ।

ओम् । वाङ्मे मनसि प्रतिष्ठिता । मनो मे वाचि प्रतिष्ठितम् । आविरावीर्म एधि । वेदस्य . . . . . .
आत्मा वा इदमेक एवाग्र आसीत् । नान्यत् किंचन मिषति स ऐक्षत लोकान् सृजा इति । इदमात्मानात्मघटितम् अनेकविभागैरनुभूयमानमिदं जगत् । अग्रे एवं स्थूलरूपप्राप्तेः प्राक् । एक आत्मैव किल । आसीत् । वै किलार्थः ।

End:

विद्यामुपाधिष्ववकोच्य मायिन्
तत्रानुगृह्णासि कथं न्वविद्याम् ।

उपाध्यधीतोऽनवधिः पितासि
सोपाधिकः पुत्रगणोऽसि पोष्यः ॥
आत्मैव पुत्रा बहवो न किं स्यात्
पिता न किं पाति पृथक् समर्थः ।
तथैव नः पाहि तवात्ममूलान्
त्वामाप्तुकामानधियं निरस्य ॥

Colophon:

इति श्रीमन्मुडुम्बै नरसिंहार्यकृतौ ऐतरेयोपनिषद्व्याख्या ॥

(c) बृहदारण्यकोपनिषद्व्याख्या.

BṚHADĀRAṆYAKŌPANIṢADVYĀKHYĀ.

Foll. 85*a*—283*b*.

This is a commentary on Bṛhadāraṇyakōpanisad : by the same author as of the last.

Contains Adhyāyas I and IV complete and breaks off in the eighth Brāhmaṇa of the fifth Adhyāya.

Beginning:

नमश्चैतन्यमात्राय समयोदितशक्तये ।
सिंहाद्रिपतये तुभ्यं जगच्छिल्पेन्द्रजालिने ॥

वाजसनेयसंहिताब्राह्मणसंबन्धिनी उपनिषत् व्याख्यायते । एषा बृहत्त्वात् अरण्यपठनीयत्वाच्च बृहदारण्यकसंज्ञितेत्याहुः । यद्यपीदं बृहदारण्यकमष्टाध्यायपरिमितम्, तत्र प्रथमाध्यायः प्रवर्ग्यपरः, द्वितीय उपसत्परः, ब्रह्मण्युपनिषण्णेत्युपनिषत् रूढ्या ब्रह्ममात्रपरा । अतः कर्मपरप्रथमद्वितीयाध्यायौ विसृज्य तृतीयाध्यायमारभ्य व्याख्यायते । अत्रापि प्रथमं ब्राह्मणमश्वमेधगोचरमेव, तथापि प्रकृताध्यायस्थत्वात् सुखपरिहारासंगत्या तत्पूर्वकमेव व्याख्यायते — उषा वा अश्वस्य मेध्यस्येत्यादि ॥

See under the next R. No. for the end.

R. No 82.

Paper. 7¾ × 6½ inches. Foll. 188. Lines, 20 in a page. Telugu. Good.

Purchased in 1910-11 from A. V. Narasiṁhācāriyar of Triplicane.

बृहदारण्यकोपनिषद्व्याख्या.

BṚHADĀRAṆYAKŌPANIṢADVYĀKHYĀ.

Foll. 1*a*—168*b*. The remaining foll. are blank.

Same work as the above.

Contains from the eighth Brāhmaṇa of the fifth Adhyāya to the end of the eighth Adhyāya

See under the previous R. No. for the beginning.

End:

एवं सर्वमनुष्ठानरूपमेवेति नास्ति ज्ञानोपयोग इति न व्याख्यायत । चतुर्थब्राह्मणे स्त्रीविषये सृष्टिरहस्यमुक्त्वा तत्संग्रहतत्संस्कारप्रजनार्थं तद्वशीकारादिकमुक्तमिति तदपि न प्रकृते उपयुज्यते । छान्दोग्ये स्वस्ति व्याख्यास्यते च पञ्चमं वंशब्राह्मणम् । तेनाध्यायः समाप्तः । तस्माद-पेक्षितमखिलं व्याख्यातं बृहदारण्यकम् ॥

सिंहाद्रिनाथ भगवन् नारसिंह परात्पर ।
गृहाण नरसिंहेन वाङ्मयोपायनं कृतम् ॥
मुडुम्बै नरसिंहाचार्यस्वामी ॥

R. No. 83.

Paper. 8 × 6½ inches. Foll. 97. Lines, 23 in a page. Telugu. Good.

Purchased in 1910-11 from A. V Narasiṁhācāriyar of Triplicane.

(*a*) प्रश्नोपनिषद्व्याख्या.

PRAŚNŌPANIṢADVYĀKHYĀ.

Foll. 2*a*—57*b*. Fol. 1*a* contains an account of the dream which the author states he had on the night of the 14th day of the dark fortnight in the month of Caitra of the year Krōdhi.

The stanza which he composed in praise of God on the next day is also given together with a commentary thereon. Fol. 1*b* gives some details about the number of Nāḍis in the human body.

This is a commentary on the Praśnōpaniṣad: by Muḍumbai Narasiṁhārya.

Complete.

The MS. is dated: the second day of the bright fortnight of the month of Puṣya in the year Śōbhakṛt.

Beginning:

हयक्षाद्रावभिव्यक्त नृहरे तेऽद्भुतं यशः ।
प्रश्नोपनिषदो व्याख्या प्रख्यापयतु मामिका ॥

सुकेशा च भारद्वाज इत्यादिवक्ष्यमाणब्रह्मविद्यायाः गुरूपसत्त्यैव संपादनीयतां ज्ञापयन्तीयमुपनिषत् गुरुशिष्याख्यायिकामारेभे । सुकेशा इत्येव नाम सुकेशानामा । भरद्वाजस्यापत्यं भारद्वाज इत्येकः । शिबेरपत्यं शैब्यः सत्यकामः तन्नामापरः । सौर्यायणिनामा गर्गस्यापत्यं गार्ग्यः, अयमन्यः ।

End:

अस्माकमिति कर्मार्थैव षष्ठी । स त्वं हि नः पितेति संबन्धः । इति ऊचुरिति पूर्वेण संबन्धः । स हि विद्यातस्तं जनयति । तच्छ्रेष्ठं जन्मेति श्रुतमिदमन्यत्रापि । नमः परमर्षिभ्यः नमः परमर्षिभ्यः । शान्तिः शान्तिरितिवत् इहापि शान्तिः । षष्ठखण्डः समाप्तः । इति प्रश्नोपनिषत् ॥

Colophon:

इति भगवत्कविमुडुम्बै नरसिंहार्यकृता प्रश्नोपनिषद्व्याख्या ॥

(*b*) मुण्डकोपनिषद्व्याख्या.

MUṆḌAKŌPANIṢADVYĀKHYĀ.

Foll. 58*a*—97*b*.

This is a commentary on the Muṇḍakōpaniṣad also called Atharvaṇōpaniṣad: by Muḍumbai Narasiṁhārya.

Complete.

Beginning:

यशस्तवाथर्वणिकी ब्रवीति श्रुतिर्गभीरैर्वचनैर्नृसिंह ।
तदेव किंचिद्विवृणोमि नाथ त्वत्किंकरोऽहं विहसन् दयस्व ॥

देव त्वं क्षरतोऽक्षरादपि परो नास्त्येव हि त्वत्परः
सर्वं त्यक्त(त्वत्त) उदेति वृद्धिमुपयात्यन्तर्धिमायाति च ।

शक्त्या सत्यमनुत्तरोऽसि सुमहान् क्लेशो जगद्व्यापृतिः
त्वत्स्वीकारसुखात् परोऽस्मि भवतस्तद्दुर्लभं यत् त्वया ॥

अथात्र भगवतीयमुपनिषत् समूलसंसृतिदुःखविमोचनी परविद्यामुपदेष्टीमाख्यायिकां प्रवर्तयति — ओम् ब्रह्मा देवानामित्यादि । ब्रह्मा हिरण्यगर्भः । देवानां प्रथमो मूलपुरुषः संबभूव संभूतः । किंच सः विश्वस्य भूरादिप्रपञ्चस्य कर्ता उत्पादकः ।

End:

कर्माणि च पुनरुक्तानि । तेषां प्रत्येकदेवतोद्देश्यक(त्व)कथनाय विज्ञानमयात्मनः तदेकीभावोपदेशोऽत्र मुख्योपदेश्यः । प्रसङ्गादेतेऽपि पुनः कथिताः । इयं व्याख्या सप्तममन्तरेण संयोजनीया ॥

R. No. **84.**

Palm-leaf. 13⅞ × 1⅛ inches. Foll. 19. Lines, 7 in a page. Grantha. Good.

Purchased in 1910-11 from Mīnāksiyammāḷ of Koḍuvāyūr.

(*a*) शिवसहस्रनामावलिः.

ŚIVASAHASRANĀMĀVALIḤ.

Foll. 1*a*—11*b*.

Gives one thousand significant names eulogistic of Śiva.

Complete.

Beginning:

पराय देवाय नमः । शंकराय नमः । महात्मने नमः । कामिने नमः । नीलकण्ठाय नमः । निर्मलाय नमः । कपर्दिने नमः ।

End:

प्रसन्नाय नमः । सर्वात्मज्योतिषे नमः । त्रिमूर्तीनां स्वयंभुवे नमः । अध्वातीताय नमः । मीनाक्षीसुन्दरेश्वराभ्यां नमः ॥

(b) चिदम्बराष्टकम्.

CIDAMBARĀṢṬAKAM.

Foll. 13*a*—14*a*. Fol 12 is blank.

A eulogy in eight stanzas on Śiva as worshipped in the sacred shrine at Cidambaram.

Complete.

Beginning:

कृपासमुद्रं सुमुखं त्रिणेत्रं जटाधरं पार्वतिवामभागम् ।
सदाशिवं रुद्रमनन्तरूपं चिदम्बरेशं हृदि भावयामि ॥

End:

पञ्चाक्षरमिदं पुण्यं पञ्चपातकनाशनम् ।
पञ्चाशत्कोटिगुणितं चिदम्बरेशं हृदि भावयामि ॥

Colophon:

चिदम्बराष्टकं संपूर्णम् ॥

(c) अरुणाचलाष्टकम्.

ARUṆĀCALĀṢṬAKAM.

Fol. 14 only.

Eight stanzas in praise of the sacred shrine of Aruṇācala dedicated to the worship of Śiva (Tiruvaṇṇāmalai in the North Arcot district)

Complete.

Beginning:

करुणापूरितापाङ्गं शरणागतवत्सलम् ।
तरुणेन्दुजटामौलिं स्मरणादरुणाचलम् ॥

End:

संवत्सरं पार्वतीशं सूर्यचन्द्राग्निलोचनम् ।
मन्दस्मितमुखाम्भोजं स्मरणादरुणाचलम् ॥

Colophon:

अरुणाचलाष्टक संपूर्णम् ॥

(*d*) त्यागराजाष्टकम्.

TYĀGARĀJĀṢṬAKAM.

Foll. 14*b*—16*a*. Fol. 16*b* is left blank.

A hymn of eight stanzas in praise of the god Śiva worshipped under the name of Tyāgarāja.

Complete.

Beginning:

चन्द्रार्धचूडाय सदाशिवाय साम्बाय लक्ष्मीपतिसेविताय ।
भक्तानुरक्षाय महेश्वराय त्यागाधिराजाय नमः शिवाय ॥

End:

नमः शिवायेति सकृज्जपित्वा पापं महद्घोरमुपैति नाशम् ।
भूम्यन्तरिक्षात् परिपूर्णकाष्ठं स्वल्पाग्निना दग्धमुपैति नाशम् ॥

Colophon:

त्यागराजाष्टकं संपूर्णम् ॥

जायालिङ्गितवामभागममलं चन्द्रावतंसोज्ज्वलं
मायामोहमहान्धकारपटलीमार्ताण्डचन्द्रोदयम् ।
ज्ञायाभीष्टित(ष्टद) नागराजनगरीनाथं दयासागरं
कायारोहणनायकं पशुपतिं कल्याणमूर्तिं भजे ॥

(*e*) बिल्वाष्टकम्.

BILVĀṢṬAKAM.

Foll. 17*a*—18*a*. Fol 18*b* is blank.

Eight stanzas on the sacredness of Bilva leaves which are generally used in the worship of Śiva.

Complete.

Beginning:

त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रियायुषम् ।
त्रिजन्मपापसंहारमेकबिल्वं शिवार्पणम् ॥

End:

तुलसीपञ्चकोटीनां बिल्वमेकं समर्चयेत् ।
रजतं शतकोटीनां स्वर्णमेकं समर्चयेत् ॥

Colophon:

बिल्वाष्टकं संपूर्णम् ॥

(*f*) अङ्गपूजा.

AṄGAPŪJĀ.

Fol. 19 only.

On the manner of conducting the worship of the several limbs of a religious teacher.

Complete.

Beginning:

अथाङ्गपूजा । तीर्थपादेभ्यो नमः पादान् पूजयामि । सर्वभूत-हितेभ्यो नमः गुल्फान् पूजयामि । विमलचरित्रेभ्यो नमः जङ्घान् पूजयामि ।

End:

उग्रतपोभ्यो नमः शिरांसि पूजयामि । तपोरूपेभ्यो नमः पुनः पादौ पूजयामि । सप्तर्षिभ्यो नमः सर्वाङ्गं पूजयामि ॥

R. No. **85.**

Palm-leaf. 9¾ × 1⅝ inches. Foll. 81. Lines, 11 in a page Grantha Good.

Purchased in 1910-11 from S. Rāmakṛṣṇavādyār of Palghat.

(*a*) समासकुसुमावलिः.

SAMĀSAKUSUMĀVALIḤ.

Foll. 1*a*—10*a*.

An elementary explanatory treatise on sanskrit compounds as dealt with by Pāṇini. The author of the work is Sarvamaṅgala of Madhyamandira family.

Complete.

Beginning:

वागीशाद्याः सुमनसः . . . तं नमामि गजाननम् ॥
मूनायकं वा धननायकं वा भजन् भुवं वा धनमेति लोके ।
तद्विघ्ननाथं न भजामि किंतु सहस्रशस्तं प्रणमामि नित्यम् ॥
श्रीमत्पाणिनिसूत्राणि समालोच्य यथामति ।
बालव्युत्पत्तये कुर्मः समासकुसुमावलिम् ॥

तत्पुरुषसमासनिरूपणम्—

तत्पुरुषोऽष्टविधोऽभूत् प्रथमादिविभक्तिनञ्कृतैर्भेदैः ।
उत्तरपदजनितार्थो मुख्यस्तत्रेति पण्डितैः ख्यातः ।

प्रथमातत्पुरुषो यथा—

अमृतं योऽपिबद्दैत्यः तं वैकुण्ठो द्विधाच्छिनत् ।
राहुरुत्तरकायोऽस्य पूर्वकायोऽभवद् ध्वजः ॥

उत्तरः कायस्य उत्तरकायः । पूर्वः कायस्य पूर्वकायः । अर्धपिप्पल्याः अर्धपिप्पली इत्यादयः ।

End:

समासवृत्तिः सर्वेषु समासेषु निरूपिता ।
परार्थस्याभिधानं हि वृत्तिरित्यभिधीयते ॥
दूरान्मात्सर्यमुत्सार्य वात्सल्यान्मत्कृतामिमाम् ।
पश्यन्ति विबुधाः सर्वे समासकुसुमावलिम् ।
श्रीमध्यमन्दिरकुलाम्बु[नि]धिपूर्णचन्द्र-
श्रीसर्वमङ्गलमनीषिकृता सलीलम् ।
एषा समासकुसुमावलिराब्जतारं
जीयात्कृपानिधिसदाशिवसत्प्रसादात् ॥

Colophon:

समासकुसुमावलिः समाप्तिमगमत् ॥

(b) कृष्णविलासव्याख्या—विलासिनी.

KṚṢṆAVILĀSAVYĀKHYĀ : VILĀSINĪ.

Foll. 11*a*—71*a*. Fol. 10*b* contains a number of eulogistic names of Lakṣmī and Viṣṇu.

This is a commentary on the Kṛṣṇavilāsa of Sukumārakavi : by Rāmapāṇivāda, disciple of Nārāyaṇa. Breaks off in the 5th Sarga.

Beginning:

गुरुणा भूसुरेन्द्रेण कल्पितं क्षेत्रमुत्तमम् ।
अध्यासीनं नमस्कुर्वे सर्वेशं चन्द्रशेखरम् ॥

श्रीनारायणगुरुवरकरुणापात्रेण पाणिवादेन ।
श्रीकृष्णविलासस्य क्रियते टीका विलासिनी नाम ॥
सुकुमारकवेर्वाचां विलासः कृष्णगोचरः ।
सुकुमारपदार्थश्रीः शेमुषीं मे विशोधयेत् ॥

अथ कविरादौ तावदखिलभुवनाधिष्ठानभूतमीश्वरं वर्ण्यवस्तुत्वेनाभ्युपगच्छन् 'आशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुखम्' इति वचनात् वस्तु निर्दिशति—अस्तीत्यादिना । प्रारम्भे तावदस्तिपदग्रहणं मङ्गलार्थम्, नित्यस्य तत्पदवाच्यब्रह्मणः स्मरणसद्भावात् । अनन्तरं श्रीपदं च वाचां प्रपञ्चसिद्ध्यर्थम्, प्रपञ्चहेतुभूताया भगवत्या मायायाः स्मरणसंभवेन तदनुग्रहलाभात् ॥

Colophon:

इति रामपादपाणि(पाणिवाद) विरचितायां विलासिन्याख्यायां (व्याख्यायां) प्रथमः सर्गः ॥

End:

जगतां भारापनोदेन परमानन्दं जनयिष्यन् अत्र नन्दगृहे भगवानरविन्दनाभः सुखमवसत् ॥

Colophon:

इति विलासिन्याख्यायां व्याख्यायां चतुर्थः सर्गः ॥

देवक्या घनसंततेरिव जवादाविर्भवन् गर्भतः
संतन्वन्नभिवर्धनं च जगतामम्भोनिधीनामिव ।
आपीतद्युतिरङ्गनाजनदृशां चक्रैश्चकोरैरिव
श्रीमानिन्दुरिवेन्दिरासहचरो बालश्रिरं पातु वः ॥

(e) कृष्णविलासः.

KṚṢṆAVILĀSAḤ.

Foll. 76*a*—81*b*. Fol. 75*b* is left blank.

A poem in six cantos based on the life of Śrī-kṛṣṇa.

Contains only the first canto.

Beginning:

अस्ति श्रियः सद्म सुमेरुनामा समस्तकल्याणनिधिर्गिरीन्द्रः ।
तिष्ठन्निदं विश्वमनुप्रविश्य स्वेनात्मना विष्णुरिवोर्जितेन ॥

End:

इति तममरलोकं सान्त्वयित्वा स देवः
सपदि नवघनाभः पद्मनाभस्तिरोऽभूत् ।
स च विहितनमस्यस्तस्य वाचं प्रशंसन्
निजपदमभिपेदे हर्षपर्याकुलात्मा ॥

R. No. **86.**

Palm-leaf. 7¼ × 1⅛ inches. Foll. 319. Lines, 9 in a page. Grantha. Good.

Purchased in 1910–11 from S. Rāmakṛṣṇavādyār of Palghat.

गौतमधर्मसूत्रव्याख्या—मिताक्षरा.

GAUTAMADHARMASŪTRAVYĀKHYĀ MITĀKṢARĀ.

Same work as the one described under No. 1205 of the D.C.S MSS., Vol. II.

Complete.

The scribe's signature:

रामेण हस्तलिखितम् ॥
अर्जुनग्रामवासायां वेङ्कटेश्वरसंनिधौ ।
रङ्गनाथेन लिखिता मिताक्षरी समाप्ता ॥

R. No. **87.**

Śrītāla. 10⅛ × 1⅛ inches. Foll. 47. Lines, 11 in a page. Grantha. Good.

Purchased in 1910–11 from S. Rāmakṛṣṇavādyār of Palghat.

चण्डिकासप्ततिः—सव्याख्या.

CAṆḌIKĀSAPTATIḤ WITH COMMENTARY.

A hymn of 70 stanzas by Bāṇa in praise of Caṇḍikā, who is also called Pārvatī and Bhadrakālī The text is accompanied by

the commentary of Vidyāpūrṇamunīndra, a disciple of Satyaśaila and Vēdapūrṇa.

Complete.

The scribe's signature and date : Paramēśvara Śarman, on the 2nd of the Vaiśākha month in the year Bhava.

Beginning :

ओंकारः सारभूतोऽप्यखिलनिगमतो यन्महो नाभिधत्ते
यद्भासा भाति नित्यं निखिलमपि जगद्भास्यते यन्न भाभिः ।
यत्तत्त्वं वेत्ति साक्षात् नियमितधिषणः शंकरः शाम्भवं तत्
वन्दे वृन्दारमुख्यैर्वटतटनिलयं वन्दितं वेदवेद्यम् ॥
व्याख्यानृत्तं निखिलविदुषां कुर्वती निर्विशङ्कं
यद्वाङ्नारी निगमभरतो निर्मलं योजयन्ती ।
विद्यारत्नं निजसुखकरं वेदलोकादवापत्
तं वन्देऽहं यतिवरवृतं सत्यशैलं यतीन्द्रम् ॥
बाणनामेति विख्यातः चण्डिकासप्तति कविः ।
चकार चन्द्रवच्चारु कविकैरवकौमुदीम् ॥
व्याक्रिया क्रियते तस्याः पूर्णविद्यैः शिवाश्रयैः ।
वेदपूर्णपदद्वन्द्वपङ्केरुहमधुव्रतैः ॥

तत्र ज्ञानैश्वर्यादिवपुषः पारमेश्वर्याः प्रकृतेः सत्त्वरजस्तमःसाम्यात्मिकायाः काश्चित् सात्त्विकराजसतामसात्मिकाः तिस्रोऽवस्थाः चण्डिकापार्वतीभद्रकाल्याख्याः । तासां यां कांचिदाश्रित्य कचित् कविना स्तूयते । क्वचिन्मूलप्रकृतिमेवाश्रित्य । तत्र प्रथमं सत्त्वप्रधानायाः प्रकृतेः सकलसन्मार्गगामिषु सारिषु देवप्रतिपक्षमहामोहमहिषमारणानुग्रहविलक्षणगुणसंकीर्तनवाक्प्रवृत्तिरूपां स्तुतिं दर्शयत्याद्यश्लोकेन—मा भाङ्क्षीदित्यादिना ॥

मा भाङ्क्षीर्विभ्रमं भूरधर विधुरता केयमास्यास्य रागं
पाणे प्राण्येव नायं कलयसि कलहश्रद्धया किं त्रिशूलम् ।

इत्युद्यत्कोपहेतून् प्रकृतिमवयवान् प्रापयन्त्येव देव्या
न्यस्तो वो मूर्ध्नि मुष्यान्मरुदसुहृदसून् संहरन्नङ्घ्रिरंहः ॥

इति। तत्रायं क्रियाकारकसंबन्धः—देव्या मूर्ध्नि न्यस्तः अङ्घ्रिः पादः वः युष्माकम् अंहः पापं मुष्यात् नाशयेत् इति ।

End:

चक्रे चक्रायुधस्य क्वणति निपतिते रोमणि ग्रावणीव
स्थाणोर्बाणस्य वेगे प्रतिहत उरुणा चर्मणा वर्मणेव ।
यस्येति क्रोधगर्भं हसितहरिहरा तस्य गीर्वाणशत्रोः
पायात् पादेन मृत्युं महिषतनुभृतः कुर्वती पार्वती वः ॥

* * * *

मम रोमणि चक्रायुधस्य क्वणति चक्रे ग्रावणीव निपतिते सति स्थाणोः बाणः वर्मणेव उरुणा मम चर्मणा प्रतिहत इत्येवं हरिहरयोर्हासं चकारेत्यर्थः ॥

श्रीमत्सत्यगिरेः पदाम्बुजरजःसान्निध्यशुद्धात(त्म)ना
विद्यापूर्णमुनीन्द्रनाम वहता व्यत्यस्तनामाक्षरम् ।
व्याख्या बाणकवेः पदार्थविषया चक्रे कलेः कृत्तये
कारुण्याद्घटवृक्षधाममहसश्चन्द्रार्धचूडामणेः ॥

R No. 88.

Palm-leaf. 15¼ × 1¼ inches. Foll. 197. Lines, 9 in a page. Grantha. Fair.

Purchased in 1910-11 from R. Anantakṛṣṇa Śāstri of Harināyakapuram, Tinnevelly district.

(a) तत्त्वचिन्तामणिदीधितिव्याख्या—जागदीशी.

TATTVACINTĀMAṆIDĪDHITIVYĀKHYĀ ; JĀGADĪŚĪ.

Foll. 1a–80a. Fol. 80b is left blank.

Same work as the one described under No. 4086 of the D.C.S. MSS., Vol. VIII.

Contains Pañcalakṣaṇī complete and Caturdaśalakṣaṇī incomplete.

(*b*) तत्त्वचिन्तामणिदीधितिप्रकाशोपन्यासः.

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚŌPANYĀSAḤ.

Foll. 81*a*—197*b*.

A discussion regarding the definition of invariable concomitance (Vyāpti) as given in the Dīdhiti of Ragunāthaśirōmaṇi. This is also called Nyāyakaustubha: by Vīrarāghavayajvan. Breaks off in Kūṭaghaṭitalakṣaṇa in Caturdaśalakṣaṇī.

Beginning:

ननु यौगिकाव्यभिचरितत्वस्य व्याप्तित्वासंभवेऽपि शास्त्रकृदेकसंकेतविषयाव्यभिचरितत्वमेव व्याप्तिरस्तु। तथाहि—यत्समानाधिकरणाः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताका यावन्तोऽभावाः स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणाः तत्त्वं व्याप्तिः। यत्पदं यद्धर्मावच्छिन्नपरम्। यद्धर्मश्च हेतुतावच्छेदकत्वेनाभिमतः। स्वपदं चाभावपरम्। हेतुपदं च हेतुतावच्छेदकावच्छिन्नहेतुपरम्। तत्त्वमित्यत्र तत्पदं तद्वत्परम्। यत्र यत्र साध्यतावच्छेदकावच्छिन्नं साध्यं तत्र यद्यदभावप्रतियोगि तादृशयद्धर्मावच्छिन्नसमानाधिकरणा यावन्तोऽभावाः अभावविशिष्टहेतुतावच्छेदकविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगिसमानाधिकरणाः तद्धर्मवत्त्वं व्याप्तिरित्यर्थः।

* * * *

Colophon:

इति श्रीवीरराघवयज्वना विरचिते न्यायकौस्तुभे दीधितिप्रकाशोपन्यासे दीधितिकृदुक्तलक्षणद्वयोपन्यासः समाप्तः॥

End:

तादृशसाध्याभावसमुदायवन्महाकालनिरूपितकालिकविशेषणताविशेषसंबन्धावच्छिन्नवृत्तित्वाभावस्य व्यधिकरणधर्मावच्छिन्नाभावस्य।

R. No. 89.

Paper. 8¼ × 6¾ inches. Foll. 5. Lines, 23 in a page. Grantha. Fair.

Purchased in 1910-11 from R. Anantakṛṣṇa Śāstri of Harināyakapuram, Tinnevelly district.

अगस्त्यसूत्रम्.

AGASTYASŪTRAM.

This work consisting of four Adhyāyas establishes that Śakti is the primeval cause of the universe and also teaches that her worship leads to salvation.

Complete.

Beginning:

अथातः शक्तिजिज्ञासा । यत्कर्त्री । यदजा वा मनोयोनित्वात् । नान्तरायोऽत्र तत्सान्निध्यात् । तत्कल्पकमौपाधिकम् । समानधर्मत्वात् । तच्च प्रातिभासिकम् । यद्बन्धः । यदा रूपाध्यासाद्यैः । यच्चाधिष्ठानं लिङ्गम् । नानात्वात् । तच्च कालिकमखण्डोपाधिः । यामेव भूतानि विशन्ति । यदोतं तत्प्रोतम् ।

End:

तत्र महिमा गरीयान् कलौ । प्रकृतिप्रवादतः पुरुषा विन्देरन् । नान्यः पन्था विद्यतेऽयनाय नान्यः पन्था विद्यतेऽयनाय ॥

Colophon:

इत्यगस्त्यसूत्रे चतुर्थोऽध्यायः ॥

यदविद्याविलासेन भूतभौतिकसृष्टयः ।
तं नौमि परमात्मानं सच्चिदानन्दविग्रहम् ॥

R. No. 90.

Śrītāla. 12 × 1¾ inches. Foll. 163. Lines, 9 in a page. Grantha. Good.

Purchased in 1910-11 from Mīnākṣiyammāḷ of Koḍuvāyūr.

(*a*) कैवल्योपनिषत्.

KAIVALYŌPANIṢAD.

Foll. 1*a*—2*b*.

Same work as the one described under No. 395. of the D.C.S. MSS., Vol. I, Part III. The Śāntipāṭha only is different, viz., भद्रं कर्णेभिः for सह नाववतु.

Complete.

(b) कालाग्निरुद्रोपनिषत्.

KĀLĀGNIRUDRŌPANIṢAD.

Foll. 2b—3b.

Same work as the one described under No. 356 of the D.C S. MSS., Vol. I, Part III. Ṛṣicchandōdēvatā, etc., is given in the end.

Complete.

(c) कैवल्योपनिषत्.

KAIVALYŌPANIṢAD.

Foll. 3b—5a.

Same work as the one described under No. 395 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(d) अथर्वशिरउपनिषत्.

ATHARVAŚIRAUPANIṢAD.

Foll. 5a—9b.

Same work as the one described under No. 257 of the D.C.S. MSS., Vol I, Part III.

Complete.

(e) अथर्वशिखोपनिषत्.

ATHARVAŚIKHŌPANIṢAD.

Foll. 10a—11b.

Same work as the one described nnder No. 250 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(f) श्वेताश्वतरोपनिषत्.

ŚVĒTĀŚVATARŌPANIṢAD.

Foll. 11*b*—18*b*.

Same work as the one described under No. 804 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(g) ब्रह्मसूत्राणि.

BRAHMASŪTRĀṆI.

Foll. 19*a*—30*b*.

Same work as the one described under No. 4649 of the D.C.S. MSS., Vol. IX. This contains also Śāntipāṭha, Dhyānaślōkas relating to Śaṅkarācārya, etc.

Complete.

(h) आत्मबोधः.

ĀTMABŌDHAḤ.

Foll. 30*b*—33*b*.

Same work as the one described under No. 4547 of the D.C.S. MSS., Vol. IX.

Complete.

(i) दृग्दृश्यविवेकः.

DṚGDṚŚYAVIVĒKAḤ.

Foll. 34*a*—36*a*.

Same work as the one described under No. 4605 of the D.C.S. MSS., Vol. IX.

Complete.

(j) अद्वैतमकरन्दः.

ADVAITAMAKARANDAḤ.

Foll. 36*a*—37*b*.

Same work as the one described under No. 4521 of the D.C.S. MSS., Vol. IX.

Complete.

(*k*) ईशावास्योपनिषत्.

ÎŚĀVĀSYŌPNIṢAD.

Fol. 38 only.

Same work as the one described under No. 300 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*l*) केनोपनिषत्.

KĒNŌPANIṢAD.

Foll. 38*b*—40*b*.

Same work as the one described under No. 376 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*m*) कठवल्ल्युपनिषत्.

KAṬHAVALLYUPANIṢAD.

Foll. 40*b*—47*b*.

Same work as the one described under No. 334 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*n*) प्रश्नोपनिषत्.

PRAŚNŌPANIṢAD.

Foll. 47*b*—53*a*.

Same work as the one described under No. 610 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*o*) मुण्डकोपनिषत्.

MUṆḌAKŌPANIṢAD.

Foll. 53*a*—58*a*.

Same work as the one described under No. 713 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(p) माण्डूक्योपनिषत्.

MĀṆḌŪKYŌPANIṢAD.

Foll. 58*a*—60*b*.

Same work as the one described under No. 694 of the D.C.S MSS., Vol. I, Part III.

Complete.

(q) ऐतरेयोपनिषत्.

AITAREYŌPANIṢAD.

Foll. 60*b*—64*a*.

Same work as the one described under No. 323 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(r) तैत्तिरीयोपनिषत्.

TAITTIRĪYŌPANIṢAD.

Foll. 64*a*—74*b*.

Same work as the one described under No. 486 of the D.C.S. MSS., Vol. I, Part III. Begins with a different Śāntipāṭha, viz., सह नाववतु . . . शान्तिः ।

Complete.

(s) छान्दोग्योपनिषत्.

CHĀNDŌGYŌPANIṢAD.

Foll. 75*a*—80*a*. Fol. 80*b* is left blank.

Same work as the one described under No. 451 of the D.C.S. MSS., Vol. I, Part III.

Contains the sixth Adhyāya only.

(t) बृहदारण्यकोपनिषत्.

BṚHADĀRAṆYAKŌPANIṢAD.

Foll. 81*a*—96*b*.

Same work as the one described under No. 633 of the D.C.S. MSS., Vol. I, Part III.

Contains the sixth Adhyāya only.

(*u*) गणपत्युपनिषत्.

GAṆAPATYUPANIṢAD.

Foll. 97*a*—98*a*. Fol. 98*b* is left blank.

Same work as the one described under No. 422 of the D.C.S. MSS., Vol. I, Part III; but without the Śāntipāṭha.

Complete.

(*v*) रहस्योपनिषत्.

RAHASYŌPANIṢAD.

Foll. 99*a*—102*a*.

Same work as the one described under No. 751 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*w*) शारीरोपनिषत्.

ŚĀRĪRŌPANIṢAD.

Foll. 102*a*—103*b*.

Same work as the one described under No. 797 of the D.C.S. MSS., Vol. I, Part III; but without the Śāntipāṭha.

Complete.

(*x*) ब्रह्मसूत्रसंग्रहतात्पर्यनिरूपणम्.

BRAHMASŪTRASAṄGRAHATĀTPARYANIRŪPAṆAM.

Foll. 103*b*—105*a*.

A compendious commentary on the Brahmasūtras establishing the Advaitic view of the Vēdānta.

Complete.

Beginning:

सूत्रकारो भगवान् बादरायणः अथातो ब्रह्मजिज्ञासेति सूत्रेण यत्त्रिविधपरिच्छेदशून्यप्रत्यगभिन्नब्रह्मणो मुमुक्षुपुरुषविचार्यत्वं प्रतिज्ञा

जिज्ञास्यब्रह्मणः किं लक्षणं किं प्रमाणमित्याकाङ्क्षायां 'जन्माद्यस्य यतः' इति सूत्रेण लक्षणं शास्त्रयोनित्वादिति सूत्रेण प्रमाणं चोपन्यस्य शास्त्रस्य कार्यपरत्वेन कथं सिद्धपरत्वमित्याशङ्कायां 'तत्तु समन्वयात्' इति चतुर्थसूत्रेण कार्यपरत्वनिरासपूर्वं सिद्धब्रह्मपरत्वं बहुधा अनेकन्यायैरुपपाद्य।

End:

सगुणब्रह्मविदुषाम् 'अनावृत्तिः शब्दात् अनावृत्तिः शब्दात्' इति ब्रह्मोपदेशेन मुक्तिं प्रदर्श्योपरराम। इत्थं सर्वज्ञबादरायणप्रणीतचातुर्लक्षणमीमांसायां परिशीलितायां भेदवादिशुनां भ[ा]षितैरद्वैतकनकाचलस्य न काचित् क्षतिरिति ॥

(y) विश्वेश्वरस्मृतिः.

VIŚVĒŚVARASMṚTIḤ.

Foll. 105*b*—112*b*.

Prescribes rules for the conduct of ascetics.

Incomplete.

Beginning:

यस्मिन् देशे स्वकाः सन्ति तं देशं दूरतस्त्यजेत्।
तेषां वार्तां न शृणुयान्न स्मरेत्तान् क्वचिद्यतिः ॥
पूर्वाश्रमजनं श्रुत्वा स्पृष्ट्वा दृष्ट्वा प्रमादतः।
प्राणायामशतं कृत्वा यतिः शुध्यति नान्यथा ॥
पूर्वाश्रमजनैर्मोहाद्दत्तमन्नं च दापितम्।
यत्तस्य भक्षणं भिक्षोर्वरं गोमांसभक्षणम् ॥

End:

वर्णाश्रमं सावयवं सरूपमाद्यन्तयुक्तं ह्यतिकृच्छ्रमात्रम्।
पुत्रादिदेहेष्वभिमानमूलं त्यक्त्वा वसेत् सौख्यतमे ह्यनन्ते ॥

विश्वेश्वरस्मृतिर्यथाशक्त्या लिखिता ॥

(*) परिव्राजकोपनिषत्.

PARIVRĀJAKŌPANIṢAD.

Foll. 112*b*—114*b*.

Similar in subject matter to the above

The scribe's signature and date ; Ayyāsāmidīkṣitar, on the 5th of the month of Āni in the year Śubhakṛt.

Complete.

Beginning :

यतेर्नियमः कथमिति पृष्टं(ष्टवन्तं)नारदं पितामहः पुरस्कृत्य विरक्तः संन्यस्य वर्षास्वेकत्र वसीत । अष्टौ मास्ये(स ए)काकी चरेत् । नैकत्र वसेत् । भिक्षुर्भयादिना सारङ्गवदेकत्र न तिष्ठेत् ।

End :

सर्वेषामात्मानुसंधानविधिरित्येवं मुमुक्षोः संसार(तार)कं तारमनुस्मरन् जीवन्मुक्तो भवेत् । अधिकारविशेषकैवल्यं प्राप(प्रुव)तामुपायमन्विच्छेत् । इत्युपनिषत् ॥

Colophon :

परिव्राजकोपनिषत् समाप्ता ॥

(*a*-1) अक्षमालिकोपनिषन्.

AKṢAMĀLIKŌPANIṢAD.

Foll. 114*b*—118*b*.

Similar to the work described under No. 246 of the D.C.S. MSS., Vol. I, Part III.

On the importance and efficacy of a rosary of beads for carrying on religious meditation.

Complete.

Beginning :

आदिक्षान्त[र]मूर्तिसंविधानम् । भावाः सौवर्णं राजतं ताम्रं चेति । सूत्रद्वयं तद्विवरे सौवर्णं तद्दक्षपार्श्वे, तद्वामे ताम्रम् । तन्मुखे मुखम् । तत्पुच्छे पुच्छम् । तदन्तरावर्तने क्रमेण योजयेत् । तदस्यान्तरं सूत्रम् । तद्ब्रह्म ।

End:

एतदक्षमालिकाया जप्तो मन्त्रः सद्यः सिद्धिकरो भवतीत्याह भगवान् गुहः प्राजाप(त्य इ)त्युपनिषत् ॥

Colophon:

इत्यक्षमालिकोपनिषत् समाप्ता ॥

(*a*-2) जाबालोपनिषत्.

JĀBĀLÔPANIṢAD.

Foll. 119*a*—120*b*.

Same work as the one described under No. 470 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*a*-3) हंसोपनिषत्.

HAṀSÔPANIṢAD.

Foll. 120*b*—122*a*.

Same work as the one described under No. 846 of the D.C.S. MSS.,Vol. I, Part III.

Complete.

(*a*-4) आरुणिकोपनिषत्.

ĀRUṆIKÔPANIṢAD.

Foll 122*a*—123*a*.

Same work as the one described under No. 289 of the D C.S. MSS., Vol. I, Part III.

Complete.

(*a*-5) परमहंसोपनिषत्.

PARAMAHAṀSÔPANIṢAD.

Foll. 123*a*—124*a*.

Same work as the one described under No. 598 of the D.C.S. MSS. ,Vol. I, Part III.

Complete.

(*a*-6) अमृतबिन्दूपनिषत्.

AMṚTABINDŪPANIṢAD.

Foll. 124*b*—125*b*.

Same work as the one described under No. 273 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*a*-7) गर्भोपनिषत्.

GARBHŌPANIṢAD.

Foll. 125*b*—127*a*.

Same work as the one described under No. 436 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*a*-8) शारीरकोपनिषत्.

ŚĀRĪRAKŌPANIṢAD.

Foll. 127*a*—128*b*.

Same work as the one described under No. 797 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*a*-9) भिक्षुकोपनिषत्.

BHIKṢUKŌPANIṢAD.

Foll. 128*b*—129*a*.

Same work as the one described under No. 676 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*a*-10) स्कन्दोपनिषत्.

SKANDŌPANIṢAD.

Foll. 129*a* and 130*a*. Fol. 129*b* is blank.

Same work as the one described under No. 837 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*a*-11) नारायणोपनिषत्.

NĀRĀYAṆŌPANIṢAD.

Foll. 130*b* and 131*a*.

Same work as the one described under No. 561 of the D.C.S. MSS., Vol. 1, Part III, for the beginning.

Complete

End:

अनपब्रुवः सर्वमायुरेति । विन्दते प्राजापत्यं रायस्पोषं गौपत्यम् । ततोऽमृतत्वमश्नुते ततोऽमृतत्वमश्नुत इति ॥

Colophon:

नारायणोपनिषत् समाप्ता ॥

(*a*-12) वासुदेवोपनिषत्.

VĀSUDĒVŌPANIṢAD.

Foll. 131*a*—133*b*.

Same work as the one described under No. 787 of the D.C.S. MSS., Vol I, Part III, for the beginning.

Complete.

End:

स सर्वैर्देवैः पू(जि)तो भवति । स सा(सर्वा)न् यज्ञान् याजितो भवति । तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् । तद्विप्रासो विपन्यवो जागृवांसः समिन्धते । विष्णोर्यत् परमं पदम् ॥

Colophon:

वासुदेवोपनिषत् समाप्ता ॥

(*a*-13) वज्रसूच्युपनिषत्.

VAJRASŪCYUPANIṢAD.

Foll. 133*b*—134*b*.

Same work as the one described under No. 776 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*a*-14) नृसिंहतापिन्युपनिषत्.
NṚSIṀHATĀPINYUPANIṢAD.

Foll. 134*b*—145*b*.

Same work as the one described under No. 577 of the D.C.S. MSS., Vol. I, Part III.

Contains only Uttaratāpinī.

(*a*-15) रामायणम्.
RĀMĀYAṆAM.

Foll. 146*a*—153*a*. The remaining ten foll. are left blank.

Same work as the one described under No. 1806 of the D.C.S. MSS., Vol. IV

Contains only Sargas 41 to 44 of the Bālakāṇḍa (Gaṅgāvatāraghaṭṭa).

The scribe's signature and date : Ayyāsāmidīkṣitar, on Friday, the new moon day, and the 24th of Āni, in the year Śukla.

R. No. **91.**

Palm-leaf. 15¾ × 1½ inches. Foll. 33. Lines, 6 in a page. Grantha. Good.

Purchased in 1910-11 from Gōpālasāmi Ayyaṅgār of Mannargudi.

आकाशाधिकरणविचारः.
ĀKĀŚĀDHIKARAṆAVICĀRAḤ.

Same work as the one described under R. No. 54 *ante*.

Complete.

R. No. **92.**

Palm-leaf. 17 × 1¾ inches. Foll. 40. Lines, 8 in a page. Grantha. Good.

Purchased in 1910-11 form Gōpālasāmi Ayyaṅgār of Mannargudi.

(*a*) सामानाधिकरण्यवादः.
SĀMĀNĀDHIKARAṆYAVĀDAḤ.

Foll. 1*a*—15*b*.

Same work as the one described under No. 5060 of the D.C.S. MSS., Vol. X.

Complete.

(*b*) ज्ञानयाथार्थ्यवादः.
JÑĀNAYĀTHĀRTHYAVĀDAḤ.

Foll. 16*a*—40*b*.

Same work as the one described under No. 4884 of the D.C.S. MSS., Vol. X.

Complete.

R. No. **93.**

Palm-leaf. 17¼ × 1¼ inches. Foll. 54. Lines, 7 in a page. Grantha. Good.

Purchased in 1910–11 from Gōpālasāmi Ayyaṅgār of Mannargudi.

(*a*) ज्ञानयाथार्थ्यवादः.
JÑĀNAYĀTHĀRTHYAVĀDAḤ.

Foll. 1*a*—23*a*.

Same work as the one described under No. 4884 of the D.C.S. MSS., Vol. X.

Complete.

The scribe's name and date can be made out from the stanzas quoted below:—

रौद्र्यब्दे मकरे मासि द्वितीयायां सितच्छदे ।
नैध्रुवान्वयरत्नेन फणीन्द्रपुरवासिना ॥
रामानुजाख्यसुधिया वादार्थोऽयं विलेखितः ।
ज्ञानयाथार्थ्यवादोऽयं लिखितः सुधियां स्वयम् ॥

(*b*) विषयतावादः.

VIṢAYATĀVĀDAḤ.

Foll. 24*a*—40*b*.

Same work as the one described under No. 5000 of the D.C.S. MSS., Vol. X.

Incomplete.

(*c*) शास्त्रैक्यवादः.

ŚĀSTRAIKYAVĀDAḤ.

Foll. 42*a*—52*a*. Foll. 41 and 52*b* are blank.

Same work as the one described under No. 5051 of the D.C.S. MSS., Vol. X.

Incomplete.

(*d*) मिथ्यात्वानुमाननिरासः

MITHYĀTVĀNUMĀNANIRĀSAḤ.

Foll. 53*a*—54*b*.

This work contains the arguments used in a controversy between Rāma Śāstrin and Anantārya in the assemblage of Paṇḍits invited by Śrīnivāsasvāmin of the Parakāla Mutt of Mysore. It refutes the inference of unreality in regard to the phenomena of external manifestation.

Incomplete.

Beginning:

श्रीश्रीनिवासपरकालयतीश्वराणां
विद्वद्वरिष्ठकलिते किल संनिधाने ।
योऽभूत् प्रसङ्गवशतो विषयः स एष
संलिख्यते क्रमवशेन कुतूहलेन ॥
स्वामिनस्तत्र मध्यस्था वादिनो रामशास्त्रिणः ।
अनन्तार्यश्च कुतुकात् प्रपेदे प्रतिवादिताम् ॥

तत्रेयं वादिनः प्रथमा कक्ष्या—विमतं मिथ्या दृश्यत्वात् इत्यनुमाने

हेतूकृतदृश्यत्वं च स्वसमानसत्ताकज्ञानविषयत्वम् । तत्र ज्ञाने स्वसमानसत्ताकत्वनिवेशात् ब्रह्मणि न व्यभिचारः ।

End:

तत्र प्रतिवादिदशमी—स्वनिष्ठबाध्यत्वप्रकारकाद्वैतिसंबन्धिज्ञानविषयत्वसंबन्धेन किंचिद्विशिष्टत्वस्य हेतुत्वसंभवात् एतावानायासो व्यर्थ इति । एतदुक्तं भवति—नीलधूमत्वादिवारणाय व्याप्यतावच्छेदकधर्मान्तराघटितस्यैव व्याप्यतावच्छेदकत्ववत् हेतु ।

R. No. **94.**

Palm-leaf. 18 × 1¼ inches. Foll. 55. Lines, 8 in a page. Grantha. Good.

Purchased in 1910–11 from Gōpālasāmi Ayyaṅgār of Mannargudi.

(*a*) तत्क्रतुन्यायविचारः.

TATKRATUNYĀYAVICĀRAḤ.

Foll. 1*a*—4*b*.

A tract on the doctrine called Tatkratunyāya which teaches that the character of meditation determines the condition to which it leads an aspirant : by Anantārya.

Complete.

Beginning:

यदुभूधरादिनिलयं वन्दित्वा श्रीपतिं यतीन्द्रं च ।
तत्क्रतुनीतिविचारं कलयति कुतुकादनन्तार्यः ॥

यथाक्रतुरस्मिन्नित्यादिश्रुतिभिः तादृशन्यायोऽवगम्यते । तदर्थश्च यथा क्रतुरस्येति बहुव्रीहिसमासात् यद्धर्मप्रकारकोपासनाश्रयो यथाक्रतुशब्दार्थः । तस्य चाधेयतासंबन्धेन भूधात्वर्थासाधारणधर्मे, तस्य चाश्रयत्वरूपाख्यातार्थे, तस्य च पुरुषे अन्वयात् तथाशब्दार्थस्य तद्धर्मस्य भूधात्वर्थासाधारणधर्मे अन्वयात् यद्धर्मप्रकारकोपासनाश्रयवृत्त्यसाधारणधर्मवान् पुरुषः तद्धर्माभिन्नधर्मवानिति प्रथमश्रुत्यर्थः ।

End:

पञ्चाग्निविद्यानिष्ठानामपि ब्रह्मप्राप्तिश्रवणात् ब्रह्मोपासकत्वमवर्जनीय-मिति ब्रह्मणः प्राप्यत्वेनोपास्यत्वसमर्थनात् तदनुपपत्तेः । तस्मादस्मदुक्तार्थ एव युक्तः ॥

(*b*) सिद्धान्तसिद्धाञ्जनम्.

SIDDHĀNTASIDDHĀÑJANAM.

Foll 5*a*–55*a*. Fol. 55*b* is left blank.

Same work as the one described under No. 5069 of the D C.S. MSS., Vol. X.

Contains only the first two Paricchēdas, namely, जडनिरूपण and जीवनिरूपण.

The scribe's date and signature : Rāmānujadāsa, on the seventh day of the bright fortnight which is the 9th day of the Tulā month in the year Āṅgirasa.

R. No. **95.**

Palm-leaf. 17⅝ × 1½ inches Foll. 58. Lines, 9 in a page. Grantha.

Slightly injured.

Purchased in 1910–11 from Gōpalāsāmi Ayyaṅgār of Mannargudi.

(*a*) शम्भुशिक्षा.

ŚAMBHUŚIKṢĀ.

Foll. 1*a*–2*a*.

Same work as the one described under No. 988 of the D.C.S. MSS., Vol. II.

Complete.

(*b*) व्यासशिक्षा.

VYĀSAŚIKṢĀ.

Foll. 2*a*–8*a*.

Same work as the one described under No. 971 of the D.C.S. MSS., Vol. II.

Complete.

(c) अनिङ्ग्यशतकम्.

ANIṄGYAŚATAKAM.

Foll. 8b—11a.

Same work as the one described under No 853 of the D.C.S. MSS., Vol. II.

Complete.

(d) इङ्ग्यरत्नम्.

IṄGYARATNAM.

Foll. 11a—12a.

This is a work which gives for each Anuvāka of the Kṛṣṇa Yajurvēda the ordinal number indicating the compound words which can be split up in the Padapāṭha.

Complete.

Beginning:

वार्णां नत्वेङ्ग्यसंख्यानां वक्ष्याम्यक्षरसंख्यया ।
इषे त्वाद्यनुवाकानामेकैकं पदशः क्रमात् ॥
अत्र द्वे द्वे अक्षरे तु पदसंज्ञकमुच्यते ।
पूर्वमेकं द्वितीयं तु दशादिपरमक्षरम् ॥
कादयो नव वर्णाः स्युष्टादयोऽपि तथैव च ।
पादयः पञ्च याद्यष्टौ वर्णास्तत्र यथाक्रमम् ॥
बिन्दुस्थाने नकारः स्यात् अभावे नहि नास्त्युभौ ।
मङ्गलार्थोऽथशब्दः स्यात् पुराणार्थः स्वरा अपि ॥

पीठिका । इषे त्वा ।

अथ तारिसयो नाको लोकेरेखदनंसटः ।

End:

भ(ए)वमिङ्ग्यानि सर्वाणि संख्यातान्युक्तसंख्यया ।
ततोऽन्यानि त्वनिङ्ग्यानि जो(बो)द्धव्यानि सुधीमताम् ॥

Colophon:

इति इङ्ग्यरत्नं समाप्तम् ॥

(*e*) सिद्धान्तशिक्षा.

SIDDHĀNTAŚIKṢĀ.

Foll. 12*b*—14*a*.

Same work as the one described under No. 1008 of the D.C.S. MSS., Vol. II.

Complete.

Colophon:

सिद्धान्तशिक्षा ॥

(*f*) जटावल्ली.

JAṬĀVALLĪ.

Foll. 14*a*—15*b*.

Same work as the one described under No. 909 of the D.C.S. MSS., Vol. II, in another name as जटावलि.

Complete.

(*g*) उच्चोदर्कि.

UCCŌDARKI.

Fol. 15*b* only.

Same work as the one described under No. 875 of the D.C.S. MSS., Vol. II.

Three stanzas which form part of a commentary on this work are added at the end. The colophon attributes the authorship of the work to Kēśavācārya.

Complete.

End:

ज्योतिरन्नाद्यमन्वाग्मन् वै बृहस्पतये जय ॥
इङ्गचानंशपदेष्वेषूदात्तं स्वारात् परोऽक्षरम् ।
स्वारात् परोऽनुदात्तस्य संग्रहोऽयमितीरितः ॥
सर्वान् देवान् गुरून् नत्वा लघुवृत्तिः प्रवक्ष्यते ।
उच्चोदर्किदशश्लोक्या बालव्युत्पत्तिसिद्धये ॥

श्रीकेशवार्याचार्याणां पदपङ्कजमञ्जसा ।
विद्यामणिनयाजि(णीनां यांज्जि)ह्वा कोशवेश्मायते नमः ॥

Colophon:

इति केशवाचार्यप्रणीतमुच्चोदर्कि संपूर्णम् ॥

(*h*) स्वरपञ्चाशत्.

SVARAPAÑCĀŚAT.

Foll. 15*b*—17*a*.

Same work as the one described under No. 1017 of the D.C.S. MSS., Vol. II.

Complete. Wants the first stanza.

(*i*) स्वरपञ्चाशद्व्याख्यानम्.

SVARAPAÑCĀŚADVYĀKHYĀNAM.

Foll. 17*a*—35*a*.

Same work as the one described under No. 1018 of the D.C.S. MSS., Vol. II, with difference in the end only.

Complete.

End:

अन्येऽप्यध्ययनाद्बोध्या आरुणोपनिषत्स्वराः ।

आरुणकेतुकोपनिषत्सु च यथोक्तव्यतिरिक्ता अपि स्वरा भवन्ति । यथाध्ययनं बोद्धव्याः । व्यशेम देवहितम् । संभार्या गृह्णाति । योऽसौ तपन्नुदेति । इत्यादि । एकश्रुतिश्चानूक्तोऽत्र भवन्ति अग्निश्च जातवेदाश्च । उपनिषत्सु चैकश्रुतिर्भवति । व्यत्ययश्च । शीक्षा व्याख्यास्यामः । सहस्रशीर्षं देवम् । स वा एष पुरुषोऽन्नरसमयः । इत्यादि । अन्येऽपीति वचनमन्यत्रापि क्वचित् पदाध्ययनरहिते व्यत्ययं सूचयति—प्रणं वोचं चिकितुषे जनाय । स त्व नलप्लवः । स वाचस्पते हृदीति व्याहरत् ॥

Colophon:

इति स्वरपञ्चाशच्छब्दव्याख्यानं समाप्तम् ॥
इदं भाष्यं नारायणभट्टाचार्येण लिखितम् ॥

(*j*) कालनिर्णयशिक्षा—सव्याख्या.

KĀLANIRṆAYAŚIKṢĀ WITH COMMENTARY.

Foll. 35*a*—39*b*.

Same work as the one described under No. 892 of the D.C.S. MSS., Vol. II. The portion noted under that number after the colophon is not found here.

Complete.

(*k*) वेदलक्षणम्.

VĒDALAKṢANAM.

Foll. 40*a*—56*a*. Foll. 55*b*, 56*b*, 57 and 58*b* are blank. Fol. 58*a* gives a list of the works contained in the MS.

On the splitting up of Vedic compound words in the Pada, text, etc.

Wants beginning and end.

Beginning :

पर्यादि(दी)ति । सपर्यादिपदं नेङ्ग्यम् । सपर्यन्तः पुरुप्रियम् । सहुरी सपर्यात् । नीयवीयामयादि चेति । नीय, वीय, आमय, एवमादिपदं नेङ्ग्यम् । मृत्यवे नीयमानम् । पणिभिर्वीयमानः । ज्योगामयावी । अत्र नीयादीनां मानमाणश्रुदन्तेनानुदात्तत्वेन चानिङ्ग्यत्वम् । अपि तु छान्दसानामुपसर्गयुक्तशङ्का मा भूदिति पुनर्विधानम् । एवमीदृशेषु सर्वत्र द्रष्टव्यम् ।

End :

भवन्तवाग्रयणाग्रवेद्या अदंश्च या आविविमध्यमाः स्युः ।
त्वाशता आस्त आप्रदीव्या आपः स्तुता आहुः सवर्णदीर्घी ॥
पादोनमात्रा पाकवती पादमात्रा पिपीलिका ॥

R. No. **96.**

Śrītāla. 14 × 1¾ inches. Foll. 92. Lines, 8 in a page Grantha. Good.

Purchased in 1910–11 from Mīnākṣiyammāḷ of Koḍuvāyūr.

(*a*) नलोपाख्यानम्.

NALŌPĀKHYĀNAM.

Foll. 1*a*—47*b*.

Same work as the one described under No. 1987 of the D.C.S. MSS., Vol. IV.

Contains Adhyāyas 1 to 29 only.

The scribe's date and name: Koḍuvāyūr Ayyāsāmidīkṣitar, on Friday, the 22nd and the first lunar day of Kanyā month, the moon being in the Aśvinī constellation, in the year Krōdhana, Kollam 1040 (1865 A.D.).

(*b*) तर्पणदर्पणम्.

TARPAṆADARPAṆAM.

Foll. 86*a*—91*b*. Foll. 48 to 85 are blank. Fol. 92 is a copy of the fol. 34 containing Nalōpākhyānam.

A manual on the subject of offering oblations of water to the dead ancestors.

Complete.

Beginning:

सूत्रकारं भाष्यकारं कारिकाकारमेव च ।
नत्वा विनायकं देवं वक्ष्ये तर्पणदर्पणम् ॥

अथ तर्पणविधिरुच्यते । तत्र पितृतर्पणं द्विविधम्—नित्यं, नैमित्तिकं चेति । तत्र वर्गद्वयोद्देश्ये(शे)न च वसुरुद्रादित्यरूपरहिततया जलमात्रेणाहरहः कर्तव्यतया यद्विहितं नित्यतर्पणम् । तथा च याज्ञवल्क्यः—

सवर्णेभ्यो जलं दद्यात् नासवर्णेभ्य एव च ।
गोत्रनामस्वधाकारं प्रत्यहं तर्पयेत् सुधीः ॥

End:

दर्भान् मूलाग्रैः द्विगुणीकृत्य दक्षिणाग्रान् विधाय संस्तीर्य तेषु पूर्वदर्भेषु सपत्नीकान् मा(पि)त्रादीन् पश्चाद्दर्भेषु मातामहादीन् सपत्नी

कान् कारुण्यानुभयेषु मन्त्रयुक्तं तर्पयित्वा संक्षिप्तं तर्पणं च कृत्वाचम्य वस्त्रं निष्पीड्य तदनन्तरं कालोदितानि कर्माणि कुर्यात् इति निष्कर्षः ॥

इति स्मृतिकौमुद्यां नित्यनैमित्तिकभेदेन तर्पणविधिः ।

Colophon:

तर्पणदर्पणं समाप्तम् ॥

R. No. 97.

Śrītāla. 16⅜ × 2⅜ inches. Foll. 66. Lines, 14 in a page. Grantha. Fair.

Purchased in 1910–11 from Mīnākṣiyammāḷ of Koḍuvāyūr.

(*a*) तुलाकावेरीमाहात्म्यम्.

TULĀKĀVĒRĪMĀHĀTMYAM.

Foll. 1*a*—62*a*.

Same work as the one described under No. 2440 of the D.C.S. MSS., Vol. IV, Part II, with difference in the end only.

Contains 1 to 46 Adhyāyas, one more than in the MS. referred to above.

End:

कावेरीदिव्यकल्याणं यः पठेच्छृणुयादपि ।
अमङ्गल्यं न जायेत तस्य वंशे कदाचन ॥
कावेरीवैभवं श्रुत्वा योऽर्चयेद्धर्मपाठकम् ।
तस्य पुण्यफलं वक्तुं नाहं शक्नोमि नान्यथा ॥

Colophon:

इति श्रीब्रह्मकै(वै)वर्तके तुलाकावेरीमाहात्म्ये षट्चत्वारिंशोऽध्यायः ॥

The MS. is dated:

हायने च सुभान्वाख्ये मासे भाद्रपदे तथा ।
त्रयोदशी कृष्णपक्षस्य वारे भानुसुतस्य च ॥

(*b*) मन्त्रमालिका.

MANTRAMĀḶIKĀ.

Foll 65*a*—66*b*. Fol. 63 contains in Tamil the Phalaśruti of Tulākāvērīmāhātmya. Foll. 62*b* and 64 are blank.

Contains the following Mantras:—Vidyāgaṇapatimantra, Gurupādukāmantra, Mahāgaṇapatimantra, Mahātripurasundarī-brahmavidyāṣōḍaśākṣarīmahāmantra, Parāprāsādamantra, Śaiva-mānasikasnāna, Bhūśuddhimantra, Mātṛkānyāsa, Mahāvākya-mantra.

Beginning:

विद्यागणपतिमहामन्त्रस्य गणकानन्दभैरव ऋषिः, गायत्र्यमृतविराट् छन्दः, विद्यागणपतिर्देवता, गं ऐं बीं, स्वाहा क्लीं शु ग्लौं सौः क्लीं विनियोगः । मूलेन षडङ्गन्यासः ।

End:

प्रज्ञानं ब्रह्म । अहं ब्रह्मास्मि । तत् त्वमसि । अयमात्मा ब्रह्म । ब्रह्मज्योतिरहोम् ॥

Colophon:

महावाक्यमन्त्रम् ॥

R. No. **98.**

Śrītāla. 18¼ × 2⅛ inches. Foll. 57. Lines, 14 in a page. Telugu. Slightly injured.

Purchased in 1910–11 from K. Rāmasāmi Ayyaṅgār of Magadi, Mysore

नञ्जराजयशोभूषणम्.

NAÑJARĀJAYAŚŌBHŪṢAṆAM.

Same work as the one described under R. No. 19 *ante*.

Contains one to seven Vilāsas complete

R. No. **99.**

Palm-leaf. 10¾ × 1½ inches. Foll. 11. Lines, 6 in a page. Grantha. Good.

Purchased in 1910–11 from Mīnākṣiyammāḷ of Koḍuvāyūr.

(*a*) वन्ध्यात्वप्रायश्चित्तम्.

VANDHYĀTVAPRĀYAŚCITTAM.

Foll. 1*a*—3*b*.

Describes the expiatory ceremonies to be performed for removing the sins which bring about barrenness. The sins are said to be due to beating or frightening the young, separating the cow from its calf, breaking the eggs of animals, disobedience to parents, etc.

Complete.

Beginning:

विघ्नेश्वरपूजा । अनुज्ञा । संकल्पः । शुभतिथौ बालताडनबालतर्जनगोवत्सवियोजनप्राण्यण्डभेदनाष्टिकाद्यकरणान्यसुतविद्वेषणपितृनियोग - भङ्गविप्ररत्नापहरणस्वरूपाणां चतुर्विधवन्ध्यात्वनिदानानां पापानां च सद्यः अपनोदकं पयोलोभात् गोवत्सद्रोहेण संभावितानपत्यतादोषनिवृत्त्यर्थं च . . . . . विष्णुधर्मोक्तायुतसंख्या(क-) गायत्रीतिलहोमकर्म कर्तुं योग्यतासिद्धिमनुगृहाण ।

End:

एवं सहस्रं हुनेत् । एवमाज्याहुतिः प्रतिमायामाज्यसंपातमन्ते प्रतिमाविसर्जनम् । दशदानम् । निरीक्षिताज्यदानम् । लक्ष्मीनारायणप्रतिमादानम् । आशीर्वादः । द्वादश ब्राह्मणान् सम्यक् भोजयेत् । शीघ्रमेव सुपुत्रान् संपद्यन्ते ॥

(*b*) वन्ध्यात्वप्रायश्चित्तम्.

VANDHYĀTVAPRĀYAŚCITTAM.

Foll. 4*a*—7*b*.

Similar to the above.

Complete.

Beginning:

शारदातिलकोक्तविधिरुच्यते—आदौ विघ्नेश्वरपूजां कृत्वा परिषदनुज्ञाप्य संकल्पः—शुभतिथौ नक्षत्रे राशौ जातस्य धर्मपत्न्याश्चावयोश्च गव्यविक्रयनिमित्तवन्ध्या(त्व)निवृत्त्यर्थं गर्भघातनिमित्तवन्ध्या(त्व)निवृत्त्यर्थं पितृद्रोहनिमित्तभूतप्रेतपिशाचोपद्रववन्ध्यात्वनिवृत्त्यर्थं सर्पाद्युरगपीडाजनित-

वन्ध्या(त्व)निवृत्त्यर्थं शारदातिलकोक्तप्रकारेणाचार्यमुखेन तिलहोमकर्म करिष्ये। पुण्याहवाचनं करिष्ये।

जन्मान्तरार्जितैः पापैः पितृद्रोही भवेन्नरः।
तत्प्रतीकारमन्विच्छन् तिलहोमं समाचरेत्॥

End:

एवं कृते सुपुत्रवान् भवति।

Colophon:

इति शारदातिलकोक्तप्रकारेण तिलहोमं समाप्तम्॥ . . . .

सुवर्णवाहनप्रीतिकरं स्वर्णं द्विजातये।
ददामि सादरं मह्यं प्रीतो भवतु केशवः॥

(*c*) वन्ध्यात्वप्रायश्चित्तम्.

VANDHYĀTVAPRĀYAŚCITTAM.

Foll. 8*a*—11*b*.

Incomplete.

Similar to the above.

Beginning:

विघ्नेश्वरपूजां कृत्वा, अनुज्ञा, अशेषे . . स्वीकृत्य मया समर्पितां शक्त्यनुसारिपादांशपरिमितगोषट्कप्रत्याम्नायभूतां ताम्बूलं च स्वीकृत्य. . . . . .

चतुर्विधवन्ध्यात्वदोषनिदानभूतानां सर्वेषां पापानां सद्यः अपनोदद्वारा परमेश्वरप्रीत्यर्थमुचितकाले आयुष्मत्सुरूपसुगुणानेकजीवत्सुपुत्रावाप्त्यर्थं पितृप्रीतिकररजतप्रतिमोत्सर्जनपुरःसरं लक्ष्मीनारायणप्रतिमादानपूर्वकं धेनुत्रयप्रतिमादानसर्पप्रतिमादानतिलदानदशदानादिभिः एभिर्ब्राह्मणैः सह शारदातिलकोक्तप्रकारेण त्र्यहं तिलहोमकर्म कर्तुं योग्यतासिद्धिमनुगृहाण।

End:

वन्ध्या(त्व)निवृत्त्यै अस्मै ब्राह्मणाय शर्मणे आज्यधेनुप्रतिमां प्रतिग्रहीत्रे इमामाज्यधेनुप्रतिमां सवत्सां सदक्षिणाकां परमेश्वरप्रीतिम्।

R. No. 100.

Palm-leaf. 18 × 1½ inches. Foll. 49. Lines, 9 in a page. Grantha. Slightly injured.

Purchased in 1910–11 from Gōpālasami Ayyaṅgār of Mannargudi.

(*a*) श्रीतत्त्वसुधाव्याख्या—न्यायमन्दरः.

ŚRĪTATTVASUDHĀVYĀKHYĀ: NYĀYAMANDARAḤ.

Foll. 1*a*—24*a*.

The text and the commentary of a work which investigates into the true nature of Lakṣmī in relation to Viṣṇu. The author of both is Vādhūla Vīrarāghava of Tirumaliśai, a village about 15 miles from Madras.

Complete.

Beginning:

भजेऽहं भक्तिसाराख्यं सौदर्शनमह महः ।
ययौ जङ्गमतां येन वेगासेतुर्विभावितः ॥
न्यायमन्दरमन्थेन मथितादागमार्णवात् ।
संभूतया प्रमोदन्तां श्रीतत्त्वसुधया बुधाः ॥

ईश्वरः सर्वभूतानाम्' ईश्वरीं सर्वभूतानाम्' इत्यत्रत्ययोः सर्वशब्दयोरन्यतरसंकोचोनोपपत्तावुभयसंकोचस्यानुचितत्वात् पत्नीत्वश्रवणस्य भगवद्विषयसर्वभूतेश्वरवाक्यभूयस्त्वस्य विनिगमकत्वात् अनिश्चितार्थश्रुतेः निश्चितार्थश्रुत्यधीनार्थनिर्णायकत्वौचित्यात् श्रीविषयवाक्यस्थसर्वशब्दस्य भगवद्व्यतिरिक्तपरतया संकोचात् भगवद्विषयवाक्यस्थसर्वशब्देन श्रियोऽपि संग्रहात् श्रियो भगवन्नियाम्यत्वं . . . . . श्रियो भगवन्नियाम्यत्वाभावः कैश्चित् परिष्कृतः । तत्र दोषः स्फुटमुपन्यस्यते—

नियन्तृत्वं नियम्यत्वविरहव्याप्यमीरितम् ।
यत्तन्न धरणीदेव्यामनैकान्तिकता यतः ॥

End:

वचनद्वयस्याप्युपबृंहितत्वाच्चेत्यादिकमपि संकलय्यानुसन्धेयमिति भावः ॥

विस्तीर्णं निगमार्णवं विपुलयन् विश्वंभरे स्थापितः
प्रज्ञाभोगवता परं नियमितः प्राज्ञैः समावर्तितः ।
आकारैर्नयमन्दरो बहुभिरप्यायोजितश्रीःमेता(या)
श्रीतत्त्वं समुदञ्चयन् भगवताश्चित्ते विधत्ते मुदम् ॥

Colophon:

इति वाधूलवीरराघवकृतिषु तत्कृतश्रीतत्त्वसुधाव्याख्यानं न्यायमन्दरसमाख्यानं संपूर्णम् ॥

The name of the former owner of the MS. is given as Cakravarti Rāmānujadāsa.

(*b*) प्रपन्नपारिजातः.

PRAPANNAPĀRIJĀTAḤ.

Foll. 28*a*—49*a*. Foll. 24*b*, 25, 26 and 27*b* are blank. Fol. 27*a* gives the name of the former owner of the MS. (probably this portion thereof) to be Tirumaliśai Nallān Cakravarti Narasiṁhācārya.

Same work as the one described under No. 5310 of the D.C.S. MSS., Vol. XI.

Complete.

R. No. **101.**

Palm-leaf. $16\frac{1}{8} \times 1\frac{1}{2}$ inches. Foll. 44. Lines, 8 in a page. Telugu. Slightly injured.

Purchased in 1910–11 from S. Śrīnivāsa Śāstri of Tanjore.

नलोदयव्याख्या.

NALŌDAYAVYĀKHYĀ.

A commentary on Nalōdaya, a poem attributed to Kālidāsa: by Kṛṣṇa, who proposes to give the analysis into words, the meaning, the prose order and the gist of each stanza.

Four Āśvāsas complete.

Beginning:

अग्रे निर्भिन्नमेघौघविद्युत्पिङ्गसटाच्छटम् ।
दिगन्तरासुरान्वेषिबाहुं नरहरिं भजे ॥
नलोदयाख्यकाव्यस्य सागरस्येव नौरियम् ।
कृष्णनाम्नावगाहाय व्याक्रिया क्रियते मया ॥
वक्ष्ये पदार्थान् प्रथमं पदानामन्वयं ततः ।
पश्चादन्वितवाक्यार्थमित्यत्र ज्ञायते क्रमः ॥

प्रथमं तावत् काव्यमारब्धुकामः कविस्तस्याविघ्नपरिसमाप्तये स्मृतिमात्रेणैव सकलदुरितापहारिणि भगवति भक्तवत्सले वासुदेवे हृदयं प्रति परमवधानमाशास्ते—हृदय । सदा । यादवतः । पापाटव्याः । दुरासदायाः । दवतः । अरिसमुदायात् । अवतः । त्रिजगत् । मा । गाः । स्मरेण । दायादवता । हे हृदय सदा यादवतः यदुवंशसंभूतात् पापाटव्याः पापमेव अटवी तस्याः दुरासदायाः दुष्प्रधर्षणायाः ।

End:

तेन नलेन स पुष्कर अमुना मुक्तेन मुदं प्राप । महात्मना मुक्तेन धृतनानामुक्तेन तेन नलेन विघटनामुग्राज्यं प्राशासि ।

आत्ममोचनेन पुष्करः प्रकामं प्रीतोऽभूत् । महात्मभिः स्तुतेन नलेनापि निष्कण्टकं राज्यं प्रशासितम् ॥

Colophon:

इति नलोदये चतुर्थाश्वासः संपूर्णः ॥

The name of the scribe and the date of transcription are given: Śeṭṭipalli Muttu for Kaṇṭikōṭṭai Subbarāyan; on Wednesday, the 5th day of the bright fortnight (Uttarabhādra) of the month of Māgha in the year Nala

---

R. No. 102.

Palm-leaf. 16 × 1⅜ inches. Foll. 35. Lines, 6 in a page. Grantha. Slightly injured.

Purchased in 1910–11 from Anantakṛṣṇa Śāstri of Harināyakapuram, Tinnevelly district.

(*a*) नाडीविज्ञानीयम्.

NĀḌĪVIJÑĀNĪYAM.

Foll. 1*a*—21*a*.

Complete in twelve Paṭalas.

A treatise on the diagnosis of diseases by means of feeling the pulse.

Beginning:

प्रणम्य शिरसा देवं शङ्करं लोकशङ्करम् ।
प्रवक्ष्यामि समासेन नाडीतन्त्रं परीक्षयेत् (या) ॥
एकस्मिन् दिवसे रम्ये कैलासे रत्नमण्डपे ।
पार्वती शङ्करं दृष्ट्वा पप्रच्छ भिषजां हितम् ॥

पार्वत्युवाच—

नाडीशास्त्रं महागोप्यं देवानामपि दुर्लभम् ।
किं पुनर्मानुषाणां तु धमनीं वद मे प्रभो ॥

शिवः—

नाडीचक्रं महादेवि सूक्ष्मात् सूक्ष्मतरं शृणु ।

* * * *

अथ नाडीमाह—

द्विसप्ततिसहस्राणि नाड्यः प्रोक्ता महर्षिभिः ।
फेले चरकशास्त्रे च सुश्रुते तन्त्रविस्तरे ॥
कण्टकोक्ते याज्ञवल्क्ये योगतारावलीयके ।
युक्तिप्रत्युक्तया सर्वा निरीक्ष्य हि हिता मया ॥

* * * *

उपायानपि वक्ष्यामि स्पर्शनप्रश्नदर्शनैः ।
स्पर्शनं दुर्लभं मन्ये सुगमावितरावुभौ ॥

End:

आशये शमिता दोषा नाड्यांश्च(च) शमितास्तथा ।
आशये वक्रका दोषा नाड्यां वक्रा भवन्ति च ॥

लतासंचल(न)न्यायात् सर्वत्रापि चला भवेत् ॥
इति ज्ञात्वा नाडीमूलं चिकित्सामाचरेत् (भिषक्) ॥

Colophon:

इति नाडीविज्ञानीये द्वादशः पटलः।
आहारकाले संप्राप्ते यो न भुङ्क्ते बुभुक्षितः।
तस्य नश्यति कायाग्निः निरिन्धन इवानलः ॥
विशेषान्तरनाशाय सूचिकेति विषूचिका।
विशेषान्मरणं सूचयतीति विषूचिका।

The date of transcription and the name of the scribe: Friday, the 23rd Āvaṇi of Durmati: by Svāminātha.

(*b*) योगतरङ्गिणी.

YŌGATARAṄGIṆĪ.

Foll. 22*a*—24*a*. The fol. 24*b* is blank.

The two Taraṅgas contained in this MS. deal with the forebodings of dreams and with predictions in regard to the health of a person from the nature of the messenger sent to the physician.

Contains two Taraṅgas: स्वप्नतरङ्ग and दूततरङ्ग.

Beginning:

अन्नसंशयः। नवोदनं पयःपानं धनलाभक(रं)परम्।
श्वेतमाल्याम्बरं छत्रं चन्दनं च घ(ध)नप्रदम् ॥

* * * *

अगम्यागमनं लेपो विष्ठाया रुदितं मृतिः।
आममांसाशनं स्वप्ने धनारोग्याप्तये विदुः ॥
जलौका भ्रमरी सर्पो मक्षिका चापि यं दशेत्।
रोगी स भूयादारोग्यस्वस्थो धनमवाप्नुयात् ॥

इति योगतरङ्गिण्यां स्वप्नकथनं नाम तरङ्गः ॥

End:

दूतास्योदितं वर्णवृन्दमखिलं द्वेधा विधाय त्रिभिर्भङ्क्त्वा व्योमनि मृत्युमाशु विवदेन्मन्त्रसञ्जीवने ॥

Colophon:

इति योगतरङ्गिण्यां दूतलक्षणं नाम तरङ्गः ॥

(c) अभ्रकलक्षणम्.

ABHRAKALAKṢAṆAM.

Foll. 25*a*—28*b*.

Deals with the mythological origin, the medical properties and the use of mica.

Complete.

Beginning:

कङ्कालवेषः सर्वज्ञो भिक्षामक्षयिकामटन् ।
कुर्वन् पतिव्रताभङ्गं प्रतस्थे जनमोहनः ॥

तद्रूपं गिरिजा दृष्ट्वा हर्षोन्मीलितलोचना ।
मुमोच वीर्यं सा गौरी गृहीत्वा तन्नभःस्थले ॥

चिक्षेप तस्मात् तद्वीर्यं व्योम्ना(ना)म्ना प्रकाशितम् ।
श्वेतरक्तं पीतकृष्णं तदभ्रं भूमिसंगमात् ॥

End:

अजीर्णमामदोषं च ज्वरस्य गमनं क्षुधम् ।
वा(त)पित्तकफोद्रेकं हस्तनाड्यां निदर्शयेत् ॥

पादनाडी—

जीवितं लाघवं स्वास्थ्यं ज्वरस्य च विमोचनम् ॥

The name of scribe and the date of transcription : Svāmināthan; Monday, the 9th of Puraṭṭāśi, in the year Durmati.

(*d*) नवरत्नशुद्धिः.

NAVARATNAŚUDDHIḤ.

Foll. 29*a*—30*b*.

This gives methods for purifying the nine precious gems for medical use and for making medicated powders from them.

Complete

Beginning:

सर्वेषां रत्नजातीनां गिरिक्षेत्रघनोद्भवाः ।
केचिज्जलसमुद्भूताः सर्वशास्त्रेषु लक्षिताः ॥
बिन्दुरेखागर्भभवाः दोषाःस(स्यु)र्धारणाअ(द)मी ।
तेषु शुद्धिं प्रवक्ष्यामि मूलिकाभिर्यथोचितैः ॥
शमीपुनर्नवोन्मत्तकञ्चुकीकोद्रवद्रवैः ।
अगस्त्यआखुकर्णीभिः कुलुत्थक्वाथसंयुतः ॥
सूरणानिचुलामेषशृङ्गीरससमुद्भवम् ।
डोलायन्त्रे पाचनीया त्रिदिनं मृदुवह्निना ॥
शुध्यन्ति सर्वरत्नानि दोषशुद्धिः प्रजायते ।

End:

वैडूर्यशुद्धिभस्मकर्म—

वैडूर्यं वाजिमूत्रेण कूश्माण्डस्य रसेन च ॥
भावितं मृदितं चातः शुद्धिर्भवति निश्चयम् ।
तद्वैडूर्यशिलाभेदी रसेन परिपावयेत् ॥
विश्वकर्मपुटे दग्ध्वा तीव्राग्नौ वज्रमूषया ।
ततो गजपुटे पाच्य भस्मं(स्मी)भवति निश्चयः ॥

(*e*) शशाङ्ककिरणम्.

ŚAŚĀṄKAKIRAṆAM.

Foll. 31*a*—32*a*.

On the preparation of a drug called Śaśāṅkakiraṇa which is used as a nervine tonic.

Complete.

Beginning:

न्यग्रोधोदुम्बराश्वत्थवकुलप्लक्षबर्बरम् ।
श्वदंष्ट्रकं वटशिफा सालमिश्री च मस्तकी ॥
गोक्षीरेण सुसंपेष्य तत्खण्डं तु समाहरेत् ।
घटोदरे घटं क्षीरं वस्त्रेणाच्छाद्य तन्मुखम् ॥
आढकं शिग्रुकुसुमं सिद्धपत्रं पलाष्टकम् ।

End:

सुनक्षत्रे सुवारे च भक्षयेदक्षमात्रकम् ।
शुक्लप्रमेहं नारीणां स्था(स्नु)स्रावं तथा मधु ॥
क्षिप्रं प्रशमनं याति वीर्ये नारीसहस्रशः ।
गम्भीरमदतो याति शशाङ्ककिरणं स्मृतम् ॥

Foll. 32*b* and 33 are blank. Fol. 34 gives in Tamil the preparation of some medicines; fol. 35 deals about the extraction of oil from sandal wood.

R. No. **103.**

Palm-leaf. Size, $7\frac{3}{4} \times 1\frac{5}{8}$ inches. Foll. 140. Lines, 10 in a page. Grantha. Good.

Purchased in 1910–11 from S. Rāmakṛṣṇavādyār of Palghat.

(*a*) दृग्गणितम्.

DṚGGAṆITAM.

Foll. 1*a*—12*b*.

This gives rules of computation for compiling calendars with the help of direct observation of the heavenly bodies.

Contains Khaṇḍas one to eight complete.

Beginning:

याताश्च मासा दिवसाश्च नाड्यः स्वाभीष्टकालावधिकाः क्रमेण ।
भवन्ति राश्यंशकलाश्च भानोः योग्यादिवाक्यं च कलासु कुर्यात् ॥

नीचेन तत्तद्दिवसाष्टकोक्तयोग्यादिवाक्यादिनभुक्तिलब्धाः ।
कुर्यात् तदार्कस्फुटभुक्तिरेषा स्याद्यज्ञरक्तादिवशाद्धनर्णम् ॥

* * * *

शिष्टा नतघ्नास्तिथितारयोश्च स्वहारभक्ता घटिका गताः स्युः ।
संक्रान्तिवाक्यादियुतध्रुवाणि संक्रान्तिकाला रविवासराद्याः ॥

End:

इति प्रथमः खण्डः ॥

न ग्राह्योऽनतिलम्ब(ङ्ग)ने शिशिरगोरन्यत्समं भानुना
वाच्यौ नाष्टमषोडशौ नतिदिशिग्राह्यो (?) विधोरन्यथा ॥

Colophon:

इत्यष्टमः खण्डः ॥

Foll. 13*a*—38*b* contain the Tamil meaning of this work. Foll. 39*a*—56*b* are blank.

(*b*) विष्णुसहस्रनामव्याख्या—ब्रह्मानन्दप्रकाशिका.

VIṢṆUSAHASRANĀMAVYĀKHYĀ: BRAHMĀNANDA-PRAKĀŚIKĀ.

Foll. 57*a*—140*a*. Fol. 140*b* is blank.

The commentary of Śaṅkarācārya on Viṣṇusahasranāmastōtra, which contains 1,000 significant names in praise of Viṣṇu, occurring in the Ānuśāsanikaparvan of the Mahābhārata.

Incomplete.

Beginning:

शुक्लाम्बरधरं . . . सर्वविघ्नोपशान्तये ॥
सहस्रनामव्याख्येयं ब्रह्मानन्दप्रकाशिका ।
शङ्करेणैव भगवत्पादाचार्येण निर्मिता ॥
आदिस्त्वं सर्वदेवानां मध्यमन्तस्तथा भवान् ।
त्वत्तस्सर्वमभूद्विश्वं त्वयि सर्वं प्रलीयते ॥

* * * *

यतस्सर्वाणीत्यारभ्य जगदुत्पत्तिस्थितिलयकार(ण)स्य ब्रह्मण एकदैवत्वे-नाभिहितत्वादादावुभयविधं ब्रह्म विश्वशब्देनोच्यते। विश्वस्य जगतः कारणत्वेन विश्वमित्युच्यते।

End:

सहस्रनामसम्बन्धा व्याख्या सर्वसुखावहा।
श्रुतिस्मृतिन्यायमाला रचिता हरिपादयोः॥

एकैकनामस्तवनस्य विशेषफलसाधनत्वं सर्वफलसाधनत्वं च प्रतिपाद-यन् विष्णुधर्माध्याये एकादशे . . . त्र सहस्रनामव्याख्या ये(यै)पठ्यते सहस्रनामसङ्कीर्तनेनापि सहस्रपुरुषार्थस्सिध्यतीति दर्शयितुमेकस्यैव।

R. No. 104.

Palm-leaf. 6⅝ × 1¾ inches. Foll. 172. Lines, 9 in a page. Grantha. Good.

Purchased in 1910-11 from S. Rāmakṛṣṇavādyār of Palghat.

(*a*) पूर्वमीमांसासूत्राणि.

PŪRVAMĪMĀṀSĀSŪTRĀṆI.

Foll. 1*a*—117*a*. Fol. 117*b* is blank.

Same work as the one described under No. 4466 of the D.C.S. MSS., Vol. IX.

Incomplete.

(*b*) अष्टाध्यायी—सवृत्तिः.

AṢṬĀDHYĀYĪ WITH VṚTTI.

Foll. 118*a*—163*b*.

Same work as the one described under No. 1246 of the D.C.S. MSS., Vol. III, with the addition of a Vṛtti (meaning of the Sūtras).

Breaks off in the fourth Pāda of the II Adhyāya.

Contains also the Māhēśvara Sūtras and the Dhyānaślōkas.

(c) अघपञ्चषष्टिः.

AGHAPAÑCAṢAṢṬIḤ.

Foll. 164*a*—172*a*. Fol. 172*b* is blank.

Same work as the one described under No. 3000 of the D.C.S. MSS., Vol. V.

Complete.

R. No. **105.**

Palm-leaf. 14¾ × 1⅛ inches. Foll. 180. Lines, 10 in a page. Grantha. Good.

Purchased in 1910–11 from E. R. Śrīnivāsarāghavācāriyar of Kalyāṇapuram.

पाराशर्यविजयः.

PĀRĀŚARYAVIJAYAḤ.

Same work as the one described under No. 4928 of the D.C.S. MSS., Vol. X.

Contains the first two Pādas in the first Adhyāya.

R. No. **106.**

Palm-leaf. 11 × 1⅜ inches. Foll. 36. Lines, 7 in a page. Grantha. Good.

Purchased in 1910–11 from Anantakṛṣṇa Śāstri of Harināyakapuram, Tinnevelly district.

परीक्षामुखलघुवृत्तिः.

PARĪKṢĀMUKHALAGHUVṚTTIḤ.

This is also called Pramēyaratna.

Same work as the one described under R. No. 22. *ante.*

Breaks off in the fourth Samuddēśa. Wants the first leaf.

R. No. **107.**

Śrītāla. 14¼ × 2¼ inches. Foll. 122. Lines, 13 in a page. Grantha. Good.

Purchased in 1910–11 from S. Rāmakṛṣṇavādyār of Palghat.

(*a*) तत्त्वचिन्तामणिदीधितिव्याख्या—जागदीशी.

TATTVACINTĀMAṆIDĪDHITIVYĀKHYĀ—JĀGADĪŚĪ.

Foll. 1*a*—69*b*.

Same work as the one described under No. 4086 of the D.C.S. MSS., Vol. VIII.

Contains Anumitirahasya, Pañcalakṣaṇī, Siṁhavyāghrī and Caturdaśalakṣaṇī.

(*b*) तत्त्वचिन्तामणिदीधितिप्रकाशिका—गादाधरी.

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ : GĀDĀDHARĪ.

Foll. 71*a*—80*b* and 87*a*—104*a*. Foll. 70, 81—86 and 104*b*—122*b* are blank.

Same work as the one described under No. 4049 of the D.C.S. MSS., Vol. VIII.

Contains Pañcalakṣaṇī and Caturdaśalakṣaṇī.

R. No. **108.**

Palm-leaf. 14¼ × 1¼ inches. Foll. 62. Lines, 6 in a page. Grantha. Slightly injured.

Purchased in 1910–11 from Mīnākṣiyammāḷ of Koḍuvāyūr

पराशरोपपुराणम्.

PARĀŚARŌPAPURĀṆAM.

Same work as the one described under No. 2348 of the D.C.S. MSS., Vol. IV, Part II.

Complete.

The scribe adds—

अयं ग्रन्थः नलूर् नारायणशास्त्रिपौत्रेण लिखितः ॥

R. No. **109.**

Palm-leaf. 16¾ or 14¾ × 1¼ inches Foll. 14. Lines, 6 in a page. Grantha. Slightly injured.

Purchased in 1910–11 from Mīnākṣiyammāḷ of Koḍuvāyūr.

(a) पुरुषसूक्तन्यासयन्त्रोद्धारहोमप्रकारः.

PURUṢASŪKTANYĀSAYANTRŌDDHĀRAHŌMAPRAKĀRAḤ.

Foll. 1a—7b.

Gives the manner of performing the Nyāsa, the drawing and sanctifying of the mystic diagram and the fire oblation in relation to the Puruṣasūkta Mantras.

Complete.

Beginning:

अस्य श्रीपुरुषसूक्तन्यासमहामन्त्रस्य साध्यनारायण ऋषिः, विराट् छन्दः, पुरुषो नारायणो देवता । . . . . . सव्यकरे सहस्र । दक्षिणकरे पुरुष एव । सव्यपादे एतावानस्य । दक्षिणपादे त्रिपादूर्ध्वः । वामजानुनि तस्माद्विराडजायत ।

* * * *

ऋचां पुरुषसूक्तस्य क्रमात् षोडशसंधिषु ।
मातृकार्णोल्लिसद्वृत्तं भूपुराश्वत्थतारकम् ॥
यन्त्रं पुरुषसूक्तस्य पुत्रायुःकीर्तिवर्धनम् ।
सर्वपापहरं श्रीदं धर्मकामार्थमोक्षदम् ॥

End:

अन्यैरश्वत्थपर्णैः संपातान् पिधाय अद्य पूर्वोक्तपुरुषसूक्तहोमकर्म करिष्यामः । ऋत्विक्सहित आचार्य अष्टोत्तरसहस्रं हविर्होमं हुत्वा स्विष्टकृत्प्रभृति ब्रह्मोद्वासनपर्यन्तं साधारणमेव सपत्नी(त्नी)कं यजमानं पुरुषसूक्तन्यासं न्यासयित्वा हविःशेषं पत्नीं प्राच(श)यित्वा षोडशऋग्भिः हविःशेषप्राशनं तत्तत्पर्णेन जलं प्राशयित्वा महाविष्णूद्वासनमाशीर्वादं च कुर्यात् । घृतसूपगुडपायससहितं ब्राह्मणभोजनं कर्तव्यम् ॥

(*b*) ब्राह्मणाच्छंसिप्रथमपर्यायशस्त्रम्.
BRĀHMAṆĀCCHAṀSIPRĀTHAMAPARYĀYA-ŚASTRAM.

Foll. 10*a*—14*b*. Foll. 8 and 9 are blank.

This gives the Sāmans which have to be recited by Brāhmaṇāccharhsi, one of the sacrificial priests in his first turn duing the performance of a sacrifice.

Complete.

Beginning:

हिं भूर्भुवः सुवरोम् । शा सावोम् । वयमु त्वा तदिदर्था वयमु त्वा तदिदर्थाः । इन्द्र त्वा यन्तः सखायः । कण्वा उक्थेभिर्जरन्तोम् । त्रिः ।

End:

उक्थं वाचि । ये यजामहे ऊती शचीवस्तव वीर्येण वयो दधाना उशिज ऋतज्ञाः । प्रजावतीन्द्रमनुषो दुरोणे । तस्थुर्गृणन्तः सधमाद्या-सा वौ । सुसोमायाग्ने वी ही वौ । पूर्ववद्भक्षः ॥

Colophon:

ब्राह्मणाच्छंसिनः प्रथमपर्यायशस्त्रम् ॥

R. No. 110.

Palm-leaf. $18\frac{1}{8} \times 1\frac{5}{8}$ inches. Foll. 51. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1910-10 from Gōpālasāmi Ayyaṅgār of Mannargudi.

(*a*) शैवकर्णामृतम्.
ŚAIVAKARṆĀMṚTAM.

Foll. 1*a*—27*b*.

This is a treatise establishing that the Supreme Being is none other than Śiva: by Appayadīkṣita of Bhāradvājagōtra, who is the propagator of Śaivism and the teacher of Advaita lore.

Complete.

Beginning:

तत्पद(निज)लोकने सति नृणामितरैः सुकृतै-
रलमिति बोधमादधदिवामयमुद्रिकया ।

* * * *

जन्मस्थेमलयं समस्तजगतां यस्यैव लीलायितं
यस्मिन्नायतते भवस्थिरमहारोगक्षयः प्राणिनाम् ।
तद्ब्रह्माच्युतपूजिताङ्घ्रिकमलं विश्वाधिकं शाश्वतं
साम्बं ब्रह्म सदाशिवाख्यममलं पश्येयमन्तर्दृशि ॥

सदाशिवः परं ब्रह्म साम्बमूर्तिः सदास्तु नः ।
विवृत्तिलेशस्तस्यायं प्रपञ्च इति वैदिकम् ॥

पाञ्चरात्रस्थितास्तस्य परभावे धृताक्षमाः ।
विष्णोः परत्वे वेदानामपि तात्पर्यमूचिरे ॥

तथापि स प्रकारोऽत्र संक्षेपेण प्रदर्श्यते ।
शिवतत्त्वविवेकस्तु(के तु) प्रपञ्चो(ञ्चे)नोपपादितः ॥

End:

मोथत्वा श्रुतिपाथोधिं न्यायमन्थाविलोडनैः ।
कर्णामृतं सुमनसामेतत् सर्वं समुद्धृतम् ॥

इहोक्तन्यायसच्छाणाघर्षणैर्विमलीकृता ।
प्रकाशयतु भूतेशं त्र्यम्बन्तमणिदीपिका ॥

शिवभक्तिकल्पवल्लीमङ्कुरितामद्य पुण्यकर्मफलात् ।
धीराः कुमतिनिदाघात् रक्षत कर्णामृत(स्य) धाराभिः ॥

यात्रामुखे श्रुताय श्रीपतिनान्विष्य लब्धाय ।
शिवलीलामुकुराय प्रणतिं वाग्ब्रह्मणे कुर्मः ॥

Colophon:

इति श्रीभारद्वाजकुलजलधिकौस्तुभश्रीकण्ठमतप्रतिष्ठापनाचार्यश्रीमदद्वैतविद्याचार्यश्रीमद्विश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ शैवकर्णामृते सिद्धान्तसंक्षेपः संपूर्णः ॥

* * * *

(येन संक्षुभितं) विष्णुकर्णामृतसुपल्वलम् ।
तद्भावदर्शनायाद्य लिखितं विष्णुभक्तिना ॥

(b) पुच्छब्रह्मवादनिरासः.

PUCCHABRAHMAVĀDANIRĀSAḤ.

Foll. 28a—32b.

Same work as the one described under No 4929 of the D C.S. MSS., Vol. X.

Incomplete.

(c) विषयतावादः.

VIṢAYATĀVĀDAḤ.

Foll. 34a—45b. Fol. 46 is blank.

Similar to the work described under No 4286 of the D.C.S. MSS., Vol. VIII.

Wants beginning and end.

(d) वेदान्तसारसंग्रहः.

VĒDĀNTASĀRASAṄGRAHAḤ.

Foll. 47a—51b.

An elementary treatise explaining the essential doctrines of the Vēdānta philosophy from the Advaitic view thereof.

Incomplete.

Beginning:

आत्मनः किं निमित्तम्? दुःखम्, शरीरपरिग्रहनिमित्तं दुःखम् । आत्मनो वै सह वै सशरीरस्य स्तः प्रियाप्रिययोरंहतिरस्तीति श्रुतेः । परिग्रहः केन भवति? कर्मणा । कर्म केन भवति? रागादिभ्यः । रागादिभ्यः(दयः) केन भवन्तीति चेत्, अभिमानात् ।

End:

जाग्रत्स्थूलशरीराभिमानी विश्वः । स्वप्नं नाम सूक्ष्मशरीराभिमानी तैजसः । सुषुप्तिः कारणशरीराभिमानी प्राज्ञः । कोशपञ्चकं नामान्नमयप्राणमयमनोमयविज्ञानमयानन्दमयाख्याः । अन्नमयोऽन्नविकारः प्राणमयः प्राणविकारो मनोमयो मनोविकारो विज्ञानमयो विज्ञानविकार न्मयदआन आनन्दविकारः । अन्नमयः कोशो नाम ।

R. No. 111.

Palm-leaf. Size, 16¾ × 1¼ inches. Foll. 28. Lines, 7 in a page Grantha. Slightly injured.

Purchased in 1910-11 from Gōpālsāmi Ayyaṅgār of Mannargudi.

(*a*) ब्रह्मपदशक्तिवादः.
BRAHMAPADAŚAKTIVĀDAḤ.

Foll. 1*a*—17*b*.

Same work as the one described under No. 4937 of the D.C.S. MSS., Vol. X.

Complete.

(*b*) शरीरवादः.
ŚARĪRAVĀDAḤ.

Foll. 17*b*—28*b*.

Same work as the one described under No. 5045 ef the D.C.S. MSS., Vol. X.

Incomplete.

R. No. 112.

Palm-leaf. 19 × 1½ inches. Foll. 22. Lines, 8 in a page. Grantha. Good.

Purchased in 1910-11 from Gōpālasāmi Ayyaṅgār of Mannargudi.

(*a*) विषयतावादः.
VIṢAYATĀVĀDAḤ.

Foll. 1*a*—13*b*.

Same work as the one described under No: 5000 of the D.C.S. MSS., Vol. X.

Complete.

(*b*) ब्रह्मलक्ष्मनिरूपणम्.
BRAHMALAKṢMANIRŪPAṆAM.

Foll. 14*a*—22*a*. Fol. 22*b* is blank.

Same work as the one described under No. 4938 of the D.C.S. MSS., Vol. X.

Complete.

R. No. **113.**

Palm-leaf. 16¼ × 1¼ inches. Foll. 94. Lines, 8 in a page. Grantha and Telugu. Slightly injured.

Purchased in 1910-11 from S. Śrīnivāsa Śāstrin of Tanjore.

(*a*) तत्त्वचिन्तामणिदीधितिप्रकाशिका—गादाधरी.

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ: GĀDĀDHARĪ.

Foll. 1*a*—50*a*. Foll. 1 and 2 contain Maṇi, and 3*a*—7*b* contain Dīdhiti.

Similar to the work described under No. 4040 of the D.C.S MSS., Vol. VIII.

Prāmāṇyavāda incomplete in the Pratyakṣakhaṇḍa.

Fol. 51 contains a few Subhāṣita Ślōkas. Foll. 50*b*, 52 and 53 are blank.

(*b*) प्रमाण्यवादः.

PRĀMĀṆYAVĀDAḤ.

Foll. 54*a*—94*a*. Fol. 94*b* is blank.

This is a treatise discussing the means by which the validity of a cognition is determined according to Nyāya philosophers: by Harirāmatarkavāgīśabhaṭṭācārya.

Similar to the work described under No. 4272 of the D.C.S. MSS., Vol. VIII.

Complete.

Beginning:

प्रामाण्यं स्वत एव ग्राह्यमिति मीमांसकाः। तत्रानुमन्वते—प्रामाण्य। ग्रहप्रतिबन्धकाभावकालीनयावत्स्वाश्रयीभूतज्ञानग्राह्यत्वस्य स्वतो ग्राह्यत्वम्- एवं च प्रामाण्यं स्वविषयकग्रहप्रतिबन्धकाभावकालीनस्वाश्रयज्ञानत्वव्याप्यविषयिताप्रतियोगि न वेति तन्मते विप्रतिपत्तिः। प्रामाण्यग्रहप्रतिबन्धकीभूतबाधादिबुद्धिकालीनज्ञानस्य प्रमाण्यविषयकतया बाधवारणाय कालीनान्तं ज्ञानविशेषणम्। प्रामाण्यभ्रमज्ञाने प्रामाण्यबुद्धिप्रतिबन्धिका बाधादिबुद्धिः अन्यथाख्यातिमनङ्गीकर्तॄणां गुरूणां मते अगृहीतासंसर्गज्ञानद्वयारोप इति ज्ञेयम्।

End:

तदानीं भिन्नविषयकप्रत्यक्षादिवारणाय तादृशप्रतिबन्धकताकल्पनस्यावश्यकत्वात् ज्ञानस्य . . . . . प्राचीनानां मतमेव निरसनीयमिति संक्षेपः ॥

Colophon:

इति श्रीहरिरामतर्कवागीशविरचि(तः प्रमाण्यवादः) समाप्तः ॥
लक्ष्मीनृसिंहशास्त्रिणा लिखितोऽयं ग्रन्थः ॥

R. No. **114.**

Palm-leaf. 7 × 1⅜ inches. Foll. 54. Lines, 9 in a page. Grantha. Good.

Purchased in 1910-11 from S. Rāmakṛṣṇavādyār of Palghat.

(*a*). तर्कवादः.

TARKAVĀDAḤ.

Foll. 1*a*—20*b*.

Similar to the work described under No. 4244 of the D.C.S. MSS., Vol. VIII.

Complete.

Beginning:

तर्कत्वं तावदापत्तित्वापरनामकं भ्रमप्रमासाधारणमाहार्यमानसज्ञानवृत्तिरापादयामीत्यनुभवसिद्धो मानसत्वव्याप्यो जातिविशेषः। न च चाक्षुषत्वादिकमादाय विनिगमनाविरहः, चक्षुरादिसंनिकर्षविरहदशायामपि तर्कोदयात्। अन्धादीनामपि तर्कोदयाच्च। एवमनुमितौ पक्षे साध्यव्याप्यहेतुमत्तापरामर्शवत् तर्के प्रत्यपि पक्षे आपाद्यव्याप्यापादकवत्तापरामर्शो हेतुः। तत्कार्यकारणभावश्चानुमितिकार्यकारणभाववदवधेयः।

End:

तथा सतीष्टापत्तिवशाच्चाक्षुषादिसामग्रीप्रतिबन्धकवशाद्वा आपत्त्यनुत्पादेऽपि तादृशतद्वत्तापरामर्शस्य तद्विशिष्टबुद्धिप्रतिबन्धकत्वापत्तेरिति समान इति तर्कप्रतिबन्धकरहस्यम् ॥

Colophon:

तर्कवादः समाप्तः ॥

(*b*) प्रतिबन्धकताविचारः.

PRATIBANDHAKATĀVICĀRAḤ.

Foll. 21*a*—51*a*.

An investigation into the nature and manner of obstruction by counteracting cognitions.

Incomplete.

Beginning:

तद्धर्मावच्छिन्नविशेष्यताकतदभाववत्तानिर्णयकाले तद्धर्मावच्छिन्नविशेष्यताकतद्विशिष्टबुद्धेरन्व(नुद)यात् पर्वतत्वा(द्य)वच्छिन्नविशेष्यताकसंयोगादिसंसर्गकवह्नित्वाद्यवच्छिन्नप्रकारकालौकिकज्ञानत्वावच्छिन्नं प्रति पर्वतत्वाद्यवच्छिन्नविशेष्यताकदैशिकविशेषणतासंसर्गकसंयोगादिसंसर्गावच्छिन्नवह्नित्वाद्यवच्छिन्नप्रतियोगिताकाभावप्रकारकानाहार्याप्रामाण्यज्ञानानास्कन्दितनिर्णयत्वेन प्रतिबन्धकत्वं कल्प्यते ।

End:

अत्रेदं विचारयामः—संशयादिसाधारणलौकिकान्यविशिष्टबुद्धित्वावच्छिन्नं प्रति विपरीतनिर्णयत्वेन प्रतिबन्धकता उभयमतेऽपि तुल्यैव । किंतु ।

(*c*) कारकवादार्थः.

KĀRAKAVĀDĀRTHAḤ.

Foll. 52*a*—54*a*. Foll. 51*b* and 54*b* are blank.

Similar to the work described under No. 3927 of the D.C.S. MSS., Vol. VIII.

Incomplete.

Beginning :

नत्वा शम्भोः पदाम्भोजं जयरामः समासतः ।
करोति कारकव्याख्यामिह संख्यावतां मुदे ॥

तत्र कारकाणि कर्तृकर्मकरणसंप्रदानापादानाधिकरणानि षट् । तत्त्वं च न क्रियानिमित्तत्वम, चैत्रस्य तण्डुलं पचतीत्यादौ संबन्धिनि चैत्रादावतिव्याप्तेः । अनुमत्यादिप्रकाशनद्वारा संप्रदानादेरिव तण्डुलादिसंपादनद्वारा संबन्धिनोऽपि पाकादिक्रियानिमित्तत्वात् । किं तु क्रियान्वितविभक्त्यर्थान्वितत्वम् ।

End :

अजां ग्राममित्यादौ ग्रामवृत्तित्वस्य प्रागजायामसत्त्वेनान्वयायोगात् । काशीतः प्रयागं नीयमानायामजायामजां काशीं नयतीति प्रयोगापत्तेश्च ।

R. No. **115.**

Palm-leaf. 8⅛ × 1¼ inches. Foll. 139. Lines, 8 in a page. Telugu. Slightly injured.

Purchased in 1910–11 from Rāmānuja Rao of Triplicane.

(*a*) गृहार्चाप्रतिष्ठाविधिः.

GṚHĀRCĀPRATIṢṬHĀVIDHIḤ.

Foll. 1*a*—11*a*.

Similar to the work described under No. 5236 of the D.C.S. MSS., Vol. XI.

Complete.

Beginning :

ऋषय ऊचुः—

भगवन् श्रोतुमिच्छावो(मो) विष्णुसंस्थापनक्रियाम् ।
यस्मिन् काले च कर्तव्यं विधिना केन सत्तम ॥

वसिष्ठ उवाच—

हरिसंस्थापनविधिं वक्ष्यामि मुनिसत्तमाः ।
यत् कर्तव्यं द्विजैस्तत्र तच्छृणुध्वमशेषतः ॥

* * * *

शङ्खचक्रधरो विप्रः प्रतिष्ठां कर्तुमर्हति ।
तेन प्रतिष्ठितस्तत्र संनिधत्ते सदा हरिः ॥

End:

अत्रोपकरणद्रव्यमाचार्याय प्रयच्छेत् । एकस्मिन् दिने चेत् तदा एकमुहूर्ते पञ्चगव्याधिवासः । एकमुहूर्ते जलाधिवासः । एकमुहूर्ते धान्याधिवासः । ततो नेत्रोन्मीलनादि प्रतिष्ठाकर्म ॥

Colophon:

इति श्रीपाञ्चरात्रे शास्त्रे शौनकीये गृहार्चाप्रतिष्ठाविधिः समाप्तः ॥

Foll. 11*b*, 13*b* and 14*b* are blank. Foll. 12, 13*a* and 14*a* contain Sadyassamprōkṣaṇa and Laghupratiṣṭhā.

(*b*) पञ्चशान्तिः.

PAÑCAŚĀNTIḤ.

Foll. 15*a*—18*b*.

Same work as the one described under No. 226 of the D.C.S. MSS., Vol. I, Part II.

Complete.

Foll. 19 and 20 are blank.

(*c*) छायापुरुषलक्षणम्.

CHĀYĀPURUṢALAKṢAṆAM.

Foll. 21*a*—22*b*.

A short treatise setting forth the predictions that may be made by a Yōgin by observing the nature and characteristics of his shadow figure in the sky.

Contains the first two Adhyāyas.

Beginning:

आत्मदेहं महाकायं यः पश्यति खगोचरे ।
उद्धरेत् सप्त गोत्राणि कुलमेकोत्तरं शतम् ॥

पित्रोरुभयपक्षश्च पत्नीपक्षस्तथैव च ।
गुरोरेककुलं चैव सप्त गोत्राणि मानवाः ॥
शुक्लवर्णमिदं देहं छायाव्योमनि सुन्दरि ।
यः पश्यति महाभागे तस्य पुण्यफलं शृणु ॥

* * * *

इति छायामाहात्म्यनिरूपणं नाम प्रथमोऽध्यायः ॥

End :

विनष्टे दक्षिणे बाहौ स्वबन्धुर्म्रियते ध्रुवम् ।
वामबाहुस्तथा भार्या विनश्यति न संशयः ॥
अशिरो मासमरणं विना जङ्घैर्दिनैर्नरः ।
अष्टाभिः स्कन्धदेशे तु छायानाशेन तत्क्षणात् ॥

Colophon :

इति छायापुरुषलक्षणनिरूपणं नाम द्वितीयोऽध्यायः ॥

Foll. 23—25 are blank.

(*d*) पाद्मतन्त्रम्.

PĀDMATANTRAM.

Foll. 26*a*—95*b*.

This is taken from the Pādmatantra of the Pāñcarātrāgama.

Same work as the one described under Nos. 5292 and 5293 of the D.C.S. MSS., Vol. XI.

Contains Adhyāyas 14 to 32 of the Kriyāpāda and Adhyāyas 1 to 9 of the Caryāpāda.

Foll. 96 and 97 are blank.

(*e*) दशनिर्णयः.

DAŚANIRṆAYAḤ.

Foll. 98*a*—131*b*.

Same work as the one described under No. 3124 of the D.C.S. MSS., Vol. VI.

Breaks off in the Sthālīpākanirṇaya, which forms the 5th Nirṇaya of this work.

Foll. 132—137 are left blank.

(*f*) पुण्याहवाचनम्.

PUṆYĀHAVĀCANAM.

Foll. 138*a*—139*a*. Fol. 139*b* is left blank.

Similar to the work described under No. 3367 of the D.C.S. MSS., Vol. VI.

Complete

Beginning:

अथ पुण्याहवाचनप्रयोग उच्यते—भगवतो बलेनेत्यादि तत्तद्द्रव्य-शुद्ध्यर्थं श्रीनारदीयोक्तप्रकारेण शुद्धिपुण्याहवाचनं करिष्ये इति संकल्प्य, चतुरश्रं गोमयेन पीठिकामुपलिप्य, सुधाचूर्णाक्षतादिभिरलंकृत्य गलन्तिकामर्घ्यपात्रं च प्रक्षाल्य, आराधनोक्तप्रकारेणार्घ्यपात्रादिदेवानावाह्य ।

End:

पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिर्वनस्पतयः शान्तिः शान्तिरेव शान्तिः ॥

Colophon:

पुण्याहवाचनं संपूर्णम् ॥

The MS. is said to have belonged to Pārthasārathi Ayyaṅgār and to have been copied by Veṅkaṭakṛṣṇamācār.

R. No. **116.**

Palm-leaf. 15¼ × 1⅜ inches. Foll. 58. Lines, 8 in a page. Grantha. Good.

Purchased in 1910–11 from S. Rāmakṣṇavādyār of Palghat.

(*a*) छन्दोगसूत्रवृत्तिः.

CHANDŌGASŪTRAVṚTTIḤ.

Foll. 1*a*—4*b*.

Similar to the work described under No. 1039 of the D.C.S. MSS., Vol. II. By Tālavṛntanivāsin.

Contains the Prayōga relating to Vājapēya and Aptōryāma.

Beginning:

करतां नः सुरासो हिं आयासो आ इन्द्रमुद्गाथिनो बृहोम् । आ इन्द्रमर्केभिरर्का इणा प्रेः । इन्द्रं वाणीरनूषा हिं ।

End:

वाजपेयस्य दक्षिणा दासीत्यादि उपरिष्टाद्वक्ष्यते । अप्तोर्यामस्य सहस्रम् । अहीनपागात् ॥

छन्दोगसूत्रस्य प्रयोगस्य वृत्तिरेषा प्रदीपिका ।
कृता त्रैविद्यनाथेन तालवन्तनिवा(सि)ना ॥

Colophon:

छन्दोगसूत्रवृत्तिः समाप्ता ॥

(*b*) महाव्रतप्रयोगः.

MAHĀVRATAPRAYŌGAḤ.

Foll. 5*a*—19*b*.

Gives directions for the performance of the sacrifice called Mahāvrata.

Complete.

Beginning:

महाव्रतस्य प्रयोग उच्यते—पञ्चविंशोऽग्निष्टोमः सर्वजिता वै देवाः सर्वमजयन् इत्यनुवाकोक्तस्य सर्वमिदंपरनामे(मधे)यस्य महाव्रतम् । उदगयने कस्यांचिदमावास्यायां दीक्षित्वोखामामाध्नीतेति वचनात् । अस्मिन् क्रतौ विश्वरूपा ज्योतिर्गान ।

End:

दशमस्य सदस्योपायमुद्गातैव ब्रूयादिति लिङ्गदेवमन्तर्निधनान्युक्तानि । अन्यत्सर्वमुदवसानीयान्तं प्रकृतिवत् ॥

Colophon:

समाप्तो महाव्रतप्रयोगः ॥

(c) पौण्डरीकक्लृप्तिः.

PAUṆḌARĪKAKḶPTIḤ.

Foll. 20*a*—42*a*. Fol. 42*b* is left blank.

On the mode of performing the sacrifice called Paunḍarīka.

Complete.

Beginning:

पौण्डरीकस्य क्लृप्तिरुच्यते—अभ्यासङ्गत्यः षडहस्त्रयाच्छन्दोमाश्चतुष्टोमोऽग्निष्टोमो विश्वजिदतिरात्रः इत्यनुवाकेन पौण्डरीक एकादशरात्र उक्तः। तत्र पौर्णमासी दीक्षा मासापवर्गाहीनास्तेषां द्वादशोपसदो द्वादश दीक्षा द्वादशोपसदो द्वादशप्रसूतः इति द्वादशाहस्य एकादशप्रसूतः पौण्डरीकस्य सुत्याभ्युच्चये दीक्षाप्रतिहासः षडुपसदिति धानञ्जय्यः।

End:

स्तोमविमोचनाद्यु(द)वसानीयान्तमाहरन्ती(ति)सुब्रह्मण्या न कर्तव्या उत्तरार्धा हरन्तीति वचनात्॥

Colophon:

पौण्डरीकक्लृप्तिः समाप्ता॥

(d) ज्योतिष्टोमादिसामादि.

JYŌTIṢṬŌMĀDISĀMĀDI.

Foll. 43*a*—58*b*.

Gives the Sāmans to be recited in Jyōtiṣṭōma and such other sacrifices.

Complete.

Beginning:

उपास्मै वायता नरो वभ्रवे न स्वतवसे पृथग्गावो न भूर्न य आशुरर्ष बृहन्मते पवमानस्य ते कवे। अग्न आयाहीत्याज्या प्रसोमासो विपश्चित इति गायत्रं चाश्वं च।

End:

चतुर्विंशमग्निष्टोमसाम। षड्भ्यो हिं करोति । स द्वाभ्यामिति । एवमुत्तरास्त्रयः पर्यायाः । एकादशमहः विश्वजितातिरात्रः । तस्य त्रिवृद्बहिष्पवमानम् । उकपत्वांजांमयोंगिरोम् ॥

R. No. **117.**

Śrītāla. 19×2 inches. Foll. 244. Lines, 11 in a page. Grantha. Good.

Purchased in 1910-11 from S. Rāmakṛṣṇavādyār of Palghat.

भावानन्दीप्रकाशिका.

BHĀVĀNANDĪPRAKĀŚIKĀ.

Same work as the one described under No. 4100 of the D.C.S. MSS., Vol. VIII, with difference in the end only · by Vajraṭaṅka.

From the beginning of Anumāna to the end of Pūrvapakṣa-vyāpti.

End :

सामान्याभावग्रहस्थले च विशिष्टाभावग्रहकल्पनयैवानुमितिः। अतो न तदनुरोधेन निरुक्तकार्यतावच्छेदकाभेदाश्रयणमिति। शेषमिति। व्यापकसामानाधिकरण्यज्ञानस्य कारणत्वमेव न संभवतीत्यादिकं लाघवात् साध्यवदन्येत्यादिकं चेत्यर्थः ॥

Colophon:

इति पूर्वपक्षग्रन्थव्याख्या ॥

R. No. **118.**

Śrītāla . 13½×2¼ inches. Foll. 229. Lines, 12 in a page. Grantha. Good.

Purchased in 1910-11 from S. Rāmakṛṣṇavādyār of Palghat.

Foll. 1—4 are blank.

(*a*) **रामायणदीपिका.**

RĀMĀYAṆADĪPIKĀ.

Foll. 5*a*—203*b*.

Same work as the one described under No. 1900 of the D.C.S. MSS., Vol. VI., Part I.

Contains only the Bāla and the Ayōdhyā Kāṇḍas.

Beginning:

धर्तासौ धरिति(त्री)भरमिति भुजगाधीश्वरो वंशवृद्धिः संभूयते अंशुमालीदलितपरिभवाविन्यद्योतिरिन्द्रः (?) । आसां संजातहर्षाः सुरमनोऽध्वरी कुर्वे श्रीरामायणदीपिकाम् ।

'वाल्मीकिरभवद्ब्रह्मा वाणी वाक्तस्य रूपिणी' इति स्कान्दे पार्वतीं प्रति शिववचनम् । तथा च ब्रह्मणोंशेन संभूतो वाल्मीकिः ब्राह्मलौकिकं शतकोटिप्रविस्तरं रामचरितं भुवि ब्राह्मणादीनामधिकारिणां तापत्रयविमोचनाय संक्षिप्य रचयितुमुद्यक्तः × × × × तदिदं प्राक्तननानाव्याख्यानुसारेण व्याक्रियते—तप इत्यादि । अन्वयमुखेन व्याख्यायते—तपस्वी प्रशस्ततपाः । मनसश्चेन्द्रियाणां चैकाग्र्यं परमं तपः इति श्रुतेश्चित्तैकाग्र्यं तपः, तद्वान् ।

End:

उच्छिष्टमशुचिं प्रमत्तमसावधानम् । तान् राक्षसव्यालान् क्षमं युक्तम् । इतीव एवमेव मार्गोपदेशपूर्वकमिति यावत् । कृतस्वस्त्ययनः कृतमङ्गलाशीर्वादः ॥

Colophon:

इति वैद्यनाथदीक्षितविरचितायां श्रीरामायणदीपिकायामयोध्याकाण्डे एकोनविंशत्यधिकशततमः सर्गः ॥

अयोध्याकाण्डः समाप्तः ॥

Foll. 204 and 205 are blank.

(*b*) दक्षिणामूर्त्यष्टकम्.

DAKṢIṆĀMŪRTYAṢṬAKAM.

Foll. 206*a*—207*a*.

This is a hymn of ten stanzas addressed to Dakṣiṇāmūrti, a manifestation of Śiva : by Śaṅkarācārya.

Printed in the Bibliotheca Sanskṛita No. 6. The first stanza

herein given as forming part of the text belongs to the commentary of Svayamprakāśayati.

Complete.

Beginning:

मौनव्याख्याप्रकटितपरब्रह्मतत्त्वं युवानं
वर्षिष्ठान्तेवसदृषिगणैरावृतं ब्रह्मनिष्ठैः ।
आचार्येन्द्रं करकलितचिन्मुद्रमानन्दमूर्तिं
स्वात्मारामं मुदितवदनं दक्षिणामूर्तिमीडे ॥
विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतं
पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया ।
यः साक्षात्कुरुते प्रबोधसमये स्वात्मानमेवाद्वयं
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥

End:

भूरम्भांस्यनलोऽनिलोऽम्बरमहर्नाथो हिमांशुः पुमा-
नित्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम् ।
नान्यत्किंचन विद्यते विमृशतां यस्मात् परस्माद्विभोः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥
सर्वात्मत्वमिति स्फुटीकृतमिदं यस्मादमुष्मिंस्तवे
तेनास्य श्रवणात्तदर्थमननाद्ध्यानाच्च सङ्कीर्तनात् ।
सर्वात्मत्वमहाविभूतिसहितं स्यादीश्वरत्वं स्वतः
सिध्येत्तत्पुनरष्टधा परिणतं चैश्वर्यमव्याहतम् ॥

* * * *

ओं नमो भगवते दक्षिणामूर्तये मह्यं मेधां प्रज्ञां प्रयच्छ स्वाहा ॥

(c) दक्षिणामूर्तिपञ्जरम्.

DAKṢIṆĀMŪRTIPAÑJARAM.

Foll. 207*a*—208*b*. The remaining foll. are blank.

Same work as the one described under No. 6376 of the D.C.S. MSS., Vol. XIII.

Complete.

R. No. **119.**

Śrītāla. 13½ × 2⅛ inches. Foll. 189. Lines, 12 in a page. Grantha. Good.

Purchased in 1910-11 from S. Rāmakṛṣṇavādyār of Palghat.

(*a*) रामायणदीपिका.

RĀMĀYAṆADĪPIKĀ.

Foll. 8*a*--117*b*. The first seven foll. are blank.

Similar to the work described under No. 1900 of the D.C.S MSS., Vol. IV, Part I.

Contains Āraṇya and Kiṣkindhā Kāṇḍas only.

Beginning :

अथ श्रीमदारण्यकाण्डो व्याख्यायते—अथ पितृवाक्यपरिपालनाय दण्डकां प्रविष्टस्य रामस्य वृत्तं विस्तरेण वक्तुमुपक्रमते—प्रविश्येति । दण्डकारण्यसंज्ञकं महारण्यं दण्डकाख्यस्य राज्ञो महाराष्ट्रदेशः शुक्रशापवशान्महारण्यमभूत् । ततः प्रभृति स देशो दण्डकारण्यसंज्ञितः ।

End :

ररास ननाद । स्ववृत्तिनानाप्राणिद्वारेति शेषः । पाने पानप्रवृत्तौ । संसर्गे च कर्कशैः अतिसक्ताचित्तैः । शृङ्गशिलानामुद्घातो ध्वंसो यस्य स तथा । मनसा जगामेति सस्मारेत्यर्थः ॥

Colophon :

इति श्रीमद्वैद्यनाथदीक्षितविरचितायां श्रीमद्रामायणदीपिकायां किष्किन्धाकाण्डे सप्तषष्टितमः सर्गः ॥ किष्किन्धाकाण्डदीपिका ॥

(*b*) रामायणव्याख्या — कतकम्.

RĀMĀYAṆAVYĀKHYĀ : KATAKAM.

Foll. 118*a*—189*b*.

This commentary on the Rāmāyaṇa appears to be different from the Amṛtakataka described under Nos. 1890—1892 of the D.C.S. MSS., Vol. IV.

Contains Sundarakāṇḍa only.

Beginning:

अथ सुन्दरकाण्डे प्रथमसर्गे व्याख्येयानि व्याख्यायन्ते—पूर्वस्मिन् काण्डे मनसा गमनं कृतमित्युक्तम्। इदानीं कायेनापि गमनं कर्तुमैच्छदित्याह—तत इत्यादिना। अत्र गन्तुमिति पदमध्याहर्तव्यम्। शत्रुकर्शनो हनूमान्।

End:

अत एवादीनभाषिणी भूत्वा मम शान्तिं स्वस्त्ययनमुवाच ॥

Colophon:

इति श्रीमद्रामायणकतकटीकायां सुन्दरकाण्डे अष्टषष्टितमः सर्गः ॥

R. No. 120.

Śrītāla. $7\frac{1}{8} \times 1\frac{3}{4}$ inches Foll 52. Lines, 7 in a page. Grantha and Tamil. Good.

Purchased in 1910–11 from Mīnākṣiyammāḷ of Koḍuvāyūr.

(*a*) महात्रिपुरसुन्दरीमन्त्रः.

MAHĀTRIPURASUNDARĪMANTRAḤ

Foll. 1*a*—4*a*.

Similar to the work described under No. 6387 of the D.C.S. MSS., Vol. XIII.

Complete.

Beginning:

ब्रह्माद्यशेषगुरुपारम्पर्यक्रमेण स्वगुरुपादाम्बुजं यावत् तावत् प्रणौमि। . . . . . मूलेन हृदयन्यासं कृत्वा अस्य श्रीविद्यात्रिपुरसुन्दरीमहामन्त्रस्य आनन्दभैरव ऋषिः, विराट् छन्दः, श्रीमहात्रिपुरसुन्दरी देवता, इं बीजम्, ह्रीं शक्तिः, ईं कीलकं श्रीमहात्रिपुरसुन्दरीप्रसादसिद्ध्यर्थे जपे विनियोगः।

End:

ओं ऐं श्रीं ह्रीं ह्रीं श्रीं क्लीं त्रिभुवनाधिपतये नमः।
ओं क ए ई ल ह्रीं ह स क ह ल ह्रीं स क ल ह्रीं स क ल ह्रीं ॥
पञ्चदशाक्षरीमन्त्रम् ॥

(*b*) भुवनेश्वरीकल्पः.
BHUVANĒŚVARĪKALPAḤ.

Foll. 4*a* - 6*a*.

Same work as the one described under No. 7988 of the D.C.S. MSS., Vol. XV.

Contains the first Paṭala only.

(*c*) भुवनेश्वरीकच्छपुटम्.
BHUVANĒŚVARĪKACCHAPUṬAM.

Foll. 6*b*—9*a*.

Same work as the one described under No. 7987 of the D.C.S MSS., Vol. XV.

Wants beginning and end.

(*d*) मन्त्रावली—यन्त्रसहिता.
MANTRĀVALĪ WITH YANTRAS.

Foll. 9*a*—52*b*.

Mystic diagrams connected with various Mantras are herein given; and the Bīja letters are written in Malayalam and Tamil characters.

Complete.

R. No. **121.**

Palm-leaf. 7¼ × 1½ inches. Foll. 180. Lines, 8 in a page Grantha and Tamil. Very much injured.

Purchased in 1910–11 from Rāmānuja Rao of Triplicane.

(*a*) दशाफलम्.
DAŚĀPHALAM.

Foll. 1*a*—102*b*.

This is a treatise on the influences of the various planets on the life and fortune of a person when they are severally in the ascendant.

Complete.

Beginning:

आत्मायते यो हृदयाब्जकोशे मार्गायते जन्मविवर्जितानाम् ।
जपायते वै जपतामभीष्टं ददातु नः सोऽन्यतरानपेक्षम् ॥

तत्तद्दशासु भुक्ती . . . . . शुभमहीशानाम् ।
पाराशर्यमतेन ब्रवीमि शास्त्रार्थमखिललोकानाम् ॥

सूर्यमहादशासंवत्सरम्—६. फलम्—

देशान्तरेषु निजबन्धुवियोगदुःख-
हृद्रोगरोगभयचोरजनाद्यपीडा ।
पूर्वस्थितस्य विभवस्य धनस्य नाशो
भानोर्दशागमनकाल मि(इ)दं भव(वद)न्ति ॥

End:

प्रमेहकामिलारोगं महादुःखं धनक्षयम् ।
पुत्रभार्यावियोगं च निगलं बन्धुनाशनम् ॥
द्वितीये द्यूननाथे वा अपमृत्युर्भविष्यति ।
तद्दोषपरिहारार्थं दुर्गादेवीजपं चरेत् ।
छागदानं प्रकुर्वीत सर्वसंपत्प्रदायकम् ॥

Colophon:

शुक्रदशा संपूर्णा ॥

(*b*) सर्वाष्टकवर्गः.

SARVĀṢṬAKAVARGAḤ.

Foll. 103*a*—162*a*. Fol. 162 is blank.

This is a treatise on the method of testing the accuracy of the relative position of the planets in horoscopes.

Complete.

Beginning:

रलललखलधंशलेशमारं रवेश्च ।
चकलशररणरारागसाकं च चन्द्रगाः ॥
कुवशगणफलभूभभूषसारं कुजेश्च ।

End:

त्रिंशाधिकफलानि स्युर्लग्नभाग्यायकर्मसु ।
विंशाद्द्वाविंशवर्षाद्वा राजा वा तत्समो भवेत् ॥

Colophon :

अष्टकवर्गफलं समाप्तम् ॥

The MS. is dated: 17th of Mārgaḷi in the year Viśvāvasu. Foll. 163—180 contain some notes in Tamil regarding horoscopes of persons whose exact birth time is not known, and regarding auspicious days for commencing journeys, etc.

R. No. **122.**

Śrītāla. 10 × 2⅜ inches. Foll. 39 Lines, 11 in a page. Grantha. Good.

Purchased in 1910–11 from Mīnākṣiyammāḷ of Koḍuvāyūr.

(*a*) परिषद्विधायकप्रायश्चित्तम्.

PARIṢADVIDHĀYAKAPRĀYAŚCITTAM.

Foll. 1*a*—7*b*.

Similar to the work described under R. No. 65(*p*) *ante*.

Complete.

Beginning :

विघ्नेश्वरपूजा, अनुज्ञा, अशेषे हे परिषत् . . . राशौ जातस्य शर्मणः मम जन्माभ्यासाज्जन्मप्रभृति . . सर्वेषां पापानां सद्यः अपनोदकं कर्मविपाकोक्तप्रकारेण परिषद्विधायकानुवादकपुरःसरं . . . मम शरीरशुद्ध्यर्थं मृत्तिकास्नानं करिष्ये—

मृत्तिके हन मे पापं यन्मया दुष्कृतं कृतम् ।
त्वया हतेन पापेन जीवामि शरदः शतम् ॥

End :

आशीर्वादपुरःसरं ब्राह्मणान् संतोषयेत् । भूरिभोजनं च कुर्यात् ॥

(*b*) रुद्रैकादशिनीप्रयोगः.

RUDRAIKĀDAŚINĪPRAYŌGAḤ.

Foll. 8*a*—21*a*.

This gives the mode of conducting a sacred bath with the water consecrated by the recitation of the Rudraprasna of the Kṛṣṇa Yajur Vēda.

Incomplete.

Beginning:

एकोनसप्तत्युत्तरशतविभागपक्षमाश्रित्य शतांशहोमविधानेन रुद्रैकादशिन्याख्यकर्म कर्तुं योग्यतासिद्धिमनुगृहाण। संकल्पः—एभिर्ब्राह्मणैः सह बोधायनोक्तप्रकारेण एकोनसप्तत्युत्तरशतविभागपक्षमाश्रित्य शतांशहोमविधानेन रुद्रैकादशिन्याख्यं कर्म करिष्ये। . . . . .

महादेवः शिवो रुद्रः शङ्करो नीललोहितः।
ईशानो विजयो भीमो देवदेवो भवोद्भवः॥ मध्ये आदित्यात्मकं रुद्रमावाहय

अथातो रुद्रस्नानार्चनाभिषेकविधिं व्याख्यास्यामः—

महान्यासजपं कृत्वा, वक्ष्यमाणप्रकारेण षोडशोपचारान् कृत्वा। रुद्रत्रिशतनामानि अर्चनानि करोति। द्राप इत्यनुवाकेन प्रदक्षिणम्। सहस्राणीति नमस्कारः। चमकेन समग्रेण प्रार्थना। अथैकादश वारान् जपेयुः। अथ होमविधिरुच्यते।

End:

देवानां हृदयेभ्यो नमः। आनिर्हतेभ्यो नमः। देवानां हृदयेभ्यो नमः। आमीवत्केभ्यो नमः। देवानां हृदयेभ्यो नमः। उमामहेश्वराभ्यां नमः। सर्वोपचारान् समर्पयामि। अस्य श्रीरुद्राध्यायप्रश्नमन्त्रस्य। एकादशवारं जपेयुः॥

(*c*) विषूचिकाहरमन्त्रः.

VIṢŪCIKĀHARAMANTRAḤ.

Foll. 28*a*—29*b*. Foll. 21*b*, 22, 23*a*, 25—27 and 30 are blank; and the foll. 23*b* and 24 contain a few lines about Gōdāna.

Similar to the work described under No. 7233 of the D.C.S. MSS., Vol. XIV.

Complete.

Beginning:

एवमस्त्विति तामुक्त्वा पुनराह पितामहः ।
सूचिका सोपसर्गा त्वं भविष्यसि विषूचिका ॥
सूक्ष्मया मायया सर्वलोकाहिंसां करिष्यसि ।

* * * *

ओं नमो भगवति विष्णुशक्तिमेनाम् ओं हर हर नय नय पच पच मथ मथ उत्सादयोत्सादय देरे कुरु कुरु स्वाहा । हिमवन्तं गच्छ ।

End:

शतं हिमा अशीय भेषजेभिः । व्यस्मद् द्वेषो वितरं व्यंहः ।
व्यमीवांश्चातयस्वा विषूचीः । इति ब्रह्मवाक्यम् ॥

(*d*) शताभिषेकविधिः.

ŚATĀBHIṢĒKAVIDHIḤ.

Foll. 31*a*—33*a*. Fol. 33*b* is blank.

On the manner of conducting the holy bath in regard to a person who lives long enough to see 1,000 full moons.

Similar to the work described under No. 3136 of the D.C.S. MSS., Vol. VII.

Complete.

Beginning:

अथातः शताभिषेकं व्याख्यास्यामः । शतसंवत्सरजीविनः सहस्रचन्द्रदर्शिनः उदगयन आपूर्यमाणपक्षे पुण्ये नक्षत्रे देवयजनाप्रणीताभ्यकृत्वा अग्रेणाग्निं व्रीहियवैर्वा मिश्रितं सुवर्णं स्ववित्तानुगुणं चतुरश्र स्थण्डिलं करोति ।

End:

ब्राह्मणान् संपूज्याशिषो वाचयित्वा दश पूर्वान् दशापरानात्मानं चैकविंशतिं पतिं च पुनाति । पुत्रपौत्रैश्च षष्टिवर्षसहस्राणि स्वर्गलोकं गमयतीति

ब्रह्मणः सायुज्यं सलोकतामाप्नोति इत्याह भगवान् बोधायनः । दश दानानि कृत्वा ।

Colophon:

शताभिषेकः समाप्तः ॥

Foll. 34—39 contain miscellaneous passages from several works.

R. No. 123.

Palm-leaf. 10⅞ × 1½ inches. Foll. 55. Lines, 5 in page. Grantha. Good.

Purchased in 1910 11 from Mīnakṣiyammal of Koḍuvāyūr.

(*a*) बोधायनश्राद्धप्रयोगः.

BŌDHĀYANAŚRĀDDHAPRAYŌGAḤ.

Foll. 1*a*—28*b*.

On the manner of offering oblations to one's manes, according to Bōdhāyana.

Complete.

Beginning:

भवद्भिरनुज्ञातः पुण्याहं वाचयिष्ये.

* * * *

शुक्लाम्बर . शान्तये ॥ ओं तदेव लग्नं . . . प्रीत्यर्थं द्वादशाह-विधानेन विच्छिन्नौपासनाग्निसंधानं करिष्ये ! तदङ्गपुण्याहवाचनं च करिष्ये । . . . . . स्वामिनः . . . श्राद्धं प्रवर्तये । प्रवर्तय । दर्भेष्वासीनः संकल्पः—गोत्रस्य शर्मणः पितृभूतस्य मम पितुः . . . विधानेनाद्य करिष्ये ।

End:

प्राणे निविष्टः । त्वाय । पिण्डपितृदेवताभ्यो नमः । सकलाराधनैः स्वर्चितम् । रक्षा । परेद्युस्तर्पणम् ॥

(*b*) बोधायनजयादिहोमः.

BŌDHĀYANAJAYĀDIHŌMAḤ.

Foll. 29*a*—49*b*.

Similar to the work described under No. 3623 of the D.C.S. MSS., Vol. VII, but according to Bōdhāyana.

Complete.

Beginning :

चित्तं च स्वाहा । प्रजापतय इदम् । अग्निर्भूतानां . . . स्वाहा । भूतानामधिपतये इदम् । पितरः पितामहाः . . . इह मावत । इन्द्रो ज्येष्ठानां . . . स्वाहा । ज्येष्ठानामधिपतये इन्द्रायेदम् । पितरः ।

End :

त्वं नो अग्ने । स त्वं नो अग्ने । त्वमग्ने अयासि प्रजापते ।

Colophon :

बोधायनजयादिः समाप्तः ॥

(*c*) चौलप्रयोगः.

CAULAPRAYŌGAḤ.

Foll. 51*a*—53*a*. Fol. 50 is blank.

Similar to the work described under No. 3619 of the D.C.S. MSS., Vol. VII.

Incomplete.

Beginning :

विघ्नेश्वरपूजा । संकल्पः—जातस्य कुमारस्य चौलकर्माङ्गं हिरण्यरूपेणाभ्युदयं करिष्ये । जातं कुमा(रं)चौलकर्मणा संस्करिष्ये । पुण्याहवाचनं करिष्ये ।

End :

ये केशिन . . . सृज । यद्वा क्षुरः परिववर्ज . . . अथो वीर्येण । ऊर्ध्वच्छेदनम् ॥

Foll. 58*b*—55*b* give an index of the hymns recited in Jayādi and Prāyaścitta Hōmas.

R. No. 124.

Palm-leaf $11\frac{3}{4} \times 1\frac{3}{4}$ inches. Foll. 36. Lines, 9 in a page. Grantha. Good.

Purchased in 1910–11 from S. Ramakṛṣṇavādyar of Palghat.

वासुदेवमननसङ्ग्रहः.

VĀSUDĒVAMANANASAṄGRAHAḤ.

This gives a summary of the work called Vāsudēvamanana of Vāsudēvayati which deals with the doctrines of the Advaita Vēdānta.

Contains Varṇakas one to twelve complete.

Beginning:

योऽवतीर्येह आचार्यरूपेण यतिनां मुदे ।
श्रमिन्नारायणं वन्दे तं हरिं करुणानिधिम् ॥
मननाख्यं प्रकरणं वासुदेवयतीश्वरैः ।
रचितं विस्तरेणाद्य सङ्ग्रहेण प्रकाश्यते ॥
बालानामु(प)काराय ममापि ज्ञानसिद्धये ।
तत्र श्रीबालगोपालकृष्णस्सन्निहितो भवेत् ॥

इह खलु धर्मार्थकाममोक्षाणां चतुर्णां पुरुषार्थानां मध्ये मोक्ष एव परमपुरुषार्थः, नित्यत्वात् । न स पुनरावर्तत इति श्रुतेः । इतरेषां त्रयाणां न तथात्वमनित्यत्वात् । तद्यथेह कर्मचितो लोकः ।

End:

जडोऽहं दुःखीत्यविवेकेन पतितानां सकलजीवानां भ्रान्तिं निराकर्तुमेव, न तु सच्चिदानन्दपदानां भिन्नप्रतिपादनार्थम्; अपि(तु) आत्मानं द्रव्यत्वेनाङ्गीकृत्यात्मनस्सत्त्वं धर्मश्चित्त्वं सुखं च गुण इति वदन्ति । तन्निरासार्थश्चात्मनस्सच्चिदानन्दपदं लक्षणम् ॥

Colophon:

इति मनने द्वादशं वर्णकं समाप्तम् ॥

R. No. 125.

Palm-leaf. 17¼ × 1½ inches. Foll. 19. Lines, 6 in a page. Grantha. Good.

Purchased in 1910–11 from Gōpālasāmi Ayyaṅgār of Mannargudi.

शास्त्रैक्यवादः.

ŚĀSTRAIKYAVĀDAḤ.

Same work as the one described under No. 5051 of the D.C.S. MSS., Vol. X

Complete.

R. No. 126.

Palm-leaf. 19 × 1½ and 16⅝ × 1⅝ inches. Foll. 31. Lines, 8 in a page. Grantha. Good.

Purchased in 1910–11 from Gōpālasāmi Ayyaṅgār of Mannargudi.

(*a*) समासवादः.

SAMĀSAVĀDAḤ.

Foll. 1*a*—14*a*. Fol. 14*b* is blank.

Same work as the one described under No. 5059 of the D.C.S. MSS., Vol. X.

Complete.

(*b*) समासवादः.

SAMĀSAVĀDAḤ.

Foll. 15*a*—31*a*. Fol. 31*b* is blank.

Same work as the above.

Complete.

R. No. 127.

Palm-leaf. 18½ × 1¼ inches. Foll. 363. Lines, 8 in a page. Telugu. Good.

Purchased in 1910–11 from Rāmānuja Rao of Triplicane.

ब्रह्मसूत्रभाष्यव्याख्या—श्रुतप्रकाशिका.

BRAHMASŪTRABHĀṢYAVYĀKHYĀ: ŚRUTAPRAKĀŚIKĀ.

Same work as the one described under No. 4963 of the D.C.S. MSS., Vol. X.

Contains only the first Pāda of the first Adhyāya.

R. No. **128.**

Palm-leaf. 17⅛ × 1⅛ inches Foll. 18. Lines, 6 in a page. Grantha. Slightly injured.

Purchased in 1910–11 from Gōpālasāmi Ayyaṅgār of Mannargudi.

Foll. 1 and 2 contain some notes on a portion of the Nyāyabhāskara of Anantācārya.

(*a*) विषयतावादः

VIṢAYATĀVĀDAḤ.

Fol. 3 only.

Same work as the one described under No. 5000 of the D.C.S. MSS., Vol. X.

Wants beginning.

(*b*) सामानाधिकरण्यवादः.

SĀMĀNĀDHIKARṆYAVĀDAḤ.

Foll 3*b*—18*b*.

Similar to the work described under No. 5050 of the D.C.S. MSS., Vol. X. By Anantrāya of Śēṣārya family and a resident of Yādavādri.

Complete.

Beginning:

श्रीरमणचरणयुगलं ध्यात्वा नत्वा च सम्यगाचार्यान् ।
सामानाधिकरण्ये वादं वितनोत्यनन्तार्यः ॥

इह खलु सर्वं खल्विदं ब्रह्म, तत्त्वमसि, अयमात्मा ब्रह्मेति समानाधिकरणवाक्यार्थो विचार्यते—सामानाधिकरण्यं नाम अभेदसम्बन्धा.

वच्छिन्नप्रकारताकबोधजनकवाक्यत्वम् । स्तोकं पचतीत्यादिक्रियाविशेषण-स्थले सामानाधिकरण्यमिष्टमेव । अत्र वाक्यत्वनिवेशात् न तादृशबोध-जनकपदज्ञानादावतिव्याप्तिः ।

End :

अपृथक्सिद्धिसंसर्गतामतेऽपि ब्रह्मादिपदस्य ब्रह्मशरीरकत्वावच्छिन्नल-क्षणाग्रहदशायां तादृशयोग्यताज्ञानादीनां हेतुत्वस्य क्लृप्तत्वेन गौरवाभा-वात् । अधिकमन्यत्रानुसन्धेयम् ॥

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

Colophon :

इति सामानाधिकरण्यवादस्समाप्तः ॥

R. No. **129.**

Palm-leaf. 14½ × 1⅜ inches. Foll. 18 Lines, 6 in a page. Grantha. Good

Purchased in 1910-11 from Gōpālasāmi Ayyaṅgār of Mannargudi.

धर्मज्ञसमयप्रामाण्यप्रकाशिका.

DHARMAJÑASAMAYAPRĀMĀṆYAPRAKĀŚIKĀ.

Foll. 1*a*—16*a*. Fol. 16*b* is blank.

A dissertation on the superiority of the authoritativeness of the conduct of Śiṣṭas or persons who have full faith in the Vēdas over that of the Śāstras. Tamil stanzas from Divyaprabandhas are also quoted. By Śrīnivāsadāsa of Vāḍhūla family and a disciple of Mahācārya.

Complete.

Beginning :

सगोदभक्तोचितसाक्षिकं मे स्वयं शिरस्यङ्घ्रियुगप्रदाता ।
सुसुन्दरस्सुन्दरयोगिवर्यस्समास्समस्ता जयतु क्षमायाम् ॥

श्रीमद्भक्तोचितैश्वर्यधुर्यसेनाश्वरायितान् ।
संश्रयामीह वाधूलश्रीनिवासमहागुरून् ॥

परं तद्गरुडारूढं तत्त्वं यस्य वशंवदम् ।
तथा स्थितिगती भेजे तमीडे घनदेशिकम् ॥

* * * *

आलक्ष्मीनाथमास्माकीं नत्वा गुरुपरम्पराम् ।
धर्मज्ञसमयस्यात्र प्रामाण्यं सत् प्रकाश्यते ।'

श्रियःपतेः परमकारुणिकस्य सर्वेश्वरस्य स्वाभाविकसौहार्दबलात्कारकारितनिर्हेतुककटाक्षवीक्षाविशेषसन्धुक्षितमोक्षाभिलाषस्य संसारदवदहनदन्दह्यमानस्वस्वरूपसमुज्जीवनहेतुभूतालौकिकप्रमेयनिर्णयस्य प्रबलप्रमाणनिश्चयायत्तत्वेन प्रथमं तन्निश्चयः कर्तव्यः । तत्र तावत् धर्मज्ञसमय एव प्रबलं प्रमाणम्; धर्मज्ञसमयः प्रमाणं वेदाश्चेत्यापस्तम्बधर्मे तस्य प्रथमोपात्तत्वात् । तत्रान्वाचयार्थकचकारेण तदपेक्षया शास्त्रस्य दौर्बल्याभिधानाच्च ।

End :

तस्मात् भगवत्कटाक्षविशेषेण सञ्जातमोक्षाभिलाषस्य स्वस्वरूपसमुज्जीवनहेतुभूतसपरिकरभगवद्दास्यात्मकपरमधर्मरूपसकलशास्त्रतात्पर्यगोचरालौकिकप्रमेयविषये धर्मज्ञसमय एव प्रबलं प्रमाणमिति सिद्धम् ॥

श्रीवरवरमुनिचरणौ तरुणसरोजातमृदुलरमणीयौ ।
अपि मम शिरस्यकस्मात्करुणापरिणामदापितौ कलये ॥

Colophon :

इति श्रीवाधूलकुलतिलकश्रीमन्महार्यचरणयुगलभावितेन श्रीनिवासदासेन विरचिता धर्मज्ञसमयप्रामाण्यप्रकाशिका समाप्ता ॥

Foll. 17 and 18 contain miscellaneous passages.

R. No. 130.

Palm-leaf. 17½ × 1⅜ inches. Foll. 56. Lines, 8 in a page. Grantha. Slightly injured

Purchased in 1910-11 from Gōpālasāmi Ayyaṅgār of Mannargudi.

सिद्धान्तसिद्धाञ्जनम्.

SIDDHĀNTASIDDHĀÑJANAM.

Same work as the one described under No. 5069 of the D.C.S. MSS., Vol. X.

Contains Paricchēdas one to three complete and four almost complete.

R. No. **131.**

Palm-leaf. 14¼ × 1½ inches. Foll. 16. Lines, 6 in a page. Grantha. Good.

Purchased in 1911 from Mīnākṣiyammāḷ of Koḍuvāyūr.

वाञ्छाकल्पलता.

VĀNCHĀKALPALATĀ.

Foll. 1*a*—5*b*. The rest are blank.

A Mantra addressed mainly to Rudra with the object of securing the favour of Mahātripurasundarī. The repetition of the Mantra is intended to enable one to accomplish the desired objects.

Contains Paryāyas one to four complete.

Beginning:

अस्य श्रीवाञ्छाकल्पलताया आनन्दभैरवगणकानङ्गवसिष्ठकाश्यपविश्वामित्रसंवर्ता नाम ऋषयः, देवीगायत्रीनिचृद्गायत्रीत्रिष्टुप्जगतीपङ्क्तयश्छन्दांसि श्रीमहात्रिपुरसुन्दरीमहागणपती(ति)विद्यागणपती(ति)संवादाग्न्यमृतरुद्रा देवताः, ओं बीजं, ऐं शक्तिः, श्रीं कीलकं, श्रीमहात्रिपुरसुन्दरीप्रसादसिद्ध्यर्थे वाञ्छितपुरुषार्थसिद्ध्यर्थे वाञ्छाकल्पलताजपे विनियोगः ।

End:

ओं ह्रीं वं ठं अमृतरुद्राय . वशमानय स्वाहा । दम(य)न्तीनलाभ्यां . संवादाग्ने प्रसीद मे ॥

इति चतुर्थः पर्यायः ॥

Fol. 5*b* contains also some prayers for the protection of the magician while invoking the deities.

R. No. 132.

Śrītāla. 13⅞ × 2⅛ inches. Foll. 263. Lines, 9 in a page. Grantha. Good.

Purchased in 1910-11 from S. Rāmakṛṣṇavādyār of Palghat.

(*a*) अनर्घराघवव्याख्यानम्—विक्रमीयम्.

ANARGHARĀGHAVAVYĀKHYĀNAM: VIKRAMĪYAM.

Foll. 1*a*—192*a*.

This is a commentary on the Anargharāghava of Murāri: by Mānavikrama, a disciple of Karuṇākara, Paṅkajākṣa and Rāma. The author seems to have lived in Calicut.

Contains one to five Aṅkas complete and the sixth incomplete

Beginning:

वन्दे चन्द्रकलापीडं सर्वज्ञं सर्वभूतये ।
गौरीसहितवामाङ्कं ज्ञानरूपं कृपानिधिम् ॥
कुक्कटक्रोडगा लक्ष्मीरक्ष्य . . . . . ।
. . . . वासिन्यै तस्यै देव्यै नमो नमः ॥
वेदवाक्यप्रमाणेषु प्रवीणैर्ब्राह्मणोत्तमैः ।
प्रत्यब्दं सेव्यमानं तं स्थलीश्वरमुपास्महे ॥
देदीपीतु ममोपान्ते देवदानवपूजितम् ।
अन्तरायविघाताय दन्तावलमुखं महः ॥

* * * *

करुणाकरसंज्ञांस्तान् पङ्कजाक्षाख्ययान्वितान् ।
रामाभिधांश्च वन्देऽहं गुरूनेतान् महामतीन् ॥
अनर्घराघवस्यास्य व्याख्यानं कर्तुमारभे ।
अनुगृह्णन्तु मामुच्चैर्विद्वांसो विमलाशयाः ॥

इह खलु स कविः 'आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्' इत्युक्तत्वात् नान्दीरूपेणेष्टदेवतां श्लोकद्वयेन नमस्करोति—निष्प्रत्यूहमिति । भगवतः लोचने निष्प्रत्यूहं प्रत्यूहाभावायोपास्महे इति क्रियाकारकसंबन्धः । निष्प्रत्यूहमित्यत्रार्थाभावेऽव्ययीभावः । 'नाव्ययीभावा-

दतोऽम् त्वपञ्चम्याः' इति चतुर्थीविभक्तेर्लुग्न भवति । अमादेशस्तु भवति । 'विघ्नोऽन्तरायः प्रत्यूहः' इत्यमरः । कीदृशस्य भगवतः? तत्राह— कौमोदकीलक्ष्मणः ।

* * * *

Colophon:

इति श्रीमानविक्रमविरचितायां विक्रमीयाख्यायामनर्घराघवव्याख्यायां पञ्चमोऽङ्कः ॥

ततः प्रविशति माल्यवान् । सर्वतोऽवलोक्य सखेदं, लङ्कायाः तादृशदुर्दशादर्शनात् खेदः । सुग्रीवप्रेषितेन हनूमता कृतं लङ्कापुरदहनादिकं परिभवं दृष्ट्वा विषीदन्नाह—अहह कष्टं दग्धा इति ।

End:

विश्वामित्रसकाशादधीतान् पठितान् दिव्यास्त्रमन्त्रान् दिव्यास्त्रमन्त्रप्रयोगक्षममनुभेदान् । ध्यायति उपास्ते । असौ राक्षसेन्द्रो रावणः । इह युद्धे । ब्रह्मोपदिष्टां ब्रह्मणा परमेष्ठिनोपदिष्टामनुग्रहेण दत्तामस्त्रविद्यां समभ्यस्यति वशीकरोति । दिव्यास्त्राणि ध्यानमात्रेणैवोपतिष्ठन्ते, रावणा·(णस्य त्व)भ्यासेनेति भेदः ॥

Fol. 192*b* is blank.

Fol. 193*a* contains an index of a few stanzas in the first Act.

Foll. 193*b* and 194 are blank

(*b*) अनर्घराघवम्.

ANARGHARĀGHAVAM.

Foll. 195*a*—263*b*.

A well-known drama based on the story of the Rāmāyaṇa : by Murāri.

Complete.

Beginning:

निष्प्रत्यूहमुपास्महे भगवतः कौमोदकीलक्ष्मणः
कोकप्रीतिचकोरपारणपटुज्योतिष्मती लोचने ।
याभ्यामर्धविबोधमुग्धमधुरश्रीरर्धनिद्रायितो
नाभीपल्वलपुण्डरीकमुकुलः कम्बोः सपत्नीकृत॥

End:

तथापीदमस्तु—

समुन्मीलत्सूक्तिस्तबकमकरन्दैः श्रवणयो-
रविश्राम्यद्धारां सततमुपचिन्वन्तु कवयः ।
न शब्दब्रह्माख्यं परिमलमनाघ्राय च जनाः
कवीनां गम्भीरे वचसि गुणदोषौ रचयतु ॥

अपि च—

देवस्यात्मभुवः कमण्डलुजलस्रोतांसि मन्दाकिनी-
गङ्गाभोगवतीमयानि पुनते यावत् त्रिलोकीमिमाम् ।
तावद्वीरयशोरसायनमधुस्यन्दः कवीनामयं
जागर्तु श्रुतिशष्कुलीवलयितव्योमावगाही पुनः ॥

इति निष्क्रान्ताः सर्वे ॥

Colophon:

मुरारिः समाप्तः ॥

R. No. **133.**

Śrītāla. 10½ × 2 inches. Foll. 50. Lines, 11 in a page. Kanarese. Injured.

Purchased in 1910–11 from K. Rāmasvāmi Ayyaṅgār of Magadi, Mysore province.

(*a*) कर्णाटकव्याकरणम्.

KARṆĀṬAKAVYĀKARAṆAM.

Foll. 1*a*—18*b*.

A treatise in Kanarese grammar: by Nāgavarma.

Complete in ten Pariccchēdas.

As the first leaf is very much injured, the extract given here is from the second leaf.

Beginning:

वर्णानां परस्परमन्योन्यं संनिकर्षः संश्लेषः सन्धिरुच्यते ।

Colophon:

इति कर्णाटकव्याकरणे संज्ञाविधानं नाम प्रथमः परिच्छेदः ॥

सन्धौ । सन्धावित्ययमधिकारः । इत ऊर्ध्वं यत् विवक्ष्यते तत् पुनः सन्धौ भवत्यवगन्तव्यम् । स्वरे स्वरस्य लोपः । स्वरे परत्रावस्थिते पूर्वस्थितस्य स्वरस्य लोपो भवति । प्रयोग. ।

End:

अय्यो अन्यायम् । स एवानुकम्पायाम् । स एव अय्योशब्दः अनुकम्पायां वर्तते निपातः ।

* * * *

कर्णाटक(स्य) शब्द(स्य) सूत्रा(णां) वृत्तिहेतवे ।
रचितानि स्फुटार्थानि कृतानि(तिना) नागवर्मणा ॥

Colophon:

इति कर्णाटकव्याकरणे निपातप्रकरणं नाम दशमः परिच्छेदः ॥

(*b*) ಶಬ್ದಮಣಿದರ್ಪಣ-
ŚABDAMAṆIDARPAṆA.

Foll. 19*a*—34*b*.

(*c*) ನಾಗವರ್ಮಛಂದಸ್-
NĀGAVARMACHANDAS.

Foll. 35*a*—39*a*. Fol. 39*b* is left blank

(*d*) ರತ್ನಪರೀಕ್ಷಾ.
RATNAPARĪKṢĀ.

Foll. 40*a*—50*b*. See the Telugu part of the Triennial Catalogue.

R. No. **134.**

Śrītāla. 14¼ × 1¾ inches. Foll. 54. Lines, 8 in a page. Grantha. Good.

Purchased in 1910–11 from S. Rāmakṛṣṇavādyār of Palghat.

सामवेदगानम्—रहस्यम्.

SĀMAVĒDAGĀNAM : RAHASYAM.

Same work as the one described under No. 53 of the D.C.S. MSS., Vol. I, Part II.

Complete.

Foll. 52—54 give an index of the Sāmans of Rahasya.

R. No. 135.

Palm-leaf. 16 × 1½ inches. Foll. 23. Lines, 8 in a page. Grantha. Good.

Purchased in 1910-11 from R. Anantakṛṣṇa Śāstri of Harināyakapuram, Tinnevelly district

राघवयादवीयम्—सव्याख्यानम्.

RĀGHAVAYĀDAVĪYAM WITH COMMENTARY.

Foll. 1*a*—19*b*.

This is a poem on the stories of Rāma and of Kṛṣṇa: by Vēṅkaṭācārya of Ātrēyagōtra and son of Raghunāthācārya who is the son of Śrīnivāsācārya. The author lived at Conjeevaram. He very properly adds a commentary to the work which is otherwise unintelligible. They refer to the story of Rāma when they are read as they are, and relates the story of Kṛṣṇa when read in the reverse order.

Incomplete. Contains only the first part.

Beginning:

किंचित् संचिन्तयो(ये) गोपीकिलिकिञ्चितवञ्चितम् ।
अञ्चितं ज्योतिरप(म)रैरञ्जनाद्रावुदञ्चितम् ॥
भद्रोल्लासं भास्करापत्यवाहि-
न्यन्तर्दीव्यन्नस्तवैर्युग्रबाणः ।
नाथोऽहल्यानन्दहेतुः प्रदत्तां
राजीवाक्षो राघवो यादवो वा ॥
अनुवर्णितरामकृष्णवृत्तेरनुलोमप्रतिलोमवाचनाभ्याम् ।
कृतिमुल्लसितां विधाय पद्यैर्विवृणोति स्वयमेव वेङ्कटार्यः ॥

अनुलोमेन रामकथाप्रतिपादकैः प्रतिलोमेन पाठे कृष्णकथाप्रतिपादकैः पद्यैः परिष्कृतं राघवयादवीयाख्यमतिदुष्करं प्रबन्धमारभमाणः प्रारिप्सितप्रबन्धप्रत्यूहप्रशमनार्थमानुलोम्यप्रातिलोम्यपाठाभ्यां प्रबन्धविषयरामकृष्णवन्दनप्रतिपादकमङ्गलश्लोकमारचयति—वन्देऽहमिति ।

वन्देऽहं देवं तं श्रीतं रन्तारं कालं भासा यः ।
रामो रामाधीराप्यागो लीलामारायोध्ये वासे ॥

पदम्—वन्दे । अहम् । देवम् । तम् । श्रीतम् । रन्तारम् । कालम् । भासा । यः । रामः । रामाधीः । आप्यागः । लीलाम् । आर । आयोध्ये । वासे । रामाधीः रामायां सीतायां धीः बुद्धिः यस्य सः तथोक्तः सन् आप्यागः आप्तुं योग्याः आप्याः अगाः सह्यमलयादिपर्वताः यस्य स तथोक्तः सीतायां मनः प्रणिधाय सह्यादिपर्वतान् प्राप्तवानित्यर्थः ।

* * * *

अयमेव श्लोकः इत्थं प्रातिलोम्येन पठ्यते—

सेवाध्येयो रामालाली गोप्याराधी मारामोराः ।
यः साभालंकारं तारं तं श्रीतं वन्देऽहं देवम् ॥

पदम्—सेवाध्येयः । रामालाली । गोप्याराधी । मारामोराः । यः । साभालङ्कारम् । तारम् । तम् । श्रीतम् । वन्दे । अहम् । देवम् । मारामोराः माया लक्ष्म्याः आरामभूतं भोग्यस्थानभूतम् उरो वक्षो यस्य स तथोक्तः । 'उरःप्रभृतिभ्यः कप्' इति कप्प्रत्ययस्तु समासान्तत्वादनित्य एव । 'समस्तलोकविजयश्रीपूर्यमाणोरसम्' इति मुरारिप्रयागः ।

End :

प्रतिलोमपाठस्तु यातसीति ।

यातसी तदिताभाभागसंसारनरो न न ।
मोदिमानसया देव्या ह्यामरागमधामराः ॥

या । अतसी । तदिताभाभाक् । असंसारनरः । न । न । मोदिमानसया । देव्या । हि । आमरागमधामराः । या अतसी यदतसीकुसुमं तदिताभाभाक् तदिता प्राप्ता (आ)भा दीप्तिः तां भजतीति तथोक्तः ; अतसीकुसुमगतदीप्तिशालीत्यर्थः । असंसारनरः संसाररहितपुरुषः श्रीकृष्णः। मोदिमानसया आनन्दयुक्तचित्तया देव्या सत्यभामया सह आमरागमधामराः अमराणां देवानां संबन्धी आमरः अगमः वृक्षः तस्मात् धाम

जन्म यस्य सः आमरागमधामा पारिजातजन्यः राः स्वर्णं यस्य सः तथोक्तः अभूदिति शेषः । हिशब्दः प्रसिद्धिद्योतकः । 'धामजन्मप्रभास्थानप्रभावसुखसद्मसु' इति रत्नमाला ।

महीसुतासुहृत्त्वेन ख्यातौ सत्यानुसारिणौ ।
दीप्येतां हृदये नित्यं देवौ यादवराघवौ ॥

Colophon :

इति श्रीमद्वाजपेयसर्वपृ[ति]ष्ठासोर्यामादियाजि श्रीनिवासाचार्यनन्दनरघुनाथाचार्यदीक्षिततनयस्य श्रीमत्काञ्चीनगरवसतेरात्रेयवेङ्कटाचार्ययज्वनः कृतिषु राघवयादवीयचरिताख्ये दुष्करकाव्ये प्रथमभागः ॥

Foll 20—23 contain a part of the same work over again.

R. No. **136.**

Palm-leaf. 16⅜ × 1¾ inches. Foll. 110. Lines, 7 in a page. Grantha. Much injured.

Purchased in 1910–11 from Gōpālasāmi Ayyaṅgār of Mannargudi.

रहस्यत्रयसारार्थरत्नम्.

RAHASYATRAYASĀRĀRTHARATNAM.

A lecture on the contents of the Rahasyatrayasāra of Vēdāntadēśika. It is a work in 32 chapters on Prapatti or self-surrender to God as a means of attaining salvation, and is written in Maṇipravāḷa (*i.e.*, Tamil and Sanskrit combined).

Incomplete.

Beginning :

(प्रणिपत्य गया)म्नायमकुटीयुगलीगुरू ।
रहस्यत्रयसारार्थरत्नकोशो विधीयते ॥

प्रतितज्ञा(ज्ञाता)र्थसर्वस्वमधिकारेषु सर्वशः ।
संगृह्यते यथासारं . . . . नुसारतः ॥

तत्रोपोद्घाताधिकारे ஸ்ரியःவெதியான ஸவெ-ஶ்ஶாது इत्यादि । मणिवर इति श्लोकस्थशौरिशब्दोऽत्र व्याख्यातः । एतेन भगवन्नामसु

स . . . . . पि तत्स्वरूपनिरूपकधर्मभूतश्रीविशिष्टभगवद-भिधायकत्वं सर्वेश्वरत्वं विशिष्टनिष्ठमित्युभयमपि स्वाभिमतं प्रधानप्रति-तन्त्रमिति सूचितम् ।

End:

स्वाभाविकपरमकारुण्याधीनमित्येवं निरूपणेन निपुणानां शरण्यस्यो-पायान्तरस्थानोपनयप्रवाद इत्येवं शरण्यस्योपायान्तरस्थाननिवेशोक्तेरौ-पचारिकत्वेन निर्वाहस्य दर्शितत्वात् । प्रपत्तेर्मुक्तिस्थाने विधानं तु न काचिदपि क्लिष्टगत्या ।

R. No. **137.**

Śrītāla. 26¼ × 2¼ inches. Foll. 137. Lines, 12 in a page Kanarese. Good.

Purchased in 1910–11 from K. Rāmasvāmi Ayyaṅgār of Magadi, Mysore province.

Fol. 1 contains the names of various mountains, towns, rivers, etc., referred to in Jaina religious works.

(*a*) पार्श्वनाथाष्टकम्—सव्याख्यानम्.

PĀRŚVANĀTHĀṢṬAKAM WITH COMMENTARY.

Fol. 2.

Eighteen stanzas full of alliterative rhyming syllables in praise of Pārśvanātha, one of the Tīrthaṅkaras of the Jainas.

Complete.

Beginning:

लक्ष्मीर्महस्तुत्य सती सती सती प्रवृद्धकालो विरतोरतोरतोऽ ॥
जरा रुजापन्महता हताहता पार्श्वे फणे रामगिरौ गिरौ गिरौ ॥

हे मित्र पार्श्वे पार्श्वजिनेश्वरं फण गच्छ यात्रां कुरु । इ इति संबोधने । क ? रामगिरौ गिरौ रामगिरिनाम्नि पर्वते । किंभूतस्त(स्त्व)म्-गिरा नाम्ना उप-लक्षितः । ओ निश्चये, अव्ययपदमेतत् । एतावति कृते किं किं स्यात् ?—जरा रुजा आपत् त्वया हता । किंभूतेन ?—महता । किंभूता जरा रुजा आपत् ? (अहता) पूर्वमविनाशिता । किंभूतः ?—प्रवृद्धकालः प्रवृद्धे(के)सुखे आल उद्यमो यस्य स (प्र)वृद्धकालः ; अथवा—प्रवृद्धः कालो वयो

लक्षणो यस्य सः वृद्ध इत्यर्थः । पुनः किंभूतः ?—विरतः सर्वविरतः। अरतोरतः अरतं ब्रह्मचर्यं तस्य ऊ रक्षा तद्रतः । (अ इति संबोधने) । हे मित्र लक्ष्मीः सति पुरुषे सती उत्तमा भवति । हे महस्तुत्य उत्सव-वर्णनीय । किंभूता लक्ष्मीः ?—सती स्वरूपिणी । इ इति संबोधने । तस्मात् लक्ष्म्या वाचश्च फलं जिघृक्षुः श्रीपार्श्वयात्रां कुर्वित्यर्थः ।

End :

रराज नित्यं सकलाकलाकलाममारतृष्णोऽव्रजिनो जिनो जिनो।
सहारपूज्यं वृषभासभासभा पार्श्वं फणे रामगिरौ गिरौ गिरौ ॥

पार्श्वं फण । किं भूतम् ?—सहारपूज्यं सह हारैर्वर्तन्ते ये ते सहाराः श्रीमरितो(न्तो) देवनरदेवादयः, तैः पूज्यम् । हे वृषभासभासभ वृषेण अनडुहा भासते वृषभासः रुद्रः तद्वत् (भासा) देदीप्यमाना भा कान्तिर्यस्य हे वृषभासभासभ । (आ) अतिशयेन । उत्तरार्धं गतम् । यो भगवान् नित्यं रराज । किंभूतः ?—अमारतृष्णः निष्कामः । पुनः किंभूतः पार्श्वः ?—सकलाकलाकलां सकलः सत्प्रभावः, अकलः रागद्वेषादिकलारहितः, अकं दुःखं कुष्ठादिप्रभवं लान्तीति अकलाः तान् आमयति, अम द्रम आर्द्रीभावे, आत्मपार्श्वं गमयति यः; इन्न(ण्य)न्तात् क्विप्। सकलाकलश्चासौ अकलांश्चेत्यादिः कर्मधारयः । पुनः किंभूतः ?—अव्रजिनः निष्पापः । किंभूतः ? जिनः तीर्थंकरः । पुनः किंविशिष्टः ? जिनो जिनं कृष्णमपि अवति रक्षतीति ; सैन्यमारकं श्रीशंकेश्वरपार्श्वस्नपनजलाभिषेकेण न्यषेधत् प्रतिषेधयति स्म । ततश्च जिनः कृष्णो जयश्रीधानात् पार्श्वेण ररक्षे ॥

(*b*) महापुराणसंग्रहः.

MAHĀPURĀṆASAṄGRAHAḤ.

Foll. 3*a*—133*b*.

This is also called Uttarapurāṇa and is intended as a supplement to the Mahāpurāṇa of Jinasēna. In another MS. of this library this work contains Parvans 1 to 76, of which 1 to 42 are attributed to Jinasēna and 43 to 76 to Guṇabhadra.

It will be seen from the extracts that Amōghavarṣa held Jinasēna, son of Vīrasēna and author of the Mahāpurāṇa, in high esteem, that Guṇabhadrācārya was the pupil of Jinasēna and his mate Daśarathaguru, and that Guṇabhadrācārya summarized what was left untold by Jinasēna. His pupi Lōkasēna is said to have consecrated this Purāṇa on Thursday, the 5th lunar day in the month of Mithuna of the year Piṅgala of Śaka 820, during the reign of Akālavarṣa and that of his feudatory, Lōkāditya of the Cēlla-patāka dynasty, then ruling the Vanavāśa country at Vaṅkāpura.

This MS. contains only Parvans 48—76.

Beginning:

श्रीमान् जिनोऽजितो जीयात् यद्वचांस्यमलान्यलम् ।
क्षालयन्ति जलानीव विनेयानां मनोमलम् ॥
पुराणं तस्य वक्ष्येऽहं मोक्षलक्ष्मीसमागमः ।

* * * *

इह जम्बूमति द्वीपे विदेहे प्राचि विश्रुते ।
सीतासरिदवाग्भागे वत्साख्यो विषयो महान् ॥
सुसीमा नगरं तस्मिन् विभूत्या विस्मयावहम् ।
नाम्नास्य नृपतिः प्राभूत्प्रभुर्विमलवाहनः ॥

* * * *

स जयति जयसेनो यो जितारातिसेनः
श्रुतयतिमहदादिर्यो बलः प्रान्तकल्पे ।
सगरसकलचक्री यो जिनो यश्च यश्च
प्रहतचरमदेहो देहमात्रात्मदेहः ॥

Colophon:

इत्यार्षे त्रिषष्टिलक्षणमहापुराणसंग्रहे भगवद्गुणभद्राचार्यप्रणीते अजिततीर्थकरसगरचक्रवर्तिपुराणं परिसमाप्तमष्टचत्वारिंशत्तमं पर्व ॥

End:

इति कतिपयवाग्भिर्वर्धमानं जिनेन्द्रं
मगधपतिरुदीर्णश्रद्धया सिद्धकृत्यः ।

गणधृतमपि मत्वा गौतमं धर्मधुर्यः
स्वपुरमविशदुद्यत्तुष्टिरागामिसिद्धिः ॥
अनुष्टप्छन्दसा ज्ञेया ग्रन्थसंख्यास्य विंशतिः ।
सहस्राणां पुराणस्य व्याख्यातृश्रोतृलेखकैः ॥

Colophon:

इत्यार्षे त्रिषष्टिलक्षणमहापुराणसंग्रहे भगवद्गुणभद्राचार्यप्रणीते श्रीवर्धमानपुराणं समाप्तं षट्सप्ततितमं पर्व ॥

श्रीमूलसंघवाराशौ मणीनामिव सार्चिषाम् ।
महापुरुषरत्नानां स्थानं सेनान्वयोऽजनि ॥
तत्र वित्रासिताशेषप्रवादिमदवारणः ।
वीरसेनाग्रणीर्वीरसेनभट्टारको बभौ ॥

* * * *

अभवदिव हिमाद्रेर्देवसिन्धुप्रवाहो
ध्वनिरिव सकलज्ञात् सर्वशास्त्रैकमुक्तिः ।
उदयगिरितटाद्वा भास्करो भासमानो
मुनिरनुजिनसेनो वीरसेनादमुष्मात् ॥
यस्य प्रांशुनखांशुजालविसरद्वारान्तराविर्भव-
त्पादाम्भोजरजःपिशङ्गमकुटप्रत्यग्ररत्नद्युतिः ।
संस्मर्ता स्वममोघवर्षनृपतिः पूतोऽहमद्येत्यलं
(स) श्रीमान् जिनसेनपूज्यभगवत्पादो जगन्मङ्गलम् ॥

* * * *

दशरथगुरुरासीत् तस्य धीमान् सधर्मा
शशिन इव दिनेशो विश्वलोकैकचक्षुः ।
निखिलमिव(मत)मदीपि व्यापितद्वाङ्मयूखैः
प्रकटितनिजभावं निर्मलैर्धर्मसारैः ॥

* * * *

प्रत्यक्षीकृतलक्ष्यलक्षणविधिर्विश्वोपविद्यान्तगः
सिद्धान्ताब्ध्यवसानयानजनितप्रागल्भ्यवृद्धीद्धधीः ।
नानानूननयप्रमाणनिपुणोऽगण्यैर्गुणैर्भूषितः
शिष्यः श्रीगुणभद्रसूरिरनयोरासीज्जगद्विश्रुतः ॥

* * * *

कविपरमेश्वरनिगदितगद्यकथामाश्रितं पुरोश्चरितम् ।
सकलच्छन्दोऽलंकृतिलक्ष्यं सूक्ष्मार्थगूढपदरचनम् ॥
जिनसेनभगवतोक्तं मिथ्याकविदर्पदलनमतिललितम् ॥
सिद्धान्तोपनिबन्धनकर्त्रा भर्त्राचिराद्विनायासात् ॥
अतिविस्तरभीरुत्वादवशिष्टं संगृहीतममलधिया ।
गुणभद्रसूरिणेदं प्रहीणकालानुरोधेन ॥

* * * *

विदितसकलशास्त्रो लोकसेनो मुनीशः
कविरविकलवृत्तस्तस्य शिष्येषु मुख्यः ।
सततांमेह पुराणे प्राप्य साहाय्यमुच्चैः
गुरुविनयमनैषीन्मान्यतां स्वस्य सद्भिः ॥

* * * *

अकालवर्षभूपाले पालयत्याखिलामिलाम् ।
तस्मिन् विध्वस्तनिःशेषद्विषि वीध्रयशोजुषि ॥
पद्मालयमुकुलकुलप्रकाशविकसत्प्रतापततमहासि ।
श्रीमति लोकादित्ये प्रध्वस्तप्रथितशत्रुसंतमसे ॥
चेल्लपताके चेल्लध्वजे(जा)नुजे चेल्लकेतनतनूजे ।
जैनेन्द्रधर्मवृद्धिविधायिनि विधुवीध्रपृथुयशसि ॥
वनवासदेशमाखिलं भुञ्जति निष्कण्टकं सुखं सुचिरम्
तत्पितृनिजनामकृते (ख्याते) वङ्कापुरे पुरष्वधिके ॥

शकनृपकालाभ्यन्तरविंशत्यधिकाष्टशतमिताब्दान्ते ।
मङ्गलमहार्थकारिणि पिङ्गलनाम(नि)समस्तजनसुखदे ॥
श्रीपञ्चम्याम्बुदा(धा)र्द्रायुजि दिवसकरे मन्त्रिवारे बुधांशे (हिमांशौ)
पूर्वायां सिंहलग्ने धनुषि धरणिजे वृश्चिकार्कौ तुलायाम् ।
सर्पे शुक्रे कुलीरे गवि च सुरगुरौ निष्ठितं भव्यवर्यैः
प्राप्ति(प्ते)ज्यं सर्वसारं जगति विजयते पुण्यमेतत्पुराणम् ॥
यावद्धराजलनिधिर्गगनं हिमांशुस्तिग्मद्युतिः सुरगिरिः ककुभां विभागाः ।
तावत् सतां[च] वचसि चेतसि पूतमेतत् स्रोतस्वतीस्थितिमुपैतु महा-
[पुराणम् ॥

श्रीजिनशासनजलधौ द्वीपायितकौण्डकुन्दना[मा]म्ना यः ।
रत्नानामिव राशिर्जज्ञे श्रीचन्द्रनन्दिसिद्धान्तगुरुः ॥
तस्य शिष्यो विदामासीत्पूजनीयोऽर्हनन्दिवाक् ।
तपोराशिर्गुणाधारो लोकज्ञत्वकुलालयः ॥

* * * *

कपु(ङ्ग)गेन्द्राख्यगणस्य नेता भूपालधीपालचरित्रपालैः ।
समर्चनीयः सकलागमज्ञः श्रीपालवाचंयमपो बभूव ॥

* * * *

तेनाकुमारं प्रतिवर्ध(र्ध्य)मानः
श्रीवीरनन्द्याख्यमुनेः सधर्मा ।
नामा(म्ना)र्हनन्दी गुणवान् महत्मा
सदा स देवव्रत उद्बभूव ॥

* * * *

महापुराणं गुरु(ण)भद्रदेवप्रणीतमेतज्जयवर्मनाम्ना ।
सदार्हनन्दी स ददौ विलिख्य श्रीवीरनन्दिप्रभवे मुनीशे ॥

Fol. 134*a* contains a few passages from some grammatical work. Fol. 134*b* is blank. Foll. 135 and 136 contain some information about Tīrthaṅkaras, and fol. 137 gives some Cāṭuślōkas.

The following list gives the titles of the various Parvans of this work :—

1. कथामुखव्यावर्णनम्.
2. कथोपोद्घातवर्णनम्.
3. पुराणपीठिकावर्णनम्.
4. महाबलाभ्युदयवर्णनम्.
5. ललिताङ्गस्वर्गभोगवर्णनम्.
6. ललिताङ्गस्वर्गच्यवनवर्णनम्.
7. श्रीमतीवज्रजङ्घसमागमवर्णनम्.
8. श्रीमतीवज्रजङ्घपात्रदानानुवर्णनम्.
9. श्रीमतीवज्रजङ्घसम्यग्दर्शनोत्पत्तिवर्णनम्.
10. श्रीमदच्युतेन्द्रैश्वर्यवर्णनम्.
11. भगवद्वज्रनाभिसर्वार्थसिद्धिगमनवर्णनम्
12. भगवत्स्वर्गावतरणवर्णनम्.
13. भगवज्जन्माभिषेकवर्णनम्.
14. भगवज्जातकर्मोत्सववर्णनम्.
15. भरतोत्पत्तिवर्णनम्.
16. भगवत्साम्राज्यभोगवर्णनम्.
17. भगवत्परिनिष्क्रमणवर्णनम्.
18. धरणेन्द्रविजयार्थोपगमनम्.
19. नमिविनमिराज्यप्रतिष्ठापनवर्णनम्.
20. तीर्थकरानुभवः.
21. ध्यानतत्त्वानुवर्णनम्.
22. भगवत्समवसरणविनिवेशवर्णनम्.
23. भगवत्समवसरणवर्णनम्.

24. भगवद्धर्मोपदेशवर्णनम्.
25. भगवत्तीर्थविहारवर्णनम्.
26. भरतराजदिग्विजयोद्योगवर्णनम्.
27. भरतराजविजयप्रयाणवर्णनम्.
28. पूर्वार्णवद्वारविजयवर्णनम्.
29. दक्षिणा—
30. पश्चिमा—
31. विजयार्थगुहाद्वारवर्णनम्.
32. भरतोत्तरार्धवर्णनम्.
33. भरताधिराजकैलासादिगमनवर्णनम्.
34. भरतराजानुजदीक्षावर्णनम्.
35. कुमारबाहुबलिरणोद्योगवर्णनम्.
36. भरतभुजबलिविजयवर्णनम्.
37. भरतेश्वराभ्युदयवर्णनम्.
38. द्विजोत्पत्तौ गर्भान्वयक्रियावर्णनम्.
39. दीक्षान्वयकर्त्रन्वयक्रियावर्णनम्
40. द्विजोत्पत्तौ क्रियामन्त्रानुवर्णनम्.
41. भरतराजस्वप्नसंदर्शनतत्फलोपवर्णनम्.
42. भरतराजवर्णाश्रमस्थितिपालनम्.
43. (गुणभद्राचार्यकृत) सुलोचनास्वयंवरमालावर्णनम्.
44. जयविजयः.
45. जयसुलोचनासुखानुभववर्णनम्.
46. जयसुलोचनाभवान्तरवर्णनम्.
47 वृषभतीर्थंकरभरतचक्रवर्तिपुराणम्.
48. अजिततीर्थंकरसगरचक्रवर्तिसमागमः.
49. शंभवतीर्थंकरपुराणम्.

50. अभिनन्दनस्वामिपुराणम्.
51. सुमतितीर्थंकरपुराणम्.
52. पद्मप्रभार्हत्पुराणम्.
53. सुपार्श्वस्वामिपुराणम्.
54. चन्द्रप्रभपुराणम्.
55. पुष्पदन्तपुराणावसितिः.
56. शीतलपुराणम्.
57. श्रेयस्तीर्थत्रिपृष्ठविजयाश्वग्रीवपुराणम्.
58. वासुपूज्यजिनपतिद्विपृष्ठाचलतारकापुराणम्.
59. विमलतीर्थंकरधर्मस्वयंभुमधुसंजयन्तमेरुमन्दरपुराणम्.
60. अनन्तजित्तीर्थंकरसुप्रभपुरुषोत्तममधुसूदनपुराणम्.
61. धर्मतीर्थंकरसुदर्शनपुरुषसिंहमधुक्रीडमघवसनत्कुमारपुराणम्.
62. अपराजितानन्तवीर्याभ्युदयवर्णनम्.
63. शान्तिचक्रधरतीर्थंकरपुराणम्.
64. कुन्थुचक्रधरतीर्थंकरपुराणम्.
65. तीर्थधरचक्रधरारसुभौमचक्रवर्तिनन्दिषेणबलदेवपुण्डरीकार्धचक्रवर्तिनिशुम्भनामप्रतिशत्रुपुराणम्.
66. मल्लितीर्थंकरपद्मचक्रधरनन्दिमित्रबलदेवनामवासुदेवबलीन्द्राख्यप्रतिवासुदेवपुराणम्.
67. दुर्मार्गप्रवर्तनप्रपञ्चव्यावर्णनम्.
68. मुनिसुव्रततीर्थंकरहरिषेणचक्रवर्तिरामबलदेवलक्ष्मीधरकेशवसीतारावणपुराणम्.
69. नमितीर्थंकरजयसेनचक्रवर्तिपुराणम्.
70. नेमिस्वामिचरिते कृष्णविजयः.
71. नेमिस्वामिचरिते भवान्तरवर्णनम्.

72. नेमितीर्थंकरपद्मनाभबलदेवकृष्णनामार्धचक्रिजरासन्धप्रतिवासुदेवब्रह्मदत्तसकलचक्रवर्तिपुराणम्.

73. पार्श्वतीर्थंकरपुराणम्.

74. अन्त्यतीर्थंकरश्रोणिकाभयकुमारचरितवर्णनम्.

75. चन्दनार्यकाजीवन्धरचरितम्.

76. श्रीवर्धमानपुराणम्.

R. No. **138.**

Palm-leaf. 19 × 1½ inches. Foll. 125. Lines, 9 in a page. Grantha. Good; only one leaf viz., fol. 60, is injured at one end.

Purchased in 1910–11 from Rāmakṛṣṇavādyār of Palghat.

सिद्धान्तकौमुदीव्याख्या—विलासः.

SIDDHĀNTAKAUMUDĪVYĀKHYĀ: VILĀSAḤ.

Same work as the one described under No. 1446 of the D.C.S. MS., Vol. III.

Contains from Bahuvrīhi to the end of Pūrvārdha.

R. No. **139.**

Śrītāla. 15½ × 2¼ inches. Foll. 31. Lines, 9 in a page. Grantha. Good.

Purchased in 1910–11 from Mīnākṣiyammāḷ of Koḍuvāyūr.

(*a*) विवेकसारः.

VIVĒKASĀRAḤ.

Foll. 1*a*—18*a*.

Same work as the one described under No. 4725 of the D.C.S. MSS., Vol. IX.

Breaks off in the fifth Varṇaka.

Foll. 18*b* and 19 are left blank.

(b) मयूरशतकम्—सव्याख्यम्.

MAYŪRAŚATAKAM WITH COMMENTARY.

Foll. 20a—31b.

A century of stanzas in praise of the Sun-god: by Mayūrakavi. The name of the commentator is not known. The work is here incomplete.

Beginning:

जम्भारातीभकुम्भोद्भवमिव दधतः सान्द्रसिन्दूररेणुं
रक्ताः सिक्ता इवौघैरुदयगिरितटीधातुधाराद्रवस्य ।
आयान्त्या तुल्यकाला कमलवनरुचेवारुणा वो विभूत्यै
भूयासुर्भासयन्तो भुवनमभिनवा भानवो भानवीयाः ॥

जम्भेति । एवंभूता भानवीया भानवः वः विभूत्यै भूयासुरिति संबन्धः । कदृग्भूताः ?—अभिनवाः प्रातःकालीनाः रक्ताः । [कथं]कथमिवेति(व?)जम्भो नाम कश्चिदसुरः, तस्यारातिरिन्द्रः, तस्येभः, ऐरावत इत्यर्थः । तस्य कुम्भो(म्भ)उद्भव उत्पत्तिस्थानं यस्य जम्भारातीभकुम्भोद्भवम् । सान्द्रसिन्दूररेणुः सिन्दूरो नाम गजकुम्भेषु शोभार्थमाधेयः पाटलवर्णो द्रव्यविशेषः ।

End:

आयान्ती किं सुमेरोः सरणिररुणिता पाद्मरागैः परागै-
राहोस्वित् स्वस्य माहारजतविरचिता वैजयन्ती रथस्य ।
गाङ्गिष्ठी प्रष्ठवाहावलिविधृतशिरश्चामराली नु लोकै
राशङ्क्यालोकितैवं सवितुरघनुदे स्तात् प्रभातप्रभा वः ॥

* * * *

सवितुः सूर्यस्य प्रभातप्रभा पूर्वसंध्यायामुत्पन्ना दीप्तिः वः युष्माकम् अघनुदे स्तात् अघं पापं तस्य नुदे पापध्वंसाय ॥

R. No. 140.

Śrītāla. 7 × 1¾ inches. Foll. 131. Lines, 9 in a page. Grantha. Good.

Purchased in 1910-11 from Rāmakṛṣṇavādyār of Palghat.

Foll. 1—5 are left unwritten.

अभिज्ञानशाकुन्तलव्याख्यानम्—दिङ्मात्रदर्शनम्.

ABHIJÑĀNAŚĀKUNTALAVYĀKHYĀNAM : DIŃ-MĀTRADARŚANAM.

Foll. 6*a*—131*b*.

This is a commentary on the Abhijñānaśākuntala, the well-known drama of Kālidāsa : by Abhirāma, a disciple of Rudraguru.

Complete.

Beginning :

हेरम्बस्याङ्घ्रिकमलपरागपटली भृशम् ।
विशदीकुरुतामस्मदन्तःकरणदर्पणम् ॥
उद्वान्तभाष्यामृतवक्त्ररन्ध्रकद्रूजविस्मापनवाग्विलासाः ॥
भद्राणि मह्यं महनीयशीला रुद्राभिधाना गुरवो दिशन्तु ॥

* * * *

अथ कविकुलपरमेश्वरः कालिदासः प्रभुसंमितेभ्यः श्रुतिस्मृतिप्रभृतिभ्यः . . . . . नाटकं चिकीर्षुरविघ्नपरिसमाप्त्यर्थं तदारम्भोचितनान्दीद्वारा समुचितेष्टदेवतामनुसंदधाति—या सृष्टिरित्यादिना ।

या तनुः स्रष्टुः आद्या सृष्टिः सृज्यत इति सृष्टिः ; या स्रष्टुः प्रथमसृज्यभूतेत्यर्थः । आदिसृज्यत्वमपामसाधारणो धर्मः ।

End :

अत्र महाकविना 'आरम्भे मङ्गलं कुर्यात् समाप्तावपि मङ्गलम्' इति दर्शनानुसारेणारम्भे या सृष्टिरित्यादिना समाप्तावनेन च मङ्गलाचरणं कृतमिति ॥

Colophon :

इत्यभिरामविरचिते अभिज्ञानशाकुन्तल(व्याख्याने)दिङ्मात्रदर्शने सप्तमोऽङ्कः ॥

R. No. **141.**

Palm-leaf. 16½ × 1⅜ inches. Foll. 23. Lines, 6 in a page. Grantha. Slightly injured.

Purchased in 1910-11 from Gōpālasāmi Ayyaṅgār of Mannargudi.

विषयतावादः.

VIṢAYATĀVĀDAḤ.

Same work as the one described under No. 5000 of the D.C.S. MSS., Vol. X.

Complete.

R. No. **142.**

Śrītāla. 7¼ × 1⅞ inches. Foll. 31. Lines, 8 in a page. Grantha. Good.

Purchased in 1910-11 from Mīnākṣiyammāḷ of Koḍuvāyūr.

(*a*) मृतसंजीवनीमन्त्रः.

MṚTASAÑJĪVANĪMANTRAḤ.

Fol. 1*a*. Fol. 1*b* is blank.

This Mantra is addressed to the Sun-god, and its repetition is considered to be efficacious in counteracting the evil effects of deadly poisons.

Complete.

Beginning and **End**:

वामदेव ऋषिः, अनुष्टुप् छन्दः, पूषा देवता ।
सुवर्भानुर्महाविष्णुः कृष्णवर्णो महाबलः ।
उदरस्थं विषं नश्येदमृतं जायते हृदि ॥

Colophon:

इति मृतसंजीवनी ॥

(*b*) शङ्करकवचम्.

ŚAṄKARAKAVACAM.

Foll. 2*a*—7*b*.

This is in praise of Śiva, and its repetition is considered to secure protection to one.

Complete.

Beginning:

ऐश्वरं परमं तत्त्वमादिमध्यान्तवर्जितम् ।
आधारं सर्वभूतानामनाधारमविक्रियम् ॥
अनन्तानन्दबोधाम्बुनिधिमद्भुतविक्रमम् ।
अम्बिकापतिमीशानमनिशं प्रणमाम्यहम् ॥

* * * *

महादेवं महानन्दं देवानामपि दैवतम् ।
शान्तं पवित्रमोङ्कारं ज्योतिषां ज्योतिरुत्तमम् ॥
शंकरो मे शिवः पातु ललाटं फाललोचनः ।
विश्वचक्षुर्दृशौ पातु रुद्रः पातु भ्रुवौ मम ॥

End:

नमो हिरण्यबाह्वादि पठेन्मन्त्रं तु भक्तिमान् ।
सद्योजातादिभिर्मन्त्रैर्नमस्कुर्यात् सदाशिवम् ॥

(c) वेदसारशिवसहस्रनामस्तोत्रम्.

VĒDASĀRAŚIVASAHASRANĀMASTŌTRAM.

Foll. 7*b*—30*a*.

This occurs as the 89th Adhyāya of the Pādmōttarakhaṇḍa. It gives 1,000 names in praise of Śiva. They are purported to be a choice selection of the names of Śiva contained in the Vēdas.

Complete.

Beginning:

ततः सहस्रनामेदं पठितव्यं मुमुक्षुभिः ।
सर्वकार्यकरं पुण्यं महापातकनाशनम् ॥
सर्वगुह्यतमं दिव्यं सर्वलोकहितप्रदम् ।
मन्त्राणां परमो मन्त्रो भवदुःखषडूर्मिहृत् ॥
ओं नमः शंभवे चेति षड्भिर्मन्त्रैः षडङ्गन्यासः ।

अस्य श्रीपरमदिव्यवेदसारशिवसहस्रनामस्तोत्रमहामन्त्रस्य श्री-भगवान् नारायण ऋषिः, अनु(ष्टु)प् छन्दः, परमात्मा श्रीमहादेवो देवता।

* * * *

नमः पराय देवाय शंकराय महात्मने।
कामिने नीलकण्ठाय निर्मलाय कपर्दिने॥

End:

पिशाचस्य विनाशाय जप्तव्यमिदमुत्तमम्।
नाम्नां सहस्रेणानेन समं किंचिन्न विद्यते॥

Colophon:

इति श्रीपाद्मे पुराणे पञ्चपञ्चाशत्सहस्रिकायां संहितायामुत्तरभागे बिल्वकेश्वरश्रीकृष्णमार्कण्डेयव्यासादिसंवादे वेदसारसहस्रनाम एकोन-(न)वतितमोऽध्यायः॥

(*d*) वेदसारशिवसहस्रविशिष्टनामानि.

VĒDASĀRAŚIVASAHASRAVIŚIṢṬANĀMĀNI.

Fol. 30.

Such of the names as are considered to be important are selected from the work described above and given here.

Complete.

Beginning:

अस्मिन् वेदसारशिवनामसहस्रे विशिष्टनामानि लिख्यन्ते — पराय देवाय नमः। निःस्पृहाय स्वरूपिणे नमः। नित्याय यतये नमः।

End:

कारणानां भगवते इति श्लोके कारणानां कारणाय नम इति॥

Colophon:

अर्चनानाम॥

(e) ऋणमोचनरुद्रम्.

ṚṆAMŌCANARUDRAM.

Fol 31*a*. Fol. 31*b* is left blank.

This Mantra is addressed to Rudra, and its repetition is considered to enable a person to free himself from debts.

Complete.

Beginning and **End**:

आं ह्रीं क्रों ज्ञानिनामपि चेतांसि देवी भगवती हि सा। एह्येहि परमेश्वरि बलादाकृष्य मोहाय महामायां प्रयच्छ[ति] स्वाहा। अरुण ऋषिः, जगती छन्दः, ऋणमोचनरुद्रो देवता। ओं नमो भगवते ऋणमोचन-रुद्राय अस्मिन् ऋणं नाशय नाशय हुं फट् स्वाहा॥

Colophon:

इति ऋणमोचनरुद्रम्॥

R. No. **143.**

Palm-leaf. 15¾ × 1⅜ inches. Foll. 258. Lines, 9 in a page. Grantha. Good.

Purchased in 1910–11 from G. Śrīnivāsa Rao of Mysore.

शाब्दिकाचिन्तामणिः.

ŚĀBDIKACINTĀMAṆIḤ.

Foll. 1*a*–125*a*. The remaining leaves are blank.

This is a commentary on the grammatical Sūtras of Pāṇini's Aṣṭādhyāyī. By Gōpālakṛṣṇa Śāstrin, son of Vaidyanātha of Vatsagōtra and pupil of Rāmabhadrādhvarin.

Wants beginning in the eighth Āhnika of the first Pāda of the I Adhyāya and breaks off in the first Āhnika of the third Pāda of the I Adhyāya.

Beginning:

(ए)वं च सर्वविभक्त्यन्तत्वमभिप्रेतम्। तथापि सर्वविभक्त्यन्तोऽ-ल्शब्दे(ब्द)रूपावयव(वोऽ)स्यास्तीति मत्वर्थीयाजन्तः सर्वविभक्त्यन्तशब्दः इहाश्रीयत इति न दोषः। सर्वविभक्त्यन्तत्वमवयवनिष्ठं समुदाये समास

उपचर्यत इत्यप्याहुः। सर्वशब्दश्चात्र बहुत्वपरः। न ह्यत्र सप्तापि विभक्तयः संभवन्ति।

* * * *

तस्मात् सू(त्र)मेव कर्तव्यम्। यत्तु तेन न सिध्यति तदर्थं ज्ञापकमाश्रयणीयम्। तच्च तुल्यजातीयापेक्षमिति सर्वमनवद्यम्॥

Colophon:

इति श्रीवत्सकुलतिलकवैद्यनाथसुमतिसूनोः वैयाकरणाचार्यसार्वभौमश्रीरामभद्राध्वरिगुरुचरणश्लाघितमतिकुशलस्य गोपालकृष्णशास्त्रिणः कृतौ शाब्दिकचिन्तामणौ प्रथमस्याध्यायस्य प्रथमे पादे अष्टममाह्निकम्॥

End:

यद्यपि तत्र वृषोऽपि काश्चित् स्यात्, तथापि मल्लग्रामवत् स्त्रीभिरेव व्यपदेशो भवतीति कैयटः। अग्राम्यादिषु तु मिश्रत्वात् संघस्य पुंस एव शेषसिद्धिः॥

Colophon:

इति शाब्दिकचिन्तामणौ प्रथमस्याध्यायस्य द्वितीये पादे तृतीयमाह्निकम्। पादश्च समाप्तः॥

भूवादयो धातवः। भवनं भूः क्रियासामान्यम्। संप(दा)दित्वात् भावे क्विप्। वदन्तीति वादयः वदेरौणादिक इञ्। भुवो वादयो भूवादयः क्रियावाचिन इति यावत्।

* * * *

क्रियावाचिनः गणपठिताश्च ये भूप्रभृतयः शब्दाः तेषामेव धातुसंज्ञेति सूत्रार्थ[:]लाभात् सर्वेष्टसिद्धेः सूत्रमिदमनवद्यम्॥

उपदेशेऽजनुनासिक इत्।

R. No. **144.**

Śrītāla. 19×2⅜ inches. Foll. 102. Lines, 13 in a page. Grantha. Good.

Purchased in 1910–11 from Mīnākṣiyammāḷ of Koḍuvāyūr.

(*a*) रामायणव्याख्या— सर्वार्थसारः.

RĀMĀYAṆAVYĀKHYĀ : SARVĀRTHASĀRAḤ.

Foll. 1*a*—77*a*. Fol. 77*b* is blank.

A commentary on the Rāmāyaṇa of Vālmiki : by Vēṅkaṭēśvara, a disciple of Śivarāma.

Contains Adhyāyas 71 to 75 of Āraṇyakāṇḍa and Adhyāyas 1 to 42 of Kiṣkindhākāṇḍa.

Beginning :

अस्मदो द्वयोश्च इति बहुवचनम् । ततः किमित्यतः शोकेति । अनायासानां स्वयं कार्यसाधने अनीश्वराणाम्, एवं विविधं सर्वत्र धावमानानामस्माकमिति भावः । सदृशमुचितम् । कारुण्यं कर्तुमुपकारेणोपकाराय ; फले हेतौ तृतीया । वर्ततां भवानिति शेषः ।

* * * *

Colophon :

इति श्रीमदारण्यकाण्डे एकसप्ततितमः सर्गः ॥

* * * *

उक्तमर्थमुपसंहरति —तत इति । कृतो दूरदेशे संक्रमो गमनं यन सः कृतदूरसंक्रमः । ददर्श क्वचिदुपविश्य सम्यगालोकितवान् ॥

शिवस्य रामस्य गुरोर्महाकवेर्नियोजनानुग्रहणोपदेशनैः ।
तयाशिषारण्यककाण्डमर्थतः समुज्ज्वलं व्याकृत वेङ्कटेश्वरः ॥

Colohon :

श्रीमद्रामायणे श्रीमदारण्यकाण्डव्याख्याने सर्वार्थसाराभिधाने पञ्चसप्ततितमः सर्गः ॥

बलं विष्णोः प्रवर्धतां तादृगाशीरिति ज्ञेयम् ॥

किष्किन्धाकाण्डे काव्याङ्गभूतं शैलनदीवनऋत्वादिवर्णनं प्रस्तौति। विदुषामपि संसारिणामिष्टवियोगनिमित्तं विलापादिकं भगवता विडम्ब्यते । तत्र विवेकिना कार्यं सान्त्वनं साधुदर्शनेऽपि भीतः संदेहं प्राप्नोतीति च कथयति प्रथमे सर्गे ।

End:

रजन्याः क्षये स्वस्योदयगिरिगमनेनावसाने सति वैदेहीमभिगम्य अस्ति नास्तीति वा निश्चित्यैव निवर्तध्वम्। दिष्टं संदिष्टम्। प्रमाणं कर्तव्याकर्तव्यनिश्चायका इत्यर्थः। तथापि एनं प्रमाणं संस्थाप्य व्यवस्थाप्य कृतस्योपकारस्यास्य कार्यस्य रावणवधान्तस्य निपुणं निशम्येति क्रियाविशेषणम् ॥

Colophon:

इति श्रीमत्किष्किन्धाकाण्डव्याख्याने सर्वार्थसारे द्विचत्वारिंशः सर्गः ॥

त्रिचत्वारिंशे संशयाभासाश्रयोऽपि देशो दिव्यवस्त्वाश्रयतया वचनश्रवणगमनैरदृष्टाधायक इति दर्शयति।

* * * *

तमतिक्रम्येति। कालपर्वतमित्यर्थः। महागिरिम् अतिदीर्घविशालमित्यर्थः।

(*b*) वाक्यवृत्तिः—वाक्यवृत्तिप्रकाशिकासहिता.

VĀKYAVṚTTIḤ WITH VĀKYAVṚTTIPRAKĀŚIKĀ.

Foll. 78*a*—99*a*. Fol. 99*b* is blank.

Same work as the one described under No. 4722 of the D.C.S. MSS., Vol. IX.

Complete.

(*c*) वेदान्तविषयः.

VĒDĀNTAVIṢAYAḤ.

Foll. 100*a*—102*a*. Fol. 102*b* is left blank.

Seems to be a commentary on a treatise bearing on Advaitavēdānta.

Contains the first Adhyāya only; wants beginning.

Beginning:

संक्षिप्याह—संग्रहेणेति। यस्य शब्दस्योच्चारणे यत् स्फुरति तत् तस्य वाच्यं प्रसिद्धम्। समाहितचित्तस्य चोङ्कारोच्चारणे यद्विषयानुरक्तं

संवेदनं स्फुरति तदोङ्कारमवलम्ब्य तद्वाच्यं ब्रह्मास्मीति ध्यायेत् । तत्राप्यसमर्थे ओंशब्द एव ब्रह्मदृष्टिं कुर्यादित्यर्थः ।

End:

एवं पुरुष इत्यादिना । यावद्यावद्गुणापचयस्तावत्तावत् तारतम्येन सौक्ष्म्यं दृष्टं पृथिव्यादिषु । परमात्मनि तु गुणानामत्यन्ताभावान्निरतिशयसौक्ष्म्यं सिध्यतीत्याह—स्थूलतावदित्यादिना ।

Colohpon:

प्रथमाध्यायः समाप्तः ॥

अनादिरविद्याप्रतिबन्धः प्रागुक्तः । अधुनागन्तुकप्रतिबन्धप्रदर्शनायोक्तः ।

R. No. **145.**

Palm-leaf. 17⅜ × 1¼ inches. Foll. 22. Lines, 7 in a page. Grantha. Slightly injured.

Purchased in 1910–11 from Gōpālasāmi Ayyaṅgār of Mannārgudi.

(*a*) मिथ्यात्वानुमाननिरासः.

MITHYĀTVĀNUMĀNANIRĀSAḤ.

Foll, 1*a*—4*a* Fol. 4*b* is blank.

Same work as the one described under R. No. 93(*d*) *ante* with difference in the end only.

Complete.

End:

तस्मात् भेदाभेदवादं मिथ्यावादं परित्यज्यैवोक्तपरिष्कारः ब्रह्मानन्दाद्युक्ता अन्येऽपि च भेदघटितात्यन्ताभावघटिताः परिष्काराः संरक्षणीया इत्यलं पल्लवितेन ॥

(*b*) सत्यत्वानुमानसमर्थनम्.

SATYATVĀNUMĀNASAMARTHANAM.

Foll. 5*a*—19*b*.

A treatise in support of the inference that the universe of external manifestation is not unreal.

Incomplete.

Beginning:

सत्यत्वसाधकानुमानबाधिताश्च दृश्यत्वादयः । यद्यपि सत्यत्वानुमानेन सत्प्रतिपक्ष इति वक्तव्यम्, साध्याभावव्याप्यवत्पक्षस्य सत्प्रतिपक्षत्वात्, तथापि पक्षविशेष्यकसाध्यानुमितिप्रतिबन्धकतावच्छेदकविषयताकत्वमेव बाधत्वं सत्प्रतिपक्षसाधारणम् । न तु प्रकृतानुमितिप्रतिबन्धकतावच्छेदिका विरोध्यनुमितिजनकतानवच्छेदिका च या विषयता तन्निरूपकत्वरूपं सत्प्रतिपक्षव्यावृत्तम् । हेत्वभाववत्पक्षतद्व्याप्यवत्पक्षयोरसिद्धित्वस्येव साध्याभावतद्व्याप्यवत्पक्षयोर्द्वयोरपि बाधतायाः एव युक्तत्वात् । बाधविशेषस्य सत्प्रतिपक्षव्यवहारस्तु अस्माकमिष्ट एवेत्यवधेयम् ।

End:

न च शाब्दप्रमानुकूलशक्तिरेव तात्पर्यम् । न तु शाब्दप्रमानुकूलशक्तिः तत्र तात्पर्यत्वाव्यवहारादिति वाच्यम् । तथा सति बौद्धादिग्रन्थानां मि ।

Foll. 20*a*, 21*a* and 22*b* contain some footnotes on the same work and 20*b*, 21*b* and 22*a* are blank

---

R. No. **146.**

Palm-leaf $7\frac{5}{8} \times 1\frac{1}{4}$ and $6\frac{1}{4} \times 1\frac{1}{8}$ inches. Foll. 26. Lines, 5 in a page. Grantha. Slightly injured.

Purchased in 1910-11 from Mīnākṣiyammāḷ of Koḍuvāyūr.

(*a*) श्राद्धप्रयोगः.

ŚRĀDDHAPRAYŌGAḤ.

Foll. 1*a*—5*b*.

Similar to the work described under No. 3819 of the D.C.S. MSS., Vol. VII. This work describes the procedure as observed by the followers of Satyāṣāḍhasūtra of the black Yājurvēda.

Incomplete.

Beginning:

देवेभ्यो नमः। पितृपितामहप्रपितामहेभ्यो नमः . . स्वामिनः . . भवन्तोऽनुगृह्णन्तु . . श्राद्धकाले . . प्रवर्तये . . संकल्पः पुण्यतिथौ गोत्रस्य शर्मणः पितृभूतस्य यजमानस्य पितुः . . अद्यास्मिन् प्रत्याब्दिकश्राद्धं पार्वणविधानेनाद्य करिष्ये। वरणम् . . स्थलशुद्धिः . . अपेतवीता . . लोकमस्मै . . अपहताः . . उदीरताम्। औपासाग्निमुपसमाधाय . . दक्षिणाग्रागग्रैर्दर्भैरग्निं परिस्तीर्य।

End:

वहाज्यं जातवेदः पितृभ्यः यत्रैनान् वेत्थ विहितां पराके आज्यस्य कूल्या अवसागमन्तु सत्यायैषामाशिषः सन्तु कामैः स्वधा नमः पितृभ्य इदम्।

(*b*) अनाहिताग्निपैतृमेधिकप्रयोगः.

ANĀHITĀGNIPAITṚMĒDHIKAPRAYŌGAḤ.

Foll. 6*a*—8*b*.

Same work as the one described under No. 3519 of the D.C.S. MSS., Vol. VII.

Incomplete.

(*c*) अनाहिताग्निसंस्कारकारिका.

ANĀHITĀGNISAṀSKĀRAKĀRIKĀ.

Foll. 9*a*—17*b*

This describes the ritualistic procedure to be followed in connection with the cremation and other funeral ceremonies to be conducted in regard to a deceased person who had not consecrated the sacred fire by performing the ceremony called Agnyādhāna. This is also intended for the followers of Satyāṣāḍhasūtra of the black Yajurvēda.

Incomplete.

Beginning:

अनाहिताग्नेरनले विनष्टे मृतस्य वह्नेर्जघनं पुरोवत् ।
संपूर्य च द्वादशभिर्गृहीतं घृतेन दर्वीं जुहुयाच्च तूष्णीम् ॥
ततो व्याहृतिभिर्हुत्वा प्रेतमात्या इति क्रिया ।
इह विध्य(न्तरा)भावादयमेव विधिर्भवेत् ॥
अनाहिताग्नेर्मरणस्य काले कर्णे जपेद्दक्षिणतो . . . काः ।
शुचिस्तदा ब्रह्मविदा भृगुर्वै तथायुषो वाथ मृते त्वमात्याः ॥

End:

भुञ्जीयाज्ज्ञातिभिः पश्चादित्थं वै पार्वणक्रिया ।
आवाहनाग्निकरणं स्वधानिनयनं तथा ॥

(*d*) शंकरद्वादशकम्.

ŚAṄKARADVĀDAŚAKAM.

Foll. 18*a*—19*b*.

A dozen stanzas describing briefly the leading incidents in the life of Śaṅkarācārya and invoking his blessings. It is stated that a certain person taught these stanzas to his disciples for daily repetition.

Contains ten stanzas only.

Beginning:

अन्वहं पठितुं सर्वमाचार्यचरितं शुभम् ।
द्विषट्कं चाथ पद्यानां शिष्यायोपदिदेश सः ॥
देशे कालडिनाम्नि केरलधराशोभाकरे सद्द्विजा-
ज्जातः श्रीपतिमन्दिरस्य सविधे सर्वज्ञतां प्राप्तवान् ।
भूत्वा षोडशवत्सरे यतिवरो गत्वा बदर्याश्रमं
कर्ता भाष्यनिबन्धनस्य सुकविः श्रीशंकरः पातु नः ॥

End:

अस्मिन् जन्मनि चान्यजन्मसु मनोवाक्कर्मभिर्यत्कृतं
बाल्ये वा सति यौवने च विहितं यद्यत्कृतं वार्धके ।

अज्ञानादपि बुद्धिपूर्वमथवा यत् संचितं चानिशं
तस्मात्कल्मषबृन्दतः सकलतः श्रीशंकरः पातु नः ॥

(e) सरस्वतीस्तोत्रम्.

SARASVATĪSTŌTRAM.

Foll. 20*a*—24*a*. Fol. 24*b* is blank.

A prayer in praise of Sarasvatī, the goddess of learning.

Contains stanzas one to eleven and the last portion of stanza eighteen. Apparently a leaf is lost in the middle.

Beginning:

नित्यानन्दवपुर्निरन्तरगलत्पञ्चाशदर्णैः क्रमात्
व्याप्तं येन चराचरात्मकमिदं शब्दार्थरूपं जगत् ।
शब्दब्रह्म यदूचिरे सुकृतिनश्चैतन्यमन्तर्गतं
तद्वोऽव्यादनिशं शशाङ्कविमलं वाचामधीशं महः ॥

End:

. . . . . युगलनमन्मध्यदेशामधीशां
वाचामीडे चिराय त्रिभुवनविनतां पुण्डरीके निषण्णाम् ॥

(f) देव्युपनिषत्.

DĒVYUPANIṢAD.

Foll. 25*a*—26*b*.

Same work as the one described under No. 543 of the D.C.S. MSS., Vol. I, Part III.

Wants beginning and end.

R. No. **147**.

Palm-leaf. 13 × 1⅜ inches. Foll. 40. Lines, 9 in a page. Grantha. Good.

Purchased in 1910-11 from Mīnākṣiyammāḷ of Koḍuvāyūr.

(a) पैतृमेधिकविधिः.

PAITṚMEDHIKAVIDHIḤ.

Foll. 1a—35b.

Similar to the work described under No. 3702 of the D.C.S. MSS., Vol. VII.

Complete.

Beginning:

अथातः पैतृमेधिकविधिं व्याख्यास्यामः—

मरणसंशये मन्त्रस्नानादिकं कारयित्वा भस्मरुद्राक्षतुलसिधारणं च । पञ्चम्यां शुभतिथौ मम पितुः शरीरशुद्ध्यर्थं पुण्याहवाचनं च करिष्ये इति संकल्प्य.

* * * *

प्राचीनावीती गोत्रस्य शर्मणः मम पितुः प्रेतस्य पैतृमेधिकविधिना संस्कारार्थं प्रेतोपासनाग्निसंधानकर्म कर्तुं योग्यतासिद्धिरस्त्विति अनुगृहाण । प्रेतोपासनाग्निना पैतृमेधिकविधिना संस्कारं च कर्तुं योग्य . . ण ।

End:

पाथेयं दधिसंयुक्तं घृतशाकादिसंयुतम् ।
प्रपितामहतृप्त्यर्थं पितुरन्नं ददाम्यहम् ॥

वृद्धप्रपितामहतृप्त्यर्थमिदं पाथेयं सदक्षिणाकं सताम्बूलं तुभ्यमहं संप्रददे । पानकसंभारदानं दत्वा । पुण्याहजपदक्षिणा । द्वादशेऽहनि कृत्यं समाप्तम् ।

* * * *

उरसि अग्निं निधाय, अपसव्यं परिषिच्य, एवमाज्याहुतिः । अत्रोभयं प्रहरति । अपसव्यं परिषिच्य, स्नात्वा ब्रह्मदण्डम् ।

(b) अस्थिसंस्कारप्रयोगः.

ASTHISAṀSKĀRAPRAYŌGAḤ.

Fol. 36.

This gives the ritualistic procedure to be followed in conducting the cremation and other funeral ceremonies in regard to a deceased person whose bones alone are available.

Complete.

Beginning:

तद्दिने कर्तारो वपनं कृत्वा स्नात्वा अनुज्ञा । अशेषे . . . स्वीकृत्य, प्राचीनावीती, गोत्रस्य शमर्णः मम मृतस्य पितुः . . . . . अस्थिसंस्कारकर्म कर्तुं यो . . ण । अस्थीनि शरीराकृति कृत्वा, पञ्चगव्येन पुण्याहजलेन चाभिषिच्य, आवाहनम्—आयाहि प्रेत . . . शत(दध)द्रयिं च ।

End:

इत्यभिमन्त्र्य, असुनी ते . . स्वस्ति । यथोक्तविधिना दहेत् । सद्यः संचयनम् । . . मन्त्रावृत्तिः ॥

Colophon:

अस्थिसंस्कारः समाप्तः ॥

(c) दर्भसंस्कारः.

DARBHASAṀSKĀRAḤ.

Foll. 36*b*—37*b*.

Similar to the work described under R. No. 65(*f*) *ante*.

Complete.

Beginning:

तद्दिने कर्तारो वपनं कृत्वा अस्थ्यभावे पालाशवृन्तैः दर्भैर्वा शरीराकृतिं कृत्वा, तत्प्रकारः—चत्वारिंशता शिरः, दशभिर्ग्रीवा, विंशतिर्वक्षः ।

End:

केशश्मश्रुनखायां(नां) च कृन्तनादि न चेष्यते ।
चरुश्रपणनिर्वासग्रन्थिपिण्डं न कारयेत् ॥

क्षीरसेचनकर्तव्यसंचयोऽपि न दूष्यते ॥
. . . . . मन्त्रावृत्तिः ॥

Colophon:

दर्भसंस्कारः समाप्तः ॥

(*d*) गर्भिणीसंस्कारः.

GARBHIṆÎSAṀSKĀRAḤ.

Foll. 37*b* - 38*b*.

Describes how the funeral rites should be conducted in the case of the death of a pregnant woman.

Complete.

Beginning:

गर्भिण्याः षण्मासादूर्ध्वं मरणे तां श्मशानं नीत्वा तस्या उदरं वामतः स्वधितिना हिरण्यगर्भः समवर्तताग्रे इत्युल्लिख्य . . . . . .

इति गर्भ(र्चे)मुद्धृत्य यदि जीवति शिशुः, जीवति मम पुत्रः दीर्घायुत्वाय वर्त(र्चे)स इति तमभिमन्त्र्य, दीर्घायुत्वाय वर्चसे हिरण्यशकलमन्तर्धाय जलेनाभिषिच्य शिशुं ग्रामं नीत्वा ।

End:

यदि शिशुर्मृतः स्यात् गोमयेनाञ्ज(नादिभिर)लंकृत्य तस्याः पाददेशे व्याहृत्या निखनेत् । उत्क्रान्तिगोदानमारभ्य यथाविधि संस्कारं कृत्वा ॥

Colophon:

गर्भिणीसंस्कारविधिः समाप्तः ॥

(*e*) ब्रह्मचारिनारायणबलिविधिः.

BRAHMACĀRINĀRĀYAṆABALIVIDHIḤ.

Foll. 39*a*—40*b*

Contains the ritualistic procedure connected with the performance of Nārāyaṇabali (a sacrifice to Nārāyaṇa) in relation to the death of an unmarried person.

Complete.

Beginning :

पुत्रस्योपनीतस्य मरणे कपालाग्निमुत्पाद्य तदग्निना सर्वं पैतृमेधिक-विधिवत् एकोद्दिष्टान्तं कृत्वा । . . . . . .
अथातो नारायणबलिं व्याख्यास्यामः—दक्षिणायने उत्तरायणे वा द्वादश-दिने अपरपक्षद्वादश्यां वा नारायणबलिः क्रियते । पूर्वेद्युः द्वादश षट् द्वौ वा ब्राह्मणान् वा निमन्त्रयते ।

End :

स्नानं पुण्याहं यज्ञोपवीतधारणं विभूतिधारणं भोजनम् ॥

Colophon :

ब्रह्मचारिनारायणबलिः समाप्तः ॥

R. No. **148.**

Śrītāla. 12¾ × 2⅛ inches. Foll. 13. Lines, 11 in a page. Grantha. Good.

Purchased in 1910-11 from Mīnākṣiyammāḷ of Koḍuvāyūr.

सीताविजयः.

SĪTĀVIJAYAḤ.

This narrates the story of the conquest of a demon named Śatamukha-Rāvaṇa by Sītā. This forms part of the Vāsiṣṭha-rāmāyaṇa and consists of seven Adhyāyas.

Complete.

Beginning :

ऋषयः—

सूतसूत महाप्राज्ञ पुराणार्थविशारद ।

* * * *

रेफोच्चारणमात्रेण मुखान्निर्यान्ति पातकाः ।
पुनः प्रवेशभीत्या च मकारस्तु कवाटकः ॥
कायेन मनसा वाचा केवलैरिन्द्रियैः (परम्) ।
यत् पापं क्रियते नित्यं तन्नश्येदत्र नामतः ॥

अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
शृण्वतां सर्वपापघ्नं सीताविजयसंश्रितम् ॥

शातानन्दः—

नमस्ते ब्रह्मपुत्राय वसिष्ठाय महात्मने ।
शतास्यो नाम दनुजः सीतया निहतः पुरा ॥

Colophon:

इति वासिष्ठरामायणे सीताविजये प्रथमोऽध्यायः ॥

End:

शृणुयात् प्रयतो भक्त्या सर्वपापैः प्रमुच्यते ।
सर्वान् कामानवाप्यान्ते विष्णुलोकं स गच्छति ॥
इत्येवमुक्त्वा वै सूतः ऋषीन् सर्वान् मुनीश्वरान् ।
गन्तुकामः पुनः प्राह वचनं सर्वसौख्यदम् ॥
कुरुध्वं सज्जने प्रीतिं भजध्वं सततं हरिम् ।
मैत्रीं भजध्वं सर्वत्र यतो विष्णुमयं जगत् ॥

Colophon:

इति श्रीमद्वासिष्ठरामायणे सीताविजये श्रीरामपट्टाभिषेको नाम सप्तमोऽध्यायः ॥

R. No. **149.**

Śrītāla. 9 × 1½ inches. Foll. 51. Lines, 9 in a page. Grantha. Good.

Purchased in 1910–11 from S. Rāmakṛṣṇavādyār of Palghat.

(*a*) कुमारायुष्यश्लोकाः.

KUMĀRĀYUṢYAŚLŌKĀḤ.

Fol. 1*a*.

This is a collection of four stanzas addressed to Śiva with a view to confer longevity on one's own son.

Complete.

Beginning :

विपर्यस्य वेषं विहर्त्रोः स्वपित्रोः
समीपस्थिते स्तन्यकामे कुमारे ।
कटाक्षाङ्कुरः सस्मितं पातितो यः
स मे दीर्घमायुः कुमारे करातु ॥

End :

सुब्रह्मण्यसदाशिवाख्यपदयोरोङ्कारधर्मे मयि
त्वय्यर्थेऽपि च कर्मधारयवतोराम्नायमध्यस्थयोः ।
त्वं चाहं प्रणवस्य वाच्य इति तं स्कन्दं वदन्तं मुदा
श्लिष्यन् जिघ्रति मूर्ध्नि यः स भगवान् मद्बालकं रक्षतु ॥

(*b*) सुभाषितानि.

SUBHĀṢITĀNI.

Foll. 1*b*—45*b*.

This is a collection of choice and pithy stanzas on various subjects.

Contains 349 stanzas.

Beginning :

मातामहमहाशैलं महस्तदपितामहम् ।
कारणं जगतां वन्दे कण्ठादुपरि वारणम् ॥
सुभाषितेन गीतेन युवतीनां च लीलया ।
यस्य चित्तं न ह्रियते स नूनं पुरुषः पशुः ॥
सुभाषितसुधानन्दलहरी यदि लभ्यते ।
अलं हारैः किमाहारैर्विहारैरपि योषिताम् ॥

End :

कविता वनिता चैव स्वयमेवागता वरा ।
बलादाकृष्यमाणा चेत् सरसाप्यरसा भवेत् ॥

Foll. 46 and 47 are blank.

(c) सामवेदगानम्—ऊहः.

SĀMAVĒDAGĀNAM : ŪHAḤ.

Foll. 48*a*—51*a*. Fol. 51*b* is blank.

Same work as the one described under No. 50 of the D.C.S. MSS., Vol. I, Part II.

Incomplete.

R. No. **150.**

Palm-leaf. 16 × 1¼ inches. Foll. 76. Lines, 7 in a page. Grantha. Good.

Purchased in 1910–11 from Gōpālasāmi Ayyaṅgār of Mannargudi.

श्रुतप्रकाशिकाव्याख्या.

ŚRUTAPRAKĀŚIKĀVYĀKHYĀ.

A commentary on the Śrutaprakāśikā which itself is a commentary by Sudarśanasūri on the Śrībhāṣya of Rāmānujācārya.

Wants beginning and end in Jijñāsādhikaraṇa.

Beginning:

कृतयुगजनस्य व्यावृत्तिः। नन्वेवं तर्हि श्रीभाष्यमप्यनुपादेयमेव स्यात्, तस्यापि टङ्कादिग्रन्थापेक्षया विस्तीर्णत्वात् वृत्त्यपेक्षया संकुचितत्वाच्च। किं च वृत्त्यादिग्रन्थानां वैयर्थ्यं च स्यात्। वृत्त्यादि देशकालान्तरे उपकरिष्यति चेत् तदा इदानीमपि उपकर्तुमर्हति, अविशेषात्। किं च भवद्भिर्यथा शारीरकं योज्यते एवं सर्वेऽपि योजयिष्यन्ति, कृतमपूर्वभाष्य-निर्माणेनेतीमाः शङ्काः परिहर्तुमाह—बोधायनेनेत्यादि व्याख्यातव्यामिति यावदित्यन्तम्।

End:

नेह सूत्रे तद्विवक्षा युक्तेति परिहरति—न विरुद्धेति। सिद्धत्वा-देवेति। वेदप्रामाण्यादिविचारं विना मीमांसाशास्त्रे प्रवृत्तिरेव नोपपद्यते। स च प्रामाण्यविचारः प्रमाणलक्षणे। तदिह शास्त्रैक्याङ्गीकारे, तदभावे च प्रमाणलक्षणस्य तापत्रयपूर्ववृत्तत्वादिभिरप्युपजीव्यत्वात्।

R. No 151.

Śrītāla. 15⅛ × 1½ inches. Foll. 122. Lines, 9 in a page. Grantha. Good

Purchased in 1910–11 from Mīnākṣiyammāḷ of Koḍuvāyūr.

(*a*) आपस्तम्बशुल्बसूत्रम्.

ĀPASTAMBAŚULBASŪTRAM.

Foll. 1*a*—11*a*.

Same work as the one described under No. 1058 of the D.C.S. MSS., Vol. II.

It deals with the measurement of the various parts of the sacrificial ground and of the altars erected thereon together with the manner of their construction.

Complete.

(*b*) आपस्तम्बशुल्बसूत्रभाष्यम्.

ĀPASTAMBAŚULBASŪTRABHĀṢYAM.

Foll 11*a*—57*b*.

A commentary on the Śulbasūtra of Āpastamba: by Kapardisvāmin.

Contains Paṭalas one to five complete and the sixth incomplete.

Beginning:

उक्ता हविर्यज्ञाः सोमयज्ञाः । तेषामग्न्यायतनानि नियतप्रमाणानि नियतदेशानि । तेषामायामविस्तारान् वक्तुकाम आह—विहारयोगानिति । विहारयोगान् व्याख्यास्यामः । विह्रियन्ते अस्मिन्नग्नय इति विहाराः प्राग्वंशादयो गार्हपत्यादयश्च । युज्यतेऽनेनेति योगो रज्जुविशेषः । विहाराणां योगः विहारयोगः । विहारसंपादनार्थान् रज्जुविशेषान् व्याख्यास्यामः प्रतिपादयामः । . . . . . .

Colophon:

इत्यापस्तम्बसूत्रविवरणे शुल्बाख्यप्रश्ने पञ्चमः पटलः ॥

End:

श्येनचितं चिन्वीत सुवर्गकामः इति विज्ञायते । अस्याः श्रुतेः पुनरुपन्यासः मार्गान्तरं प्रतिपादयितुमनयैवैषा श्रुतिरियाने(यन्तमे) वाकारमाश्रिता । . . . . . .

एवमेव हि श्येनस्य वर्षीयांसौ पक्षौ पुच्छात् वक्रौ संनतम् ।

(c) चयनकारिका.

CAYANAKĀRIKĀ.

Foll. 5ᵇa—69b.

This is a metrical treatise dealing with the arrangement of bricks for the construction of Uttaravēdi (one of the fire altars) and the rites connected therewith.

Incomplete.

Beginning:

प्रकृतौ षोडशिन्यग्निरग्निष्टोमेऽपि नेष्यते ।
विकृत्योस्त्वनयोरिष्टः साद्यस्कादिनिषेधतः ॥
प्रकृत्योश्च विकृत्योश्च चीयेतोक्थ्यातिरात्रयोः ।
पर्वण्येकाष्टकायां वा संकल्पो विकृतेः क्रतोः ॥

End:

अरत्निपठितोऽन्वस्रा अर्धाङ्गुलिसमन्वितः ।
चयनं चाग्निमानं च तुल्यं सप्तविधाग्निना ॥
अथोच्यते द्विषाहस्रे परश्येने यथामति ।

(d) साग्निचित्यक्रतुप्रयोगः.

SĀGNICITYAKRATUPRAYŌGAḤ.

Foll. 70a—120a.

Same work as the one described under No. 1130 of the D.C.S. MSS., Vol. II, wherein this has been mentioned as Cayana-prayōga.

Complete.

The scribe signs himself as Ayyāsāmi.

Fol. 120*b* contains a small portion of Śrautaprayōgakārikā; fol. 121 of Śrautaprayōga; and fol. 122 of Bhartṛharisubhāṣita.

R. No. **152.**

Palm leaf. 1¼ × 1¼ inches. Foll. 58. Lines 8 in a page. Grantha. Good.

Purchased in 1910-11 from Mīnākṣiyammāḷ of Koḍuvāyūr.

(*a*) सोममैत्रावरुणम्.

SŌMAMAITRĀVARUṆAM.

Foll. 1*a*—15*b*.

This contains ritualistic directions to be followed by the sacrificial priest called Maitrāvaruṇa in Sōma sacrifices.

Complete.

Beginning:

अनाधृष्टमसि . . सुविते माधाः । स्पृष्टोदकं राजानमाप्याय-यन्ति । अंशुरंशुष्ट . . मशीय । स्पृष्टोदकं निहवन्ते प्रस्तरे पाणिं निधायोत्तानान् दक्षिणां सव्यान् नीचः । एष्टा रायः . . पृथि-व्यै । मित्रावरुणयोस्त्वा बाहुभ्यां प्रशास्त्रोः प्रशिषा प्रतिगृह्णामि । अक्रो विधुरो भूयासमुत्तरेण होतारम् । इत्यादि ।

End:

अग्नेः समिदसीत्यादि . . तस्मै ते नमः । संस्थाजपेनो-पतिष्ठन्ते ये ये प्रवृत्तकर्माणः ॥

Colophon:

सोममैत्रावरुणं समाप्तम् ॥

The MS. is dated: 25th Āni of Sarvadhari.

(*b*) शस्त्रप्रयोगः.

ŚASTRAPRAYŌGAḤ.

Foll. 16*a*—35*b*.

Contains directions for the priests, Brāhmaṇācchamsin, Acchāvāka, Pōtṛ, Nēṣṭṛ, Āgnīdhra and Grāvastut in regard to Śastra in sacrifices.

Complete.

Beginning:

अनाधृष्टमसि । अंशुरंशुष्टे । एष्टा रायः । प्रवृताहुतीर्हुत्वा । अध्वनामध्वपते । अग्नयः सगराः । उर्वन्तरिक्षं वीहि । . . . . शस्त्रम्—हिं भूर्भुवः सुवरों शों सावो मायाहि सुषुमाहित इन्द्रसोमं पिबा इमम् एदं बर्हिः सदोममोम् । प्रजावदिन्द्रमनुषो दुरोणे । तस्थुर्गृणन्तः सधमाद्यासा वौ ॥

End:

सोमस्याग्ने वीहि वौ । पूर्ववत् भक्षः ॥

Colophon:

ब्राह्मणाच्छंसिन उत्तमपर्यायशस्त्रं समाप्तम् ॥

(c) हौत्रप्रयोगः.

HAUTRAPRAYŌGAḤ.

Foll. 36*a*—54*b*

Same work as the one described under No. 1142 of the D.C.S. MSS., Vol. II, with difference in the end.

Contains directions for the priest Hōtṛ in connection with the following sacrifices:—Darśapūrṇamāsa, Ādhāṇa, Āgrayaṇa, Anvārambha, Pavitrēṣṭi, Agārēṣṭi, Pathikṛtēṣṭi, Dēvayāna and Kuṇḍalēṣṭi.

Complete.

End:

अग्नाविष्णू । अग्नाविष्णू महि धामेत्यग्नाविष्णोः पिप्रीहीत्यादि सूक्तवाके च ऊहयं संस्थाजपान्तम् ॥

Colophon:

कुण्डलेष्टिहौत्रं समाप्तम् ॥

Foll. 55 to 58 contain some miscellaneous information about sacrifies.

R. No. **153.**

Śrītāla. 19½ × 1⅞ inches. Foll. 131. Lines, 14 in a page. Grantha. Slightly injured.

Purchased in 1910–11 from Prasannācāriyar of Tiruppārkaḍal.

सिद्धान्तकौमुदीव्याख्या—सुखबोधिनी.

SIDDHĀNTAKAUMUDĪVYĀKHYĀ : SUKHABŌDHINĪ.

Same work as the one described under R. No. 33 *ante*. This is the original from which that MS. was copied.

Contains Śabdādhikāra to Kārakaprakaraṇa.

R. No. **154.**

Śrītāla $7\frac{5}{8} \times 1\frac{7}{8}$ inches. Foll. 47. Lines, 7 in a page. Grantha. Good.

Seventeen leaves are blank in the beginning.

Purchased in 1910–11 from Mīnākṣiyammāḷ of Koḍuvāyūr.

सन्न्यासविधिः.

SANNYĀSAVIDHIḤ.

Gives directions for initiating one into the order of ascetics; intended chiefly for the followers of Advaita Vēdānta.

Contains up to Ārādhanavidhi.

Beginning :

प्रव्रजेद्ब्रह्मचर्येण प्रव्रजेद्वा गृहादपि ।
वानप्रस्थः प्रव्रजेद्वाप्यातुरो वा सुदुःखितः ॥
प्राजापत्याग्निरूपेष्टिं सर्वमेव सदक्षिणाम् ।
आत्मन्यग्नीन् यथारोप्य ब्राह्मणः प्रव्रजेद्गृहात् ॥
आसन्ने संकटे घोरे चोरव्याघ्रादिसंकुले ।
भयप्राप्तस्य संन्यासः कर्तव्यो मनुरब्रवीत् ॥

End :

आतुरसंन्यासात्परं यतीनामातुरसंन्यासवतां महावाक्योपदेशपर्यन्तम् ॥

Colophon :

आराधनविधिः समाप्तः ॥

Fol. 47 contains directions for the worship of Hastāmalaka, etc.

R. No. **155.**

Palm-leaf. $15\frac{1}{4} \times 1\frac{1}{4}$ inches. Foll. 28. Lines, 6 in a page. Grantha. Good.

Purchased in 1910–11 from Mīnākṣiyammāḷ of Koḍuvāyūr.

आचारविधिः.

ĀCĀRAVIDHIḤ.

The following subjects are dealt with herein :—

Śaucavidhi.
Ācamanavidhi.
Brahmayajñavidhi.
Vibhūtidhāraṇavidhi.
Udakaśānti.
Rambhāsaṁskāra.
Kadalīvivāha.
Ārkavivāha.
Agnivibhāga.
Hōmavaikalyaprāyaścitta.
Piṇḍapitṛyajña.
Sarpaśānti.
Nāgapratiṣṭhā.

Complete.

Beginning :

अथातः शौचविधिं व्याख्यास्यामः । ग्रामाद्दूरं गत्वा यज्ञोपवीतं दक्षिणे कर्णे कृत्वा मृत्तिकां गृह्णाति काष्ठमन्तर्धायोपविश्य ।

End :

आवाहनादिषोडशोपचारैः संपूज्य ब्राह्मणान् भोजयेत् । आशिषो वाचयित्वेत्याह भगवान् पराशरः ॥

R. No. **156.**

Śrītāla. 16¼ × 2 inches. Foll. 182. Lines, 13 in a page. Grantha. Good.

Purchased in 1910–11 from Mīnākṣiyammāḷ of Koḍuvāyūr.

स्मृतिमुक्ताफलम्.

SMṚTIMUKTĀPHALAM.

Same work as the one described under Nos. 2788 and 2789 of the D.C.S. MSS., Vol. V.

The first fol. gives a list of the subjects dealt with in the work.

Contains Varṇāśramakāṇḍa complete.

The MS. is dated : 28th of the month of Kaṭaka in the year Vilambi ; and is said to have been written by Vēṅkaṭēśvaran for Ayyādīkṣitar.

R. No. 157.

Palm-leaf. 15½ × 2¼ inches. Foll. 230. Lines, 13 in a page. Grantha. Good.

Purchased in 1910–11 from Mīnākṣiyammāḷ of Koḍuvāyūr.

स्मृतिमुक्ताफलम्.
SMṚTIMUKTĀPHALAM.

Foll. 1*a*—220*a*.

Same work as the one described under No. 2794 of the D.C.S. MSS., Vol. V.

Contains Śrāddhakāṇḍa complete.

This MS. is dated the 14th Puraṭṭāśi of Plava and is said to have been given to Ayyāsāmidīkṣitar of Kēralapuram by Vēṅkaṭēśvaran.

Foll. 220*b* and 221 are blank. Foll. 222 and 223 give a table of contents of the work. Foll. 224 and 225 are blank. Foll. 226 and 227 contain Sannyāsavidhi as given in विश्वेश्वरस्मृति. Foll. 228— 230 are blank.

R. No. 158.

Palm-leaf. 9½ × 1⅜ inches. Foll. 84. Lines, 10 in a page. Grantha. Good.

Purchased in 1910–11 from Mīnākṣiyammāḷ of Koḍuvāyūr.

(*a*) स्मृतिमुक्ताफलम्.
SMṚTIMUKTĀPHALAM.

Foll. 1*a*—59*b*.

Contains Kālanirūpaṇa and a portion of Śrāddhakāṇḍa of the work described under the last number.

Beginning:

अथ कालो निरूप्यते—स च कर्मण्यङ्गभूतः। तदाह गर्गः—

. . . . . नं पुण्यपापयोः।
प्रधानगुणभावेन न स्वातन्त्र्येण ते क्षमाः॥ इति।

व्यासोऽपि—

यत्तिथौ यत्र नक्षत्रे वारे यत्र च यद्यथा।
विहितं वा निषिद्धं वा पालयंस्त्रिदिवं व्रजेत्॥

अपालयन् पुनर्मोहादपवित्रं पदं व्रजेत् । इति ।
काल एकोऽप्युपाधिभेदादनेकप्रकारः ।

End:

उदयेऽस्तमये वा यस्मिन् दिने करणसद्भावः तस्मिन् दिने [वदिने] तत् कर्मानुष्ठेयम् । साका(संक्रा)न्तिग्रहणादिकालो नैमित्तिकस्नानादि-प्रकरणे निरूपितः ॥

Colophon:

इति वैद्यनाथदीक्षितीये कालनिरूपणं नाम पञ्चमः परिच्छेदः ॥

(*b*) स्वरमनोज्ञमञ्जरी.

SVARAMANŌJÑAMAÑJARĪ.

Foll. 60*a*—84*b*.

A treatise discussing the principles of the Vēdic accentual system: by Narasiṁhasūri, son of Rudrārya.

Incomplete.

Beginning:

. . . पावनानथ गुरून् प्रणम्य तान् ।
पाणिनीयसमयानुसारिणी वक्ष्यते स्वरमनोज्ञमञ्जरी ॥
स्वभ्यस्तवेदः कुरुते प्रबन्धं स्वरार्थमावर्तितशब्दविद्यः ।
रुद्रार्यसूनुर्नरसिंहसूरिरसावदोषो विदुषां मुदेऽस्तु ॥

इह खलु निरन्तरं वेदाभ्यासनिरतानामध्यापकानामध्येतॄणां च सम्यगुदात्तादयः स्वरा विवेचनीयाः तथैवोच्चारयितव्याश्च । विवेकपूर्वं सम्यगुच्चारणे महाफलश्रवणात् । असम्यगुच्चराणे प्रत्यवायदर्शनाच्च ।

End:

चत्वार ऋत्विजः । चतस्रोऽधो दद्यादित्यत्र कथमाद्युदात्तत्वम् । प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमित्युक्तत्वात् त्रिचतुरोः स्त्रियाम् ।

R. No 159.

Palm-leaf. 12 × 1⅝ inches. Foll. 155. Lines, 8 in a page. Grantha. Good.

Purchased in 1910-11 from Mīnākṣiyammāḷ of Koḍuvāyūr.

(*a*) स्मृतिमुक्ताफलम्.

SMṚTIMUKTĀPHALAM.

Foll. 1*a*—118*a*. Fol. 118*b* is blank.

Same work as the one described under No. 2793 of the D.C.S. MSS., Vol. V.

Contains Āśaucakāṇḍa complete

The date of transcription and the name of the scribe are given :

विकृत्याख्ये वर्षे घटमुपगतेऽर्यम्णि दशमे
दिने पक्षे शुभ्रे नवमितिथिरोहिण्युडुयुते ।
रवेर्वारे शेषाद्रिमखिवरवंशाब्धिविधुना
द्विजेनाशौचाख्यो लिखितमि(इ)ह काण्डः सुमतिना ॥
शेषाद्रिसूरिणाशौचकाण्डः शेषाद्रियज्वनः ।
पञ्चमेनाधिलिखितो वसुधामृतपायिना ॥

(*b*) अवशिष्टधर्मनिरूपणम्.

AVAŚIṢṬADHARMANIRŪPAṆAM.

Foll. 119*a*—135*b*.

Same work as the one described under No. 2740 of the D.C.S. MSS., Vol. V. This seems to be a supplement probably to the Smṛtimūktāphala.

Complete.

(*c*) स्मृतिमुक्ताफलम्.

SMṚTIMUKTĀPHALAM.

Foll. 135*b*—149*b*.

Same work as the one described under No. 2800 of the D.C.S. MSS., Vol. V.

Contains Dravyaśuddhi complete.

The MS. is dated: Friday, the sixth day of the dark fortnight and the 2nd of Maśi in the year Vikṛti; and it was copied by Śeṣādridīkṣita, son of Koḍuvāyūr Rāmasvāmidīkṣita. Foll. 150 and 153 are blank; foll. 151 and 152 contain an index of the subjects dealt with in the Āśaucakāṇḍa.

(*d*) सोमोत्पत्तिः.

SŌMŌTPATTIḤ.

Foll. 154*a*—155*a*. Fol. 155*b* is blank.

Same work as the one described under No. 2592 of the D.C.S. MSS., Vol. IV.

Complete.

R. No. **160.**

Śrītāla. 9 × 1¼ inches. Foll. 114. Lines, 11 in a page. Telugu. Good.

Purchased in 1910–11 from Gōpālasāmi Ayyaṅgār of Mannargudi.

(*a*) चतुःश्लोकी.

CATUŚŚLŌKĪ.

Fol. 3*b* only.

Foll. 1*a*—3*a* contain the portions omitted here and there in this MS.

This work consists of four stanzas and a prose passage in praise of Lakṣmī, the consort of Viṣṇu: by Yāmunācārya

Complete.

Beginning:

स्वादयान्निह सर्वेषां त्रय्यन्तार्थं सुदुर्ग्रहम् ।
स्तोत्रायामास योगीन्द्रस्तं वन्दे यामुनाह्वयम् ॥
कान्तस्ते पुरुषोत्तमः फणिपतिः शय्यासनं वाहनं
वेदात्मा विहगेश्वरो यवनिका माया जगन्मोहिनी ।

ब्रह्मेशादिसुरव्रजः सदयितस्त्वद्दासदासीगणः
श्रीरित्येव च नाम ते भगवति ब्रूमः कथं त्वां वयम् ॥

End:

आकारत्रयसंपन्नामरविन्दनिवासिनीम् ।
अशेषजगदीशित्रीं वन्दे वरदवल्लभाम् ॥

(*b*) हस्तिगिरिमाहात्म्यम्.

HASTIGIRIMĀHĀTMYAM.

Foll. 4*a*—44*a*. Fol. 44*b* is blank.

Same work as the one described under No. 2600 of the D.C.S. MSS., Vol. IV, Part II.

Complete.

(*c*) ஞானசாரம்.

JÑĀNASĀRAM.

Foll. 45*a*—48*b*.

See the Tamil part of the Triennial Catalogue.

(*d*) பிரமேயசாரம்.

PRAMĒYASĀRAM.

Fol. 49 only.

See the Tamil part of the Triennial Catalogue.

(*e*) श्रीस्तुतिः.

ŚRĪSTUTIḤ.

Foll. 50*a*—51*b*.

A eulogy on the goddess Śrī or Lakṣmī: by Vēṅkaṭēśa, also called Vēdāntadēśika.

Complete.

Beginning:

आविर्भावः कलशजलधावध्वरे वापि यस्याः
स्थानं यस्याः सरसिजवनं विष्णुवक्षःस्थलं वा ।

भूमा यस्या भुवनमखिलं देवि दिव्यं पदं वा
स्तोकप्रज्ञैरनवधिगुणा स्तूयसे सा कथं त्वम् ॥

End:

उपचितगुरुभक्तेरुत्थितं वेङ्कटेशात्
कलिकलुषनिवृत्त्यै कल्पमानं प्रजानाम् ।
सरसिजनिलयायाः स्तोत्रमेतत् पठन्तः
सकलकुशलसीमासार्वभौमा भवन्ति ॥
कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

(f) श्रीगुणरत्नकोशः.

ŚRĪGUṆARATNAKŌŚAḤ.

Foll. 51*a*—54*b*.

Another eulogy on the goddess Lakṣmī: by Parāśarabhaṭṭa, son of Śrīvatsāṅkamiśra.

Complete.

Beginning:

श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः ।
श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे ॥
श्रियै समस्तचिदचिद्विधानव्यसनं हरेः ।
अङ्गीकारिभिरालोकैः सार्थयन्त्यै कृतोऽञ्जलिः ॥
उल्लासपल्लवितपालितसप्तलोकी-
निर्वाहकोरकितनेमकटाक्षलीलाम् ।
श्रीरङ्गहर्म्यतलमङ्गलदीपरेखां
श्रीरङ्गराजमहिषीं श्रियमाश्रयामः ॥

End:

श्रीरङ्गे शरदः शतं सह सुहृद्वर्गेण निष्कण्टकं
निर्दुःखं सुसुखं च दास्यरसिकां भुक्त्वा समृद्धिं पराम् ।

युष्मत्पादसरोरुहान्तररजः स्याम त्वमम्बा पिता
सर्वं च त्वमसि त्वमेव भव नः स्वीकुर्वकस्मात्कृपाम् ॥

Colophon :

श्रीगुणरत्नकोशं संपूर्णम् ॥

(*g*) आर्तिषोडशी.

ĀRTIṢŌḌAŚĪ.

Foll. 54*b*—55*b*.

A poem of praise and prayer addressed to God Varadarāja as worshipped at Conjeevaram : by Aṣṭagōtram Nṛsiṁhārya.

Complete in sixteen stanzas.

Beginning :

जन्मानन्त्यसमुत्थकिल्बिषपरीपाकोत्थदुःशेमुषी-
संजातानभिजातकृत्यकलनाशीलं सदा श्रीपते ।
पाहि श्रीकरिशैलनाथ करुणाकूपार पापाकरं
दासं मामरुणाब्जनत्रे यतिराण्मुख्यार्यसेव्य प्रभो ॥

End :

कटाक्षविषयं कृत्वा दासं कमललोचन ।
अनायासेन नय मां त्वत्पदाम्भोरुहद्वयम् ॥
अष्टगोत्रनृसिंहार्यकलितामार्तिषोडशीम् ।
यः पठेत्तस्य तु भवेत्करीशकरुणामिता ॥

Colophon :

पूर्णमिदं स्तोत्रमार्तिषोडशी ॥

(*h*) भगवद्गीता.

BHAGAVADGĪTĀ.

Foll. 56*a*—82*a*. The total number of stanzas in each Adhyāya is given in fol. 82*a*. Fol. 82*b* is blank.

Same work as the one described under No. 1992 of the D.C.S. MSS., Vol. IV, Part I.

Complete but without the Ṛṣicchandōdēvatā and the Aṅganyāsa and Karanyāsa.

(*i*) गीतार्थसंग्रहः.

GĪTĀRTHASAṄGRAHAḤ.

Fol. 83 only.

Same work as the one described under No. 4876 of the D.C.S. MSS., Vol. X.

Complete.

(*j*) विष्णुसहस्रनामस्तोत्रम्.

VIṢṆUSAHASRANĀMASTŌTRAM.

Foll. 84*a*—88*b*.

One thousand names in praise of Viṣṇu. This eulogy occurs in the 254th Adhyāya of the Ānuśāsanikaparvan of the Mahābhārata (Kumbakonam edition).

Complete.

Beginning :

यस्य स्मरणमात्रेण जन्मसंसारबन्धनात् ।
विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे ॥

* * * *

विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः ।
भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः ॥

End :

विश्वेश्वरमजं देवं जगतः प्रभुमव्ययम् ।
भजन्ति ये पुष्कराक्षं न ते यान्ति पराभवम् ॥

Colophon :

ओं तत्सदिति श्रीमहाभारते शतसहस्र्यां संहितायां वैयासिक्यां श्रीमदानुशासनिकपर्वणि श्रीभीष्मयुधिष्ठिरसंवादे मोक्षधर्मे श्रीविष्णुदिव्यसहस्रनामामृतस्तोत्रं संपूर्णम् ॥

(k) रहस्यत्रयविवरणम्.

RAHASYATRAYAVIVARAṆAM.

Foll. 89*a*—96*a*.

A metrical treatise in 265 stanzas explaining the meaning of the three Rahasyas (viz., Aṣṭākṣara, Dvaya and Caramaślōka). It purports to summarize the commentaries of Lōkācārya and Saumyajāmātṛyōgin on the three Rahasyas.

Complete.

Beginning :

सुन्दरजामातृमुनेः प्रपद्ये चरणाम्बुजम् ।
संसारार्णवसंमग्नजन्तुसंतारपोतकम् ॥
अस्मद्गुरूंस्तथाचार्यानखिलान् परमानपि ।
रामानुजार्यं करुणावात्सल्यवरुणालयम् ॥

* * * *

रहस्यत्रितयार्थोऽयं चिन्त्यते दृढताप्तये ।
रहस्यत्रितयं ज्ञेयं चेतनेन मुमुक्षुणा ॥
ज्ञातव्यमखिलं तस्मात् यस्मादत्राभिधीयते ।
रहस्यत्रितयं प्रोक्तं महानष्टाक्षरो मनुः ॥
द्वयाभिधं मन्त्ररत्नं चरमश्लोक इत्यपि ।

End :

मत्प्राप्त्यर्थतयोक्तेषु त्यक्त्वा साधनतां मयि ।
निवेशयाहं निष्पापं कुर्यां त्वं मा कृथाः शुचम् ॥
इति श्रीचरमश्लोकसंग्रहार्थो विचिन्तितः ।
सन्तः श्रीमूलमन्त्रोक्तस्वाकारत्रयवेदिनः ॥
गीतान्त्यार्थद्वयोक्तार्थमहाविश्वासशालिनः ।
श्रीशानेकेष्टकैङ्कर्यसिद्ध्यै त्यक्तान्यसाधनाः ॥

उत्तमाङ्गं स्वपादाब्जमालाभिर्भूषयन्तु मे ।

Colophon:

इति रहस्यत्रयविवरणे चरमश्लोकविवरणम् ॥ रहस्यत्रयविवरणं समाप्तम् ॥ मूलमन्त्रविवरणश्लोकाः १२३, द्वयविवरणश्लोकाः ६२, चरमश्लोकविवरणश्लोकाः ८०.

(*l*) अर्थपञ्चकम्.

ARTHAPAÑCAKAM.

Foll. 96*a*--97*b*.

Explains certain fundamental principles of the Śrī-Vaiṣṇava religion under the five following heads:—(1) the nature of the soul, (2) the nature of God, (3) the goal in view, (4) the means of attaining that goal, and (5) the nature of the obstacles preventing the attainment of the goal: by Gārgya Vēṅkaṭārya.

Complete.

Beginning:

श्रीभट्टयोगिनः शुद्धश्रीपादाब्जे रतः सदा ।
हंसः कान्तोपयन्तास्मन्मानसे रमतां मुदा ॥
रामानुजार्यस्वस्रीयकुलदुग्धाब्धिकौस्तुभम् ।
श्रीदयेशगुरुं वन्दे श्रीवत्सान्वयभूषणम् ॥
प्रणम्य पश्चिमार्याणामर्थानां पञ्चकं क्रमात् ।
ज्ञातव्यं मूलमन्त्रस्थं मुमुक्षूणां निरूप्यते ॥
प्राप्यस्य ब्रह्मणो रूपं प्राप्तुश्च प्रत्यगात्मनः ।
प्राप्त्युपायः फलं प्राप्तिस्तथा प्राप्तिविरोधि च ॥

End:

अर्चा त्वदीयशेषत्वं कृपा भगवतः परा ।
मुखोल्लासोऽहमादिश्च परादीनां परोऽवधिः ॥
इत्यर्थपञ्चकं गुप्तं रहस्ये सुदृशोद्धृतम् ।
गार्ग्यश्रीवेङ्कटार्येण प्राप्तं दुर्गतभीरुभिः ॥

Colophon:

अर्थपञ्चकं समाप्तम् ॥

(*m*) अध्यात्मचिन्ता.

ADHYĀTMACINTĀ.

Foll. 98*a*—100*b*.

Same work as the one described under No. 4864 of the D.C.S. MSS., Vol. X.

Complete.

(*n*) मन्त्रार्थकारिकामालिका.

MĀNTRĀRTHAKĀRIKĀMĀLIKĀ.

Foll. 101*a*—102*b*.

A metrical composition explaining the meaning of the Mūlamantra and the Dvayamantra: by Nārāyaṇa of Ciñcāpattana family.

Complete.

Beginning:

श्रीकूरकुलकन्दालवंशवार्धिसुधाकरम् ।
रघुनाथार्यजं वीरराघवाख्यं भजाम्यहम् ॥
अष्टाक्षरमनावाद्यपदत्रयविधानतः ।
शेषत्वं पारतन्त्र्यं च कैङ्कर्यं प्रतिपादितम् ॥
प्रणवोक्तमात्मरूपं विरोध्युपायौ नमःपदेनोक्तौ ।
नारायणायपदयोः प्रथितौ च परस्वरूपपुरुषार्थौ ॥

End:

वाक्यार्थः प्रापकस्यात्र स्वरूपस्य निरूपणम् ।
शेषिस्वरूपकथनं प्रधानार्थ इति स्मृतम् ॥
चिञ्चापत्तनवंशाब्धिचन्द्रो नारायणाह्वयः ।
चक्रे हिताय मन्त्रार्थकारिकामालिकां क्रमात् ॥

(*o*) व्यूहादिचतुष्टयस्तोत्रम्.

VYŪHĀDICATUṢṬAYASTŌTRAM.

Fol. 102*b* only.

Five stanzas in praise of the five kinds of manifestation of Viṣṇu, viz, Para, Vyūha, Vibhava, Antaryāmin and Arcā.

Complete.

Beginning:

श्रीभूमिनीलापतिमप्रमेयं शेषाशनाद्यैर्धृतपादपद्मम् ।
शेषासनस्थं परवासुदेवं श्रयामि वैकुण्ठपदं मुकुन्दम् ॥

End:

श्रीरङ्गशेषाचलहस्तिशैलस्थानादिषु ग्रामनिकेतनेषु ।
भक्तावनायादिपुमांसमीडचमर्चात्मनावस्थितमीशमीडे ॥

Colophon:

व्यूहादिचतुष्टयस्तोत्रम् ॥

(*p*) गोपिकागीता.

GŌPIKĀGĪTĀ.

Fol. 103.

Same work as the one described under No. 2420 of the D.C.S. MSS., Vol. IV, Part II.

Complete.

(*q*) आदित्यहृदयम्.

ĀDITYAHṚDAYAM.

Fol. 104.

Same work as the one described under No. 5945 of the D.C.S. MSS., Vol. XII.

Complete.

(*r*) रामस्तवः.

RĀMASTAVAḤ

Fol. 105.

This forms the 20th Sarga of the Yuddhakāṇḍa in Vālmīki's Rāmāyaṇa.

(s) गजेन्द्रस्तोत्रम्.

GAJĒNDRASTŌTRAM.

Fol. 106.

This is a eulogy on God Viṣṇu alleged to have been made by the king of the elephants when he was released by Him from the crocodile's jaws.

Incomplete.

Beginning:

निर्विशेषाय सौम्याय नमो ज्ञानघनाय च ।
क्षेत्रज्ञाय नमस्तुभ्यं सर्वाध्यक्षाय साक्षिणे ॥
पुरुषायात्ममूलाय मूलप्रकृतये नमः ।

End:

नमः कैवल्यनाथाय निर्वाणसुखसंविदे ।
नमः शान्ताय घोराय गूढाय गुणधर्मिणे ॥

(t) स्तोत्ररत्नम्.

STŌTRARATNAM.

Fol. 107.

This is in praise of Viṣṇu by Yāmunacārya. Incidentally the principles of the doctrine of Prapatti or self-surrender to God as a means of attaining salvation are explained.

Incomplete.

Beginning:

स्वादयन्निह सर्वेषां . . तं वन्दे यामुनाह्वयम् ॥
नमो नमो यामुनाय . . यामुनाय नमो नमः ॥
नमो यामुनपादाब्जरेणुभिः पावितात्मने ।
विदितास्विलवेद्याय गुरवे विदितात्मने ॥
नमोऽचिन्त्याद्भुतक्लिष्टज्ञानवैराग्यराशये ।
नाथाय मुनयेऽगाधभगवद्भक्तिसिन्धवे ॥

End:

एवं निसर्गसुहृदि त्वयि सर्वजन्तोः
वामिन् न चित्रमिदमाश्रितवत्सलत्वम् ॥

स्वाभाविकानवधिकातिशयेशितृत्वं
नारायण त्वयि न मृष्यति वैदिकः कः ।

---

(७) गजेन्द्रमोक्षः.

GAJĒNDRAMŌKṢAḤ.

Foll. 108*a*—114*b*.

Same work as the one described under No. 2400 of the D.C.S. MSS., Vol. IV, Part II.

Complete.

R. No **161.**

Śrītāla. 14⅛ × 1⅞ inches. Foll. 41. Lines, 10 in a page. Grantha Good.

Purchased in 1910–11 from Mīnākṣiyammāḷ of Koḍuvāyūr.

The first six leaves are left blank.

बोधायनदर्शपूर्णमासप्रयोगः.

BŌDHĀYANADARŚAPŪRṆAMĀSAPRAYŌGAḤ.

Foll. 7*a*—31*a*. The remaining foll. are blank.

A manual of ritualistic procedure to be followed in the performance of the sacrifices called Darśa and Pūrṇamāsa according to Bōdhāyana.

Complete.

Beginning :

हेरम्बमम्बां पितरं वाचां देवीं रमापतिम् ।
मित्रं विद्यागुरून् नौमि प्रत्यूहविनिवृत्तये ॥
शिरोमणिं सूत्रकृतां नौमि बोधायनं मुनिम् ।
येन कर्माण्यशेषाणि सूत्रितानि महात्मना ॥
दार्शस्य पौर्णमासस्य प्रयोगं हविषः स्फुटम् ।
कुर्वे संक्षिप्य विदुषां मुदे मन्दहिताय च ॥
ब्राह्मं सूत्रं याजमानमाध्वर्यवमसंगतम् ।
अनुक्रमेण सूत्रेण ग्रथयामि मणीनिव ॥

आमावास्येन वा पौर्णमास्येन वा हविषा यक्ष्यमाणो भवति । स प्रातरग्निहोत्रं हुत्वा केशश्मश्रुलोमनखानि वापयित्वा पवनादि कुर्यात् ।

End:

आक्षित्यायेदम् । परिषेचनान्तं कृत्वा । भूर्भुवः सुवः स्वाहा। प्रजापतय इदम् । परिषेचनान्तं कृत्वा । नमस्कारम् ।

R. No. **162.**

Śrītāla. 9½ × 1⅝ inches. Foll. 47. Lines, 8 in a page. Grantha. Good.

Purchased in 1910–11 from Mīnākṣiyammāḷ of Koduvāyūr.

सन्ध्यावन्दनभाष्यम्.

SANDHYĀVANDANABHĀṢYAM.

Foll. 1*a*—46*b*.

Fol. 47 contains a few lines in the Svaraprakaraṇa of the Aṣṭādhyāyī of Pāṇini.

Gives the commentary on the Mantras used in the Sandhyāvandana or the daily prayer of the followers of the Taittirīya-saṁhitā of the Yajurvēda.

Incomplete. The statement made in the colophon given below is apparently incorrect.

Beginning :

संध्यावन्दनानित्यमन्त्रा व्याख्यायन्ते—मन्तारं मननशीलं त्रायन्त इति मन्त्राः । पितामहः—

सूर्यस्येत्यनुवाकस्य छन्दो गायत्रमुच्यते ।
सविता देवता तस्माद्दृषिरग्निरिति श्रुतिः ॥
अथवा ऋषयो विश्वे देवा याज्ञवल्क्य उपनिषदो वा ।

सूर्यो वा लिङ्गोक्ता देवता। सूर्यश्च मामात्मानं मन्युश्च मन्युपतयश्च मां रक्षन्तामित्यन्वयः । सुष्ठु ईरयतीति सूर्यः । मन्युशब्देन तदभिमानी देवतोच्यते । तस्याः ये पतयः मननानियमनकुशला ऋषयः ।

End:

देवं देवत्रा देवानामपि त्रातारं सूर्यं पश्यन्तो वयमुत्तमं ज्योतिरगन्म गमिष्याम इत्यर्थः । उदि(दु)त्यं इति निपातोऽवधारणार्थः। अत्यन्तं जातानि भूतानि वेत्तीति जातवेदाः ॥

Colophon:

संध्यावन्दनभाष्यं संपूर्णम् ॥

R. No. **163.**

Palm-leaf. 9⅜ × 1¾ inches. Foll. 26. Lines, 9 in a page. Grantha. Good.

Presented in 1910–11 by Mīnākṣiyammāḷ of Koḍuvāyūr.

अघपञ्चषष्टिः—सव्याख्या.

AGHAPAÑCAṢAṢṬIḤ WITH COMMENTARY.

Same work as the one described under No. 3002 of the D.C.S. MSS., Vol. V.

The text and the commentary are also called Smṛtisiddhāntasudhā and Sajjanasahajīvanī, respectively. The text is by Vīṣinātha, while the commentary Sajjanasahajīvanī (wrongly stated as Smṛtisiddhāntasudhā by Rāmacandrabudha in No. 3002) is by Avadhānivājapēya.

Complete.

The following are added at the end :—

श्लोकैः षट्षष्टिसंख्यैर्मधुमधुरपदैर्विग्दि(र्वीषि)नाथोऽघभेदान्
व्याचख्यौ व्या च तुष्टचै विवरणमफलं यद्यपि स्यात् तथापि ।
प्रत्यक्षस्यापि भानोः प्रतिकृतिविधिवत्प्रास्तराद्यैर्जनानां
युक्तं व्याख्यानमस्याप्यसदृशमथान्य(थवाप्य)ग्निचिद्यज्वनो मे ॥

Colophon :

इति श्रीमदभयाम्बिकासमेतमायूरनाथकरुणामृताब्धिनिमज्जनलब्ध-समस्तभाग्यस्य श्रीमद्रायदीक्षिततातचरणकटाक्षवीक्षालब्धसमस्तविद्यस्य श्रीमदवधानिवाजपेयसाग्निचित्यसर्वपृष्ठाप्तोर्यामयाजिनः कृतिषु अघ-विवेचनव्याख्या सज्जनसहजीविनीसमाख्या समाप्ता ॥

The scribe states that the MS. was written by Ayyāsāmi on Friday, the 12th Āvaṇi, in the year Nala.

R. No. **164.**

Śrītāla. 12¾ × 2 inches. Foll. 139. Lines, 10 in a page. Grantha. Good.

Presented in 1910–11 by Mīnākṣiyammāḷ of Koḍuvāyūr.

(*a*) अग्निष्टोमहौत्रक्लृप्तिः.

AGNIṢṬŌMAHAUTRAKḶPTIḤ.

Foll. 25*a*—74*a*. The first 24 foll. are blank.

Contains directions for the Hōtṛ priest in relation to Agniṣṭōma sacrifice.

Complete.

Beginning:

अग्निष्टोमहौत्रक्लृप्तिरुच्यते। क्रतुसंकल्पकाले होता—को यज्ञः क ऋत्विजः का दक्षिणा इति प्रतिवचनं ब्रूयात्। महं मे वोचो भर्गो मे वोचो यशो मे वोचः स्तोमं मे वोचः क्लृप्तिर्मे वोचो भुक्तिर्मे वोचः सर्वं मे वोच इति जपित्वा तन्मावतु तन्मा विशतु तेन भुक्षिषीय। अग्निष्टे होता स ते होताहं ते मानुषः इति प्रतिजानीयात्।

End:

आहवनीये सर्वप्रायश्चित्तानि करोति अयाश्चेत्यादि।

ओं च मे उदवसायनीयया यजन्ते पौनराधेऽपि कृत्या विकृता-विकृता संतिष्ठतेऽग्निष्टोमोऽग्निष्टोमः॥

Colophon:

अग्निष्टोमस्य हौत्रं समाप्तम्॥

The scribe states that the MS. was written by Ayyāsāmidīkṣita on Friday, the 12th of Āḍi, in the year Nala.

(*b*) अग्निष्टोमहोतृसप्तकम्.

AGNIṢṬŌMAHŌTṚSAPTAKAM.

Foll. 74*a*—100*b*.

Contains directions regarding the respective duties of the seven Hōtṛ priests, viz., Maitrāvaruṇa, Acchāvāka, Nēṣṭṛ, Āgnīdhra, Grāvastut, Brāhmaṇācchaṁsin and Pōtṛ in the performance of sacrifices.

Complete.

Beginning:

मित्रावरुणयोस्त्वा बाहुभ्यां प्रशास्त्रोः प्रशिषा प्रतिगृह्णामि। अवक्रो भूयासमुत्तरेण होतारमतिव्रजेत् दक्षिणेन दण्डं हरेत्। न चोनेन

संस्पृशेदात्मानं वान्यं वा प्रैषवचनात् दक्षिणने होतृषदनात् । प्रह्व उपस्थाय वेद्यां दण्डमवष्टभ्य ब्रूयात्—होता यक्षदग्निं . . . होतर्यज ।

End :

प्रजिगात बाहुभिः । सीदता बर्हिरुरवः सदस्त्र तं मादयध्वं मरुतो मध्वो असन्धसा वौ सोमस्याग्ने वीही वौ । संस्थाजपान्तम् ।

Fol. 96 gives the date, 16th of Kanyā month in the year Raudri; and fol. 99*b* gives the date, 17th of Kanyā month in the same year.

(*c*) चातुर्मास्यहौत्रप्रयोगः.

CĀTURMĀSYAHAUTRAPRAYŌGAḤ.

Foll. 101*a*—111*b*.

Contains directions for the Hōtṛ priest in regard to Cāturmāsya sacrifice.

Complete.

Beginning :

चातुर्मास्यानां प्रयोग उच्यते । पूर्वेद्युरन्वारम्भणीयेष्टिः । अस्या इष्टेः पञ्चदश सामिधेन्यः । वात्रघ्नावाज्यभागौ । अग्निर्वैश्वानरः पर्जन्यश्च प्रधान-देवते । स्विष्टकृत्प्रयाजादयोऽङ्गदेवताः । देवा आज्यपाश्च । नमः प्रवक्र इत्यादि ।

End :

स्विष्टकृतः । प्रेद्धो अग्न इमो अग्न इति संयाज्ये । वाचस्पति-नेत्यादि । नवानूयाजाः । प्रथमया विभक्त्या देवता आदित्योज्जितयः वैश्वदेववत् वाजिनं प्रचारवर्जं संस्थाजपान्तं समाप्य सोमेन यजेत अशक्तौ पशुना वा ॥

Colophon :

समाप्तानि चातुर्मास्यानि ॥

(*d*) सौत्रामणिहौत्रमैत्रावरुणप्रयोगः.

SAUTRĀMAṆIHAUTRAMAITRĀVARUṆAPRAYŌGAḤ.

Foll. 111*b*—114*b*. The remaining foll are blank.

Deals with the duties and functions of the Hōtṛ and the Maitrāvaruṇa priests in regard to the Sautrāmaṇi sacrifice.

Complete.

Beginning :

अङ्गसौत्रामणिहौत्रप्रयोग उच्यते—आग्नावैष्णवप्रभृतिनिरूढपशुबन्धवत् । पश्वावाहनकाले सौत्रामण्याः पशूनां सप्तदश सामिधेन्यः । वार्त्रघ्नावाज्यभागौ । अश्विनौ सरस्वतीन्द्रश्च पशुदेवताः । वनस्पतिः पृषदाज्यदेवता । स्विष्टकृत्प्रयाजादयोऽङ्गदेवा देवा आज्यपाश्च । अग्निमन्थादि निरूढवत् । नमः प्रवक्र इत्यादि । पृथुपाजास्तंसबाधः । आवह देवान् यजमानाय । अग्निमग्न आवह । सोममावह ।

End :

दण्डं नानुप्रहरेदवभृते(थे)ऽत्रेति वचनात् । अवभृतं(थं) वरुणप्रघासवत् संस्थाजपान्तम् ॥

Colophon :

अङ्गसौत्रामणिमैत्रावरुणं समाप्तम् ॥

* * * *

असि भद्रवाच्याय प्रेषितो मानुषः । सूक्तवाकाय सूक्ता ब्रूहि ।

The scribe's signature : Ayyāsāmudīksita, on Sunday, the 21st of Ādi, in the year Nala

---

R. No. **165**

Palm-leaf. 18 × 1¾ inches. Foll 61. Lines, 7 in a page Telugu. Injured.

Presented in 1910-11 by Dūpalli Veṅkaṭappa Śāstri of Repalli, Guntur district.

(*a*) व्युत्पत्तिवादः.

VYUTPATTIVĀDAḤ.

Foll. 1*a*—22*b*.

Same work as the one described under No. 4290 of the D.C.S. MSS., Vol. VIII.

Contains Dvitīyāvibhaktyartha only; wants beginning and end.

(b) अद्वैतसिद्धान्तविजयव्याख्या.

ADVAITASIDDHĀNTAVIJAYAVYĀKHYĀ.

Foll. 23a—41b.

A commentary on the work described below.

Incomplete.

Beginning:

त्वदीयपादाम्बुजयोर्मनो मे भृङ्गायतां शंकर किंकरस्य ।
तथा भवान्या मम सज्जनन्याः स्मृतोऽर्थलाभः स्वत एव भूयात् ॥
मम जिह्वाङ्गणे नित्यं नृत्यतु श्रीसरस्वती ।
अलभ्यार्थास्तु सुलभा भवन्तु तत एव मे ॥
सार्थानि वेदान्तवचांसि येन यो
हिरण्यविद्विट् च सुदर्शनाश्रयः ।
प्रह्लाद उत्सर्पति यस्य चिन्तया
स मे नृसिंहो यतिराट् परा गतिः ॥

अतीतपरिच्छेदे लाघवाद्युपोद्बलितानुमानादिना अहमर्थातिरिक्त एव कूटस्थो निर्विशेषश्च चिद्रूप आत्मेत्युक्तम्; तदयुक्तम्, जीवेश्वरयोर्जीवानां च परस्परभेदग्राहिप्रत्यक्षादिप्रमाणविरोधेन लाघवाद्यनवतारादित्याक्षेपनिरासाय भेदमिथ्यात्वं निरूपयितुं परिच्छेदान्तरमारभमाणस्तदर्थं दर्शयन् श्रीनृसिंहं प्रार्थयते—नरहरिरिति । नरसिंहात्मकरूपमास्थाय सर्वदा स्वस्मृतिमतो हिरण्यकशिपोरनर्थकहेतुशरीरभङ्गमुत्पाट(द)यन् नृसिंहपदलक्ष्यतत्त्वंपदार्थाभेदज्ञस्यैवाशरीरत्वाख्यो मोक्षो भवतीति यः प्रकटयति स इति द्रष्टव्यम् । अभेदप्रमैव पुरुषार्थहेतुरिति मन्वतो(न्वानो) भेदमिथ्यात्वमाह—निजेति । निजा अनादिसिद्धा गुणमयी गुणात्मिका

या माया अनिर्वचनीयज्ञानं तावन्मात्रस्तदधीनसत्ताकः प्रमात्रादिभेदो यस्मिन् स तथोक्तः । बहुवादिसंमतभेदभङ्गेनाद्वैतस्थापनसामर्थ्यं गुरुचरणसेवयैव प्राप्तमिति द्योतयन् गुरून् महीकरोति—जगदिति ।

End:

तत्र हेतुमाह धर्मभेद इति । यदा एकस्मिन् वृक्षे अग्रावच्छिन्नवृक्षप्रतियोगिकमेकं कपिसंयोगावच्छिन्नप्रतियोगिकमपरं वृक्षत्वावच्छिन्नप्रतियोगिकमन्यदित्यनेकानि तादात्म्यानि धर्मिभेदात् भिद्यन्ते । तथाच मू ।

(c) अद्वैतसिद्धान्तविजयः.

ADVAITASIDDHĀNTAVIJAYAḤ.

Foll. 42*a*—61*b*.

A treatise establishing the Advaita view of the Vēdānta : by a disciple of Jagannāthāśrama.

Incomplete.

Beginning:

येनाखण्डि तमःकाण्डवेतण्डोद्दण्डतेजसा ।
द्वैतशाल्मलिरेतस्मै नमः स्ताद्गुरवे मम ॥

. . . . . .

स्थापयित्वा परं ज्योतिरादित्यमहमारभे ॥
नरहरिवपुषा यो दारयन् दानवोरः
प्रकटयति पुमर्थोऽभेददृष्टावितीशः ।
निजगुणमयमायामात्रमात्रादिभेदो
गुरुतरदयया मां पातु लक्ष्मीनृसिंहः ॥
जगन्नाथाश्रममुनेश्चित्रं चरणरेणवः ।
वाचामगोचरेऽप्यर्थे मूकं वाचालयन्ति माम् ॥

अथास्य परस्माद्विभागः परीक्ष्यते—तत्र जीवपरयोः स्वाभाविको भेदः परमार्थ इति केचित् । औपाधिकः परमार्थ इत्यन्ये । औपाधिकानिर्वचनीय इति भगवत्पादीयमतानुसारिणः । ननु यद्यत्र प्रमाणतः

प्रतीयते तत्तत्र सद्विपरीतं चासादिति स्थितिः। जीवे च परस्माद्भेदः प्रत्यक्षादिभिः प्रमीयते। तथाहि—तत्र नवीनः प्रत्यक्षं तावत् जीवब्रह्मभेदे प्रमाणम्, नाहं सर्वज्ञो नाहं निर्दुःख इत्यनुभवात्।

* * * *

एतेन प्रत्यक्षस्योपजीव्यत्वेन बलवत्त्वात् तेन श्रुतेर्बाध इति निरस्तम्। उपजीव्यांशस्य श्रुत्या बाधि(त)त्वात्। भेदसत्तांशे प्रामाण्यस्यानुपजीव्यत्वात्। तदाहुः—उत्पादकाप्रतिद्वन्द्वत्वात् इति। प्रत्यक्षस्य ज्येष्ठत्वेऽपि प्रत्यक्षश्रुत्योर्भिन्नविषयत्वान्न श्रुतिबाधः।

तस्मादद्वैतसिद्धान्तविजये दुन्दुभिः श्रुतिः।
नान्येतोऽस्तीति जयति भेदवादिशुगावहा॥

End:

तथापि दर्पणे मुखं पश्यामि, ममेदं मुखं, ग्रीवास्थमेव मुखमत्र प्रतीयते अहंपूर्वमुखं, मम मुखं तु मदाभिमुखं प्रतीयते, इत्यादिमुखप्रतिफलन . . . . . .
तदभेदाद्यनुभवैः स बाध्यते। न च वैपरीत्यापत्तिः, अनेकानुभवबि।

R. No. 166.

Palm-leaf. 17½ × 1⅜ inches. Foll. 88. Lines, 6 in a page. Telugu. Injured.

Presented in 1910-11 by Dēvulapalli Veṅkaṭappa Śāstri of Repalli, Guntur district.

(*a*) तत्त्वचिन्तामणिः.

TATTVACINTĀMAṆIḤ.

Foll. 1*a*—4*a*. Fol. 4*b* is blank.

Same work as the one described under No. 3982 of the D.C.S. MSS., Vol. VIII.

Contains Anumānakhaṇḍa up to Siddhāntalakṣaṇa.

(*b*) तत्त्वचिन्तामणिव्याख्या—दीधितिः.

TATTVACINTĀMAṆIVYĀKHYĀ : DĪDHITIḤ.

Foll. 5*a*—11*b*.

Same work as the one described under No. 4002 of the D.C.S. MSS., Vol. VIII.

Contains from Pañcalakṣaṇī to Pūrvapakṣavyāpti.

(*c*) तत्त्वचिन्तामणिदीधितिप्रकाशिका.

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ.

Foll. 12*a*—88*a*. Fol. 88*b* is blank.

Same work as the one described under No. 4049 of the D.C.S. MSS., Vol. VIII.

Contains Pañcalakṣaṇī and Caturdaśalakṣaṇī.

R. No. **167.**

Palm-leaf. 16⅞ × 1¼ inches. Foll. 48. Lines, 8 in a page. Telugu. Injured.

Presented in 1910-11 by Prayāga Sītārāma Śāstri of Guntur.

(*a*) अभिज्ञानशाकुन्तलम्.

ABHIJÑĀNAŚĀKUNTALAM.

Foll. 1*a*—41*b*.

Complete.

Fol. 42 contains Caṇḍīstōtra.

(*b*) वृत्तरत्नाकरः.

VṚTTARATNĀKARAḤ.

Foll. 43*a*—48*b*.

Wants beginning and end.

R. No. 168.

Paper. 8¼ × 6½ inches. Foll. 106. Lines, 20 in a page. Telugu. Injured.

Purchased in 1910–11 from Gōpālaṭāmi Ayyaṅgār of Mannargudi.

अलङ्कारशिरोभूषणम्.

ALAṄKĀRAŚIRŌBHŪṢAṆAM.

A work on poetics: by Kandālayārya, son of Rāmānujārya and grandson of Kēśavārya of Rāyalūri family and of Kauśikagōtra. The author was a Paṇḍit in the court of Vēṅkaṭabhūpati, son of Sōmabhūpati (by Giryamāmbā), who was the son of Nallāreḍḍi of Muṣṭipalli family (also called Pākanāḍu family) and of Miṭimillagōtra; and the work was composed at the instance of this Vēṅkaṭabhūpati. The author lived in Bōruvalli in Naḍigaḍḍa country which lies between the Tuṅgabhadrā and the Kṛṣṇā.

Contains Ullāsas one to ten.

Beginning:

कन्दालदोड्डयाचार्यचरणौ शरणं वृणे ।
यन्नतौ कवितागङ्गालहरी विहरिष्यति ॥
अतिशयोऽस्ति महांश्च महागुरोः
चरणयोरनयोः सरसीरुहात् ।
भवति तत् स्वयमेव गृहं श्रियः
परमिमौ तनुतः स्वसमाश्रितान् ॥

* * * *

तस्मिन् कार्ष्णिवलं वर्णं सुवर्णमिव शुश्रुम ।
वर्णोत्कर्षश्च तत्रापि पाकातिशयतः परः ॥
वंशोऽपि पाकनाडिति विख्यातो लोकपुण्यपरिपाकात् ।
तत्र मिटिमिल्लगोत्रं प्रोक्तमभूत् भूरिगोत्रराजत्वम् ॥
तस्य मिट्मिल्लगोत्रस्य महिमा वागगोचरः ।
यत्र श्रीवेङ्कटक्ष्माभृन्मुख्या जाता महीभृतः ॥

* * * *

तन्मुष्टिपल्लिवंशे जाता मुक्तामयाश्च राजानः ।
वेङ्कटनायकमणिना गुणिना हृदयंगमा बभुः सुदृशाम् ॥
माणिक्यस्तम्भशुम्भद्धनकनकमहाभित्तिसंपत्तिदीव्य-
द्देहव्यूहान्तरालाविरलसदयिताश्लेषयोषास्ति तेषाम् ।
भास्वच्छ्रीबोरुवल्ली भुवि कविविदुषां भाग्यदा कल्पवल्ली
राज्ञां श्रीमुष्टिपल्लीकुलजलधिभुवां राजधानीमतल्ली ॥
नडिगङ्गसीमनामा देशः खलु भाति तेन नगरेण ।
मध्यस्थत्वात् पुण्यो यत्कृष्णातुङ्गभद्रयोः श्रेष्ठः ॥

* * * *

नल्लारेड्डीति विख्यातस्तेषु राजस्वभोभवीत् ।
यत्कीर्तिपूरकर्पूरपूरिताजाण्डपेटिका ॥
गुणरत्नाकरात् तस्मात् जातौ सोमौ च सत्प्रभू ।
सर्वज्ञशेखरौ सर्वकलापूर्णौ द्विजाधिपौ ॥

* * * *

स एकदा वेङ्कटभूमिपालकः सभासदां मध्यगत कलारतः ।
सुधामयैः सूक्तिझरैः प्रमोदयन् प्रशंसयामास कवीन् समादरात् ॥

* * * *

काव्यमेव परं पुसां विलक्षणविभूषणम् ।
यदेकदैव बहुभिर्धार्यते सदनश्वरम् ॥
तादृग्बहुविधग्रन्थग्रथनात्तमहायशः ।
कन्दालयार्य भवता कर्तव्यं काव्यमुत्तमम् ॥

* * * *

एवं संप्रार्थितस्तेन राज्ञा सभ्यैरनूदितः
करोमि सदलंकाराशिरोभूषणमुत्तमम् ॥
श्रीरङ्गधाम्नि भवने भुजगे शयानः
श्रेयो हरिर्दिशतु नः स जगन्निवासः ।

श्रीरङ्गवासततमम्बु खगेशयान-
सूनुश्च येन निहितौ हृदि नाभिकञ्जे ॥

* * * *

विष्णोर्नाभीसरोजाद्विधिरुदयमगात् तस्य वंशे वरिष्ठः
संजातः कौशिकोऽभून्मुनिरतुलतपास्तस्य गोत्रे प्रसिद्धः ।
आसीत् श्रीकेशवार्यस्तदनु समभवत् तस्य रामानुजार्यः
तस्यासीत् पुत्ररत्नं कविकुलतिलकः कोऽपि कन्दालयार्यः ॥
अशेषभाषापटुरायल्लरिकन्दाडयार्यः कविसार्वभौमः ।
कलानिधिः कौशिकगोत्रसिन्धुसुधागभस्तिः सुमहाप्रशस्तिः ॥

* * * *

अस्मिन् शास्त्रे काव्यस्य प्राधान्यतो निरूप्यत्वात् तस्य च शब्दार्थ-शरीरकत्वेन तयोरपि निरूपणीयतायां तत्रादौ शब्दस्य वर्णगणात्मकतया तयोरपि निरूपणीयत्वे प्रथमं गणावयवभूतान् वर्णान् विवेचयिष्यामः। तत्रादौ वर्णोत्पत्तिप्रकारः ।

* * * *

Colophon:

इति श्रीमत्सकलकल्याणगुणगणपरिपूर्णकृष्णातुङ्गभद्रामध्याधिष्ठित-श्रीबोरुवल्लिनगरविहरमाणश्रीकेशवस्वामिचरणनलिनयुगलसेवाधुरीणताभि-रामसोमभूपतिसतीललामगिर्यमाम्बागर्भक्षीरपाथोनिधिसुधाकरायमाणवेङ्कट-क्षमाभृन्महास्थानाविद्वन्महाकविना कौशिकगोत्रतिलकेन श्रीमद्रायल्लयन्वय-यसमुद्भवेन कन्दालयार्येण विरचितेऽलंकारशिरोभूषणनामन्यलंकारशास्त्रे प्रथमोल्लासः ॥

End:

यद्यप्यस्मिन् नायिकाप्रकरणे बहु विचारणीयमस्ति, तथापि ग्रन्थ-विस्तरभयात् यद्यदुपयुक्ततमं तत्तदेवोपन्यस्तमस्माभिः । अन्यथा दुरव-गाहोऽयं स्यात् प्रबन्ध इति ॥

* * * *

श्रीरङ्गशायिपदसादकारि तत्रायमर्थवानास्ताम् ।
त्रिजगदलंकार(शिरो)भूषणनामाभिर्या(रो)चयन् ग्रन्थः ॥

Colophon:

श्रीमत्सकलकल्याणगुणगणपरिपूर्णकृष्णातुङ्गभद्रामध्याधिष्ठितश्रीबोरुवल्लीनगरविहरमाणश्रीकेशवस्वामिचरणनलिनयुगलसेवाधुरीणताभिरामसोमभूमिपतिसतीललामागर्यमाम्बागर्भक्षीरपाथोनिधिसुधाकरायमाणवेङ्कटक्षमाभृन्महास्थानविद्वन्महाकविना कौशिकसगोत्रतिलकेन श्रीमद्रायलूर्यन्वयसमुद्भवेन कन्दालयार्येण विरचितेऽलंकारशिरोभूषणनामन्यलंकारशास्त्रेदशमोल्लासः ॥

The following are the subjects dealt with in the various chapters of the work :—

१. उपोद्घात.	५. दोषप्रकरण.
२. काव्यलक्षण.	६. गुणप्रकरण.
३. ध्वनिप्रकरण.	७, ८, ९. काव्यविशेषप्रकरण.
४. रसप्रकरण.	१०. नायकप्रकरण.

R. No. 169.

Palm-leaf. 19½ × 1⅜ inches. Foll. 68. Lines, 8 in a page. Telugu. Injured.

Presented in 1910–11 by Prayāga Sītārāma Śāstri of Guntur.

Fol. 1 contains Grahaṇanirṇaya and foll. 2 to 5 contain some work on Anumāna portion in Tarka (logic).

(*a*) तत्त्वचिन्तामणिव्याख्या—फक्किका.

TATTVACINTĀMAṆIVYĀKHYĀ: PHAKKIKĀ.

Foll. 6*a*—20*b*.

Same work as the one described under No. 4019 of the D.C.S. MSS., Vol. VIII.

Contains Anumāna incomplete.

(*b*) व्युत्पत्तिवादः.

VYUTPATTIVĀDAḤ.

Foll. 21*a*—33*b*.

Same work as the one described under No. 4290 of the D.C.S. MSS., Vol. VIII.

Contains up to Rājapuruṣavādārtha in Prathamāvibhakti.

(*c*) आख्यातवादः.

AKHYĀTAVĀDAḤ.

Foll. 34*a*—37*b*.

A treatise in logic discussing the exact force of finite verbs and the meanings of different tenses: by Jayarāmasūri.

Complete.

Beginning:

सीताश्लेषमिलन्नवार्द्रविलसत्काश्मीरबिन्दुत्विषा
भास्वद्विद्रुमपद्मरागशकलस्यूतेन्द्रनीलत्विषम् ।
ग्रैवेयादिमणिप्रदीप्ततनुभिर्लोकैः स्वसर्वात्मतां
कुर्वाणं प्रकटं भजे हृदि सदा श्रीरामचन्द्रप्रभुम् ॥

लः कर्मणि चेत्यादिसूत्रेण लकाराणां कर्तरि शक्तिरिति वैयाकरणाः । तत्र शक्त्यङ्गीकारे कर्तृत्वं शक्यतावच्छेदकं वाच्यम् । तच्च कृतिरूपम् । कृतीनां चानन्त्यात् गौरवेण लाघवात् कृतित्वावच्छिन्ने शक्तिरिति नैयायिकाः । ननु कृतौ शक्त्यङ्गीकारे चैत्रस्तण्डुलं पचतीत्यादौ कर्तृकरणयो) स्तृतीयेत्यनेनानभिहिताधिकारीयेण चैत्रादिपदोत्तरं तृतीयापत्तिः ।

End:

ततोऽन्यत्र प्रथमपुरुष एवाभ्युपगन्तव्यम् । एतस्यैवार्थस्य बोधकं युष्मदीत्याद्यनुशासनमिति न कोऽपि दोषः पदमादधाति ।

Colophon:

इति श्रीजयरामसूरिविरचिताख्यातवादः समाप्तः ॥

(*d*) न्यायसिद्धान्तमञ्जरीव्याख्या—दीपिका.
NYĀYASIDDHĀNTAMAÑJARĪVYĀKHYĀ : DĪPIKĀ.

Foll. 38*a*—42*a*. Fol. 42*b* is blank.

Same work as the one described under No. 4223 of the D.C.S. MSS., Vol. VIII.

Contains the Pratyakṣa portion incomplete.

(*e*) कारकवादार्थः.
KĀRAKAVĀDĀRTHAḤ.

Foll. 43*a*—58*b*.

Same work as the one described under R. No. 114(*c*) *ante* with difference in the end.

Incomplete.

End :

किं तु वर्तमानध्वंसप्रतियोगिदोहनकर्मसु गोष्विति। दुग्धासु गोष्विति अतीतार्थतादृशगोदोहनविशेषणप्रतियोगित्वाविशेषणध्वंससमानकालीनत्वमागमने भा(सते)।

Foll. 59*a*—60*a* contain the horoscope of the eldest son of the former owner of the MS. Fol. 60*b* is blank. Fol. 61 contains few lines on logic.

(*f*) शिवकवचः.
ŚIVAKAVACAḤ.

Foll. 62*a*—64*b*.

Same work as the one described under No. 7387 of the D.C.S. MSS., Vol. XIV.

Complete.

Colophon :

इति ब्रह्मोत्तरखण्डे शिववर्मकथनं नाम द्वादशोऽध्यायः ॥

(*g*) तत्त्वचिन्तामणिव्याख्या—फक्किका.
TATTVACINTĀMAṆIVYĀKHYĀ : PHAKKIKĀ.

Foll. 65*a*—68*b*.

Same work as the one described under No. 4019 of the D.C.S. MSS., Vol. VIII.

Contains Anumāna incomplete.

R. No. **170.**

Śrītāla. 14 × 1⅞ inches. Foll. 162. Lines, 8 in a page Grantha. Good.

Presented in 1910–11 by S. Rāmakṛṣṇavādyār of Palghat.

अमरकोशव्याख्यानम्—टीकासर्वस्वम्.

AMARAKŌŚAVYĀKHYĀNAM: ṬĪKĀSARVASVAM.

For remarks and extracts, see pages 23 and 184 of the "Report on a Search for Sanskrit and Tamil Manuscripts," No. 2, by M. Seshagiri Sastri.

Contains from Bhūvarga to Vaiśyavarga complete and Śūdravarga incomplete.

R. No. **171.**

Palm-leaf. 6½, 5⅝ and 8¼ × 1⅛, 1¼ and 1½ inches, respectively. Foll. 51. Lines, 8, 6, 10 in order in a page. Grantha. Slightly injured.

Presented in 1910–11 by Gōpālasāmi Ayyaṅgār of Mannargudi.

(*a*) नित्यग्रन्थः.

NITYAGRANTHAḤ.

Foll. 1*a*—21*a*. Fol. 21*b* is blank.

Same work as the one described under No. 5269 of the D.C.S. MSS., Vol. XI.

Complete.

Colophon:

इति श्रीभगवद्रामानुजविरचिताराधनक्रमः समाप्तः ॥

(*b*) द्वादशनामस्तोत्रम्.

DVĀDAŚANĀMASTŌTRAM.

Foll. 22*a*—23*b*.

A eulogy on God Viṣṇu and His consort Lakṣmī. This is repeated when Śrī-Vaiṣṇavas wear the caste mark on the forehead and the body in 12 places.

Complete.

Beginning :

चतुश्चक्रं नमस्यामि केशवं कनकप्रभम् ।
नारायणं घनश्यामं चतुःशङ्खं नमाम्यहम् ॥

* * * *

श्रीदेवी प्रथमं नाम द्वितीयममृतोद्भवा ।
तृतीयं कमला प्रोक्ता तृतीयं चन्द्रशोभना ॥

End :

सर्वलोकस्य मातेति नामभिः क्रमशोऽन्वहम् ।
ध्यायी(ये)त परमैकान्ती शरीरात्मविशुद्धये ॥
इत्युक्तक्रमेण मन्त्रानुपदिश्य शिष्यं वाचयेत् ॥

(c) परमार्थस्तुतिः.

PARAMĀRTHASTUTIḤ.

Fol. 24.

Two stanzas setting forth briefly and clearly the career of a Prapanna who in the end realizes God and obtains salvation : by Varada.

Complete.

Beginning and End :

सत्सङ्गाद्भवनिःस्पृहो गुरुमुखाच्छ्रीशं प्रपद्यात्मवान्
प्रारब्धं परिभुज्य कर्मशकलं प्रक्षीणकर्मान्तरः ।
न्यासादेव निरङ्कुशेश्वरदयानिर्लोल(र्लून)मायान्वयो
हार्दानुग्रहलब्धमध्यधमनिद्वाराद्बहिर्निर्गतः ॥
मुक्तोऽर्चिर्दिनपूर्वपक्षषडुदङ्मासाब्दवातांशुमद्-
ग्लौविद्युद्वरुणेन्द्रधातृमहितः सीमान्तसिन्ध्वाप्लुतः ।
श्रीवैकुण्ठमुपेत्य नित्यमजडं तस्मिन् परब्रह्मणः
सायुज्यं समवाप्य नन्दति समं तेनैव धन्यः पुमान् ॥
प्रातर्नित्यानुसन्धेयं परमार्थं मुमुक्षुभिः ।
श्लोकद्वयेन संक्षिप्तं सुव्यक्तं वरदोऽब्रवीत् ॥

(*d*) अष्टश्लोकी.

AṢṬAŚLŌKĪ.

Foll. 25*a*—28*b*. Foll. 29—31 are blank.

This is the text, a commentary of which was described under R. No. 2 *ante*.

Complete.

Beginning:

अकारार्थो विष्णुर्जगदुदयरक्षाप्रलयकृ-
न्मकारार्थो जीवस्तदुपकरणं वैष्णवमिदम् ।
उकारोऽनन्याहं नियमयति संबन्धमनयो-
स्त्रयीसारस्त्र्यात्मा प्रणव इममर्थं समदिशत् ॥

End:

श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः ।
श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे ॥

(*e*) भगवदाराधनक्रमः.

BHAGAVADĀRĀDHANAKRAMAḤ.

Foll. 32*a*—48*b*.

Similar to the work described under No. 3557 of the D.C.S. MSS., Vol. VII.

Complete.

Beginning:

रमारमणपादाब्जपरिचर्यारतात्मनाम् ।
श्रीशास्त्रोक्तविधानेन सपर्याविधिरुच्यते ॥

उपादानानन्तरं माध्याह्निकं कृत्वा आजानुपादामणिबन्धनात् हस्तौ पादौ च प्रक्षाल्य भगवत्संनिधिं गत्वा गुरुपरम्परापूर्वकं भगवन्तं प्रणम्य . . . . . घण्टां नादयन् ओं यं वायवे नमः इति कवाटमुद्घाट्य ।

End:

अतस्त्वमेव त्वां देव्यौ चण्डादीन् पालकानपि ।
मां च मामकमप्येतत् सर्वं गृहमशेषतः ॥
पालयित्वा स्वसंकल्पमात्रेण मधुसूदन ।
त्वं मया त्वयि निक्षिप्तं विश्वस्तेनार्थिकल्पकम् ॥
आगताय यथाकल्पं सर्वं मे दातुमर्हसि ।
इति विज्ञापयेत् ॥

Colophon:

आराधननित्यक्रमः समाप्तः ॥

(*f*) पुण्याहवाचनप्रयोगः.

PUṆYĀHAVĀCANAPRAYŌGAḤ.

Foll. 49*a*—51*b*.

Same work as the one described under R. No. 61(*b*) *ante*.

Complete.

R. No. **172.**

Śrītāla. $9\frac{1}{4} \times 1\frac{3}{8}$ inches. Foll. 63. Lines, 9 in a page. Grantha. Good.

Presented in 1910–11 by Mīnākṣiyammāḷ of Koḍuvāyūr.

(*a*) आपस्तम्बधर्मप्रश्नः.

ĀPASTAMBADHARMAPRAŚNAḤ.

Foll. 1*a*—54*a*. Foll. 54*b*—56 are blank.

Same work as the one described under No. 1215 of the D.C.S. MSS., Vol. II.

Complete.

(*b*) हरिश्चन्द्रोपाख्यानम्.

HARIŚCANDRŌPĀKHYĀNAM.

Foll. 57*a*—63*a*. Fol. 63*b* is blank.

Same work as the one described under No. 2101 of the D.C.S. MSS., Vol. IV, Part I.

Incomplete.

R. No. **173.**

Palm-leaf 6¼ × 1¼ inches. Foll. 79. Lines, 6 in a page. Telugu.

Injured.

Presented in 1910–11 by T. Rāmānuja Rao of Triplicane.

(*a*) पूर्वाचार्यध्यानश्लोकाः.

PŪRVĀCĀRYADHYANAŚLŌKAḤ.

Foll. 1*a*—6*b*.

Similar to the work described under No. 5386 of the D.C.S. MSS., Vol. XI.

Complete.

Beginning:

अस्मद्गुरुभ्यो नमः । अस्मत्परमगुरुभ्यो नमः । अस्मत्सर्वगुरुभ्यो नमः । श्रीमते रामानुजाय नमः । श्रीमत्पराङ्कुशदासाय नमः । . .

श्रीशैलेशदयापात्रं . . रम्यजामातरं मुनिम् ।
लक्ष्मीनाथसमारम्भां . . . वन्दे गुरुपरम्पराम् ॥
यो नित्यमच्युत . . . शरणं प्रपद्ये ॥
माता पिता युवतय . . . प्रणतोऽस्मि नित्यम् ॥

End:

श्रीस्तनाभरणं तेजः श्रीरङ्गेशयमाश्रये ।
चिन्तामणिरि(मि)वोद्भ्रान्तमुत्सङ्गेऽनन्तभोगिनः ॥

(*b*) योगिजन्मनक्षत्रध्यानश्लोकाः.

YŌGIJANMANAKṢATRADHYĀNAŚLŌKĀḤ.

Foll. 7*a*—9*a*. Fol. 9*b* is blank.

Gives the month, the Nakṣatra, the Yuga as well as the place in which the Śrī-Vaiṣṇava saints well known as Āḷvārs were born.

Incomplete.

Beginning:

तुलायां श्रवणे जातं काञ्चयां काञ्चनवारिजात् ।
द्वापरे पाञ्चजन्यांशं सरोयोगिनमाश्रये ॥

End:

आषाढे पूर्वफल्गुन्यां तुलसीकाननोद्भवाम् ।
पाण्ड्ये विश्वम्भरां गोदां वन्दे श्रीरङ्गनायकीम् ॥

(c) आचार्यजन्मनक्षत्रध्यानश्लोकाः.

ĀCĀRYAJANMANAKṢATRADHYĀNAŚLŌKĀḤ.

Foll. 10*a*—15*b*.

Gives the month and the Nakṣatra associated with the birth of (Teṅgalai) Vaiṣṇava teachers of religion.

Complete.

Beginning:

नमोऽस्मदाचार्यपरम्पराभ्यो नमो नमो भागवतव्रजाय ।
नमो नमोऽनन्तमुखामरेभ्यो नमः श्रियै श्रीपतये नमोऽस्तु ॥

End:

तुलामूलसमुद्भूतं श्रीशैलेशपदाश्रितम् ।
वन्दे यतीन्द्रप्रवणं सौम्यजामातृयोगिनम् ॥

(d) ரகஸ்யத்ரயம்.

RAHASYATRAYAM.

Foll. 16*a*—22*a*.

See Tamil part of the Triennial Catalogue of MSS.

(e) वरवरमुनिदिनचर्या.

VARAVARAMUNIDINACARYĀ.

Foll. 23*a*—29*b*. Foll. 22*b* is blank.

A eulogy on Varavaramuni, otherwise called Saumayajāmātṛ-yōgin, the well-known Teṅgalai Śrī-Vaiṣṇava religious teacher.

The work also gives the daily duties performed by him.

Beginning:

सौम्यजामातृयोगीन्द्रचरणाम्बुजषट्पदम् ।
देवराजगुरुं वन्दे दिव्यज्ञानप्रदं शुभम् ॥
अङ्के कवेरकन्यायास्तुङ्गे भुवनमङ्गले ।
रङ्गे धाम्नि सुखासीनं वन्दे वरवरं मुनिम् ॥

End:

श्रीमद्रङ्गं जयति परमं धाम तेजोनिधानं
भूमा तस्मिन् भवतु कुशली कोप(पि)भूमासहायम्(:) ।
दिव्यं तस्मिन् दिशतु विभवं देशिको देशिकानां
काले काले वरवरमुनिः कल्पयन् मङ्गलानि ॥

(*f*) यतिराजविंशतिः.

YATIRĀJAVIṀŚATIḤ.

Foll. 30*a*—34*b*.

Twenty stanzas in praise of Rāmānujācārya: by Saumyajāmātṛmuni.

Complete.

Beginning:

यः स्तुतिं यतिपतिप्रसादनीं व्याजहार यतिराजविंशतिम् ।
तं प्रपन्नजनचातकाम्बुदं नौमि सौम्यवरयोगिपुङ्गवम् ॥
श्रीमाधवाङ्घ्रिजलजद्वयनित्यसेवा-
प्रेमाविलाशयपराङ्कुशपादभक्तम् ।
कामादिदोषहरमात्मपदाश्रितानां
रामानुजं यतिपतिं प्रणमामि मूर्ध्ना ॥

End:

इति यतिकुलधुर्यमेधमानैः श्रुतिमधुरैरुदितैः (प्रहर्षयन्तम्) ।
वरवरमुनिमेव चिन्तयन्ती मतिर्य(रिय)मेति निरत्ययं प्रसादम् ॥

(*g*) स्तोत्ररत्नम्.

STŌTRARATNAM.

Foll. 35*a*—46*b*.

Same work as the one described under R. No. 160(*t*) *ante*, but this is complete.

End:

अकृत्रिमत्वच्चरणारविन्दप्रेमप्रकर्षावधिमात्मवन्तम् ।
पितामहं नाथमुनिं विलोक्य प्रसीद मद्वृत्तमचिन्तयित्वा ॥

यत्पदाम्भोरुहध्यानविध्वस्ताशेषकल्मषः ।
वस्तुतामुपयातोऽहं यामुनेयं नमामि तम् ॥

(*h*) अष्टश्लोकी.

AṢṬAŚLŌKĪ.

Foll. 47*a*—49*a*.

Same work as the one described under R. No. 171(*d*) *ante*.

Complete.

(*i*) चतुःश्लोकी.

CATUŚŚLŌKĪ.

Foll. 49*a*—50*b*.

Same work as the one described under R. No. 160 (*a*) *ante*.

Complete.

(*j*) पञ्चायुधस्तोत्रम्.

PAÑCĀYUDHASTŌTRAM.

Foll. 51*a*—52*a*.

A eulogy on the five weapons (of war) belonging to Viṣṇu. A repetition of this eulogy is considered to enable one to be freed from all dangers and difficulties.

Complete.

Beginning :

स्फुरत्सहस्रारशिखासुतीव्रं सुदर्शनं भास्करकोटितुल्यम् ।
सुरद्विषां प्राणविनाशि विष्णोश्चक्रं सदाहं शरणं प्रपद्ये ॥

End :

वने रणे शत्रुजलाग्निमध्ये यदृच्छयापत्सु महाभयेषु ।
इदं पठन् स्तोत्रमनाकुलात्मा सुखी भवेत् तत्कृतसर्वरक्षः ॥

Colophon :

इति पञ्चायुधस्तोत्रं संपूर्णम् ॥

(*k*) प्रार्थनाषट्कम्.

PRĀRTHANĀṢAṬKAM.

Foll. 52*a*—53*a*.

Six stanzas of praise and prayer addressed to Śaṭhāri or Nammālvār, a very esteemed saint of the Śrī-Vaiṣṇavas.

Complete.

Beginning :

श्रीशठारे मम स्वामिन् मद्गुरो मम रक्षक ।
अवधारय विज्ञप्तिमधुना · · · · पुमन् ॥
अनात्मन्यात्मबुद्धिं मे स्वतन्त्रात्मधियं तथा ।
विनिवर्तय दत्वा म यथार्थज्ञानसंपदम् ॥

End :

कलयामि कलिध्वंसं कविलोकदिवाकरम् ।
यस्य गोभिः प्रकाशाभिराविद्धं निहतं तमः ॥

Colophon :

इति श्रीशठारिप्रार्थनाषट्कं संपूर्णम् ॥

(*l*) पराङ्कुशस्तोत्रम्.

PARĀṄKUŚASTŌTRAM.

Foll. 53*a*—55*b*.

A eulogy on the saint mentioned under the last work above. Complete.

Beginning :

जयतु जयतु कारेः सूनुराद्यो गुरूणां
जयतु जयतु भूमानायकप्रेमसीमा ।
जयतु जयतु नित्यं द्राविडाम्नायदर्शी
जयतु जयतु चिञ्चामूलवासी शठारिः ॥

End :

निष्ठत्यस्यास्तटपरिसरे निन्त्रिणी कापि तस्याः
कश्चिन्मूले निवसति मुनिर्मुक्तिमार्गोपदेष्टा ।
कालं दृष्ट्वा कलिकलुषितं सर्वयोग्यामनन्यं
दिव्यज्ञानं दिशति दयया द्राविडब्रह्मविद्याम् ॥

Colophon :

इति पराङ्कशस्तोत्रं संपूर्णम् ॥

(*m*) पराङ्कुशपञ्चविंशतिः.

PARĀṄKUŚAPAÑCAVIṀŚATIḤ.

Foll. 55*b*—59*b*.

Similar to the above. By Varadadēśika of Vādhūlagōtra. Complete.

Beginning :

श्रीपराङ्कुशनुतिं य आतनो(त्) तत्पदाब्जपरभक्तिचोदितः ।
तं वधूलकुलभूषणं दयावारीधिं वरददेशिकं भजे ॥
श्रीमन् पारङ्कश निरङ्कुशतत्त्वबोध-
वात्सल्यपूर्णकरुणापरिणाहरूप ।
सौशील्यसागरमनन्तगुणाकरं त्वां
संसारतापहरणं शरणं भजेऽहम् ॥

End:

. . . . . सूनु-
मस्मद्गुरुं तव पदप्रवणं समीक्ष्य ।
अज्ञं कृतागसमनाथमकिञ्चनं मां
त्वत्किंकरं शठरिपो सततं कुरुष्व ॥

Colophon:

इति श्रापराङ्कुशपञ्चविंशतिः संपूर्णा ॥

(n) नक्षत्रमालास्तोत्रम्.

NAKṢATRAMĀLĀSTŌTRAM.

Foll. 59*b*—64*a*. Fol. 64*b* is left blank.

This consists of 27 stanzas in praise of Nammāḷvār: by Abhirāmavara.

Complete.

Beginning:

अस्मासु वत्सलतया कृपया च भूयः
स्वेच्छावतीर्णमिव सौम्यवरं मुनीन्द्रम् ।
आचार्यपौत्रमभिरामवराभिधान-
मस्मद्गुरुं परमकारुणिकं नमामि ॥
श्रीमान् पराङ्कुशमुनिर्जीयाद्विज्ञानमुद्रया ।
नेन्द्रियाश्वयुजो नणां नित्यं विषयवीथयः ॥

End:

अन्तरेण शठारातिं कः संसारेऽवतीम(ह नः) ।
तदहं हृदये नित्यं निदधे तद्वपुःश्रियम् ॥
वाचिकी वरिवस्या मे तारकामालिकात्मिका ।
पराङ्कुशपदाब्जेन परिवा(ष्कार)वती भवेत् ॥

(o) क्षमाषोडशी.

KṢAMĀṢŌḌAŚĪ.

Foll. 65*a*—69*a*.

Sixteen stanzas of praise and prayer addressed to Raṅganātha: by Vēdācārya, son of Vēdavyāsa.

Complete.

Beginning:

यश्चक्रे रङ्गिणः स्तोत्रं क्षमाषोडशनामकम् ।
वेदव्यासस्य तनयं वेदाचार्यं तमाश्रये ॥
श्रीरङ्गेश यया करोषि जगतां सृष्टिप्रतिष्ठाक्षया
नत्रामुत्र च भोगमक्षयसुखं मोक्षं च तत्तत्तृषाम् ।
तत् स्वातन्त्र्य(मपास्य) कल्पितजगत्क्षेमादिहृद्या स्वतः
क्षान्तिस्ते करुणासखी विजयतां क्षेमाय सर्वात्मनाम् ॥

End:

संत्यक्तसर्वविहितक्रियमर्थकायः
श्रद्धालुमन्वहमनुष्ठितनिन्द्यकृत्यम् ।
अत्यन्तनास्तिकमनात्मगुणोपपन्नं
मां रङ्गराज परया कृपया क्षमस्व ॥

Colophon:

क्षमाषोडशी समाप्ता ॥

(p) श्रीस्तवः.

ŚRĪSTAVAḤ.

Foll. 69*a*—71*b*.

A short poem in praise of Lakṣmī or Śrī-Raṅganāyakī: by Śrīvatsāṅkamiśra.

Complete.

Beginning:

श्रीवत्साचिह्नमिश्रेभ्यो नमउक्तिमधीमहि ।
यदुक्तयस्त्रयीकण्ठे या(न्ति मङ्गलसूत्र)ताम् ॥

स्वस्ति श्रीर्दिशतादशेषजगतां सर्गोपसर्गस्थिति-
स्वर्गं दुर्गतिमापवर्गिकपदं सर्वं च कुर्वन् हरिः ।
यस्या वीक्ष्य मुखं तदिङ्गितपराधीनो विधत्तेऽखिलं
क्रीडेयं खलु नान्यथास्य रसता स्यादैकरस्यात्ततः ॥

End:

यस्याः कटाक्षवीक्षाक्षणलक्ष्यं लक्षिता महेशाः स्युः ।
श्रीरङ्गराजमहिषी सा मामभिवीक्षतां लक्ष्मीः ॥

Colophon:

इति श्रीवत्साङ्कमिश्रविरचितः श्रीस्तवः संपूर्णः ॥

(q) धाटीपञ्चकम्.

DHAṬĪPAÑCAKAM.

Foll. 72*a*—73*a*.

This is an eulogy on Rāmānujacārya.

Incomplete.

Beginning:

पाषण्डद्रुमषण्डदावदहनश्चार्वाकशैलाशनि-
र्बौद्धध्वान्तनिरासवासरपतिर्जैनेभकण्ठीरवः ।
मायावादिभुजङ्गभङ्गगरुडस्त्रैविद्यचूडामणिः
श्रीरङ्गेशजयध्वजो विजयते रामानुजोऽयं मुनिः ॥

End:

प्रज्ञासूत्रं बुधानां प्रशमधनमनःपद्मिनीनालसूत्रं
रक्षासूत्रं मुनीनां जयति यतिपतेर्वक्षसि ब्रह्मसूत्रम् ॥
पाषण्डसागरमहाबडबामुखाग्निः
श्रीरङ्गराजचरणाम्बुजमूलदासः ।
श्रीविष्णुलोकमणिमण्डपमार्गदायी
रामानुजो विजयते यतिराजराजः ॥

(7) प्रार्थनापञ्चकम्.

PRĀRTHANĀPAÑCAKAM.

Foll. 73*a*—74*a*.

Five stanzas of praise and prayer addressed to Rāmānujācārya. Complete.

Beginning:

यतीश्वर शृणु श्रीमन् कृपया परया तव ।
मम विज्ञापनमिदं विलोक्य वरदं गुरुम् ॥
अनादिपापरचितामन्तःकरणनिष्ठिताम् ।
यतीन्द्र विषये सान्द्रां विनिर्वासय वासनाम् ॥

End:

काषायशोभि(कमनीय)शिखानिवेशं
दण्डत्रयोज्ज्वलकरं विमलोपवीतम् ।
उद्यद्दिनेशनिभमुल्लसदूर्ध्वपुण्ड्रं
रूपं तवास्तु यतिराज दृशोर्ममाग्रे ॥

Colophon:

इति श्रीयतिराजप्रार्थनापञ्चकं संपूर्णम् ॥

---

(8) रामानुजाष्टकम्.

RĀMĀNUJĀṢṬAKAM.

Foll. 74*a*—75*b*.

Similar to the last.

Complete.

Beginning:

रामानुजाय मुनये नमउक्तिमात्रं
कामातुरोऽपि कुमतिः कलयन्नभीक्ष्णम् ।
यामामनन्ति यमिनां भगवज्जनानां
. . . . . ॥

End:

श्लोकाष्टकमिदं भक्त्या योऽकामः प्रत्य(हं पठेत्)।
आकारत्रयसंपन्नः शोकाब्धिं तरति ध्रुवम् ॥

(t) श्रीरङ्गराजप्रपत्तिः.

ŚRĪRAṄGARĀJAPRAPATTIḤ.

Foll. 76*a*—77*b*.

This eulogy is addressed to God Raṅganātha worshipped at Srirangam in whose feet the author takes refuge.

Incomplete.

Beginning:

श्रीरङ्गधामनि महाद्भुतसंनिवेशे
व्यक्ते स्वयं प्रणववर्ष्मणि वेदशृङ्गे।
दिव्ये विमानतिलके कृतनित्यवासौ
श्रीरङ्गराजचरणौ शरणं प्रपद्ये ॥

End:

श्रीचन्द्रपुष्करणिकातटवासिधर्म-
वर्मादिपूर्वतनु(न) भूपतपःप्रसन्न।
कल्याणकल्पतरुपल्लवतल्लजामौ
श्रीरङ्गराजचरणौ शरणं प्रपद्ये ॥

भोगीन्द्र . . . . . ।

(u) श्रीरङ्गराजमङ्गलाशासनम्.

ŚRĪRAṄGARĀJAMAṄGALĀŚĀSANAM.

Fol 78.

One leaf containing the end of the last work and the beginning of this work is lost.

A benediction addressed to God Raṅganātha.

Wants beginning.

Beginning :

. . . . सुखसुप्ताय मङ्गलम् ।
रजताद्रिनिषण्णेन्द्रनीलशैलानुसारिणे ।
. . . . य श्यामाय श्रीरङ्गेशाय मङ्गलम् ॥

End :

ज्ञानसिद्धाञ्जनैरस्मद्देशिकैर्दर्शिताय मे ।
निधये नित्यपूर्णाय श्रीरङ्गेशाय मङ्गलम् ॥

(*v*) शठकोपप्रपत्तिः.

ŚAṬHAKŌPAPRAPATTIḤ.

Fol. 79.

Contains a prayer addressed to Śaṭhāri or Nammāḻvār in which the author seeks refuge in His feet for absolving the sins.

Incomplete.

Beginning :

श्रीशस्य पुष्कलकृपाविषयैर्यतीन्द्र-
पूर्णै . . . . र्यविद्भिः ।
पूर्वैः प्रसूनसदृशं विधृतैः शिरोभिः
भव्यौ शठारिचरणौ शरणं प्रपद्ये ॥

End :

अन्नादिधारकमशेषशरीरभाजां
संपोषकं . . . . . ।

R No. **174.**

Palm-leaf. 19½ × 1½ inches Foll. 52. Lines, 6 in a page. Telugu.

Slightly injured.

Presented in 1910-11 by T. Rāmānuja Rao of Triplicane.

(*a*) स्तोत्ररत्नम्.

STŌTRARATNAM.

Foll. 1*a*—4*b*.

Same work as the one described under R. No. 160(*t*) *ante*.
Complete.

(*b*) यतिराजविंशतिः.

YATIRĀJAVIṀŚATIḤ.

Foll. 4*b*—6*a*.

Same work as the one described under R. No. 173(*f*) *ante*.
Complete.

(*c*) वरवरमुनिदिनचर्या.

VARAVARAMUNIDINACARYĀ.

Foll. 6*a*—7*b*.

Same work as the one described under R. No 173(*e*) *ante*.
Contains Pūrvadinacaryā only.

(*d*) मुकुन्दमाला.

MUKUNDAMĀLĀ.

Foll. 8*a*—10*b*.

A hymn in praise of Viṣṇu: by Kulaśēkhara, a prince of the Travancore country and a Vaiṣṇavasaint. He is considered by Śrī-Vaiṣṇavas to be an Āḻvār; and his Tamil work called Perumāḷ Tirumoḻi is included in what is called the Drāviḍavēda.

Complete.

Beginning:

घुष्यते यस्य नगरे रङ्गयात्रा दिने दिने ।
तमहं शिरसा वन्दे राजानं कुलशेखरम् ॥
श्रीवल्लभेति वरदेति दयापरेति
भक्तप्रियेति भवलुण्ठनकोविदेति ।
नाथेति नागशयनेति जगन्निवासे-
त्यालापनं प्रतिपदं कुरु मे मुकुन्द ॥

End :

यस्य प्रियौ श्रुतिधरौ कविलोकवीरौ।
मित्रौ द्विजन्मवरपद्मशरावभूताम् ।
तेनाम्बुजाक्षचरणाम्बुजषट्पदेन
राज्ञा कृता कृतिरियं कुलशेखरेण ॥

(*e*) चतुःश्लोकी.

CATUŚSLŌKĪ.

Foll. 10*b*—11*a*

Same work as the one described under R. No. 160(*a*) *ante*.
Complete.

(*f*) घाटीपञ्चकम्.

DHĀṬIPAÑCAKAM.

Fol. 11.

Same work as the one described under R. No. 173(*q*) *ante*.
Complete.

(*g*) प्रार्थनापञ्चकम्.

PRĀRTHANĀPAÑCAKAM.

Foll. 11*b*—12*a*.

Same work as the one described under R. No. 173(*r*) *ante*.
Complete.

(*h*) पञ्चायुधस्तोत्रम्.

PAÑCĀYUDHASTŌTRAM.

Fol. 12*a*.

Same work as the one described under R. No. 173(*j*) *ante*.
Complete.

(i) जितन्तेस्तोत्रम्.

JITANTĒSTŌTRAM.

Foll. 12*b*—13*a*.

This is taken from the Pāñcarātrāgama and is a hymn in praise of Viṣṇu.

Contains the first twenty stanzas only.

Beginning:

जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्तेऽस्तु हृषीकेश महापुरुष पूर्वज ॥

End:

उपचारापदेशेन कृतानहरहर्मया ।
अपचारानिमान् सर्वान् क्षमस्व पुरुषोत्तम ॥

(j) देवराजाष्टकम्.

DĒVARĀJĀṢṬAKAM.

Fol. 13.

Eight stanzas in praise of Varadarāja, a form of Viṣṇu, worshipped at Conjeevaram. The author of this work is Kāñcīpūrṇa, called Tirukkaccinambi in Tamil. He was the son of Kamalāpati and was one of the religious teachers of Rāmānujācārya.

Complete.

Beginning:

श्रीमत्काञ्चीमुनिं वन्दे कमलापतिनन्दनम् ।
वरदाङ्घ्रिसदासंगरसायनपरायणम् ॥
देवराजदयापात्रं श्रीकाञ्चीपूर्णमुत्तमम् ।
रामानुजमुनेर्मान्यं वन्देऽहं सज्जनाश्रयम् ॥
नमस्ते हस्तिशैलेश श्रीमन्नम्बुजलोचन ।
शरणं त्वां प्रपन्नोऽस्मि प्रणतार्तिहराच्युत ॥

End:

त्वदीक्षणसुधासिन्धुवीचिविक्षेपशीतलैः ।
कारुण्यमारुतानीतैः शीकरैरभिषिञ्च माम् ॥

(*k*) अष्टश्लोकी.

AṢṬAŚLŌKĪ.

Foll. 13*b*—14*a*.

Same work as the one described under R. No. 171(*d*) *ante*.

Complete.

(*l*) नाममौक्तिकमाला.

NĀMAMAUKTIKAMĀLĀ.

Foll. 14*b*—15*a*.

A collection of 128 names of Viṣṇu: by Yāmunācārya.

Complete.

Beginning:

यत्पदाम्भोरुहध्यानविध्वस्ताशेषकल्मषः ।
वस्तुतामुपयातोऽहं यामुनेयं नमामि तम् ॥

श्रीनाममौक्तिकैर्माला यामुनार्येण निर्मिता ।
ऋषिसू(शु)क्तिसमुद्भूतैर्निर्दोषैः श्रुतिसागरे ॥

* * * *

श्रीमन्नारायणाद्रीश श्रीमन्नञ्जनशैलप ।
श्रीमद्वृषभशैलेन्द्र श्रीमत्सिंहनगाधिप ॥

End:

येन तत्पठ्यते नाम्नामष्टाविंशोत्तरं शतम् ।
अनिष्टपक्षक्षपणमिष्टावाप्तिरवाप्यते ॥

(*m*) क्षमाषोडशी.

KṢAMĀṢOḌAŚĪ.

Foll. 15*b* - 17*a*. Fol. 17*b* is left blank.

Same work as the one described under R. No. 173(*o*) *ante*.

Complete.

(*n*) गद्यत्रयम्.

GADYATRAYAM.

Foll. 18*a*—23*b*.

Three prose pieces containing praise and prayer addressed to God Viṣṇu. They describe the self-surrender made by Rāmānuja to God Nārāyaṇa as a means of attaining salvation, and praise Śrī-Raṅganātha worshipped at Srirangam and in Vaikuṇṭha (Lord of the heaven). By Rāmānujācārya.

Complete.

Beginning:

वन्दे वेदान्तकर्पूरचामीकरकरण्डकम् ।
रामानुजार्यमार्याणां चूडामणिमुपास्महे ॥

भगवन्नारायणाभिमतानुरूपस्वरूपरूपगुणविभवैश्वर्यशीलाद्यनवधिकातिशयासंख्येयकल्याणगुणगणां पद्मावनालयां भगवतीं श्रियं देवीं नित्यानपायिनीं . . . . . पारमार्थिकभगवच्चरणारविन्दयुगलैकान्तिकात्यन्तिकपरभक्तिपरज्ञान ।

End:

सस्मितमाहूय समस्तक्लेशापहं निरतिशयसुखावहमात्मीयं श्रीमत्पादारविन्दयुगलं शिरसि कृतं ध्यात्वा अमृतसागरान्तर्निमग्नसर्वावयवः सुखमासीत ॥

चिदचित्परतत्त्वानां तत्त्वयाथार्थ्यवेदिने ।
रामानुजाय मुनये नमो मम गरीयसे ॥

रामानुजपदाम्भोजद्वन्द्वकैङ्कर्यवृत्तयः ।
सन्तु सर्वास्ववस्थासु धारकाः पोषकाश्च मे ॥

Colophon:

इति श्रीभगवद्रामानुजविरचितगद्यत्रयं संपूर्णम् ॥

(o) सुन्दरराजस्तवः.

SUNDARARĀJASTAVAḤ.

Foll. 24*a*—34*a*.

This consists of eulogistic prayer addressed to God Sundarabāhu worshipped at Alagar Malai near Madura. This work is also called

Sundarabāhustava. By Śrīvatsāṅkamiśra, of Hārītagōtra, and a disciple of Rāmānujācārya. The colophon is incorrectly written here.

Complete.

Beginning:

श्रीमन्तौ हरिचरणौ समाश्रितोऽहं श्रीरामावरजमुनीन्द्रलब्धबोधः ।
निर्भीकस्तत इह सुन्दरोरुबाहुं स्तोष्ये तच्चरणविलोकनाभिलाषी ॥

End:

इदं भूयो भूयः पुनरपि च भूयः पुनरपि
स्फुटं यद्दीव्यामीत्यगतिरबुधोऽनन्यशरणः ।
कृतागा दुष्टात्मा कलुषमतिरस्मीत्यनवधे-
र्दयायास्ते पात्रं वनगिरिपते सुन्दरभुज ॥

Colophon:

इति श्रीहारीतकुलतिलकश्रीरामिश्रसोमसुत्सूनोः श्रीरङ्गराजदिव्याज्ञालब्धपराशरापरनामधेयस्य श्रीवत्साङ्कस्य कृतिषु श्रीरङ्गनाथसुन्दरराजस्तवः संपूर्णः ॥

(*p*) श्रीवैकुण्ठस्तवः.

ŚRĪVAIKUṆṬHASTAVAḤ.

Foll. 34*b*—42*a*.

A hymn in praise of Viṣṇu, the Lord of Vaikuṇṭha: by the same author as the last.

Complete.

Beginning:

यो नित्यमच्युतपदाम्बुजयुग्मरुक्म-
व्यामोहतस्तादितराणि तृणाय मेने ।
अस्मद्गुरोर्भगवतोऽस्य दयैकसिन्धोः
रामानुजस्य चरणौ शरणं प्रपद्ये ॥

त्रैविद्यवृद्धजनमूर्धविभूषणं यत्
संपच्च सात्त्विकजनस्य यदेव नित्यम् ।

यद्वा शरण्यमशरण्यजनस्य पुण्यं
तत् संश्रये(य) वकुलाभरणाङ्घ्रियुग्मम् ॥

End:

निर्बन्ध एष यदि ते यदशेषवैध-
संसेवितो वरद रक्षसि नेतरांस्त्वम् ।
तर्हि त्वमेव मयि शक्त्यधिकारवाञ्छा-
प्रत्यूहशान्तिमितरच्च निधेहि विश्वम् ॥
व्यक्तीकुर्वन् निगमवचसामर्थमन्तर्निगूढं
श्रीवैकुण्ठस्तुतिमकृत यः श्रेयसे सज्जनानाम् ।
कूराधीशं गुरुतरदयादुग्धसिन्धुं तमीडे
श्रीवत्साङ्कं श्रुतिमतगुरुच्छात्रशीलैकधाम ॥

Colophon:

श्रीवैकुण्ठस्तवः समाप्तः ॥

(*q*) श्रीरङ्गराजस्तवः.

ŚRĪRAṄGARĀJASTAVAḤ.

Foll. 42*a*—44*b*.

A hymn in praise of Śrī-Raṅganātha as worshipped at Śrirangam: by Parāśarabhaṭṭa, son of Śrīvatsāṅkamiśra.

Pūrvaśataka incomplete.

Beginning:

श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः ।
श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे ॥
श्रीवत्सचिह्नमिश्रेभ्यो नमउक्तिमधीमहे ।
यदुक्तयस्त्रयीकण्ठे यान्ति मङ्गलसूत्रताम् ॥

End:

परेण नाकं पुरि होममय्यां यो ब्रह्मकोशोऽस्त्यपराजिताख्यः ।
श्रीरङ्गनाम्ना तव पौरुषेयं विमानराजं भुवि भावयानि ॥
अनाद्यानातत्वात् पुरुषरचना.

(r) यतिराजस्तवः.

YATIRĀJASTAVAḤ.

Foll. 45a—52b.

A hymn in praise of Rāmānujācārya: by a disciple of Varadasūri.

Incomplete.

Beginning:

श्रीशैलेशदयाभिपात्रमतुलं धीभक्तियोग्यादिसौ-
शील्याशेषमहागुणार्णवमहं श्रीरम्यजामातरम् ।
वेदान्तद्वयमुख्यपारवचनालंकारशास्त्रार्थदं
वन्दे तं यतिशेखरप्रवणमम्भोजाङ्घ्रिमब्जाननम् ।
श्रीशं शठारिं यतिसार्वभौमं श्रीरम्यजामातृमुनिं महान्तम् ।
वेदान्तयुग्मार्थविबोधशीलं वेदान्तसूरिं वरदं भजामि ॥
श्रीमद्रामानुजार्याङ्घ्री प्रपद्ये शरणं सदा ।
रामानुजाय कलये श्रीमते नम इत्यहम् ॥

End:

श्रीमद्रामानुजार्याङ्घ्री प्रपद्ये शरणं सदा ।
श्रीमते रामानुजाय नम इत्येवमास्थितः ॥

R. No. **175.**

Palm-leaf. 13½ × 1¼ inches. Foll. 147. Lines, 5 in a page. Telugu.

Slightly injured.

Presented in 1910–11 by T. Rāmānuja Rao of Triplicane.

(a) यतिराजविंशतिः.

YATIRĀJAVIṀŚATIḤ.

Foll. 1a—4a.

Same work as the one described under R. No. 173(f) *ante*.

Complete.

(b) वरवरमुनिदिनचर्या.

VARAVARAMUNIDINACARYĀ

Foll. 5a—7b. Fol 4b is blank.

Same work as the one described under R. No. 173(*e*) *ante*.
Contains Pūrvadinacaryā only.

(*c*) क्षमाषोडशी.

KṢAMĀṢŌḌAŚĪ.

Foll. 8*a*—11*a*.

Same work as the one described under R. No. 173(*o*) *ante*.

Complete.

(*d*) न्यासदशकम्.

NYĀSADAŚAKAM.

Foll. 12*a*—13*a*. Fol. 11*b* is blank.

Ten stanzas explaining the doctrine of Nyāsa or Prapatti as a means of attaining salvation: by Vēṅkaṭanātha also called Vēdāntadēśika.

Complete.

Beginning:

अहं मद्रक्षणभरो मद्रक्षणफलं तथा ।
न मम श्रीपतेरेवेत्यात्मानं निक्षिपेद्बुधः ॥

End:

श्रीमन्नियतपञ्चाङ्गं मद्रक्षणभरार्पणम् ।
अचीकरत्(:)स्वयं स्वस्मिन्नतोऽहमिह निर्भरः ।

Colophon:

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु न्यासदशकं संपूर्णम् ॥

(*e*) प्रार्थनापञ्चकम्.

PRĀRTHANĀPAÑCAKAM.

Fol. 14. Fol. 13*b* is blank.

Same work as the one described under R. No. 173(*r*) *ante*.

Complete.

(*f*) यतिराजविंशतिः—आन्ध्रव्याख्यासहिता.

YATIRĀJAVIṀŚATIḤ WITH TELUGU COMMENTARY.

Foll. 15*a*—33*a*.

Same work as the one described under R. No. 173(*f*) *ante*.

Complete.

(*g*) உபதேசரத்தினமாலை.

UPADĒŚARATNAMĀLAI.

Foll. 34*a*—45*a*. Fol. 33*b* is blank.

See the Tamil part of the Triennial Catalogue.

(*h*) वरदराजस्तवः.

VARADARĀJASTAVAḤ.

Foll. 46*a*—58*b*. Fol. 45*b* is blank.

A hymn in praise of Varadarāja worshipped at Conjeevaram: by Śrīvatsāṅkamiśra.

Complete.

Beginning:

श्रीवत्सचिह्नमिश्रेभ्यो नम(उ)क्तिमधीमहे ।
यदुक्तयस्त्रयीकण्ठे यान्ति मङ्गलसूत्रताम् ॥
स्वस्ति हस्तिगिरिमस्तशेखरः संतनोतु मयि संततं हरिः ।
निःसमाभ्यधिकमभ्यधत्त यं देवमौपनिषदी सरस्वती ॥

End:

रामानुजाङ्घ्रिशरणोऽस्मि कुलप्रदीपः
आसीत् स यामुनमुनेः स च नाथवंश्यः ।
वंश्यः पराङ्कुशमुनेः स च सोऽपि देव्याः
दासस्तवेति वरदास्मि तवेक्षणीयः ॥
श्रीवत्सचिह्नमिश्रेभ्यः . . . मङ्गलसूत्रताम् ॥

(i) भगवद्गीता.

BHAGAVADGĪTĀ.

Foll. 60*a* - 116*b*. Fol. 59 is blank.

Same work as the one described under No. 1992 of the D.C.S. MSS., Vol. IV, Part I.

Complete.

(j) ரஹஸ்யத்ரயம்.

RAHASYATRAYAM.

Foll. 133*a*—143*a* Foll. 117 to 132 and 143*b* to 147 are blank.

See the Tamil part of the Triennial Catalogue.

R. No. **176.**

Palm-leaf. $16\frac{1}{2} \times 1\frac{1}{8}$ inches. Foll. 33. Lines, 8 in a page. Telugu. Much injured.

Presented in 1910–11 by Ullakki Śāstri of Guntur.

(*a*) हंसोपनिषत्.

HAṀSŌPANIṢAD.

Fol. 1 only.

Same work as the one described under No. 841 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*b*) परमहंसोपनिषत्.

PARAMAHAṀSŌPANIṢAD.

Fol. 2 only.

Same work as the one described under No. 598 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*c*) वाक्यवृत्तिः.

VĀKYAVṚTTIḤ.

Foll. 3*a*—5*b*.

Same work as the one described under No. 4719 of the D.C.S. MSS., Vol. IX.

Complete.

(*d*) ईशावास्योपनिषद्भाष्यटिप्पणी.

कौसल्यादिवधूजनैर्दशरथः शोभां प्रपेदे यथा ॥
असहायशूर इति काटयप्रभुं प्रवदन्ति पारनृपतेस्तनूभवम् ।
भुवनादिदुर्गजयसाहसेन यो जलदुर्गमल्लबिरुदः प्रशस्यते ॥
पृथ्वीं ब्राह्मणसाच्चकार विदधे हेमाद्रिदानानि यः
सोपानावलिमाततान विषमे पातालगङ्गापथे ।
दोड्डाम्बामुपयम्य तस्य तनयो(यां)वेमप्रभोः काटयः
पुत्रं वीरमलब्ध रामसदृशं वेमं विभूत्यै भुवः ॥
गुणानां पुण्यानां वसतिरनपोताक्षितिपतेः
स्वासा श्रीदोड्डाम्बा समभवदुमायाः प्रतिनिधिः ।
पिता भूभृन्नाथः पतिरपि महेशः प्रियसुतो
महासेनो यस्याः स्वयमथ यदार्येति कथिता ॥
मारक्ष्मारमणः पितामहतया मातामहत्वेन च
श्रीवेमक्षितिनायकः प्रथयते यस्याभिजात्याश्रियम् ।
धन्यः काटयवेमभूपतिरसौ यद्भागिनेयस्ततो
जामाता स्वयमन्नपोतनृपतेः क्षोणीशचूडामणिः ॥
श्रीकृष्णेन समः कुमारगिरिभूपालो नृपालोत्तमः
स्वामी यस्य वसन्तरायबिरुदो वीरान्नपोतात्मजः ।
संग्रामार्जुनमामनन्ति सुधियस्तं भीमसेनान्वितं
भूमौ काटयवेमभूपतिमहो कर्णप्रियास्तद्गुणाः ॥

धाटीघोटीखुराग्रत्रुटितगिरितटे यत्र मा(चा)क्रेदि दुर्गं
दुर्गं किं(कौ)मारसंज्ञं दलितरिपुबले दुर्गमं बेण्डपूर्णम् ।
दुर्भेदं वज्रकूटं जितवति रभसा रामगिर्याख्यदुर्गं
विख्यातं वीरघोटं गलितमसुहृदां दुर्गसंनाहधार्ष्ण्यम् ॥

मुनीनां भरतादीनां (भोजादीनां) च भूभृताम् ।
शास्त्राणि सम्यगालोच्य नाट्यवेदार्थवेदिनाम् ॥

प्रोक्तं वसन्तराजेन कुमारगिरिभूभुजा ।
नाम्ना वसन्तराजीयं नाट्यशास्त्रं यदुत्तमम् ॥

तत्रोक्तेनैव मार्गेण दर्शिताशेषलक्षणः ।
कवीनामाश्रयो मन्त्री काटभूपतनूभवः ॥

सोऽयं वेमविभुः कुमारगिरिराजाज्ञानियुक्तः कृती
नाट्यानां त्रितयं कृतं कृतधिया श्रीकालिदासेन यत् ।
तस्योदीर्णरसार्णवस्य रसिकः शाकुन्तलादेः स्वयं
व्याख्यानं कुरुते कुमारगिरिराजीयाख्यमस्मै हितम् ॥

अथ तत्रभगवान् कालिदासः कविसार्वभौमः प्रारिप्सितग्रन्थस्याविघ्नपरिसमाप्त्यर्थमिष्टदेवतास्मरणपूर्वकमाशिषं प्रयुङ्क्ते—येत्यादि । ईशः परमेशः वः पात्विति क्रियाकारकसंबन्धः । स कीदृशः ? प्रत्यक्षाभिः इन्द्रियग्राह्याभिः अष्टाभिस्तनुभिः प्रपन्न उपेतः । कीदृश्यस्तनवः ? या स्रष्टुः ब्रह्मणः आद्या प्रथमा सृष्टिः ; अनेन जलमयी तनुरुक्ता, अप एव ससर्जादौ इति स्मरणात् ।

Colophon:

इति काटयवेमाविरचिते कुमारगिरिराजीये शाकुन्तलव्याख्याने षष्ठोऽङ्कः ॥

कविरिदानीमङ्कान्तरमारभते—ततः प्रविशतीत्यादि ।

* * * *

आत्मभूः स्वयंभूः परमेश्वरः ममापि पुनर्भवं पुनर्जन्म क्षपयतु क्षीणं करोतु । तदेव पुनर्जन्म विशिनष्टि—अमङ्गलमिति । तस्यामङ्गलत्वं सांसारिकत्वसंभवादिति मन्तव्यम् । अत्र भरतो नाट्यार्थस्य परिसमाप्तत्वात् अनुकार्यत्वमुत्सृज्य स्वस्वरूपमे ।

R. No. **296.**

Palm-leaf. $17\frac{5}{8}$ and $10\frac{3}{8}$ × $1\frac{3}{4}$ inches. Foll. 71 Lines, 8 to a page. Grantha. Injured.

Presented in 1910–11 by Gōpālasāmi Ayyaṅgār of Mannargudi.

शास्त्रारम्भसमर्थनम्.

ŚĀSTRĀRAMBHASAMARTHANAM.

Same work as the one described under Nos. 5048 and 5049 of the D.C.S. MSS., Vol. X.

Complete.

R. No. **297.**

Palm-leaf. $12\frac{1}{2}$ × $2\frac{1}{2}$ inches. Foll. 95. Lines, 6 in a page. Telugu. Much injured.

Presented in 1910–11 by T. Rāmānuja Rao of Triplicane.

श्रीगुणरत्नकोशव्याख्यानम्.

ŚRĪGUṆARATNAKŌŚAVYĀKHYĀNAM.

As the first ten foll. are mostly broken, the beginning is given from fol. 11.

A commentary on the work described under No. 160(*f*) *ante*.

Wants beginning and end.

Beginning:

योग्य अभ्यासः । एतदर्थमेव संशीलितमत्यन्तं योग्येति निघण्टोः । . . . . . अस्या औदार्यातिशयं च संदर्शयति—ऐश्वर्यमिति । अम्ब श्रीरङ्गेश्वरि सर्वसुलभे मातापितृशुश्रूषणम् ।

End:

निखिलभुवनभरणहरणादिलीलस्य सर्वस्वामिनः स्वेतरसमस्तवस्तु-व्यावृत्तज्ञानानन्दस्वरूपस्य नित्यनिरवद्यनिरतिशयसौन्दर्य . . . . . दिव्यमङ्गलविग्रहस्य नित्यनिरुपाधिकस्वामिनः.

R. No. **298.**

Palm-leaf. 13⅛ × 1¼ inches. Foll. 14. Lines, 6 in a page. Grantha. Good.

Presented in 1910–11 by Mīnākṣiyammāḷ of Koḍuvāyūr.

(*a*) श्रीचक्रपूजाविधिः.

ŚRĪCAKRAPŪJĀVIDHIḤ.

Foll 1*a*—12*b*.

Similar to the work described under No. 5729 of the D.C.S. MSS., Vol XII.

Complete.

Beginning:

अथ कल्पसूत्रोक्तप्रकारेण श्रीविद्याचक्रपूजाविधिर्लिख्यते—आदौ महागणपतिपूजां कृत्वा गं गणपतये नम इति गणेशमभ्यर्च्य पश्चात्रि-पुरसुन्दरीऋष्यादिकं विन्यस्य ध्यात्वा, अथ पीठपूजा—ऐं ह्रीं ह्रीं अ-मृताम्भोनिधये नमः ।

End:

महामहाशैवे महामहाशये महामहाश्रीचक्रनगरसाम्राज्ञि नमस्ते नमस्ते स्वाहा ।

(*b*) धूमावतीकल्पः.

DHŪMĀVATĪKALPAḤ.

Foll. 13*a*—14*b*.

Similar to the work described under No. 7881 of the D.C.S. MSS., Vol. XV.

Complete.

Beginning:

ध्यायेत्कालाभ्रनीलां विपलितवदनां काकनासां विकर्णी
संमार्जन्युल्कशूर्पैर्युतमुसलकरां वक्रदन्तां विषास्याम् ।
ज्येष्ठां निर्माणवेषां भ्रुकुटितनयनां मुक्तकेशामुदारां
पीनोत्तुङ्गाद्रितुङ्गस्तनभरनमितां निष्कृपां शत्रुहन्त्रीम् ॥

नक्षत्रराशौ जातां मम सपत्नरूपिणीं नाशय नाशय ओं धूं धूमावती स्वाहा ।

End:

कोणाग्रे तु लिखेच्छूलं तल्लिखेत्तं मनुं तदा ।
तदग्रे विलिखेत्साध्यं धूमायन्त्रं वरानने ॥

* * * *

विद्वेषणे तथा देवीं जपेदेकाग्रमानसः ।
अन्योन्यकलहं क्षिप्रं जायते वैरिणां ध्रुवम् ॥

ह्रीं ओम् ॥

R. No. **299.**

Śrītāla. 19⅝ × 2 inches. Foll. 181. Lines, 10 in a page. Grantha. Good.

Presented in 1910–11 by Gōpālasāmi Ayyaṅgār of Mannargudi.

ब्रह्मसूत्रभाष्यम्.

BRAHMASŪTRABHĀṢYAM.

Foll. 5*a*—176*a*. The remaining foll. are blank.

By Rāmānujācārya.

Same work as the one described under No. 4943 of the D.C.S. MSS, Vol. X.

Complete.

R. No. **300.**

Palm-leaf. 14¾ × 1¼ inches. Foll. 30. Lines, 8 in a page. Grantha. Good.

Presented in 1910–11 by E. R. Śrīnivāsarāghavācāriyar of Kalyāṇapuram.

श्रीभाष्योपन्यासः.

ŚRĪBHĀṢYŌPANYĀSAḤ.

Foll. 1*a*—29*b*.

A gloss on the Śrībhāsya of Rāmānujācārya : apparently by a disciple of Śrīnivāsa of Vādhūlagōtra.

Similar to the work described under No. 4976 of the D.C.S. MSS., Vol. X.

Complete.

Beginning:

वन्दे वेदान्तकर्पूरवासितस्वान्तमन्वहम् ।
वाधूलकुलजीवातुं श्रीनिवासमहागुरुम् ॥

श्रियः पतिः परमकारुणिको भगवान् सर्वेषां पुरुषाणामुपादित्सित-जिहासितेष्टानिष्टतत्साधनानां त्याज्योपादेयविवेकार्थं 'हर्तुं तमः सदसती च विवेक्तुमीशो मानं प्रदीपमिव कारुणिको ददाति' इत्युक्तप्रकारेण वेदाख्यं प्रमाणं प्रदायावतारादिमुखेन तदर्थविषयज्ञानं चोदपादयत् ।

End:

जगद्व्यापारेत्यत्र मुक्तस्य भगवतः परमसाम्यापत्तिश्रवणात् जगन्नियमनादिकं मुक्तस्यैश्वर्यमित्याशङ्क्य जगन्नियमनप्रतिपादनेषु परमात्मनः प्रकृतत्वात् मुक्तस्यासंनिहितत्वाच्च भोगमात्रं संभवतीत्याशङ्क्य इमं मानवमावर्तं नावर्तन्ते इत्यादिना अनावृत्तिश्रवणात् अश्रुतस्यामुक्तस्य भगवतस्तन्निवर्तनसंकल्पाभावात् (अ)मुक्तस्य पुनरावृत्तिः संभवतीत्युपसंहृतम् ।

Colophon:

इति भाष्योपन्यासे चतुर्थस्याध्यायस्य चतुर्थः पादः । समाप्तश्चाध्यायः ॥

Foll. 29*b*—30*b* contain some stanzas giving the number of Adhikaraṇas in each Pāda of the four Adhyāyas.

R. No. **301.**

Palm-leaf. 16⅛ × 1¼ inches. Foll. 164. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1910–11 by Praṷāga Sītārāma Śāstri of Guntur.

श्रीशैलखण्डः (स्कान्द).

ŚRĪŚAILAKHAṆḌAḤ (SKĀNDA).

Same work as the one described under No. 2319 of the D.C.S. MSS., Vol. IV, Part I.

Complete.

R. No. **302.**

Śrītāla. 14¼ × 1⅞ inches. Foll. 100. Lines, 9 in a page. Grantha. Slightly injured.

Presented in 1910–11 by S. Rāmakṛṣṇavādyār of Palghat.

(*a*) सामवेदसंहिता—ऋक्पाठः.

SĀMAVĒDASAṀHITĀ: ṚKPĀṬHAḤ.

Foll. 1*a*—60*b*.

Same work as the one described under No. 41 of the D.C.S. MSS., Vol. I, Part I.

Contains the Uttaraṛk, Adhyāyas 1 to 21 only.

(*b*) सामवेदगानम्—रहस्यम्.

SĀMAVĒDAGĀNAM—RAHASYAM.

Foll. 61*a*—100*a*. Fol. 100*b* is left blank.

Same work as the one described under Nos. 53 and 54 of the D.C.S. MSS., Vol. I, Part II.

Contains ऐकाह, अहीन, रथन्तर and संवत्सर.

R. No. 303.

Śrītāla. 13⅞ × 1¾ inches. Foll. 222. Lines, 10 in a page. Grantha. Good.

Presented in 1910–11 by S. Rāmakṛṣṇavādyār of Palghat.

Foll 1—3 and 4*b*—12*b* are blank. Foll. 4*a* contains a few stanzas of the 34th and the 35th Adhyāyas of the Drōṇaparvan of the Mahābhārata.

(*a*) सामवेदगानम्—ऊहः.

SĀMAVĒDAGĀNAM—ŪHAḤ.

Foll. 13*a*—212*b*.

Same work as the one described under No. 50 of the D.C.S. MSS., Vol. I, Part II.

Complete.

The transcription of the work is said to have been completed by Subrahmaṇya, son of Īśvarōpādhyāya, on Friday, the 8th day of the dark fortnight, when the moon was in the constellation Hasta in the month of Dhanus in the year Parābhava.

Foll. 213 and 214 are blank.

(*b*) सामवेदसंहिता—ऋक्पाठः.

SĀMAVĒDASAṀHITĀ—ṚKPĀṬHAḤ.

Foll. 215*a*—222*b*.

Same work as the one described under No. 41 of the D.C.S. MSS., Vol. I, Part I.

Wants beginning and end in the Uttaraṛk.

R. No. 304.

Palm-leaf. 18½ × 1¼ inches. Foll. 95. Lines, 7 in a page. Telugu. Much injured.

Presented in 1910–11 by Prayāga Sītārāma Śāstri of Guntur.

(*a*) तत्त्वचिन्तामणिव्याख्या—दीधितिः.

TATTVACINTĀMAṆIVYĀKHYĀ: DĪDHITIḤ.

Foll. 1*a*—5*b*.

Same work as the one described under No. 4002 of the D.C.S. MSS., Vol. VIII.

Siddhāntalakṣaṇa incomplete.

(b) तत्त्वचिन्तामणिदीधितिव्याख्या—जागदीशी.

TATTVACINTĀMAṆIDĪDHITIVYĀKHYĀ JĀGADĪŚĪ.

Foll. 6a—30a.

Same work as the one described under No. 4086 of the D.C.S. MSS., Vol. VIII.

Contains Siddhāntalakṣaṇa incomplete.

Foll. 30b—33b are blank.

(c) तत्त्वचिन्तामणिदीधितिप्रकाशिका.

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ.

Foll. 34a—95b.

Same work as the one described under No. 4061 of the D.C.S. MSS., Vol. VIII.

Contains Siddhāntalakṣaṇa incomplete.

R. No. **305.**

Palm-leaf. 17½ and 16⅝ × 1⅜ inches Foll. 92. Lines, 7 in a page Telugu. Injured.

Presented in 1910–11 by Prayāga Sītārāma Śāstri of Guntur

सिद्धान्तकौमुदी.

SIDDHĀNTAKAUMUDĪ.

Same work as the one described under No. 1354 of the D.C.S. MSS., Vol. III.

Wants beginning and end in Taddhita. The leaves are put in disorder.

R. No. **306.**

Palm-leaf. 15⅞ × 1⅜ inches. Foll. 123. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1910–11 by Prayāga Sītārāma Śāstri of Guntur.

The first three leaves are blank.

साहित्यरत्नाकरः.

SĀHITYARATNĀKARAḤ.

Foll. 4*a*—123*b*.

A work in poetics and rhetoric in ten Taraṅgas: by Dharmasudhī, son of Parvatanāthasūri and Yallamāmbā of Hāritagōtra. The author gives the following genealogy:—

Aṅgiras
|
Hārīta
|
× × ×
Vārāṇasī Tripurāri — Nāgāmbikā
|
Dharma
|
Nārāyaṇa | Rāma
Parvatanāthasūri — Yallamāmbā
|
Dharmasudhī.

This is the same work as what is mentioned under No. 815 in the Fourth Report of Operations in Search of Sanskrit MSS. by P. Peterson.

Complete.

Beginning:

आलिङ्ग्य गाढमुदरं पितुरर्धजानेः
उत्सङ्गवर्त्यपि वतु बालगजाननो नः ।
यत्कुम्भयोर्गिरिसुताकुचपार्श्वभाजोः
स्तन्यं पिपासति गुहस्त्रिभिराननाब्जैः ॥

* * * *

तेष्वङ्गिरोमुनिवरादुदयं प्रपेदे
भास्वानिवोदयगिरेर्हरितो मुनीन्द्रः ।
दोषानुषङ्गरहितश्च नभोगमार्ग-
भ्रात्रा(न्तो)निराकृततमाः शुचियोगदीप्रः ॥

गोत्रे च तस्य समभूदभिजातवंशो
वाराणसीत्युपपदेन भुवि प्रसिद्धः ।
तत्राभवन् बुधवरास्त्रिपुरारिना(सो)म-
यज्वादयः शुभतपःश्रुतशीलवृत्ताः ॥
देवान् हविर्भिरतिथीनशनैश्च शिष्यान्
विद्योपदेशविधया परितोषयद्भि(न्त)ः ।
वाराणसीविहितनित्यनिवासदीक्षैः
यैः पण्डितैर्भरतखण्डममण्डि पुण्यैः ॥
सर्वज्ञतः शमितकामरुषो गिरीशात्
श्रीपार्वतीप्रियतमात् त्रिपुरारिनाम्नः ।
तस्मात् बुधाद्बहुमुखोद्भवतवाग्विभूतिः
धर्माह्वयः समुदभून्महितः कुमारः ॥
नागाम्बिकां शुभगुणां प्रतिगृह्य कन्या-
मेतां गृहाश्रमनिवासकृते चिरं यः ।
अन्यप्रतिग्रहभयो निगमागमानां
सत्संप्रदायमकरोदवनादखण्डम् ॥

* * * *

विधिवदनुष्ठितकर्मा धर्माख्यसुधीः सुसंस्फुरद्धर्मा ।
जनयांबभूव तनयान् नारायणपर्वतेशरामाख्यान् ॥
पदक्रमपदाक्षरक्रमजटाक्रमारोहणा-
वरोहविषमक्रमाक्रममुखावधानाध्वनि ।
परिक्रमणचक्रवर्त्यभिधयाष्टदिग्रढया
चचार बहुशः क्षितौ द्विजरथेन नारायणः ।

जित्वा रामावधानिप्रमुख(मु)रुमरुद्वेगवद्वेदचर्चा-
गोष्ठ्या नारायणार्यः सदसि बुधशतैः श्लाघ्यमानावधानः ।
संतुष्टाद्धर्मभूपादलभत शिबिकाचामरच्छत्रपूर्णं
गर्वाखर्वावधानीश्वरशरभघटीगण्डभेरुण्डचिह्नम् ॥
तस्यानुजः पर्वतनाथसूरिरासीदशेषागमपारदृश्वा ।
ऐकात्म्यलीलायित आदिमानां षड्दर्शनीजन्मकृतां मणीनाम् ॥

* * * *

यो वादेन जनार्दनाह्वयबुधं मध्येविपश्चित्सभं
जित्वाविन्दत वादिकेसरिपदं प्रौढं तदीयं स्वयम् ।
मायावादिभयंकराख्यबिरुदादत्यूर्जितादार्जितात्
किंचोदश्चयति स्म कीर्तिमतुलां प्रख्यापयन् वैष्णवम् ॥
आटोपोद्भटनाट्यधूर्जटिजटाकोटीरकोटीनट-
द्गङ्गातुङ्गतरङ्गरिङ्गणभरप्रस्पर्धिवाग्वैभवः ।
सोऽयं स्वप्रतिभादृषन्निकषणप्रादीप्तषड्दर्शनी-
रत्नस्रङ्मयकन्धरो यदनुजो रामाह्वयः पण्डितः ॥
तस्मात् पर्वतनाथसूरिजलधेः श्रीयल्लमाम्बावियद्-
गङ्गासंगजुषो लसद्गुणमणेर्लब्धोदयश्चन्द्रवत् ।
सोऽहं धर्मसुधीर्गवां विलसितैः कर्तुं रसालंक्रिया-
संस्फूर्तिं समुदश्चयेयमधुना साहित्यरत्नाकरम् ॥

अत्र कविपक्षे गवां विलसितैर्वचसां विलासैः। रसालंक्रियासंस्फूर्तिं रसाः वक्ष्यमाणाः शृङ्गारादयः, अलंक्रियाः उपमादयः ; इदं गुणादीनामप्युपलक्षणम् ; तेषां संस्फूर्तिं निरूपणं कर्तुं साहित्यरत्नाकरं नामालंकारग्रन्थं समुदश्चयेयं निर्मास्यामीत्यर्थोऽवगन्तव्यः ।

End:

यत्र बहूनां भावानामन्योन्योपमर्दकतया निबन्धः क्रियते तत्र भाव-शबलता । सा यथा—

आयातो न ममान्तिकं रघुपतिः किं तेन जातागसा
यास्यामि स्वयमेव तस्य सविधं किं वा वदेन्मां सखी ।
आयातः स्वयमेव नन्विह पुनर्द्रक्ष्यामि नैतन्मुखं
तूर्णं तद्धुननं भवेन्मम कथं का वा भवित्री कथा ॥

अत्र चिन्तास्मृतिदैन्यशङ्काहर्षामर्षौत्सुक्यविषादानां शबलता ।

Colophon:

इति श्रीमत्त्रिभुवनपवित्रहरितगोत्रावतंसवारणासीवंशपद्माकरप्रभातभानुना पदवाक्यप्रमाणपारावारपारीणमहोपाध्याय पर्वतनाथमण्ड(ले)श्वरसूनुना श्रीयल्लमाम्बागर्भरत्नाकरपारिजातेन निर्मलाचारपूतेन चतुर्दशविद्याविभूषणवता धर्मसंख्यावता विरचिते रघुकुलतिलकगुणमणिगणधामनि साहित्यरत्नाकरनामनि अलंकारशास्त्रे रसनिरूपणं नाम दशमस्तरङ्गः ॥

धर्मान्तर्वाणिवर्यस्त्रिजगति विदिते वारणास्यन्वये यः
संजातः पर्वतेशाच्छुभगुणगणभूर्यल्लमाम्बासुगर्भे ।
व्याख्याविख्यातकीर्तिर्विवरणगुरुवाक् सांख्यमुख्यागमानां
तस्यालंकारशास्त्रे विलसति दशमो रामवर्ण्ये तरङ्गः ॥
आस्थामन्दिरमिन्दिराप्रणयिनो देवस्य रामात्मनः
त्वङ्गत्तुङ्गतरङ्गरिङ्गणभरैरङ्गीकृताडम्बरः ।
तादृङ्निर्मलधर्मसूरिकवितासोल्लासकल्लोलिनी-
पूर्णः कर्णमनोहरो विजयते साहित्यरत्नाकरः ॥
प्राचीनानुभवप्रबन्धविहितग्रन्थानुसन्धायिना
सोऽयं साहसिकेन संप्रति मया नूत्नः प्रबन्धः कृतः ।

कस्तुष्येदमुनाऽधुना सुलभो बोद्धा च निर्मत्सरः
सर्वज्ञो गतमत्सरोऽस्ति हि रमारामः स संतुष्यतु ॥
भो मातः कविते हितं मम वचः किंचित्समाकर्णय
श्रीमद्रामगुणस्तवामृतवती मर्त्यस्तुतिं मा कृथाः ।
कस्तूरीघनसारचन्दनरसन्यासोत्सवास्वादवित्
को वा विस्रवसास्रपूयपिशितालेपाभिलाषी भवेत् ॥
संजातो हरितान्वये महति यः श्रीपर्वतेशः सुधीः
षण्णां दर्शनकारिणां सुमनसामैकात्म्यलीलाकृतिः ।
धर्माख्येन मनीषिणा विरचितस्तत्सूनुना तादृशा
सोऽयं यावदिलातलं विजयतां साहित्यरत्नाकरः ॥

The scribe gives his name in the following stanzas :—

श्रीसातविल्ल्याम्बुधिचन्द्रशेषभट्टस्य सूनुर्नरसिंहनामा ।
शिवाङ्घ्रिपद्माश्रितशान्त(चेताः) साहित्यरत्नाकरमालिखच्छुभम् ॥
श्रीसातविल्ल्याख्यसुवंशपावनः शेषाद्रिसूनुर्नरसिंहनामा ।
सर्वं यथामातृकवत् तथैव साहित्यरत्नाकरपुस्तकं(मा)लिखत् ॥

The subjects dealt with in the ten chapters of the work are—

प्रथमतरङ्गः	...	...	ग्रन्थारम्भसमर्थनम्.
द्वितीय ,,	..	...	वाचकशब्दार्थवृत्तिनिरूपणम्.
तृतीय ,,	...	...	लक्षकशब्दनिरूपणम्.
चतुर्थ ,,	...	..	व्यञ्जकशब्दार्थवृत्तिनिरूपणम्.
पञ्चम ,,	...	...	गुणनिरूपणम्.
षष्ठ ,,	...	...	शब्दालंकारनिरूपणम्.
सप्तम ,,	...	...	अर्थालंकारनिर्णयः.

अष्टमतरङ्गः ... ... दोषनिरूपणम्.
नवम ,, ... ध्वनिभेदनिरूपणम्.
दशम ,, ... रसनिरूपणम्.

R. No. **307.**

Palm-leaf. 17⅛ × 1⅜ inches. Foll. 20. Lines, 6 in a page. Telugu. Injured.

Presented in 1910–11 by Prayāga Sītārāma Śāstri of Guntur.

Fol. 1 contains the horoscope of the son of the former owner of this manuscript.

(*a*) सामान्यनिरुक्तिक्रोडपत्रम्.
SĀMĀNYANIRUKTIKRŌḌAPATRAM.

Foll. 2*a*—20*a*.

Similar to the work described under No. 4320 of the D.C.S. MSS., Vol. VIII.

Incomplete.

(*b*) तत्त्वचिन्तामणिः.
TATTVACINTĀMAṆIḤ.

Fol. 20*b*.

Same work as the one described under No. 3983 of the D.C.S MSS., Vol. VIII.

Sāmānyanirukti only.

R. No. **308.**

Palm-leaf. 17⅛ × 1⅜ inches. Foll. 108. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1910–11 by Śrīnivāsa Śāstri of Tanjore.

(*a*) तत्त्वचिन्तामणिः.
TATTVACINTĀMAṆIḤ.

Foll. 1*a*—2*b*.

Same work as the one described under No. 3983 of the D.C.S. MSS., Vol. VIII.

From Pūrvapakṣavyāpti to Siddhāntalakṣaṇa.

(*b*) तत्त्वचिन्तामणिव्याख्या—दीधितिः.

TATTVACINTĀMAṆIVYĀKHYĀ : DĪDHITIḤ.

Foll. 3*a*—13*b*.

Same work as the one described under No. 4002 of the D.C.S. MSS., Vol. VIII.

From Pūrvapakṣavyāpti to Siddhāntalakṣaṇa.

(*c*) तत्त्वचिन्तामणिदीधितिप्रकाशिका.

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ.

Foll. 14*a*—97*b*.

Same work as the one described under No. 4041 of the D.C.S. MSS., Vol. VIII.

From Pūrvapakṣavyāpti to Siddhāntalakṣaṇa.

The MS. is dated :

विषुनामसंवत्सरे दक्षिणायने हेमन्तर्तौ मार्गशीर्षमासे कृष्णपक्ष-सप्तम्यां स्थिरवासरे श्रीगोपालकृष्णेन स्वहस्तलिखितम् ॥

(*d*) तर्कविषयः.

TARKAVIṢAYAḤ.

Foll. 98*a*—108*a*. Fol. 108*b* is left blank.

A gloss on the last described work.

R. No. **309.**

Palm-leaf. 17⅞ × 1⅝ inches. Foll. 155. Lines, 7 in a page. Telugu Slightly injured.

Presented in 1910-11 by A. Ullakki Śāstri of Guntur.

ब्रह्मगीताव्याख्या.

BRAHMAGĪTĀVYĀKHYĀ.

Foll. 1*a*—151*b*.

Same work as the one described under No. 2482 of the D.C.S. MSS., Vol. IV, Part II.

Complete.

The MS. is said to have been copied on Wednesday, the 5th day of the dark fortnight of the Āśvija month, in the year Plava.

Foll. 152 and 153 give footnotes of the above work. Foll 154 and 155 are blank.

R. No. 310.

Palm-leaf. $15\frac{3}{8} \times 1\frac{1}{8}$ inches. Foll. 9. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1910–11 by Śrīnivāsa Śāstri of Tanjore.

सुभाषितनीवी.

SUBHĀṢITANĪVĪ.

A collection of ethical maxims composed in verse: by Vēṅkaṭanātha or Vēdāntadēśika in twelve chapters, viz.—

१. अनिपुणपद्धतिः.	७. समचित्तपद्धतिः.
२. दृप्तपद्धतिः.	८. सदाश्रितपद्धतिः.
३. खलपद्धतिः.	९. नीतिमत्पद्धतिः.
४. दुर्वृत्तपद्धतिः.	१०. वदान्यपद्धतिः.
५. सेव्यपद्धतिः.	११. सत्कविपद्धतिः.
६. महापुरुषपद्धतिः.	१२. परीक्षकपद्धतिः.

Complete.

Beginning:

श्रीमान् . . . . सदाहृदि ॥

प्रथमसुजनाय पुंसे मह्यमपि प्रथमदुर्जनाय नमः ।
सर्वं हृतः कृतं यौ सकृदुपकारापकाराभ्याम् ॥

प्रथितपरिष्कृतिमुद्रा सहृदयहृदये समर्पिता कविभिः ।
भवति सुभाषितनीवी परगुणचोरैरहार्यार्था ॥

End:

सैषा सुभाषितानां माला महनीयवर्णवृत्तगुणा ।
भावुकसंस्त्यविगूढा प्रियपद्धतिभूषिता जयति ॥
कविकथकसिंहकथितं कठोरललितं सुभाषितं तदिदम् ।
सदसद्विवेकमुखतः संमुखयति सर्वलोकहितम् ॥

Colophon:

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु सुभाषितनीवी संपूर्णा ॥

R. No. 311.

Palm-leaf. 16¾ × 1¼ inches Foll. 123. Lines, 8 in a page. Telugu. Much injured.

Presented in 1910-11 by Prayāga Sītārāma Śāstri of Guntur.

शेषधर्मः.

ŚEṢADHARMAḤ.

The first two leaves are broken.

Same work as the one described under No. 2089 of the D.C.S. MSS., Vol. IV, Part I.

Adhyāyas 1 to 57 complete.

R. No. 312.

Palm-leaf. 16⅞ × 1½ inches. Foll. 126. Lines, 7 in a page. Telugu. Much injured.

Presented in 1910-11 by Śrīnivāsa Śāstri of Tanjore.

स्मृतिचन्द्रिका.

SMṚTICANDRIKĀ.

The first 42 leaves are broken in the end.

Same work as the one described under No. 2779 of the D.C.S. MSS., Vol. V.

Contains Dāyabhāga complete.

R. No. **313.**

Palm-leaf. 19⅓ × 1⅝ inches. Foll. 38. Lines, 8 in a page. Telugu. Good.

Presented in 1910-11 by Addēpalli Rāmaśēṣayya of Guntur.

सिद्धान्तशिरोमणिः.

SIDDHĀNTAŚIRŌMAṆIḤ.

Foll. 1*a*—36*a*.

This is a copy of Bhāskarācārya's well-known work on astronomy and mathematics.

Contains the Graha and the Gōla chapters.

Beginning :

जयति जगति गूढानन्धकारे पदार्थान्
जनघनघृणयायं व्यञ्जयन्नात्मभाभिः ।
विमलितमनसां सद्वासनाभ्यासयो(गै-
रपि च परमत)त्त्वं योगिनां भानुरेकः ॥
अथ निजकृतशास्त्रे तत्प्रसादात् पदार्थान्
शिशुजनघृणयाहं व्यञ्जयाम्यत्र गूढान् ।
विमलितमनसां सद्वासनाभ्यासयोगैः
हृदि भवति यथैषां तत्त्वभूतार्थबोधः ॥

* * * *

यत्र त्रातुमिदं जगज्जलजिनीबन्धौ समभ्युद्गते
ध्वान्तध्वंसविधौ विधौतविनमान्निःशेषदोषोच्चये ।
वर्तन्ते क्रतवः शतक्रतुमुखा दीव्यन्ति देवा दिवि
द्राङ् नः सूक्तिमुचं व्यनक्तु स गिरं गीर्वाणवन्द्यो रविः ॥
कृत्वा चेतसि भक्तितो निजगुरोः पादारविन्दं ततो
लब्ध्वाबो धलवं करोति सुमतिप्रज्ञासमुल्लासकम् ।

सद्वृत्तं ललितोक्तियुक्तममलं लीलावबोधं स्फुटं
सत्सिद्धान्तशिरोमणिं सुगणकप्रीत्यै कृती भास्करः ॥

* * * *

त्रुट्यादिप्रलयान्तकालकलनामानप्रभेदः क्रमा-
च्चारश्च द्युसदां द्विधा च गणितं प्रश्नास्तथा सोत्तराः ।
भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते
सिद्धान्तः स उदाहृतोऽत्र गणितस्कन्धप्रबन्धे बुधैः ॥

End:

या ज्यानुपाततः सेष्टव्यासार्धे परिणाम्यते ।
आद्यदोःकोटिजीवाभ्यामेवं कार्या ततो मुहुः ॥
भावनाः स्युस्तदग्रज्या इष्टे व्यासदले स्फुटाः ।
स्थूलं ज्यानयनं पाटा(ट्या)मिह तन्नोदितं मया ॥

Colophon:

श्रीमहेश्वरोपाध्यायसुतभास्कराचार्यविरचिते सिद्धान्तशिरोमणौ ज्योत्पत्त्यध्यायः ॥

सर्वे उत्तरखण्डश्लोकाः ४९८, पूर्वोत्तराध्याययोः संभूय श्लोकाः ९४५.

Foll. 36*b* and 37*a* are blank. Foll. 37*b* and 38 contain some astronomical tables.

R. No. 314.

Palm-leaf. 15¾ × 1½ inches. Foll. 60 Lines, 12 in a page. Grantha. Slightly injured.

Presented in 1910-11 by Mīnākṣiyammāḷ of Koduvayūr.

अग्निष्टोमप्रयोगः.

AGNIṢṬOMAPRAYŌGAḤ.

Same work as the one described under Nos. 1119 and 1120 of the D.C.S. MSS., Vol. II.

Sōmapañcaka, complete.

The MS. is dated :

अभयंकरविघ्नेशकार्त्तिकेयगणाधिपः ।
श्रीमङ्गलाम्बया चापि साकं श्रीवाञ्छिनायकः ॥
सोमप्रयोगप्रश्नानां पञ्चकं लिखितं सदा ।
आनन्दाब्दधनुःकृष्णदशम्यां पातु पुस्तकम् ॥

R. No. **315**.

Śrītāla. 9¾ × 1¾ inches. Foll. 136. Lines, 13 in a page. Grantha. Good.

Presented in 1910–11 by Mīnākṣiyammāḷ of Koḍuvāyūr.

The leaves are in disorder.

अग्निष्टोमप्रयोगः.

AGNIṢṬŌMAPRAYŌGAḤ.

Same work as the one described under Nos. 1119 and 1120 of the D.C.S. MSS., Vol. II.

Sōmapañcaka, complete.

R. No. **316**.

Palm-leaf. 12¼ × 1⅜ inches. Foll. 12. Lines, 16 in a page. Grantha. Good.

Presented in 1910–11 by Mīnākṣiyammāḷ of Koḍuvāyūr.

सोमवारव्रतोद्यापनकल्पः.

SŌMAVĀRAVRATŌDYĀPANAKALPAḤ.

Similar to the work described under No. 8587 of the D.C.S. MSS., Vol. XVI.

Complete.

The scribe's name is given as Áyyāsāmi dīkṣitar.

Beginning :

ऋषिः—

व्रतकल्पं त्वया प्रोक्तमुद्यापनाविधिं वद ।
यं कृत्वा सर्वपापेभ्यो नरो मुच्येत पातकी ॥

गौतमः—

उद्यापनविधिं वक्ष्ये व्रतस्य फलसिद्धये ।
आदौ मध्ये तथान्ते वा कुर्यादुद्यापनं शुभम् ॥
व्रतोद्यापनहीनं तु निष्फलं भवति ध्रुवम् ।
तस्मात् सर्वप्रयत्नेन उद्यापनमथाचरेत् ॥
वृश्चिके मासि संप्राप्ते आद्यन्ते सोमवासरे ।
उद्यापनं प्रकर्तव्यमथवा फाल्गुने मतम् ॥
सर्वमासेषु सर्वत्र कर्तव्यं कर्तुरिष्टदम् ।

End:

तत् सर्वं परमेशान मया तुभ्यं निवेदितम् ॥
तद्गृहाण स्वयं प्रीत्या भोगायुष्यादिसिद्धये ।
कर्मणा मनसा वाचा त्वं गतिर्मे महेश्वर ॥

Colophon:

सोमवारव्रतोद्यापनं संपूर्णम् ॥

पञ्चवर्तिसमायुक्तं पञ्चबाणप्रभञ्जन ।
पञ्चास्यदीपं दास्यामि पञ्चपातकनाशन ॥ पञ्चमुखदीपः ।
नीराजनं महादेव निर्मलं स्वप्रकाशक ।
अहं भक्त्या प्रदास्यामि स्वीकुरु त्वं महेश्वर ॥ नीराजनम् ॥

R. No. 317.

Palm-leaf. 19⅝ × 1¼ inches. Foll. 60. Lines, 10 in a page. Grantha. Slightly injured.

Presented in 1910–11 by Gōpālasami Ayyaṅgār of Mannargudi.

स्तोत्ररत्नभाष्यम्.

STŌTRARATNABHĀṢYAM.

A commentary on Yāmunācārya's Stōtraratna, also called Ālavandārstōtra: by Vēṅkaṭanātha or Vēdāntadēśika.

Complete.

Beginning:

श्रीमद्यामुनमुनिना (ना)थसहायेन नाथवानस्मि ।
यद्वदनचन्द्रजनिता स्तोत्रसुधा भवति सुमनसां भोग्या ॥
प्राप्यप्रापकभूते भगवति यामुनमुनेरयं प्रसृतः ।
दुरितानि हरति जगतां द्वयानुसंधानसिन्धुपरिवाहः ॥
विमला[म]मृतोल्बणरसं विगाह्य निर्विशति वेङ्कटेशकविः ।
यदुपतिचरणार्हमिदं यमुनातीर्थमिव यामुनस्तोत्रम् ॥

* * * *

तत्रैवमागतं स्वस्य सदाचार्येक्षणादिकम् ।
यत्संबन्धाद्मुं नाथमुनिं प्रणमति त्रिभिः ॥

उक्तं च—आचार्यप्राचार्यसंनिपाते प्राचार्यं परिचर्यया उपसंगृह्य उपसंजिघृक्षेदाचार्यम् ।

End:

ननु प्रपन्न इति श्लोकेन शरण्यवृत्तिविशेषस्वभावादपि तदेव प्रथयामास । अथाकृत्रिमेत्यनेन स्वपरगतेषु स्वरक्षणहेतुषु भगवत्कटाक्षविशेषजनितः सदाचार्यसंबन्ध एव प्रधानतम इति निर्धार्य तदधीनभगवत्प्रसादेन निर्भयः प्रहृष्ट आसीत् ।

इति किल निगमान्तभागधेयस्तुतिपरिवाहसमीक्षया महत्या ।
अलभत परमं पदं मुरारेरनघमनोरथ एष यामुनेयः ॥
कथिताकथिते विभाव्य साद्भिः सदसद्वेदिभिरत्र सावधानैः ।
बलवत्प्रथितप्रमाणदृष्ट्या बहुमन्तव्यमिहेदमस्मदुक्तम् ॥
उपनिषदुपधेयस्तोत्रतात्पर्यमेतत्
व्यवणुत निगमान्ताचार्यको वेङ्कटेशः ।

अगणि जगति सद्भिर्यस्तमस्यासहस्रे
कविकथकमृगेन्द्रः सर्वतन्त्रस्वतन्त्रः ॥

Colophon:

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु स्तोत्रभाष्यं संपूर्णम् ॥

R. No. **318.**

Palm-leaf. 14½ × 1½ inches. Foll. 123. Lines 7 in a page. Grantha. Injured.

Presented in 1910-11 by Gōpālasami Ayyangār of Mannargudi.

(*a*) काव्यप्रकाशिकाटीका.

KĀVYAPRAKĀŚIKĀṬĪKĀ.

Foll. 1*a*—6*a*. Fol. 6*b* is left blank.

A commentary on Mammaṭa's Kāvyaprakāśa: by Tiruvēṅkaṭa, son of Cinnatimma, grandson of Tirumalaguru and great grandson of Tālapāka Annayācārya of Bhāradvājagōtra The author refers to the commentary of Gōpāla in the introduction

Contains only a very small portion.

Beginning:

श्रीवेङ्कटेशेन सरोजजाता सेयं सरोजालयलालनीया ।
इतीव नित्यं हृदयारविन्दे निवेशिता मां कमलालयाव्यात् ॥
आसीदासेतुसीमा(नीहा)रविगिरि(गिरिवि)ख्यातनामवान् ।
तालपाकान्नयाचार्यो वेङ्कटेशवराञ्चितः ॥
ततोऽभवत्तिरुमलगुरुर्गुरुसमानधीः ।
भरद्वाजान्वयपयःपारावारकलानिधिः ॥
तस्मादभून्नन्दवरवरहारहरिन्मणिः ।
दीक्षितश्चिन्नतिम्माख्यो मुक्ताच्छत्रद्वयाञ्चितः ॥
तदात्मजन्मा तिरुवेङ्कटा(डप्पा)ख्यः सुधीमणिः ।
ऋग्वेदसरसीहंसो हंसो मित्रसरोरुहाम् ॥

गोपालप्रमुखोक्तव्याख्यासु समाकलय्य सारांशम् ।
टीकासुधानिधिमसौ रचयति काव्यप्रकाशस्य ॥

अथ स्वकर्तृकां कारिकां व्याचिख्यासुर्ग्रन्थकारः विशिष्टशिष्टाचारपरिप्राप्ततया आदौ मङ्गलं प्रेक्षावत्प्रवृत्त्यङ्गतया प्रयोजनसाधनत्वेनाभिधेयं वा वक्तुमुचितं, न तु देवताकीर्तनमिति शङ्कां निराकर्तुमाह—ग्रन्थारम्भ व (इ)ति । अनेन मङ्गलस्य कर्तव्यत्वे सदाचारः प्रमाणमिति सूचितम् ।

End:

तत्राभिधेयस्याद्यश्लोकेन प्रतिपादनेऽपि प्रयोजनाप्रतिपादनादत आह—इपराभिवे(हाभिधे)यमिति । काव्यं खल्वत्राभिधेयम् । प्रकरणकाव्ययोः यथाशास्त्रमभिधानाभिधेयभावः संबन्धः काव्यप्रयोजनयोः कार्यकारण ।

(*b*) स्तोत्ररत्नभाष्यम्.
STŌTRARATNABHĀṢYAM.

Foll. 7*a*—123*b*.

Same work as the one described under R. No. 317 *ante*.

Incomplete.

R. No. **319.**

Palm-leaf. 16½ × 1⅝ inches. Foll. 47. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1910-11 by Ullakki Śāstri of Guntur.

स्मृतिरत्नमहोदधिः.
SMṚTIRATNAMAHŌDADHIḤ.

Same work as the one described under No. 2804 of the D.C.S. MSS., Vol. V, but with a different beginning.

Āśaucakāṇḍa, complete.

Beginning:

नमो महद्भ्यः शिवविष्णुकेभ्यो नमो गुरुभ्यो मुनिपुङ्गवेभ्यः ।
नमः सदा विघ्नविनायकेभ्यो नमो मनुव्यासपराशरेभ्यः ॥
श्रीपरमानन्दघनो ब्रह्मेन्द्रसरस्वतीपदानि(ब्ज)रतः ।
जडधीनां विशदार्थं स्मृतिरत्नमहोदधिं समाकृतवान् ॥

अत्रादौ तावत् गर्भस्रावपातादिलक्षणं निरूप्यते —

R. No. 320.

Śrītāla. 17⅝ × 2¼ inches. Foll. 148. Lines, 12 in a page. Grantha. Good

Purchased from S. Rāmakṛṣṇavādyār of Palghat in 1910 11.

Fol. 1 is blank. Fol. 2*a* contains some stanzas giving the names of the eight Brāhmaṇas of the Sāmavēda. Fol. 2*b* is blank.

सामवेदब्राह्मणम्.

SĀMAVĒDABRĀHMAṆAM.

Foll. 3*a*—140*a*.

Same work as the one described under No. 58 of the D.C.S. MSS., Vol. I, Part II.

All the eight Brāhmaṇas are complete.

Foll. 141*a*—142*a* contain Mithyātvavicāra. The remaining leaves are blank.

The transcription is said to have been completed by Subrahmaṇya on the 5th Mārgaḷi in the year Virōdhi.

R. No. 321.

Paper. 7¾ × 6⅝ inches. Foll. 12. Lines, 30 in a page. Telugu. Good.

Presented in 1910–11 by Pottūri Lakṣmayya of Guntur

Fol. 1*b* contains 11 lines containing some stanzas on medicine. Foll. 1*a* and 2*a*—4*b* are left blank.

(a) अभिधानरत्नमाला—आन्ध्रटीकासहिता.

ABHIDHĀNARATNAMĀLĀ WITH TELUGU MEANING.

Foll. 5*a*—9*b* and 12*a*.

This is a work on materia medica, the things being arranged in six Skandhas according to their Rasa or taste. This appears to be the same work as the one described by Burnell on page 72(*b*) of the Tanjore Palace Library Catalogue.

Breaks off in the sixth Skandha.

Beginning:

वन्दे सिन्दूरसन्दोहसुन्दराङ्गमुमासुतम् ।
मन्दस्मितरसानन्दं प्रसन्नं सगजाननम् ॥
येन केनाप्युपायेन(पि यद्यद्वा) यस्य कस्य च जीवितम् ।
नाम तत्तु तदीयं स्यात् तं नमामि जगन्मयम् ॥
सर्वतन्त्रप्रयुक्तानि नामान्यादाय सर्वशः ।
रसभेदेन षट्स्कन्धो निघण्टोरभिधीयते ॥

तत्राज्यस्कन्धः—

आज्यक्षौद्रतिलोत्थदुग्धनवनीताम्भोविदारीवरी-
काकोलीकपिगच्छुगोपतनयामेधापयस्याद्वयम् ।
खर्जूरी तृणराण्मधूकयुगलं पर्णीचतुष्कं कुशौ
द्राक्षा काशयुगं सितोपलबला दूर्वात्रयं गोक्षुरम् ॥

Colophon:

इत्यभिधानरत्नमालायां पञ्चमः स्कन्धः ।

End:

त्रिवृन्मुस्तालोध्रौ कृमिजयुगलं तिन्दुकयुगं
शमी बिल्वः पथ्या शिवकलितसमङ्गायुवफला ।

* * *

चतुर्विधो रसो ज्ञेयः रसेन्द्रादिविभेदतः ।

पारदं शम्भुवीर्यं च रसधातुमहारसः ।
रसेन्द्ररसिकं सूतं रसः साक्षात्सदाशिवः ।

* * * *

ఆ. స్థాపాయాం—పాదరసం. ముఖ్యగుణామర ॥

रक्तपादशमीपत्रं समङ्गाजविकारिका ।
नमस्कारी रक्तमूली लज्जालोहितयेष्टिका ॥ ౩౪౮.

(b) देव्यपराधस्तोत्रम्—आन्ध्रानुवादसहितम्.

DĒVYAPARĀDHASTŌTRAM WITH TELUGU TRANSLATION.

Fol. 10.

A work of praise and prayer addressed to Dēvī or Pārvatī attributed to Śaṅkarācārya. The author of the Telugu version is Kopparāja Subbaya.

Complete.

Beginning:

न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो
न चाह्वानं ध्यानं तदपि च न जाने स्तुतिकथाः ।
न जाने मुद्रास्ते तदपि च न जाने विलपनं
परं जाने मातस्त्वदनुसरणं कष्टहरणम् ॥

శా. శ్రీమన్మాత భవత్కథాస్తుతులు సేవాధ్యాన ముద్రాదులన్
బ్రేమన్ మంత్రము యంత్రముల్ విలపనం బిచ్చాసమావాహనం
బేమైనన్ మది నే నెఱుంగ నగజా ! యింపొందఁ గష్టహరం
బై మేలైన భవత్పదాబ్జభజనం బాధిక్యమం చెంచెదన్

End:

जगदम्ब विचित्रमत्र किं परिपूर्णा करुणास्ति चेन्मयि ।
अपराधपरम्परावृतं न हि माता समुपेक्षते सुतम् ॥

ఉ. శాంకరి ! నీకృపారసము చాలగ నాపయిఁ గల్గుచుండఁ దా
నింక విచిత్రమేమి ? ననుఁ నెమ్మదిఁ బ్రోవఁగఁదల్లిభూమి నే
పంకమహాపరాధుని నపాత్రునిఁ బుత్రునిఁ బ్రోవకుండునే
పంకజగర్భముఖ్యసురవల్లభ సేవితపాదపంకజా !

ఉ. శంకరదేశికేంద్ర కృతశాంభవి సంస్తవ మాంధ్రభాషచేఁ
బొంకముగా రచించె బుధపుంగవు లెంతయు సంతసిల్ల ని
శ్శంకతఁ గొప్పరాజకులసంభవసత్కవి సుబ్బయాఖ్యుఁడో
శాంకరి ! దీనిఁగైకొనుము శాశ్వతమై తనరార నిద్ధరన్.

(c) अगस्त्येश्वराष्टकम्.

AGASTYĒŚVARĀṢṬAKAM.

Fol. 11*a*. Foll. 11*b* and 12*b* are left blank.

A eulogy addressed to Agastyēśa worshipped at Guntur: by Kopparāja Subbaya.

Complete.

Beginning:

श्रीमत्पर्वतपुत्रिकाश्रितलसद्वामाङ्गमिन्दूज्ज्वल-
त्कोटीरं कनकाद्रिकार्मुकधरं कल्पद्रुमालावली-
सक्तोरःस्थलमन्तकान्तकमनन्ताहीन्द्रसद्भूषणं
श्रीगुण्टूरिपुराधिवासमतुलागस्त्येशलिङ्गं भजे ॥

End:

श्रीकोप्पराजकुलवार्धिनिशाकरेण
स्तोत्रं कृतं जगति सुब्बयनामभाजा-
गस्त्येश्वरस्य निजभक्तजनावनस्य
यो वै पठेल्लभति सोऽपि सदा विमुक्तिम् ॥

R. No. **322.**

Paper. 4¾×3⅝ inches. Foll. 26. Lines, 15 in a page. Telugu. Good.

Presented in 1910-11 by Pottūri Lakṣmaṇayya of Guntur.

(a) हरिहरनामावली.

HARIHARANĀMĀVALĪ.

Foll. 1*a*—2*b*.

A eulogy in fourteen stanzas containing the names of Viṣṇu and Śiva. It is said to have been taken from the Kāśīkhaṇḍa of the Skāndapurāṇa and composed by Dharmarāja.

Complete.

Beginning:

गोविन्द माधव मुकुन्द हरे मुरारे
शंभो शिवेश शशिशेखर शूलपाणे ।
दामोदराच्युत जनार्दन वासुदेव
त्याज्या भटा(य) इति संततमामनन्ति ॥

End:

अष्टोत्तराधिकशतेन सुचारुनाम्नां सन्दर्भितां ललितरत्नकदम्बकेन ।
सन्नायकां दृढगुणां द्विजकण्ठगां यः कुर्यादिमां स्रजमहो स इमं न पश्यत्
. . . . . ॥ १२ ॥ [॥ ११ ॥

अगस्त्य उवाच—
यो धर्मराजरचितां ललितप्रबन्धां
नामावलिं सकलकल्मषबीजहन्त्रीम् ।
धीरोऽत्र कौस्तुभभृतः शशिभूषणस्य
नित्यं जपे स्तनरसं न पिबेत् स मातुः ॥ १३ ॥

इति शृण्वन् कथां रम्यां शिवशर्मा प्रियेऽनघाम् ।
प्रहृष्टवक्त्रः पुरतो ददर्शाप्सरसां पुरीम् ॥

Colophon:

इति श्रीस्कन्दपुराणे काशीखण्डे अगस्त्यलोपामुद्रासंवादे धर्मराज-विरचितं हरिहरनामावलीस्तोत्रं संपूर्णम् ॥ १४ ॥

(b) सीतारामस्तोत्रम्.

SĪTĀRĀMASTŌTRAM.

Fol. 3

This is a short eulogy on Rāma and Sītā attributed to Hanumat in the Brahmāṇḍapurāṇa.

Complete.

Beginning:

अयोध्यापुरनेतारं मिथिलापुरनायिकाम् ।
राघवाणामलङ्कारं वैदेहानामलंक्रियाम् ॥

End:

लोकाभिरामं श्रीराममभिरामां च मैथिलीम् ।
दिव्यसिंहासनासीनं दिव्यस्रग्वस्त्रभूषणाम् ॥
अनुक्षणं कटाक्षाभ्यामन्योन्येक्षणकाङ्क्षिणौ ।
अन्योन्यसदृशोपेतौ त्रैलोक्यगृहदम्पती ॥

* * * *

अनया स्तौति यः स्तुत्या रामसीतासमन्वितम् ।
तस्य तौ ददतुः प्रीत्या संपदश्च कला अपि ॥
इत्येवं रामचन्द्रस्य जानक्याश्च विशेषतः ।
कृतं हनुमता पुण्यं स्तोत्रमेतद्विमुक्तिदम् ॥

* * * *

सीतासौन्दर्यपात्रं सुरमुनिविनुतं नीलमिन्दीवराभं
वन्दे मन्दारमूलं रजनिचरहरं रम्यकोदण्डबाहुम् ॥
सर्वसंपत्करं चैव सर्वसंपत्प्रदायकम् ।
यः पठेत् प्रातरुत्थाय सर्वान् कामानवाप्नुयात् ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे हनुमत्कृतं सीतारामस्तोत्रं संपूर्णम् ॥

(*c*) निरालम्बोपनिषत्.

NIRÀLAMBÒPANIṢAD.

Foll. 4*a*–6*b*. Fol. 7*b* is left blank.

Same work as the one described under No. 570 of the D.C.S. MSS., Vol. I, Part III.

Complete.

Foll. 6*b* and 7*a* contain some stanzas on the Advaita philosophy

(*d*) वज्रसूच्युपनिषत्.

VAJRASŪCYUPANIṢAD.

Foll. 8*a*—9*a*. Fol. 9*b* is blank.

Same work as the one described under No. 776 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*e*) अम्बाष्टकम्.

AMBĀṢṬAKAM.

Foll. 10*a*—11*a*.

A eulogy in eight stanzas addressed to Ambā or Śakti.

Complete.

Beginning:

अम्बा शाम्भवि(व)चन्द्रमौलिरबलात्रार्या भवानीश्वरी
कामाक्षी महिषासुरप्रशमनी वाक्चातुरी सुन्दरी ।
दुर्गा शुम्भनिशुम्भदैत्यदमनी दौर्भाग्यविच्छेदनी
चिद्रूपी परदेवता भगवती श्रीराजराजेश्वरी ॥

End:

अम्बापालितरत्नराजकथितं(चा)म्बाष्टकं यः पठेत्
अम्बालोककटाक्षवीक्षणददाऐ(बलादै)श्वर्यमव्याहतम् ।
अम्बापावनमन्त्रनामपठनादद्यैव मोक्षप्रदा
चिद्रूपी (परदेवता भगवती श्रीराजराजेश्वरी) ॥

Foll. 11*b*—26*b* are blank.

R. No. **323.**

Paper. 7⅞ × 6¼ inches. Foll. 25. Lines, 18 in a page. Telugu. Good.

Presented in 1910-11 by Pottūri Lakṣmaṇayya of Guntur.

The foll. are put in disorder.

(*a*) चण्डिकाहृदयम्.

CAṆḌIKĀHṚDAYAM.

Foll. 1*a*—4*b*. Foll. 3*a* and 5 are blank.

Similar to the work described under No. 6278 of the D.C.S. MSS., Vol. XIII.

Incomplete.

Beginning:

अथातः संप्रवक्ष्यामि विस्तरेण यथा तथा ।
चण्डिकाहृदयं गुह्यं शृणुष्वैकाग्रमानसः ॥

ऐं ह्रीं श्रीं ह्रः ह्रसौः श्रीर्जय जय चण्डि चामुण्डे चण्डिके त्रिदशमकुटकोटिसंघट्टितचरणारविन्दे गायत्रीसरस्वतीसावित्रीमातृवद्रक्षे सर्वविघ्नानि कृन्तति गो(भो)गैश्वर्यं ददाति ।

End:

श्रीं ह्रीं सर्वप्राणसंहारकारिणि हुं फट् स्वाहा इति जपः । इति ध्यानम्— . . . . . महिम(ष)मस्तकनृत्यविनोदिनि स्फुटरणन्माणिनूपुरमालिका ॥

(*b*) नारायणहृदयम्.

NĀRĀYAṆAHṚDAYAM.

Foll. 6*a*—7*a*.

Same work as the one described under No. 6487 of the D.C.S. MSS., Vol. XIII, but without Ṛṣicchandōdēvatā.

Complete.

(*c*) लक्ष्मीनारायणहृदयम्.

LAKṢMĪNĀRĀYAṆAHṚDAYAM.

Foll. 7*b*—11*b*.

Similar to the work described under No. 7102 of the D.C.S. MSS., Vol. XIV.

Incomplete.

Beginning:

सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥

ओं श्रीबीजेन प्राणायामं कृत्वा अस्य श्रीआद्यादिश्रीमहालक्ष्मी-हृदयमालामन्त्रस्य भार्गव ऋषिः, अनुष्टुबादिनानाछन्दांसि ।

End:

ब्रह्मरुद्रादयो देवा(वे)दाश्चापि न शक्नुयुः ।
महिमानं तव स्तोतुं मन्दोऽहं शक्नुयां कथम् ॥
अहं त्वधीत्य वाक्यानि सूक्तासूक्तानि यानि च ।
तानि स्वीकुरु सर्वज्ञे दयालुत्वेन साद(रम्) ॥

(*d*) नारायणहृदयम्.

NĀRAYAAṆHṚDAYAM.

Foll 12*a*—13*a*.

Same work as the one described under No. 6487 of the D.C.S. MSS., Vol. XIII.

Complete.

This work is written in this MS. twice over.

(*e*) लक्ष्मीनारायणहृदयम्.

LAKṢMĪNĀRĀYAṆAHṚDAYAM.

Foll. 13*b*—16*b*.

This is a duplicate copy of the work described under (*c*) above.

Incomplete.

(*f*) वर्णन्यासः.

VARṆANYĀSAḤ.

Foll. 17*a*—18*b*.

The letters of the alphabet are treated as Mantras, and the manner of repeating them is given here.

Incomplete.

Beginning :

अस्य श्रीअकारमन्त्रस्य देव ऋषिः, त्रिष्टुप् छन्दः, श्रीकण्ठो देवता, वैष्णवं बीजम्, विसर्गान्तं शक्तिः, बिन्द्वन्तं कीलकम्, ममाकाराधिष्ठान-देवताप्रसादसिद्ध्यर्थे जपे विनियोगः ।

अमित्यादिषडङ्गन्यासः । ओं भूर्भुवः सुवरोमिति दिग्बन्धः । मनुः—अं नमः । पुनः ऋष्यादिन्यासं कुर्यात् । लक्षपुनश्चर्यं कुर्यात् ।

End:

अस्य श्रीयकारमन्त्रस्य सनत्कुमार ऋषिः ।

(*g*) अजपाविधानम्.

AJAPĀVIDHĀNAM.

Foll. 19*a*—20*b*.

Similar to the work described under No. 7732 of the D.C.S. MSS., Vol. XV.

Complete.

Beginning :

विश्वामित्रकल्पे आह्निकाविधिं व्याख्यास्यामः ।

अथातो(तः) पूजयेत् देवमुपचारैश्च पञ्चकैः ॥
भक्तिश्रद्धानुसारेण विश्वामित्रः प्रकल्पयेत् ।
अस्य मन्त्रस्य प्रश्नस्य प्राणायामं निरुन्धयेत् ॥
प्राणापानं नियम्याशु गुरुपूजापुरःसरम् ।
प्रातरुत्थाय यो विप्रः स्वात्ममूलस्थगु(कु)ण्डलीम् ॥

End :

गमागमस्थं गमनादिशून्यं चिद्रूपदीपं तिमिरापहारम् ।
पश्यामि ते सर्वजनान्तरस्थं नमामि हंसं परमात्मरूपम् ॥

Colophon :

अजपाविधानं समाप्तम् ॥

(*h*) योगिनीहृदयम्.
YŌGINĪHṚDAYAM.

Foll. 21*a*—25*a*. Foll. 22 and 21 are bound in the wrong way; and therefore the correct order of reading is 22*b*, 22*a*, 21*b*, 21*a*, 23*a*, etc.

Similar to the work described under No. 5698 of the D.C.S. MSS., Vol. XII.

Complete.

Beginning :

शुद्धस्फटिकसंकाशं त्रिणेत्रं चन्द्रशेखरम् ।
वराभयगुरुं वन्दे श्रीगुरुं शिवरूपिणम् ॥
भक्तज्ञानतमोभानुमूर्धपङ्कजसंस्थितम् ।
सदाशिवमयं वन्दे श्रीगुरुं शिवरूपिणम् ॥
श्रीविद्यां जगतां धात्रीं सर्गस्थितिलयेश्वरीम् ।
नमामि ललितादेवीं भक्तानामिष्टदायिनीम् ॥

* * * *

पूर्वाम्नायमयं पूर्वद्वारं देवीं भजाम्यहम् ।
दक्षिणाम्नायपूर्वं तं दक्षिणद्वारमाश्रये ॥
नमामि पश्चिमाम्नायं पश्चिमद्वारपूर्वकम् ।
उत्तराम्नायपूर्वं तामुत्तरद्वारमाश्रये ॥

End :

अन्तर्दिक्षु विधानेन बलिं दास्यामि भैरवीम् ।
जगदम्ब महाराज्ञि सर्वशक्ते शिवप्रिये ॥
हृच्चक्रे तिष्ठ मे नित्यं त्रिपुरापरमेश्वरि ।
पञ्चोपचारैः संपूज्य हृदये ललितां पराम् ॥
आत्मालंकरणं कुर्यात् गन्धमाल्यादिभिस्ततः ॥

Colophon :

इति श्रीललितानुक्रमणिका(यां) योगिनीहृदयं संपूर्णम् ॥

R. No. **324.**

Paper. 6 × 4½ inches Foll. 42. Lines, 20 in a page. Telugu, Good.

Presented in 1910–11 by Pottūri Lakṣmaṇayya of Guntur.

Fol. 1 contains a list of various Mantra works.

(*a*) భక్తిబోధకమగుసువ్విపాట.

BHAKTIBŌDHAKAMAGUSUVVIPĀṬA.

Fol. 2.

See the Telugu part of this Triennial Catalogue.

(*b*) रामप्रभुस्तोत्रम्.

RĀMAPRABHUSTŌTRAM.

Foll. 2*b*—3*b*.

A eulogy addressed to Ramaprabhu, *i.e.*, the Lord Rāma, and consisting of stanzas ending in रामप्रभुं सन्ततमर्चयामः and describing the various acts of a formal worship.

Complete.

Beginning:

कान्तित्कृ(कान्त्युत्क)टैः कनकपात्रयुतैः प्रसन्नैः
काम्यैः सुगन्धकलितैरमृतोपमानैः ।
गाङ्गैर्जलैः कृतशुभाभिषवं प्रसन्नं
रामप्रभुं रहसि संततमर्चयामः ॥

End:

मुक्ताकलापललितं कनकातपत्रं धृत्वा चिरं विमलमाशुगनन्दनेन ।
स्थित्वा पुरः शुभगुणेन निषेविताङ्घ्रिं रामप्रभुं रहसि संततमर्चयामः ॥

(*c*) त्रिवेणीस्तोत्रम्.

TRIVĒṆĪSTŌTRAM.

Foll. 3*b*—4*c*.

A eulogy of Dēvī who is here called by the attribute Trivēṇī in each stanza.

Complete.

Beginning:

कर्पूरागरुकुङ्कुमाङ्कितकुचां कर्पूरवर्णस्थितां
कष्टोत्कृष्टनिकृष्टकर्मदहनां कामेश्वरीं कामिनीम् ।
कामाक्षीं करुणारसार्द्रहृदयां कल्पान्तरस्थायिनीं
कस्तूरीतिलकाभिरामजटिलां देवीं त्रिवेणीं भजे ॥

End:

ओंकाराब्जनिवासमत्तमधुपामोङ्कारपीठस्थिता-
मोंकारागमकामकल्पलतिकां बीजस्वनीं चौषधीम् ।
ओंकारेश्वरकेवलप्रियसखीमोंकारनादप्रिया-
मोंकारप्रभवां विचित्रविभवां देवीं त्रिवेणीं भजे ॥

(*d*) జీవైక్యబోధము.

JĪVAIKYABŌDHAMU.

See the Telugu part of this Triennial Catalogue.

(*e*) పంచీకరణము.

PAÑCĪKARAṆAMU.

See the Telugu part of this Triennial Catalogue.

(*f*) अवस्थात्रयोल्लासः—आन्ध्रटीकासहितः.

AVASTHĀTRAYŌLLĀSAḤ WITH TELUGU MEANING.

Foll. 18*b*—22*a*.

A description of the nature and characteristics of the three conditions of consciousness, viz., wakefulness, dream and sleep.

Complete.

Beginning:

इदं ममेति सर्वेषु(र्वासु) दृश्यजातिषु भावना ।
जाग्रजा(ज्जा)ग्र इ(दि)ति प्राहुर्ममता रघुनन्दन ॥

అర్థము—

రామయ్య రఘునన్దన యీ స్థూలదేహమును సూక్ష్మదేహమును కారణదేహమును నేనను అభిమానంబిడిచి యిది అనిత్యమనిన్ని జడమనిన్ని,

End:

सर्ववस्तूश्चनारीणां(?) तुर्यात्मा परिकीर्तिता(तः) ।
इत्येवन्तु समुल्लासविमर्शमु(ः प्रो)च्यते श्रुतेः ॥

అర్థము—

జాగ్రత్స్వప్నసుషుప్తిలో అవస్థాతీతమై తుర్యస్వరూపమైయుండే బ్రహ్మమును చెప్పబడినది . . . . అవస్థాత్రయములల్లాసగంథము వసిష్ఠ రఘునాయకు కు బోధించినది.

(g) ज्ञानदीपिका—आन्ध्रटीकासहिता.

JÑĀNADĪPIKĀ WITH TELUGU MEANING.

Foll. 22*b*—31*b*.

A short treatise on the nature of the soul.

Complete.

Beginning:

नित्यानन्दाय शुद्धाय निर्मलाय चिदात्मने ।
ज्ञानोत्तमाय गुरवे साक्षिणे ब्रह्मणे नमः ॥

టీకా—

తనకు యిష్టదేవతైన గురువుల పాదపద్మములకు నమస్కారము చేసిగురు శిష్య సంవాదమైన జ్ఞానదీపిక అనే ప్రకరణం లోకోపకారార్థగ్రంథచెప్పెను।

पञ्चीकृतमहाभूतसम्भवं कर्मसञ्चितम् ।
शरीरं सुखदुःखानां भोगायतनमुच्यते ॥

End:

अलं विकल्पैरहमेव दैवतं मयि स्थितं विश्वमिदं चराचरम् ।
इदं रहस्यं मम येन दर्शितं स चिन्तनीयो गुरुरेव केवलम् ॥

టీకా—

యిఘనువికల్పాలు చాలును నేనేదైవమని నాయందు చరాచరాత్మకమయిన ప్రపంచం మున్నదియని యీ రహస్యం యెవ్వరి చేత తెలియబడునో ఆ గురువులనుస్తుతియింపుచున్నాను.

Colophon:

इति ज्ञानदीपिकाप्रकरणं सम्पूर्णम् ॥

(h) शिवषडक्षरस्तोत्रम्.

ŚIVAṢAḌAKṢARASTŌTRAM.

Fol. 32.

A hymn of praise on Śiva based on the meaning conveyed by the six syllables of the six-syllabled Mantra addressed to Him.

Complete.

Beginning :

ओंकारसंजातसमस्तवेदपुराणपुण्यागमपूजिताय ।
ओंकारवर्णप्रतिपादिताय ओंकाररूपाय नमः शिवाय ॥

End :

षडक्षरमिदं स्तोत्रं यः पठेच्छिवसंनिधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥

* * * *

मेरुकाञ्चनदत्तानां गवां कोटिशतैरपि ।
पञ्चकोटितुरङ्गानां तत्फलं[शिव]लिङ्गदर्शनम् ॥

(i) नमःशिवायाष्टकम्.

NAMAŚŚIVĀYĀṢṬAKAM.

Foll. 32*b*—33*b*.

A hymn of praise on Śiva consisting of eight stanzas each of which ends with the words Namaśśivāya. The authorship is attributed to Vasiṣṭha, and a recital of this hymn is considered to bestow health, wealth, progeny and salvation.

Complete.

Beginning :

विश्वेश्वराय नरकार्णवतारणाय ज्ञानप्रदाय करुणामृतसागराय ।
कर्पूरकुन्दधवलेन्दुजटाधराय दारिद्र्यदुःखदहनाय नमः शिवाय ॥

End :

वसिष्ठेन कृतं स्तोत्रं सर्वरोगनिवारणम् ॥
सर्वसंपत्करं शीघ्रं पुत्रपौत्राभिवर्धनम् ।
यत्र सन्ध्या पठेन्नित्यं तत्र कैवल्यमश्नुते ॥

Colophon :

वसिष्ठस्तोत्रं संपूर्णम् ॥

(*j*) मार्कण्डेयस्तोत्रम्.

MĀRKAṆḌĒYASTŌTRAM.

Foll. 33*b*—34*a*.

Another hymn of praise on Śiva said to have been composed by the unaging Mārkaṇḍēya. A recital of this hymn in the presence of an idol of Śiva is considered to free one from fear of death.

Complete.

Beginning :

मार्कण्डेय उवाच—

रुद्रं पशुपतिं स्थाणुं नीलकण्ठमुमापतिम् ।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति ॥

End :

मार्कण्डेयकृतं स्तोत्रं यः पठेच्छिवसंनिधौ ।
तस्य मृत्युभयं नास्ति सत्यं सत्यं वदाम्यहम् ॥

Colophon :

मार्कण्डेयस्तोत्रं संपूर्णम् ॥

(*k*) कृष्णाष्टकम्.

KṚṢṆĀṢṬAKAM.

Fol. 34.

A hymn of praise on Śrī-Kṛṣṇa in eight stanzas; and its repetition is considered to absolve one from all sins.

Complete.

Beginning :

वसुदेवसुतं देवं कंसचाणूरमर्दनम् ।
देवकीतनयानन्दं कृष्णं वन्दे जगद्गुरुम् ॥

End:

कृष्णाष्टकमिदं पुण्यं प्रातरुत्थाय यः पठेत् ।
कोटिजन्मकृतं पापं स्मरणेन विनश्यति ॥

Colophon:

कृष्णाष्टकं संपूर्णम् ॥

(*l*) नरसिंहस्तोत्रम्.

NARASIṀHASTOTRAM.

Foll. 35*a*—36*b*.

A hymn of praise on the man-lion incarnation of Viṣṇu: by Śaṅkarācārya.

Complete.

Beginning:

श्रीवत्साङ्कं त्रिणेत्रं शशिसमधवलं चक्रहस्तं सुरेशं
वेदाङ्गं वेदनादं विलसितवदनं वेदरूपं स्वरूपम् ।
ओं ह्रीं ह्रीं ह्रैकारकारं उ(हु)तवहसर्वेश प्रज्वल
. . . . . पातु मां नारसिंहः ॥

End:

भूतप्रेतपिशाचशाकिणीडाकिणी गणनाथोच्चाटनं
चोरव्याधिज्वरौ रोगभयं शत्रुक्षयं निश्चयम् ।
संध्याकालजपन्तमष्टकमिदं सद्भक्तिपूर्वादिभिः
प्रह्लादेन तु ये पठन्ति जपदां(तां)सत्पूजितं भूतले ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशंकराचार्यविरचितं नरसिंहाष्टकं संपूर्णम् ॥

(*m*) चन्द्रशेखराष्टकम्.

CANDRAŚĒKHARĀṢṬAKAM.

Fol. 37.

A hymn of praise on the moon-crested Śiva.

Complete.

Beginning:

रत्नसानुशरासनं रजताद्रिशृङ्गनिकेतनं
शिञ्जिनीकृतपन्नगेश्वरमच्युतानलसायकम् ।
क्षिप्रदग्धपुरत्रयं त्रिदशादियै(धिपै)रभिवन्दितं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥

End:

विश्वसृष्टिविधायिनं पुनरेव पालनतत्परं
संहरन्तमथ प्रपञ्चमशेषलोकनिवासिनम् ।
क्रीडयन्तमहर्निशं गणनाथयूथसमावृतं
चन्द्रशेखरमाश्रये मम किं करिष्यति वै यमः ॥

(*n*) कालहस्तीश्वरस्तोत्रम्.

KĀLAHASTĪŚVARASTOTRAM.

Foll. 37*b*—38*b*.

A hymn in praise of Śiva as worshipped at Kālahasti in the Nellore district

Complete.

Beginning:

महेश्वरं महोन्नतं महेश्वरं सदानम-
द्गणेश्वरं गुणान्वितं गणेश्वरं जगन्नुतम् ।
अनीश्वरं वृषाश्वरंहसा(से)श्वर(रे)न्द्रगामिनं
सदा भजामि कालहस्तिसाम्बमूर्तिमीश्वरम् ॥

End:

सुधाशनाधिराट्पुरीसुगह्वरीजमञ्जरी-
स्फुरन्मरन्दिनिर्झरीधुराधुरीणगीर्गणम् ।
विराट्तुरङ्गमार्गणं विशेषवृषमार्गणं
सदा भजामि कालहस्तिसाम्बमूर्तिमीश्वरम् ॥

(o) आपन्निवारकरामस्तोत्रम्.

ĀPANNIVĀRAKARĀMASTTORAM.

Foll. 38*b*—40*a*.

A hymn of praise on Rāma, a repetition of which is considered to save one from all kinds of danger.

Complete.

Beginning:

नमः शुद्धान्तरङ्गाय तारकब्रह्ममूर्तये ।
संसारबन्धमोक्षाय रामायापन्निवारिणे ॥

End:

प्रातःकाले पठेद्यस्तु यात्राकाले विशेषतः ।
भयानि तस्य नश्यन्ति सर्वत्र विजयी भवेत् ॥

(p) लक्ष्मीनृसिंहकरावलम्बस्तोत्रम्.

LAKṢMĪNṚSIṀHAKARĀVALAMBASTŌTRAM.

Foll. 40*a*—41*a*.

A hymn of praise on the man-lion incarnation of Viṣṇu; commonly attributed to Śaṅkarācārya.

Complete.

Beginning:

श्रीमत्पयोनिधिनिकेतन चक्रपाणे
भोगीन्द्रभोगमणिराजितपुण्यमूर्ते ।
योगीश शाश्वत शरण्य भवाब्धिपोत
लक्ष्मीनृसिंह मम देहि करावलम्बम् ।

End:

अन्धस्य मे हृदि विवेकमहाधनस्य चोरैर्महाबलि(भि)रिन्द्रियनामधेयैः ।
मोहान्धकारकुहरे विनिपातितस्य लक्ष्मीनृसिंह मम देहि करावलम्बम् ॥

Fol. 41*b* and 42*a* contain stanzas in praise of Narasiṁha and of Śiva. Fol. 42*b* is left blank.

R. No. 325.

Paper. 10¾ × 7½ inches. Foll. 16. Lines, 28 in a page. Telugu. Good

Presented in 1910-11 by Pottūri Laksmayya of Guntur

कृष्णयजुर्वेदारुणम्.

KṚṢṆAYAJURVĒDĀRUṆAM.

Same work as the one described under No. 169 of the D.C.S. MSS., Vol. I, Part II.

Contains Praśnas 3, 5 and 6.

The MS. is said to have been copied by Māciraja Hanumanta Rao on Sunday, the 12th day of the dark fortnight, in the month of Puṣya of the year Kālayukti, from the MS. copied by Auvvāli Veṅkaṭaramaṇa on Friday, the 13th day of the bright fortnight, in the month of Kārtika of the year Prabhava.

R. No. 326.

Paper. 5½ × 1⅜ inches Foll. 7. Lines, 16 in a page. Telugu. Good.

Presented in 1910-11 by Pottūri Laksmayya of Guntur.

देवीस्तोत्रम्.

DĒVĪSTŌTRAM.

A hymn of praise on Dēvī or Kālī.

Wants beginning and end.

Beginning:

. . . वती महादेवी महासुरी ।
प्रकृतिस्त्वं च सर्वस्वं गुणत्रयविभाविनी ॥
कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ।

End:

निपात्य प्रमथानीकमभ्यधावत सोऽसुरः ।
सिंहं हन्तुं महादेव्याः कोपं चक्रे ततोऽम्बिका ॥

R. No. **327**.

Paper. 9¼ × 5⅞ inches. Foll. 112. Lines, 20 in a page. Telugu. Good.

Presented in 1910–11 by Pottūri Laksmayya of Guntur.

अध्यात्मरामायणम्.

ADHYĀTMARĀMĀYAṆAM.

Same work as the one described under No. 2153 of the D.C.S. MSS., Vol. IV, Part I.

Contains the seven Kāṇḍas complete.

Copied by Śrīnivāsa of Bobbilipēṭṭai for Pottūru Kālidāsa on Saturday, the 13th day of the bright fortnight, in the month of Phālguna of the year Vyaya.

R. No. **328**.

Paper. 7¾ × 6⅛ inches. Foll. 8. Lines, 20 in a page. Telugu. Good.

Presented in 1910–11 by Pottūri Laksmayya of Guntur.

(*a*) सूर्यसहस्रनामस्तोत्रम्.

SŪRYASAHASRANĀMASTŌTRAM.

Foll. 1*a*—3*a*.

One thousand significant names in praise of the Sun.

Complete, but wants beginning.

Beginning:

स्वस्तिदाय स्वस्तिकृते सदायसर्वदाय च ।
कवये लोकरत्नाय कर्णिकारप्रियाय च ॥

End:

यतो जगत् स्थावरजङ्गमाख्यं लयं तु यत्रैष्यति जीवलोकः ।
ततः कृतं रूपमजाद्यभीष्टदं नान्तो(नतो)ऽस्मि मायामयमप्रमेयम् ॥

Colophon:

इति स्कन्दपुराणे श्रुतिसारसंग्रहे सूर्यसहस्रनामस्तोत्रं संपूर्णम् ॥

Foll. 3*b*—4*b* are blank.

(*b*) लक्ष्मीकवचम्.

LAKṢMĪKAVACAM.

Foll. 5 and 6.

Similar to the work described under No. 7096 of the D.C.S. MSS., Vol. XIV. The name of the work is wrongly given in the colophon as Lakṣmīhṛdaya.

Complete.

Beginning:

इन्द्र उवाच—

समस्तकवचानां च तेजः श्रीकरमुत्तमम् ।
आत्मरक्षणमारोग्यं सत्यं मे ब्रूहि . . . (पद्मज) ॥

ब्रह्मोवाच—

महालक्ष्मीसुकवचं प्रवक्ष्यामि समासतः ।
चतुर्दशसु लोकेषु रहस्यं ब्रह्मणा पुरा ॥
शिरो मे विष्णुपत्नी च ललाटममृतोद्भवा ।

End:

गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादात् स्ववस्थिते ॥

Colophon:

इति श्रीमदथर्वणरहस्ये लक्ष्मीहृदयं संपूर्णम् ॥

(*c*) पञ्चीकरणवार्तिकम्.

PAÑCĪKARAṆAVĀRTIKAM.

Foll. 7*a*—8*b*.

Same work as the one described under No. 4638 of the D.C.S MSS., Vol. IX.

Complete.

R. No. **329.**

Paper. 7½ × 6 inches. Foll. 10. Lines, 20 in a page. **Telugu.** **Good**

Presented in 1910–11 by Pottūri Lakṣmayya of Guntur.

शिवरामगीता.

ŚIVARĀMAGĪTĀ.

Foll. 1*a*—9*b*.

A discourse between Rāma and Śiva, in which the latter teaches the former the truths regarding the nature and origin of the universe and the means of obtaining a knowledge of the Brahman.

Complete in eleven Adhyāyas.

Beginning:

ओं नमोऽव्यक्तरूपाय परब्रह्मस्वरूपिणे ।
शब्दस्पर्शस्वरूपाय रसगन्धस्वरूपिणे ॥
साधनं च परिच्छिन्नमेतद्भेदेन सिद्धिदम् ।
सृष्टिपालनसंहारं ततः कृत्यं त्रिधात्मकम् ॥

* * * *

कैलासशिखरासीनं देवदेवं जगद्गुरुम् ।
पप्रच्छ चात(न्त)रं रामः ब्रह्मज्ञानं महेश्वरम् ॥

राम उवाच—

कथं सृष्टिर्भवेद्देव कथं सृष्टिर्विनश्यति ।
ब्रह्मज्ञानं कथं देव सृष्टिसंहारवर्जितम् ॥

ईश्वर उवाच—

अव्यक्तं च भवेत्सर्वमव्यक्तं च विनश्यति ।
अव्यक्तं ब्रह्मणो ज्ञानं सृष्टिसंहारवर्जितम् ॥
ओंकारादक्षराः सर्वे स्थूलविद्याश्चतुर्दश ।
मन्त्रं पूजा तपो ध्यानं कर्माकर्म तथैव च ॥

End:

अचलं निर्मलं चैव सूक्ष्मं चापि निरञ्जनम् ।
वेदान्तसारसर्वस्वं रामाग्रे शिवभाषितम् ॥

सिध्यन्ति सर्वयोगानां मनसेप्सितसंपदः ।
मोक्षलक्ष्मीं च निर्वाणं रामगीतां सदा पठेत् ॥

Colophon:

इति श्रीशुकोदये अद्वैतसुधारसे शिवरामसंवादे शिवरामगीताय सकलयोगसारे सर्वनिर्वाणदर्शनं नाम एकादशोऽध्यायः ॥

Fol. 10*a* contains footnotes on some stanzas in this work. Fol 10*b* is blank.

R. No. **330.**

Paper. 8¼ × 6½ inches. Fol. 1. Lines, 50 in a page. Telugu Injured.

Presented in 1910–11 by Pottūri Lakṣmayya of Guntur.

(*a*) रामस्तोत्रम्.

RĀMASTŌTRAM.

Fol. 1*a*. This leaf is 15¾×5½ in size and is folded over.

Same work as the one described under R. No. 324(*b*) *ante*.

Complete.

(*b*) राममानसपूजा.

RĀMAMĀNASAPŪJĀ.

Fol. 1.

A hymn of praise addressed to Rāma with a view to conduct his worship through meditation.

Complete.

Beginning:

सीतापतिं रघुकुलाम्बुधिपूर्णचन्द्रं राजीवनेत्रयुगलं मणिकुण्डलाढ्यम् ।
आवाह मेचकशरीरविराजमानं रामप्रभुं रहसि संततमाश्रयामः ॥

End:

ये वै पठन्ति रामस्य स्तोत्रं सर्वार्थसाधनम् ।
मन्त्रसिद्धिर्भवेत्तेषां तपश्चर्यां विना तथा ॥

Colophon:

इत्युमामहेश्वरसंवादे राममानसपूजाविधानं संपूर्णम् ॥

R. No. **331.**

Paper. $11\frac{7}{8} \times 7\frac{3}{4}$ inches. Foll. 12. Lines, 22 in a page. Telugu. Injured.

Presented in 1910-11 by Pottūri Lakṣmayya of Guntur.

रामवेदपादस्तवः.

RĀMAVĒDAPĀDASTAVAḤ.

The end is written on fol. 1*b*.

A hymn of praise on Rāma consisting of stanzas, the fourth line of each of which contains a quotation from the Vēdas; said to be by a Bharadvāja.

Complete.

Beginning:

श्रीमद्राम रघूत्तंस सच्चिदानन्दलक्षण ।
भवन्तं कमलावन्तं गाये त्वा वचसा गिरा ॥
रामे दूर्वादलश्यामे जानकी कनकोज्ज्वला ।
भाति मद्दैवते मेघे विद्युल्लेखेव भास्वरा ॥

End:

अहं भरद्वाजमुनिर्निरन्तरं श्रीराममेकं जगदेकनायकम् ।
तं वर्णये मुक्तिरसाढ्यवित्तदं कविं कवीनामुपमश्रवस्तमम् ॥
वेदपादाभिधस्तोत्रं स्नात्वा भक्त्या सकृन्नरः ।
यः पठेद्राघवस्यापि जीवाति शरदः शतम् ॥

Colophon:

इति श्रीरामवेदपादस्तवं(वनं) भरद्वाजकृतं संपूर्णम् ॥

R. No. **332.**

Paper. $12\frac{1}{2} \times 5\frac{1}{4}$ inches. Foll. 119. Lines, 15 in a page. Telugu. Good.

Presented in 1910-11 by Pottūri Lakṣmayya of Guntur.

ललितासहस्रनामभाष्यम्--सौभाग्यभास्करः.

LALITĀSAHASRANĀMABHĀṢYAM: SAUBHĀGYA-BHĀSKARAḤ.

This is a commentary on Lalitāsahasranāmastōtra which consists of one thousand significant names in praise of Lalitā, a manifestation of Śakti: by Bhāskararāya *alias* Bhāsurānandanātha, son of Gambhīra (Gaṇṇāra) and Kōnamāmbā, and a disciple of Nṛsiṁhayajvan. The author comments also on the Lalitāsahasranāmaparibhāṣā of his preceptor Nṛsiṁhānandanātha, which consists of mnemonic stanzas giving the traditional explanations connected with the Stōtra and following the Chalākṣarasūtra.

Complete in eleven Kalās.

Beginning:

श्रीगण्णारविपश्चितः पितुरभूद्यः कोनमाम्बोदरे
विद्याष्टादशकस्य मर्मभिदभूद्यः श्रीनृसिंहात् गुरोः ।
यस्य श्रीवरदत्तशुक्लचरणैः पूर्णाभिषिक्तोऽभवत्
स त्रेतात्रिपुरामयी वित(ति म)नुते तामेव नाथत्रयीम् ॥
गुरुचरणसनाथो भासुरानन्दनाथो
विवृतिमतिरहस्यां वीरवृन्दैर्नमस्याम् ।
रचयति ललिताया नामसाहस्रिकाया
गुरुकृतपरिभाषाः संविवृण्वन्नशेषाः ॥
अष्टाभिर्याज्ञिकानामधिपतिभिरमोघोक्तिभिर्देवताभिः
मात्राज्ञप्ताभिरभ्यं यदरचि ललितादिव्यनाम्नां सहस्रम् ।
यद्ब्रह्माणीरमेशप्रभृतिदिविषदां विस्मयो(या)धानु(न)दक्षं
तत्रैकस्यानुनाम्नः कथमिव विवृतिं मादृशः कर्तुमीष्टे ॥

* * * *

इह खलु निखिलपुरुषार्थसाधनेऽभ्यर्हिततमस्वरहस्यनामसहस्रकीर्तनस्य रहस्यतरसद्गुरुसंप्रदायैकवेद्यस्य गुणत्वेन तान् संप्रदायान् शिष्यानु-

चिघृक्षया दिदर्शयिषवः श्रीनृसिंह[नन्द]नन्दनाथनामानः अस्मद्गुरुचरण-(णाः) निरन्तरनिरन्तराया अपि शिष्यशिक्षायै मङ्गलमाचरन्ति—

त्रिपुरां कुलनिधिमीडेऽरुणश्रियं कामराजविद्धाङ्गीम् ।
त्रिगुणैर्देवैर्विनुतामेकान्तां बिन्दुगां(ललिताम्) ॥

त्र्यात्मकं पुरं मण्डलकोणरेखा मन्त्रादिसमूहो वा यस्याः सा त्रिपुरा ।

* * * *

ललितानामसहस्रे छलार्णसूत्रानुयायिन्यः ।
परिभाषा भाष्यन्ते सन्तोषात् कौलिकप्रमोदाय ॥

छलाक्षरनामकसूत्रेभ्यो नामविभागादेर्विलम्बेन क्लिष्टतया ज्ञायमानत्वात् तत्रत्या एव परिभाषाः सुलभोपायेन सुबोधाः इह विद्योपासकानां तोषाय कल्प्यन्त इत्यर्थः ॥

* * * *

Colophon:

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणसर्वतन्त्रस्वतन्त्र-श्रीमन्नृसिंहयज्वचरणाराधकेन भास्करनामकश्रीमद्गम्भीररायदीक्षितसूनुना भासुरानन्दनाथेतिदीक्षितशालिना प्रणीते सौभाग्यभास्करे ललितानामसहस्र-नामपरिभाषाभाष्ये उपोद्घातप्रकरणं नाम प्रथमा कला ॥

End:

स्वधास्वाहेत्यनयोरव्ययत्वात् स्वधा नम इत्यादिरेव प्रयोगः । स्वां धत्ते इत्यादिरूपेऽर्थे तु स्वधायै न(म) इत्यादिरेव प्रयोगः सुवच इत्युक्तम् ॥

Colophon:

इति भास्करराये॰ण कृते सौभाग्यभास्करे दशमे शते नाभूधारिण्येकादशी कला ॥

इति श्रीललितासहस्रनामभाष्ये सौभाग्यभास्करे दशमं नामशतकं नामैकादशी कला ॥

R. No. **333.**

Paper. 6 × 4⅛ inches. Foll. 12. Lines, 24 in a page. Telugu. Good.

Presented in 1910-11 by Pottūri Lakṣmayya of Guntur.

शिवाख्यासप्ततिः.

ŚIVĀKHYĀSAPTATIḤ.

Foll. 1*a*—6*a*. The remaining foll. are blank.

A hymn of praise and prayer addressed to Pārvatī and consisting of 70 stanzas.

Almost complete.

Beginning :

शिवाख्ये नो जाने शिवमितरदेवानपि जन-
न्यये कामी का . . . . . दिष्ठा तु भवतीम् ।
समीक्ष्ये मत्सर्वश्रमसुषि महामूकसुलभां
स्वलभ्यस्वाधीनाखिलभुवनसाम्राज्यविभवाम् ॥

End :

कियदिव दुरगाम त्वामनत्वा कदाचित्
न सुघनि तव रात्रौ नित्यमाराधयामः ।

* * * *

हे पुरभिदभिधे हे मदनमथनाख्ये त्वामेव शरणं प्रपद्ये शिव ।

R. No. **334.**

Palm-leaf. 17⅛ × 1¼ inches. Foll. 49. Lines, 8 in a page. Telugu. Injured.

Presented in 1910-11 by Prayāga Sītārāma Śāstri of Guntur.

(*a*) अभिज्ञानशाकुन्तलम्.

ABHIJÑĀNAŚĀKUNTALAM.

Foll. 1*a*—42*b*.

By Kālidāsa.

Complete.

Fol. 43*a* contains four stanzas in praise of Cāmuṇḍi.

(*b*) वृत्तरत्नाकरः.

VṚTTARATNĀKARAḤ.

Foll. 43*a*—49*b*.

Same work as the one described under No. 1782 of the D.C.S. MSS., Vol. III.

By Kēdārabhaṭṭa.

Incomplete.

R. No. **335.**

Palm-leaf. 18 × 1⅝ inches. Foll. 10³. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1910–11 by E. R. Śrīnivāsarāghavācāriyar of Kalyāṇapuram.

Foll. 1 and 2 are blank.

(*a*) याज्ञवल्क्यस्मृतिः—ऋजुमिताक्षरासहिता.

YĀJÑAVALKYASMṚTIḤ WITH ṚJUMITĀKṢARĀ.

Foll. 3*a*—78*a*. Fol. 78*b* is blank.

Same work as the one described under No. 2682 of the D.C.S. MSS., Vol. V.

Vyavahārakāṇḍa, incomplete.

(*b*) स्मृतिचन्द्रिका.

SMṚTICANDRIKĀ.

Foll. 79*a*—103*a*. Fol. 103*b* is blank.

Same work as the one described under No. 2779 of the D.C.S. MSS., Vol. V.

Dāyabhāga, incomplete.

R. No. **336.**

Paper. 11 × 8¾ inches. Foll. 44. Lines, 32 in a page. Telugu. Good.

Presented in 1910–11 by Pottūri Lakṣmayya of Guntur.

(*a*) सिद्धरूपाणि.

SIDDHARŪPĀṆI.

Foll. 1*a*—4*b*. Foll. 5*a*—9*b* are blank.

Similar to the work described under No. 1554 of the D.C.S. MSS., Vol. III.

Incomplete

(*b*) गीतगोविन्दम्—सव्याख्यानम्.

GĪTAGŌVINDAM WITH COMMENTARY.

Foll. 10*a*—59*a*.

Same work as the one described under No. 22 of the Report on a Search for Sanskrit and Tamil MSS. by M. Seshagiri Sastri, No. 2.

Begins in the course of the first Sarga and breaks off in the sixth Sarga.

Colophon:

इति श्रीमदखि(ल)विद्यापरिवारदक्षिणामूर्तिमहादेवप्रसादलब्धविद्यापूर्वोत्तरमीमांसाशब्दतर्कसाहित्यसार्वभौमचरकूरिकूरु(कोण्डु)भट्टोपाध्यायानुजेन सर्वाम्बिकागर्भशुक्तिमुक्तामणिना श्रीलक्ष्मणसूरिणा विरचितायां श्रीगीतगोविन्दव्याख्यायां श्रुतिरञ्जनीसमाख्यायां प्रथमः सर्गः ॥

The remaining leaves are blank.

R. No. **337.**

Paper. 7¾ × 6⅝ inches. Foll. 19. Lines, 28 in a page. Telugu. Good.

Presented in 1910–11 by Pottūri Lakṣmayya of Guntur.

द्रव्यगुणकल्पवल्ली.

DRAVYAGUṆAKALPAVALLĪ.

A Hindu materia medica giving the medicinal properties of certain things.

The following are the names of the Vargas contained in the work :—

पेयवर्गः.	मत्स्यमांसवर्गः.
कूर्चवर्गः.	मृगमांसवर्गः.
कृतान्तवर्गः.	विहगमांसवर्गः.
अपूपवर्गः.	कन्दवर्गः.
छेदनवर्गः.	पुष्पवर्गः.
पत्रशाकवर्गः.	अपर्वथवर्गः.

Wants beginning.

Beginning :

मुग्धप्रियोदिते चेनवोदनस्य च लाशवम् ।
यथापूर्वशिवस्तत्र मन्दहीनसुलोमनम् ॥
दुग्धाहिदोषशोषघ्नं पाचनो धातुसौम्यकृत् ।
स्रोता मूर्धप्रकृच्छेद सत्त्वक्षय इति . . ॥
क्षुत्पातिग्लानिदौर्बल्यं कुक्षिरोगज्वरापहम् ।

End :

मदनस्य फलं तिक्तं कटुरूक्षव्रणापहम् ।
कासश्वासहरं हन्ति वमने च प्रशस्यते ।
श्लेष्मज्वरप्रतिश्यायगुल्मार्कप्लीहनाशनम् ॥

Colophon :

इति द्रव्यगुणवल्ल्यामपर्वथवर्गः ॥

R. No. **338.**

Paper. 7⅜ × 6¼ inches. Foll. 36. Lines, 33 in a page. Telugu. Good.

Presented in 1910-11 by Pottūri Lakṣmayya of Guntur.

लीलावतीव्याख्या.

LĪLĀVATĪVYĀKHYĀ.

Foll. 1*a*—34*b*.

A commentary on the Līlāvatī of Bhāskarācārya. The commentator's name is not known.

Complete.

Beginning:

प्रीतिं भक्तजनस्य यो जनयते विघ्नं विनिघ्नन् स्मृतः
तं वृन्दारकवृन्दवन्दितपदं नत्वा मतङ्गाननम् ।
पाटीं सद्ग(णि)तस्य वच्मि चतुरप्रीतिप्रदां प्रस्फुटां
संक्षिप्ताक्षरकोमलामलपदैर्लालित्य लीलावतीम् ॥

* * * *

तत्र तावदयमाचार्य इष्टदेवतास्तुतिपूर्वकं चिकीर्षितमाह—प्रीतिमिति । सद्गणितस्य पाटीं विचित्ररूपस्य गणितस्य परिपाटीं लीलावतीसंज्ञितां वच्मि । लालित्य लालयित्वेत्यर्थः । किञ्चे(केचित्)शब्दशुद्ध्यर्थं लालित्यलीलावतीमित्येकं पदं वदन्ति, तत्रापि नास्माकं मतिप्रसा(मा)दः ।

End:

अथोपसंहरति—

येषां तु शान्ति(जाति)गुणवर्ण(र्ग)विदूःवागीः (विभूषिताङ्गी)
शुद्धाखिलव्यवहृतिः खलु कर्णवेक्ता (कण्ठसक्ता) ।
लीलावतीह सरसोक्तिमुदाहरन्ती
तेषां सदैव सुखसंपदुपैति वृद्धिम् ॥

जातिगुणौ वर्गश्च जातिगुणवर्गाः अथवा योष(षा)जातेर्गुणवर्गः गुणसमूहः ॥

The remaining leaves are blank.

R. No. **339.**

Paper. 12¾ × 6½ inches. Foll. 582. Lines, 26 in a page. Telugu. Good. Bound in three volumes.

Presented in 1910-11 by Pottūri Laksmayya of Guntur.

भागवतम्—सव्याख्यानम्.

BHĀGAVATAM WITH COMMENTARY.

Same work as the one described under No. 2199 of the D.C.S MSS., Vol. IV, Part I.

Complete.

R. No. **340.**

Paper. 12¾ × 8¼ inches. Foll. 40. Lines, 35 in a page. Kanarese. Good.

Purchased in 1910-11 from M. Rāmasāmi Ayyaṅgār of Magaḍi, Mysore Province.

(*a*) श्रीपालचरितम्.

ŚRĪPĀLACARITAM.

Foll. 1*a*—29*a*.

This gives an account of a king known as Śrīpāla in ten Pariochēdas: by Sakalakīrti. The subjets dealt with in the ten Pariochēdas are—

पीठिकाव्यावर्णनविधिः.	भार्यासंदर्शनवर्णनम्.
मदनसुन्दरीविवाहवर्णनम्.	चम्पापुरीराज्यप्राप्तिवर्णनम्.
राजसंमानादिव्यावर्णनम्.	राज्यलाभधर्मश्रवणवर्णनम्.
श्रीपालमदनमञ्जूषाविवाहवर्णनम्.	भवान्तरवर्णनम्.
गुणमालाविवाहवर्णनम्.	श्रीपालपरिनिर्वाणगमनम्.

Complete.

Beginning :

नत्वा श्रीमज्जिनाधीशं सुराधीशार्चितक्रमम् ।
श्रीपालचरितं वक्ष्ये सिद्धचक्रार्चनोत्तमम् ॥

वन्दे श्रीवृषभं देवं देवदेवैः समार्चितम् ।
भुक्तिमुक्तिप्रदं नित्यं व्यक्तानां च चतुष्टयम् ॥
अजितं जितकन्दर्पं तं भवन्तं भवान्वितम् ।
वन्देऽभिनन्दनं भक्त्या त्रैलोक्यप्राणिशर्मदम् ॥

नमामि सुमतिं तान्तं भव्यानां सुमतिप्रदम् ।
पद्मप्रभञ्जनं वन्दे पद्माभं पद्मलाञ्छनम् ॥
श्रीसुपार्श्वजिनाधीशं वन्देऽहं हरितप्रभम् ।
जितचन्द्रप्रभं चन्द्रप्रभं भक्त्या नमाम्यहम् ॥
पुष्पदन्तं लसत्कुन्दप्रस्फुटत्कान्तिसंयुतम् ।
शीतलं श्रीजिनं वन्दे शीतलोत्तमवाग्भरम् ॥
श्रीयोजनं जगच्छ्रेयःकारणं भवतारणम् ।
वासुपूज्यं जगत्पूज्यं पद्मरागमणिप्रभम् ॥
निर्मलं विमलाधीशं संस्तुवे शर्मदायकम् ।
अनन्तानन्तसज्ज्ञानमनन्तजिनमद्भुतम् ॥
धर्मसद्धर्मतीर्थेशं मुक्तिदं संभजाम्यहम् ।
शान्तिदं शान्तिदं वन्दे शान्तदान्तैः समाश्रितम्
कुण्डुं कुण्ड्वादिजन्तूनां रक्षणे चतुरोत्तमम् ।
अरप्रभुं कृतानन्दं नमामि गुणनायकम् ॥
मल्लिं सन्मल्लिकादामसुगन्धोत्तमविग्रहम् ।
इन्द्रनीलप्रभं वन्दे सुव्रतं मुनिसुव्रतम् ॥
नमितीर्थेश्वरं वन्दे केवलज्ञानभासुरम् ।
लोकालोकस्वभावादुद्द्योतनैशादिवाकरम् ॥
नेमिं धर्मरथीनेमिं वन्दे प्रावृड्घनप्रभम् ।
पार्श्वनाथं नमाम्युच्चैः स्वकान्त्या कदलीनिभम् ॥

संस्तुवे सन्मतिं देवं भव्यानां सन्मतिप्रदम् ।
यं वदन्ति बुधा वीरं महावीरादिनामकम् ॥

* * * *

श्रीसर्वज्ञमुखाम्भोजात् समुत्पन्नां सरस्वतीम् ।
भुक्तिमुक्तिप्रदां वन्दे सन्देहहरणे सतीम् ॥

* * * *

कुन्दकुन्दाख्यविद्यादिनान्दश्रीमल्लिभूषणः ।
श्रुतादिसागरादीनां गुरूणां संस्मराम्यहम् ॥

* * * *

एतेषां शर्महेतूनां चरणस्तुतिमङ्गलम् ।
कृत्वाहं तुच्छबुद्ध्यापि श्रीपालचरितं ब्रुवे ॥

End:

इदं पवित्रं व्रतमाचरन्ति ये दृग्विशुद्धा नृसुरादिसौख्यम् ।
भूत्वा विराट्सिद्धिपदं व्रजन्ति श्रीपालवच्चाखिलकीर्तिनोक्तम् ॥

Colophon:

इति श्रीपालभूपालचरिते भट्टारकश्रीसकलकीर्तिविरचिते श्रीसिद्ध-चक्रपूजातिशयसंप्राप्ते श्रीपालपरिनिर्वाणगमनो नाम दशमः परिच्छेदः ॥

इति श्रीपालमहीपालचरितं संपूर्णम् ॥

Foll. 29*b*—35*a* are blank.

(*b*) सुभाषितार्णवः.

SUBHĀṢITĀRṆAVAḤ.

Foll. 35*b*—36*a*.

A collection of didactic stanzas: by a follower of Jainism.

Incomplete.

Beginning:

प्रणिपत्य जिनं वीरं प्रभूतसुखदायकम् ।
सुभाषितार्णवं वक्ष्ये सुजनानन्दकारिणम् ॥

सूक्तिसंग्रह एव स्यात् प्रियो नणां मनोमुदे ।
रत्नैः किमुदधौ कीर्णैः परिष्कारार्थिनां फलम् ॥

भो भो धूम महीतले वसति(सि) किं कार्यं विना निष्फलं
किं ते सन्ति गुणा मनोहरतरा दुष्टाश्च दुर्मोहकाः ।
दुर्गन्धस्त्वयि केवलं च सततं सन्त्येव दूष्या(ः)परैः
त्वां वाञ्छन्ति वृथा मुदा बहुजना मूर्खा हि नित्यं हिमा(त्) ॥

End:

स्नेहमूलानि दुःखानि रसमूलानि व्या(चा)धयः ।
लोभमूलानि पापानि त्रीणि त्यक्त्वा सुखी भवेत् ॥

Foll. 36*b*—38*a* are blank. Foll. 38*b*—40*b* contain a list of the Tīrthaṅkaras with particulars regarding their caste, age, place of residence, etc.

R. No. 341.

Palm-leaf. 7⅝ × 1¼ inches. Foll. 84. Lines, 4 in a page. Telugu. Much injured.

Presented in 1910–11 by T. Rāmānuja Rao of Triplicane.

आपस्तम्बयजुःसन्ध्यावन्दनभाष्यम्.

ĀPASTAMBAYAJUSSANDHYĀVANDANABHĀṢYAM.

Foll. 1*a*—83*a*.

Same work as the one described under No. 2876 of the D.C.S. MSS., Vol. V.

Complete.

Foll. 83*b* and 84 are blank.

R. No. 342.

Palm-leaf. 10 × 1¼ inches. Foll. 17. Lines, 5 in a page. Grantha. Good.

Presented in 1910–11 by Mīnākṣiyammāḷ of Koḍuvāyūr.

श्राद्धप्रयोगः.

ŚRĀDDHAPRAYŌGAḤ.

Same work as the one described under No. 3823 of the D.C.S. MSS., Vol. VII.

This is intended for use by the followers of Āpastamba and contains also the Agnisandhānaprayōga.

Complete.

A TRIENNIAL CATALOGUE OF MANUSCRIPTS

COLLECTED DURING THE TRIENNIUM

1910-11 TO 1912-13

FOR THE

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS.

BY

M. RANGACHARYA, M.A., RAO BAHADUR,

PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE, AND CURATOR, GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS,

AND

S. KUPPUSWAMI SASTRI, M.A.,

PRINCIPAL, SANSKRIT COLLEGE, TIRUVADI, AND FOR SOME TIME AG. PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, AND AG. CURATOR, GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS.

Prepared under the orders of the Government of Madras.

VOL. I.—PART I. SANSKRIT, B.

MADRAS:

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.

1913.

A TRIENNIAL CATALOGUE OF MANUSCRIPTS.

1910-11 TO 1912-13.

PART 1—SANSKRIT—B.

R. No. **343**.

Palm-leaf. 15½ × 1¼ inches. Foll. 139. Lines, 6 in a page. Grantha Injured.

Purchased in 1911-12 from the Sarasvatī-Bhāṇḍāgāra of Triplicane.

(*a*) जैमिनिसूत्रवृत्तिः—भावकौमुदी.

JAIMINISŪTRAVṚTTIḤ : BHĀVAKAUMUDĪ.

Foll. 1*a*—83*a* Fol. 83*b* is blank.

A commentary on the astrological Sūtras of Jaimini : by Vēṅkaṭēśa of Vādhūlagōtra.

Complete in 14 Paṭalas.

Beginning :

कृतमालातरोर्मूले कृतावासगणाधिपम् ।
प्रत्यूहध्वान्तविध्वंसप्रभाकरमुपास्महे ॥

गणाधिपतिमीशानमच्युतं शक्ति . . . . ।
वन्दे वाचस्पतिं वाणीं ग्रहान् सूर्यपुरोगमान् ॥

पराशरादिग्रन्थार्थानुचितग्रन्थसंग्रहान् ।
वीक्ष्यान्यान् संग्रहान् सर्वान् सूत्रार्थान् जैमिनेर्मतान् ॥

श्रीवेङ्कटेशविदुषा लिख्यते भावकौमुदी ।

मूर्धात्मकीर्तितनुरूपगुणस्वभावान् स्वर्णादिलोचनकुटुम्बमुखाशनानि ।
युद्धप्रभावबलशौर्यसकर्णवक्षोधैर्यस्वरादिसुखमन्दिरयानभोगाः ॥

* * * *

Colophon :

इति श्रीवेङ्कटेश्वरकृतायां भावकौमुद्यां प्रथमः पटलः ॥

End :

मोक्षस्थानगते जीवे तदीशे स्वोच्चराशिके(गे) ।
केन्द्रत्रिकोणगे वापि पुण्यशीलो भवेन्नरः ॥
भावानां कौमुदी नाम तत्फलानां प्रकाशिका ।
वाधूलवेङ्कटार्येण लिखिताह्लादसिद्धिदा ॥

Colophon :

इति वेङ्कटेश्वरविदुषा विरचितायां भावकौमुद्यां चतुर्दशः पटलः ॥

(*b*) दशासारः.

DAŚĀSARAḤ.

Foll. 84*a*—134*b*.

On horoscopy : by Śrīnivāsa, a disciple of Garuḍa.

Complete.

Beginning :

श्रीमद्गरुडदासेन श्रीनिवासविपश्चिता ।
भृगुमार्गानुसारेण दशासारो विलिख्यते ॥

मेषवृषभमिथुनकटकसिंहकन्यातुलावृश्चिकधनुर्मकरकुम्भमीनानां भौमशुक्रबुधचन्द्रसूर्यबुधभृगुभौमगुरुमन्दशनिजीवाः क्रमेण पतयः । भौमादीनां मकरमीनकन्यावृषभमेषकुलीरतुला उच्चाः । राहुकेत्वोः कन्यामीनौ स्वक्षेत्रे, वृषसिंहावुच्चौ वृश्चिककुम्भौ वा ।

End :

लग्नपञ्चमाष्टमस्य फलानि यावन्ति तावद्वर्षसंख्यया आयुस्त्रिधा विभज्य खण्डत्रयेऽपि योज्यम् ॥

The scribe adds:

खरनामसंवत्सरे दक्षिणायने पूर्णिमायां सोमवासरे दशासारः श्रीकृष्णाचार्येण रामेण विलिख्य समापितः ॥

Foll. 135—139 contain miscellaneous stanzas on astrological matters.

R. No. 344.

Paper. 11½ × 8¾ inches. Foll. 456. Lines, 10 in a page. Dēvanāgarī. Good.

Transcribed in 1911-12 from a MS. of Pāṭrācāriyar of Kumbakonam.

अघनिर्णयसारः.

AGHANIRṆAYASĀRAḤ.

A work in Dharma Śāstra treating of the various kinds of pollutions: by Dharmarāja, a resident of Ērakara village. It is said to be based upon various authoritative passages of the early sages.

Incomplete.

Beginning:

प्रणम्य दक्षिणामूर्तिं वन्दे साम्बं वृषध्वजम् ।
सोमयाजिगुरून् सर्वान् ऋषीन्धर्मप्रवर्तकान् ॥

अघनिर्णयसारं तु संक्षिप्य ब्राह्मणाश्रयम् ।
यथाश्रुतं यथाचारं प्रवक्ष्येऽहं यथामति ॥

प्रारिप्सितस्य ग्रन्थस्य निरन्तरायपरिसमाप्तिसिद्ध्यर्थं प्रचयनिगमनार्थाय चाशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुखमिति काव्यप्रकाशिकायामुक्तवृद्धवचनानुसारेण च मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि वीर्यवत्तराणि भवन्तीत्यादिवृद्धवचनानुसारेण च प्रथमं कर्तव्यतया परिप्राप्तविशिष्टेष्टदेवतात्रयगुरुधर्मशास्त्रप्रवर्तकपराशरव्यासयाज्ञवल्क्यमन्वत्रिविष्णु -

हारीतवसिष्ठशङ्खलिखितबोधायनापस्तम्बादिसकलमुनिनमस्कृतिं श्लोकेन निबध्य प्रारिप्सितमघनिर्णयसाराख्यं ग्रन्थं प्रतिजानीते—प्रणम्येत्यादिना । दक्षिणापदमव्ययमस्वपदेन विग्रह इति न्यायेन दक्षिणादिशमभिमुखीकृत्य वटविटपिमूले शुकशौनकादीनां मुनीनां ज्ञानोपदेशार्थं वर्तमाना श्रीमूर्तिः विग्रहो यस्य स तथोक्तः । . . . . . .
नानामुनिप्रणीतानि वचनानि यथामति विचार्य मया एरकरग्रामवासिना धर्मराजेन संक्षिप्य कृते अघनिर्णयसाराख्ये ग्रन्थे प्रमादादागतान् शब्दार्थान् शब्दार्थविषयान् क्षमासाराः सत्पुरुषाः क्षन्तुमर्हन्ति ।

End:

यमः—

सूरणं चैव तत्कन्दं वार्ताकं चणकं तथा ।
कपित्थं श्वेतनिष्पावं कूश्माण्डद्वयमेव च ॥
राजमाषं कुलुत्थं च कदलीकुसुमं तथा ।
दीर्घं पटोलं वृन्ताकं रक्तागस्त्यमसूरिकाम् ॥
आढकं रक्तशाकं च . . . . यत्नेन वर्जयेत् ।
आविकं माहिषं चौष्ट्रमाश्वं क्षीरं घृतं दधि ॥
तक्रं गव्यमपि श्राद्धे विशेषेण विवर्जयेत् ।

इत्यादिस्मृत्यन्तरोक्तं द्रष्टव्यम् ।

R. No. **345.**

Paper, 13½ × 8¼ inches. Foll. 133. Lines, 21 in a page. Grantha. Good.

Transcribed in 1911–12 from a MS. of Rajambhaṭṭar of Conjeevaram.

The first 20 foll. are blank.

अहिर्बुध्न्यसंहिता.

AHIRBUDHNYASAṀHITĀ.

Foll. 21*a*—133*a*. Fol. 133*b* is blank,

Similar to the work described under No. 5201 of the D.C.S. MSS., Vol. XI.

Contains Adhyāyas 19—55 complete; 56th incomplete.

Beginning:

ध्यातं सकृद्भवानेककोटचघौघं हरत्यरम् ।
सुदर्शनस्य तद्दिव्यं भर्गो देवस्य धीमहि ॥
पापपलालजालकल्पानलाय सुदर्शनाय नमः ॥

अहिर्बुध्न्यः —

यत्तज्ज्ञानमयं दिव्यं गुणानां प्रकृतिः परा ।
पञ्चानां तु बलादीनां नित्यशुद्धं निरञ्जनम् ॥
तन्नामहृदयं मन्त्रं स षाड्गुण्यमयो यतः ।
तस्य वाचकमाकारमुद्धरेन्मनसा सुधीः ॥
ज्ञानत्वादप्रमेयश्च प्रथमो व्यापकः स्मृतः ।
आनन्द आदिदेवश्च गोपनश्चेति षड्विधा ॥

* * * *

Colophon:

इति पाञ्चरात्रे अहिर्बुध्न्यसंहितायामङ्गोपाङ्गमन्त्रोद्धारं नाम एकोनविंशोऽध्यायः ॥

End:

इति व्यूहाः समुद्दिष्टाः उग्रादित्रितयेन तु ।
ज्वलदादिनिरूप्योऽर्थो हितः परमुदीर्यते ॥

Colophon:

इत्यहिर्बुध्न्यसंहितायां तन्त्ररहस्ये पञ्चपञ्चाशोऽध्यायः ॥

आख्यातं भवता सर्वं भगवन् परमेश्वर ।
सौदर्शनस्य यन्त्रस्य स्वरूपं वद मे प्रभो ॥

* * * *

एतमेवमनाराध्य राजानोऽमितविक्रमाः ।
सपत्नैरभिभूयन्ते निःश्रीकाश्च भवन्ति वै ॥

R. No. 346.

Paper. $11\frac{1}{8} \times 8\frac{7}{8}$ inches. Foll. 385. Lines, 16 in a page. Grantha. Good.

Transcribed in 1911-12 from a MS. of Appāsvāmivādyār of Maṇḍakoḷattūr (North Arcot district).

आचारनवनीतम्.

ĀCĀRANAVANITAM.

Similar to the work described under No. 2741 of the D.C.S. MSS., Vol. V.

By Appādhvarin, a native of Gaurīmāyūra, probably a disciple of Pullai Śāstrin of Ālattūr.

Contains the Ācārakāṇḍa complete.

Beginning:

गौरीमायूरनाथाङ्घ्रिपद्मेन्दिन्दिरमानसः ।
अप्पाध्वरी वितनुते सदाचारस्य संग्रहम् ॥
आलत्तूरधिवासस्य पुल्लैशास्त्रिबुधेशितुः ।
आचारनवनीताख्यं निबध्नाति कृपाबलात् ॥
संवर्धितोऽर्थकामाभ्यामद्रोहिभ्यां श्रुतीरितः ।
धर्मो जयति नानात्मा विज्ञानो मोक्षसाधनः ॥

श्रुतीरितः श्रुत्या ईरितः चोदितः चोदितः चोदनालक्षणः । अत्र श्रुतिशब्दः स्मृतिपुराणादीनां वेदाविरुद्धानामुपलक्षकः ।

End:

मृत्तोयैः शुध्यते शोध्यं नदी वेगेन शुध्यति ।
रजसा स्त्री मनोदुष्टा संन्यासेन द्विजोत्तमः ॥ इति मनुः ।
मार्जारश्चैव दर्वी च मारुतश्च सदा शुचिः ॥

इति शुद्धिप्रकरणम् ॥

Colophon:

इति श्रीगौरीमायूराप्पादीक्षितविरचिते आचारनवनीते शुद्धिप्रकरणं समाप्तिमगमत् ॥

इति वर्णाश्रमकाण्डः समाप्तिमगमत् ॥

R. No. **347.**

Paper. 11½ × 3⅞ inches. Foll. 300. Lines, 18 in a page. Grantha. Good

Transcribed in 1911-12 from a MS. of Rāmacandra Rao of Samalkota.

आपस्तम्बश्रौतप्रयोगदीपिका.

ĀPASTAMBAŚRAUTAPRAYŌGADĪPIKĀ.

Foll. 1*a*—297*a*.

Same work as the one described under No. 1071 of the D.C.S. MSS., Vol. II.

Contains Praśnas six to fourteen complete.

The remaining leaves are blank.

अयाचितप्रति वसन्तवाडवेङ्कटरामशर्मयाजिनः पुस्तकं स्वहस्तलिखितम् ॥

R. No. **348.**

Paper. 11½ × 8⅞ inches. Foll. 250. Lines, 18 in a page. Kanarese. Good.

Transcribed in 1911-12 from a MS. of G. Śrīnivasa Rao of Mysore.

मुनिसुव्रतकाव्यम्.

MUNISUVRATAKĀVYAM.

Foll. 1*a*—45*a*. Fol. 45*b* is blank.

A Jaina poem in ten Sargas on the life of Suvratamuni, one of the 24 Tīrthaṅkaras revered by the Jainas: by Arhaddāsa.

The titles of the various Sargas are given below:—

I. भगवदभिजन्मवर्णनम्.

II. भगवत्पितृवर्णनम्.

III. भगवद्गर्भावतरणवर्णनम्.

IV. भगवज्जन्मोत्सववर्णनम्.

V. भगवन्मन्दरानयनवर्णनम्.

VI भगवदभिषेकवर्णनम्.

VII. भगवत्कुमारयौवनदारकर्मसाम्राज्यवर्णनम्.

VIII भगवत्परिनिष्क्रमणवर्णनम्.

IX. भगवत्तपोवर्णनम्.

X. भगवदुभयमुक्तिवर्णनम्.

The work is also called Kāvyaratna.

Complete.

Beginning:

श्रियं स वः श्रीवृषभो विशिष्याद्यस्यालिमालावृतवत्सभायाम् ।
बभौ नरेन्द्रोत्करमौलिनीलप्रभावलीलालितमब्जपीठम् ॥
चन्द्रप्रभं नौमि यदङ्गकान्तिं ज्योत्स्नेति मत्वा द्रवतीन्दुकान्तः ।
चकोरयूथं पिबति स्फुटन्ति कृष्णेऽपि पक्षे किल कैरवाणि ॥
तमांसि हत्वा जगतः पदार्थान् प्रकाशयन्तं यमिव प्रदीपम् ।
न[ा]नाश मोहादभिपत्य कामः पतङ्गवच्छान्तिजिनं भजेऽहम् ॥
अबोधकालोरगलीढमूढमबूबुधद्गारुडरत्नवद्यः ।
जगत्कृपाकोमलदृष्टिहेतोः प्रभुः प्रसद्यान्मुनिसुव्रतो नः ॥
त्रासादिदोषोज्झितमुद्धजातिं गुणान्वितं मौलिमणिं यथैव ।
वृत्तात्मकं भावलयाभिरामं कृताश्रियं मूर्ध्नि दधामि वीरम् ॥

* * * *

भट्टाकलङ्काद्गुणभद्रसूरेः समन्तभद्रादपि पूज्यपादात् ।
वचोऽकलङ्कं गुणभद्रमस्तु समन्तभद्रं मम पूज्यपादम् ॥
वीराकरोत्थं मुनिसार्थनीतं कथामणिं श्रीमुनिसुव्रतस्य ।
सुवर्णदीप्रं नवयुक्तिरम्यं विदग्धकर्णाभरणं विधास्ये ॥
सरस्वतीकल्पलतां स को वा संवर्धयिष्यन् जिनपारिजातम् ।
विमुच्य काश्मीरतरूपमेषु व्यारोपयेत् प्राकृतनायकेषु ॥

* * * *

अथास्ति जम्बूविटपिस्थलेन द्वीपेषु गर्वोन्नतमस्तकस्य ।
द्वीपस्य भर्माभरणेऽत्र खण्डे रत्नायमानो मगधाख्यदेशः ॥

End:

मिथ्यात्वकर्मपटलैश्चिरमावृते मे युग्मे दृशोः कुपथयाननिदानभूते ।
आशाधरोक्तिविलसज्जनसंप्रयोगैरच्छीकृतेऽद्य पृथुसत्पथमाश्रितोऽस्मि ॥

Colophon:

इत्यर्हद्दासकृतौ काव्यरत्ने भगवदुभयमुक्तिवर्णनो नाम दशमः सर्गः ॥

(*b*) मुनिसुव्रतकाव्यव्याख्या—सुखबोधिनी.

MUNISUVRATAKĀVYAVYĀKHYĀ: SUKHABŌDHINĪ.

Foll. 46*a*—248*a*. Foll 248*b*—250*b* are blank.

A commentary on the poem described above.

Complete.

Beginning:

श्रीमद्देवेन्द्रसन्दोहबर्हिणानन्ददायिनम् ।
सुव्रताम्बुभृतं नौमि दिव्यश्राव्यानिनादिनम् ॥

तस्य गर्भावतारादिपञ्चकल्याणशंसिनः ।
काव्यरत्नाख्यकाव्यस्य वक्ष्ये टीकां स्वशक्तितः ॥

श्रियमित्यादि । यस्यादिनाथस्य सभायां समवसरणसदसि नरेन्द्रोत्करमौलिनीलप्रभावलीलालितं नमन्ति स्म (इति) नराः इन्दन्ति परमैश्वर्यमनुभवन्तीतीन्द्राः नराश्च ते इन्द्राश्च तथोक्ताः, तेषामुत्करः समूहः ।

End:

अच्छीकृते प्रागनच्छमिदानीमच्छं क्रियते स्म अच्छीकृतं तस्मिन् निर्मलीकृते सति । अद्य संप्रति । पृथुसत्पथं संश्चासौ पन्थाश्च सत्पथः पृथुश्चासौ सत्पथश्च तथोक्तः सत्पथः तं महाजनमार्गम् । आश्रितः आश्रयते स्म आश्रितः आसेवितः अस्मि भवामि अस भुवि लोट् ।

Colophon:

इत्यर्हद्दासकृतौ काव्यरत्नस्य टीकायां सुखबोधिन्यां भगवत्तपो(दुभयमुक्ति)वर्णनो (न) नाम सप्त(दश)मोऽध्यायः ॥

R No. 349.

Paper. $11\frac{1}{8} \times 8\frac{5}{8}$ inches. Foll. 104. Lines. 18 in a page. Dēvanāgarī. Good.

Transcribed in 1911-12 from a MS. of Addēpalli Rāmaśēṣayya of Repalli, Guntur district.

कुण्डदर्पणः

KUṆḌADARPANAḤ.

Gives details regarding the dimensions required for the construction of sacrificial altars: by Mallēśvara, younger brother of Vīrabhadra and son of Candraśēkhara and Annapūrṇā, and grandson of Mallēśvara of Bhāradvājagōtra. The author was a descendent of Udbhaṭārādhya of the Viraśaiva sect and a disciple of Bālavīrana. The work is said to have been composed in Śaka 1646 (*i.e.*, 1722 A.D.) and dedicated to God Śiva worshipped in the shrine called Śrīśaila (Kurnool district).

Complete.

Beginning:

श्रीमद्गणानामधिपं गजास्यं लम्बोदरं बालशशाङ्कचूडम् ।
विघ्नेश्वरं लड्डुकहस्तमेकदन्तं त्रिनेत्रं वृषयानमीडे ॥
वेदादिदीक्षात्रयकारणादित्रिदेहलिङ्गत्रयसंयुतस्य ।
अजस्रलिङ्गार्पितलोचनस्य तस्योद्भटाराध्यकुलोद्भवस्य ॥

भारद्वाजसगोत्रभूरियशसो मल्लेश्वराराध्यस-
त्पुत्रस्याखिलशत्रुशासनकराघोरास्त्रमन्त्रे सदा ।
संसक्तस्य च चन्द्रशेखरमहाराध्यस्य तत्सूनुना
मल्लेशेन हि कुण्डदर्पण इति ग्रन्थस्तु संरच्यते ॥
तेनान्नपूर्णातनयेन वीरभद्रानुजेनाखिलतन्त्रसारः ।
सर्वागमज्ञेन च बालवीरनाराध्यशिष्येण जनोपकारः ॥

अथ कुण्डमण्डपादिनिर्माणे हस्तादिपरिभाषां श्लोकत्रयेणाह—
यस्योर्ध्वबाहोस्तु समस्थितस्य वा यः पञ्चमांशः प्रपदोच्छ्रितस्य वा ।
पुंसः स हस्तोऽस्य युगाक्षिभागोऽङ्गुलं यवस्तस्य लवोऽष्टमः स्यात् ॥

End :

अथ कृतिनामधेयमेकश्लोकेनाह—

मल्लेश्वराख्येन सुकुण्डदर्पणग्रन्थः समस्तागमसार ईरितः ।

तन्त्रार्थविज्ञानविशारदैः सदा विशोधनीयोऽस्तु विचक्षणैरयम् ॥

* * * *

अथ ग्रन्थोत्पत्तिकालमेकश्लोकेनाह—

गुहाननाम्भोनिधिबाहुलेयमुखाब्ज (१६४६) शाकाह्वयवत्सरे गते ।

अभूदयं श्रीगिरिमल्लिकार्जुने देवेऽर्पिता मत्कृतिरस्तु साम्बे ॥

गुहाननेति . . . . . षट्चत्वारिंशदधिकषट्शत्युत्तरसहस्रशकाह्वयसंवत्सरे गते सति अयं ग्रन्थोऽभूत् । मत्कृतिः साम्बे श्रीगिरिमल्लिकार्जुने देवे अर्पितास्त्विति व्याख्या ॥

Colophon:

इति श्रीमल्लेश्वराराध्यविरचितकुण्डदर्पणग्रन्थः समाप्तः ॥

R. No. **350.**

Paper. $11\frac{1}{8} \times 8\frac{7}{8}$ inches. Foll. 72. Lines, 18 in a page. Dēvanāgarī. Good.

Transcribed in 1911-12 from a MS. obtained through Mr. R. A. Narasiṁha Ayyaṅgār of Bangalore.

प्रमाणानिर्णयः.

PRAMĀṆANIRṆAYAḤ.

A Jaina treatise in logic. The author seems to be a disciple of Hēmasēna and Nāgavīra.

Contains Pratyakṣanirṇaya, Anumananirṇaya and Āgamanirṇaya. Wants beginning.

Beginning:

विपरीतसमारोपस्य प्रसङ्गात् तेन तस्योपरोधात् । परेषां तु तस्यापि निश्चयात्मकत्वात् तेन विरोधः सिद्ध एव । तथा निश्चयहेतुना दर्शनेन विरुद्धं समारोपं प्रतिपादयतः स्वमतविरोधः स्यात् । निश्चया-

रोपमनसोः बाध्यबाधकभाव इति धर्मकीर्तेरभिमतत्वात् . . .
योर्विरोधाभावसिद्धेः ।

End:

श्रेयः श्रीजिनशासनं यदमलं तु . . . .
द्रीची नित्यमनुत्तराप्यदमुईची मे रुचिर्वर्धताम् ।
आसंसारपरिक्षयादमुमुईची भावना भावकः
भूयान्मे भवबन्धसंततिमिमामुच्छेत्तमिच्छावतः ॥

Colophon:

इत्यागमनिर्णयः ॥

बालः कामपि मानतत्प्रतिनिधिप्रज्ञा . . . . .
तत्संस्कारबलाद्भवत्यधिगमी शास्त्रेषु विस्तारिषु ।
तज्ज्ञः क्षेमपदी भवेदिति मया निर्वर्णितः श्रेयसे
भूयाद्वः सकलप्रमाणविषयः संक्षेपतो निर्णयः ॥

यैरेष मे वस्तुविवेकबोधो
व्यधायि तान् नौमि नतेन मूर्ध्ना ।
श्रीहेमसेनं . . . . . .
. . . . मुनिं दयापालिमहामुनिं च ॥

श्रीमद्व्याकरणोन्नताग्रनखरं षट्तर्कदंष्ट्रोत्कटं
सत्साहित्यवरोरुकेसरसटासुभ्राजितं सिंहवत् ।
यद्वाक्यं परवादिवारणगण . . शोद्ध . .
. . नन्दन्तु मुनीन्दवः सुकृतिनः श्रीनागवीरात्मजाः ॥

Colophon:

इति प्रमाणनिर्णयः समाप्तः ॥

R. No. 351.

Paper. 11½ × 8¾ inches. Foll. 306. Lines, 18 in a page. Dēvanāgarī. Good.

Transcribed in 1911-12 from a MS. of M O. Anandālvār of Bangalore.

ब्रह्मसूत्रभाष्यव्याख्या—मूलभावप्रकाशिका.

BRAHMASŪTRABHĀṢYAVYĀKHYĀ: MŪLABHĀVAPRAKĀŚIKĀ.

A commentary on the Brahmasūtrabhāṣya of Rāmānujācārya. Contains only the first Pāda of the first Adhyāya.

Beginning:

सर्वेषां पुरुषार्थानां प्रमाणाधीननिश्चयत्वेनालौकिके पुरुषार्थे तत्साधने च शब्दैकसमधिगम्ये तत्राप्यपुरुषशेमुषीदोषमषीमालिन्यस्य वेदस्यैव प्रमाणत्वेन तत्र पूर्वभागे च पशुपुत्रादिफलतत्साधनपरेऽवगते तदुत्तरभागे च परमपुरुषार्थपरे च सति पूर्वाचार्याभिमतमुक्तिघण्टापथकण्टकायमानविविधकुदृष्टिजनदुर्वचनशतोपप्लुते तदुपदर्शितकुपथप्रवृत्तिनि जगति मोमुह्यमाने तदुज्जिजीवयिषया पूर्वाचार्यपरिचितमेवायनं निष्कण्टकीकृत्य भवतापतप्तजीवभागधेयं भगवान् भाष्यकारः शारीरकं व्याख्यातुमुपक्रमते। प्रारिप्सितस्याविघ्नपरिसमाप्तिप्रचयगमनार्थं स्मृत्याचारसिद्धामिष्टदेवोपासनरूपं मङ्गलं श्रौतमाचरति—अखिलेत्यादिना।

* * * *

Colophon:

इति श्रीभाष्यमूलभावप्रकाशिकायां जिज्ञासाधिकरणं संपूर्णम् ॥

End:

इहापीति। आनन्दोऽजरोऽमर इति स्वेनानुसंधानं प्रमाणेऽस्मिन्नचिद्विशिष्टानुसंधानं मामुपास्वेति चिद्विशिष्टानुसंधानमिति त्रिविधानुसंधानमिह उपपद्यत इत्यर्थः। विशिष्टोपायपरत्वचिह्नं दर्शयति—एतदुक्तमिति। यत्रेति। अयं न्यायः सर्वप्रकरण इति भावः ॥

Colophon.

प्रथमस्य प्रथमः पादः ॥

R. No. 352.

Paper. 11½ × 8⅞ inches. Foll. 120. Lines, 20 in a page Dēvanāgarī. Good.

Transcribed in 1911-12 from a MS. of T. B. Rāmācār of Bangalore.

(*a*) पाञ्चरात्रसंहिता.

PĀÑCARĀTRASAṀHITĀ.

Foll. 1*a*—43*a* and 45*b*—119*a*. Foll. 119*b*—120*b* are blank.

Contains the following portions taken from the Pāñcarātra gama:—

1*a* पाद्मसंहिता (10th Adhyāya).
3*a* व्याससंहिता (7th Adhyāya).
31*a* वायुसंहिता (Paṭalas 1 to 10).
34*b* अगस्त्यसंहिता (8th and 17th Adhyāyas).
41*b* अष्टाक्षरन्यास do.
45*b* विष्णुतन्त्रसंहिता (7th Adhyāya).
46*b* पाद्मतन्त्र (13—16 Adhyayas).
53*b* विष्वक्सेनसंहिता (10th Adhyāya).
55*b* कपिञ्जलसंहिता (8th Adhyāya).
63*a* अनिरुद्धसंहिता (Incomplete).
67*b* विष्णुतवत्त्संहिता do.
68*a* परमपुरुषसंहिता do.
71*a* पराशरसंहिता do.
85*a* प्रह्लादसंहिता do.
87*b* कपिञ्जलसंहिता (14th Adhyāya)
96*a* पाद्मसंहिता (2nd Adhyāya).
99*a* अष्टबन्धनलेखन, मूर्तिलक्षण.
102*b* विष्णुतन्त्र (38th Adhyāya).
105*b* वृद्धपाद्मसंहिता (37th Adhyāya)
109*b*—119*a* विविधागमवचनानि.

(*b*) उपनिषदः.
UPANIṢADS

Foll. 43*a*—45*b*.

Contains the following Upaniṣads :—

43*a* नारायणोपनिषत्.

44*a* ऊर्ध्वपुण्ड्रधारणोपनिषत्.

44*b* द्वयोपनिषत्.

45*a* तेजोबिन्दूपनिषत्.

R. No **353**.

Paper. 11¼ × 8⅞ inches. Foll. 5[illegible]. Lines, 17 in a page. Dēvanāgarī. Good

Transcribed in 1911-12 from a MS. of M. O. Anandalvār of Bangalore.

सौभाग्यदशाफलम्.
SAUBHĀGYADAŚĀPHALAM

A treatise on astrology specially dealing with the conditions under which prosperity attends one

Incomplete.

Beginning :

गलद्दानोद्रेकभ्रमदलिकदम्बावभ(वृत)शिरो
धुनानः संतोषादिव निजगुरोस्ताण्डवविधेः ।
प्रचण्डैर्दोर्दण्डैः प्रबलतरविघ्नौघशमनः
मनोगम्यं भव्यं वितरतु शिशु शैलदुहितुः ॥

कृत्वादित्यमित्रोक्तानि सामान्यदशाफलानि -

तुङ्गेति तुङ्गभवने स्वगृहे परर्क्षे नीचेति नीचभवनेऽरिगृहेऽतिशत्रौ ।
मित्राधिमित्रगृहयोः स्वपरांशयोश्च मूलत्रिकोणभवने परकेन्द्रयोश्च ॥

End :

लग्नं गतस्य च दशा शशिनन्दनस्य भूपालमित्रधनधान्यकलत्रपुत्रम् ।
यज्ञादिकर्म नृपमाननलब्धवित्तं मृद्वन्नगन्धमृदुलाम्बरभूषणानि ॥

R. No. 354.

Paper. 8¾ × 5½ inches. Foll. 44. Lines, 8 in a page. Dēva nāgarī. Good.

Transcribed in 1911-12 from a MS. of Rāmacandra Rao of Mysore.

भरतार्णवः.

BHARATĀRṆAVAḤ.

Foll. 1*a*—42*a*. The remaining foll. are blank.

This is a work on Nāṭya or dancing attributed to Nandikēśvara.

The subjects treated in the first three Adhyāyas are—

I. असंयुत(हस्त)प्रकरणम्, II. संयुतहस्तप्रकरणम्, III. नाट्यहस्तनिर्णय.

Breaks off in the fourth Adhyāya.

Beginning:

मणिहस्तः पताकस्त्रिपताकोऽर्धपताकक: ।
कर्तरी च मयूरः स्यादर्धचन्द्रकरस्तथा ॥
अरालः शुकतुण्डश्च मुष्टिहस्तस्तथैव च ।
शिखरश्च कार्पित्थश्च कटकामुख इत्यपि ॥

* * * *

वेदत्रये त्रिलोकार्थे वनार्थेऽभिनयक्रमे ।
युज्यते ताम्रचूडोऽयं योजनक्रमवेदिभिः ॥

Colophon:

इति श्रीनन्दिकेश्वरकृतौ भरतार्णवे सुप्रतिबोधके असंयुतप्रकरणं नाम प्रथमोऽध्यायः ॥

End:

शुकद्वयस्य गमने प्रलयस्य निरूपणे ।
ऊर्ध्वमण्डलिनौ ज्ञेयौ करकर्मविशारदैः ॥

Colophon:

इति श्रीभरतार्णवे नाट्यहस्तनिर्णयो नाम तृतीयोऽध्यायः ॥

* * * *

भ्रमरेषु महाभीत्यां लपने भ्रमणेऽपि च ।
चित्राद्युरुषु भेदेषु कथितं लोलितं शिरः ॥
प्रान्तशिरसो लक्षणविनियोगावुच्यन्ते(च्यते) ॥

R. No. **355.**

Paper. 11 × 8½ inches. Foll. 19. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1911–12 from a MS. of Dēvulapalli Vēṅkatappa Śāstri of Repalli, Guntur district.

यवनसंहिता.

YAVANASAṀHITĀ.

A treatise on astrology.

Incomplete.

Beginning :

वृत्तस्ताम्रदृगुष्णशाकलघुभुक्क्षिप्रप्रसादोऽटनः
कामी दुर्बलजानुरस्थिरधनः शूरोऽङ्गनावल्लभः ।
सेवाज्ञः कुनखी व्रणाङ्कितशिरा मानी . . .
. . . तलेऽङ्कितोऽतिचपलस्तोये च भीरुः क्रिये ॥

End :

लग्नाधियोगजातो मन्त्री पृतनाधिपतिर्धरास्वामी ।
बहुदारवान् विनीतो दीर्घायुर्धर्मवान् विशिष्टगुणः ॥

R. No. **356.**

Paper. 11 × 8⅝ inches. Foll. 80. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1911–12 from a MS. of Śrīnivāsācāriyar of Kumbakonam.

भाट्टसारः.

BHĀṬṬASĀRAḤ.

A short treatise containing the essential teachings of the Mīmāṁsāsūtras of Jaimini: by the late Mahāmahōpādhyāya Tiruppuṭkuḷi Śrī-Kṛṣṇatātācārya of Conjeeveram.

Complete.

Beginning:

रघुवरचरणद्वन्द्वध्यानसुधास्वादनित्यतृप्तेन ।

श्रीकृष्णतातसुधिया क्रियते कुतुकेन भाट्टसारोऽयम् ॥

प्रमाणाधीनसिद्धिकतया प्रमेयस्य प्रमाणमादौ निरूप्यते । तत्र प्रमाकरणं प्रमाणम् । अनधिगताबाधितार्थज्ञानं प्रमा । स्मृतिव्यावृत्तये-ऽनधिगतेति । भ्रमव्यावृत्तयेऽबाधितेति । धारावाहिकबुद्धिस्थलेऽपि उत्त-रोत्तरज्ञानानां पूर्वपूर्वज्ञानाविषयतत्तत्क्षणविशेषविषयकतया नाव्याप्तिः, नीरूपस्यापि कालस्य रूपस्येवानुभवानुरोधेन प्रत्यक्षवेद्यत्वाभ्युपगमात् ।

End:

अत एवाग्नीषोमीयपशोः न पूर्णमासामावास्याकालिकत्वम्, किन्तु प्रधानभूतसोमस्येति ॥

Colophon:

इति द्वादशाध्याये द्वितीयः पादः ॥

तृतीयचतुर्थयोः पादयोः समुच्चयविकल्पचिन्ताप्रवृत्तिः इति संक्षेपः । विस्तरस्तु भाट्टदीपिकादौ द्रष्टव्यः ॥

Colophon:

इति द्वादशाध्याये तृतीयचतुर्थौ पादौ । समाप्तश्च द्वादशोऽध्यायः ॥

अवगाह्य तन्त्रवारिधिमनघोऽभ्युदहारि भाट्टसारोऽयम् ।

श्रीकृष्णतातसुधिया रघुवरचरणद्वयैकसक्तधिया ॥

R. No. 357.

Paper. 11×8¾ inches. Foll. 256. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1911-12 from a MS. of Sūri Subbā Śāstri of Bezwada.

लघुशब्देन्दुशेखरव्याख्यानम्—शङ्करभट्टीयम्.

LAGHUŚABDĒNDUŚĒKHARAVYĀKHYĀNAM : ŚAṄKARABHAṬṬĪYAM.

A commentary on the Laghuśabdēnduśēkhara (for which see No. 1414 of the D.C.S. MSS., Vol. III) of Nāgēśabhaṭṭa: by Śaṅkarabhaṭṭa.

Breaks off in Śabdādhikāra.

Beginning:

पातञ्जल इति । समुच्चयार्थकचशब्दमध्याहृत्य पातञ्जलनाम्नि योगशास्त्रे महाभाष्ये चेति व्याख्येयम् । सामानाधिकरण्येनान्वये तु महाभाष्यपदेनैवेतरभाष्यव्यावृत्त्या पातञ्जलपदप्रयोगवैयर्थ्यम्; न हीतरभाष्येषु महाभाष्यमिति व्यवहरन्त्यभियुक्ताः । पातञ्जलाख्ययोगशास्त्रे परिश्रमस्य प्रकृतोपयोगस्तु शब्दज्ञानानुपाती वस्तुशून्यो विकल्प इत्यादितच्छास्त्रसंमतपदार्थनिरूपणस्य एतद्ग्रन्थे करिष्यमाणस्य स्वकीयाध्ययनभावनामूलकत्वप्रदर्शनमिति बोध्यम् ।

Colophon:

इति शंकरभट्टकृते शेखरव्याख्याने संज्ञाप्रकरणम् ॥

End:

कृतयोरजादिपरत्वाभावः स्पष्टः । आमादेशे शीभावे चाबन्तस्य निमित्ततया तद्विषये सन्निपातपरि.

R. No. 358.

Paper. 10½ × 8¾ inches Foll. 23. Lines, 18 in a page. Grantha. Good.

Transcribed in 1911-12 from a MS. of Viśvanātha Śāstri of Vizianagaram.

गायत्रीकल्पः.

GĀYATRĪKALPAḤ.

Similar to the work described under No. 7812 of the D.C.S. MSS., Vol. XV. The authorship of this Kalpa is attributed to Vasiṣṭha.

This manuscript is said to have been copied and completed by Gōpālasōmayājin on a Sunday in the month of Mārgaśīrṣa of the year Nala.

Complete.

Beginning:

अथ प्राणायामादिन्यासाः—

अथ प्राणायाममन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, ओंकारो देवता, भूरिति बीजम्, भुव इति शक्तिः, सुव इति कीलकम्, परब्रह्म तत्त्वम्, महाबाह्यशरीरशुद्ध्यर्थे विनियोगः ।

End:

अपरिमितमायुर्भवति । शतं वर्षाणि जीवति । न स पुनरावर्तते । यदि पुनरावर्तेत तर्हि ऋषीणां कुले महामेधावी भवति । मृत्योर्मुनुः ।

Colophon:

वसिष्ठप्रोक्तगायत्रीकल्पः समाप्तः ॥

R. No. **359.**

Paper. 10¼ × 8¾ inches. Foll. 62. Lines, 18 in a page. Grantha. Good.

Transcribed in 1911–12 from a MS. of Viśvanātha Śāstri of Vizianagaram.

विश्वामित्रकल्पः.

VIŚVĀMITRAKALPAḤ.

The various subjects treated of in this work are evident from the titles of the Adhyāyas, which are given underneath in order:—

I. शौचविधिकथनम्.
II. स्नानविधिकथनम्.
III. माध्याह्निकस्नानविधिकथनम्.
IV. मृत्तिकास्नानविधिकथनम्.
V. दर्भविधिकथनम्.
VI. आचमनविधिकथनम्.
VII. प्राणायामकथनम्.
VIII. मार्जनविधिकथनम्.
IX. अस्त्रप्रयोगकथनम्.
X. उत्पत्तिन्यासकथनम्.
XI. स्थितिन्यासविधिकथनम्.
XII. लयन्यासविधिकथनम्.
XIII. न्यासविधिकथनम्.
XIV. महापञ्चकन्यासविधिकथनम्.
XV. मन्त्रोद्धारकथनम्.
XVI. जपविधिकथनम्.
XVII. औपासनविधिकथनम्.
XVIII. ब्रह्मयज्ञविधिकथनम्.
XIX. तर्पणविधिकथनम्.
XX. वैश्वदेवविधिकथनम्.
XXI. पञ्चमहायज्ञविधिकथनम्.
Complete.
XXII. अतिथिपूजाविधिकथनम्.
XXIII. गायत्रीमन्त्रोद्धारकथनम्.
XXIV. मन्त्रोद्धारकथनम्.
XXV. बीजोद्धारकथनम्.
XXVI. भूतशुद्धिकथनम्.
XXVII. Do.
XXVIII. प्राणप्रतिष्ठाविधिकथनम्.
XXIX. अन्तर्मातृकान्यासविधिकथनम्.
XXX. बहिर्मातृकान्यासविधिकथनम्.
XXXI. गायत्रीकवचविधिकथनम्.
XXXII. मन्त्रसाधनकथनम्.
XXXIII. शान्तिविधिकथनम्.
XXXIV. पुष्टिविधिकथनम्.
XXXV. शत्रुक्षयविधिकथनम्.
XXXVI. प्रायश्चित्तविधिकथनम्.
XXXVII. रहस्यप्रायश्चित्तविधिकथनम्.

Beginning:

स्वगुरुं पूजयेद्देवमुपचारैस्तु पञ्चकैः ।
भक्तिश्रद्धानुसारेण विश्वामित्रं प्रकल्पयेत् ॥
अस्य मन्त्रस्य हंसस्य प्राणापानौ निरुन्धयेत् ।
प्राणापानौ नियम्याशु गुरुपूजापुरःसरम् ॥
प्रातरुत्थाय ये विप्राः स्नात्वा मूलास्थकुण्डलीम् ।
प्रबोधे सुप्रभातायां गायत्रीं तत्र चिन्तयेत् ॥
अष्टधा कुण्डली ज्ञेया द्वात्रिंशद्वर्णसंख्यया ।
चतुरक्षरसंयुक्तं क्रमेण वसुसंख्यया ॥

* * * *

ततो वायुं बहिर्गम्य विण्मूत्रादिविसर्जनम् ।
दुर्गन्धत्यागपर्यन्तं शौचं कृत्वा समासतः ॥

End:

सर्वमेतन्मया लब्धं तपसाराध्य शंकरम् ।
अतिगुह्यतरं प्रोक्तं कृपया परमं धनम् ॥
इत्थं मुनिवरेणोक्तं विश्वामित्रेण धीमता ।
वेदत्रयसमं पुण्यं धारयेद्गोपयेदपि ॥

Colophon:

इति श्रीविश्वामित्रप्रोक्ते रहस्यप्रायश्चित्तविधिकथनं नाम सप्तत्रिंशोऽध्यायः ।

विश्वामित्रकल्पः संपूर्णः ॥

R. No. **360.**

Paper. 11 × 8¾ inches. **Foll.** 28. **Lines,** 16 in a page. **Dēvanāgarī. Good.**

Transcribed in 1911–12 from a MS. of Śrīnivāsapāṭrācāriyar of Kumbakonam.

श्येनकारिका.

ŚYENAKĀRIKĀ.

Foll. 1*a*—24*b*.

On details connected with the construction of a particular form of sacrificial altar resembling a hawk with its wings spread out.

Incomplete.

Beginning:

. . . . . धर्मसंहृतिम् ।
धर्मेष्टकाकुलायिन्यौ षोडशीपादसंज्ञिके ॥
अष्टेष्टकाः पारिश्येने षोडशाद्याश्च षट् स्फुटाः ।
अणूकसंज्ञिके चेह . . . ह्रस्वाः षडेव वा ॥
पार्श्वे चतुर्थ्यास्त्रिपदं त्रिपञ्चकमेका तिरश्ची त्रिदशाङ्गुला मता ।
षट्सप्तकान्या च तिलद्विसप्तका दीर्घाक्ष्णया षोडशस(प्त)कात्र तु ॥
पूर्वे श्येने चतुर्थी या षोडशीसंज्ञिकात्र सा ।
नवम्यश्च तथापाद्या अध्यायास्त्रिंशके उभे ॥

End:

वृतेष्टके यदि स्यातां पूर्णा एकादशेष्टकाः ।
चितौ हिरण्यमित्यादिप्रयोगस्तु यथापुरा ॥

Fol. 25 gives a list of the things required in Sōmayāga. Foll. 26*a*—27*a* give a table of sacrificial measurements. Foll. 27*b* and 28 are blank.

R. No. **361.**

Paper. 11 × 8¾ inches. Foll. 64. Lines, 16 in a page. Dēvanāgarī. Good.

Transcribed in 1911-12 from a MS. of R. Rāmacandra Rao of Samalkota, Godavari district.

साहितीसारः.

SĀHITĪSĀRAḤ.

Foll. 1*a*—61*a*.

An elementary treatise on poetics and rhetoric: by Sītārāma, son of Vēṅkaṭarāma Śāstrin and Raghupatyambā. The titles of the various Adhyāyas are given below :—

I. नायकप्रकरणम्.
II. काव्यप्रकरणम्.
III. रसप्रकरणम्.
IV. दोषप्रकरणम्.
V. गुणप्रकरणम्.
VI. शब्दालंकारप्रकरणम्.
VII. अर्थालंकारप्रकरणम्.

Breaks off after Vikasvarālaṅkāra in the Arthālaṅkāraprakaraṇa.

Beginning:

श्रीमद्गोपालबालस्य स्ववक्षोरुहशायिनः ।
चिबुकं संस्पृशन्त्यव्याद्वत्सला कमलान्वहम् ॥
पितरौ रघुपत्यम्बाश्रीवेङ्कटरामशास्त्रिणौ नत्वा ।
प्राचोऽपि लक्ष्यलक्षणसंग्रहणं वाच्मि काव्यशास्त्रस्य ॥
ग्रन्थविस्तरभीरूणां बालानां बोधसिद्धये ।
मया निगद्यते ग्रन्थः साहितीसारनामकः ॥
शब्दार्था वृत्तयश्चैव शय्या पाकाश्च रीतयः ।
रसा गुणा अलंकारा इतीयं काव्यपद्धतिः ॥

* * * *

अथ नायकगुणाः—

महाकुलीनतौज्ज्वल्यं महाभाग्यमुदारता ।
तेजस्विता च पाण्डित्यं धार्मिकत्वं विदग्धता ॥

Colophon:

इति श्रीसीतारामविरचिते साहितीसारे शब्दालंकारप्रकरणं समाप्तम् ॥

* * * *

अत्रादौ विशेषमुक्त्वा तत्समर्थनाय सामान्यं निर्दिश्य तत्प्रसिद्धावप्यपरितोषात् तत्समर्थनाय विशेषोक्तेर्विकस्वरालंकारः ।

इति विकस्वरालंकारः ॥

The remaining foll. are blank.

R. No. **362.**

Paper. 11 × 8⅝ inches. Foll. 116. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1911-12 from a MS. of Paṭṭābhirāmamūrti of Vizianagaram.

सिद्धान्तरत्नमाला.

SIDDHĀNTARATNAMĀLĀ.

A treatise in refutation of the Dvaita view of the Vēdānta and in support of the Advaita view: by Śrīvatsalāñchana Śarman, son of Viṣṇudhvajācārya.

The transcription of this manuscript is said to have been completed on Tuesday, the 4th of the bright fortnight of the month of Jyēṣṭha in the year 1940 of the Vikrama era.

Complete.

Beginning:

अर्धाङ्गे योऽतिशुद्धस्फटिकविरचितच्छद्मना चन्द्रमौलिः
यन्नाभीकोटरान्तर्घुणरणितमिव ब्रह्मणो वेदघोषः ।
एकोऽसावद्वितीयो भुवनमयमहामण्डपस्येन्द्रनील-
स्तम्भः संसारयात्राश्रमभरविकलस्यावलम्बो ममास्तु ॥

मदमुदितभृङ्गभांकृतिहुंकृतिभिस्तर्जयन्विघ्नान् ।
कृपया कृतावलम्बः शं वो लम्बोदरो ममादिश्यात् ॥

प्रणम्य दशकण्ठेभकुण्ठनैकहरिं हरिम् ।
श्रीवत्सशर्मा निर्माति वेदान्तार्थनिरूपणम् ॥

यदि वो जगज्जिगीषा यदि च परब्रह्मजिज्ञासा ।
सिद्धान्तरत्नमालां कण्ठे तदिमां बुधाः कुरुत ॥

अथ तत्रादौ द्वैतमिथ्यात्वं निरूप्यते । तत्र द्वैतपदार्थनिरुक्तिः—द्विधेतं द्वीतमित्याहुस्तद्भावो द्वैतमुच्यते । इति वार्तिककाराः । तत्र प्राञ्चः—तुलाज्ञानकल्पितभिन्नत्वे सति सत्त्वेन प्रतीत्यर्हं चिद्भिन्नं मिथ्या, दृश्यत्वात् जडत्वात् परिछिन्नत्वात्, शुक्तिरूप्यवत् ।

End:

अतस्तत्र तात्त्विकस्यैव प्रामाण्यम् । द्वैतसत्यत्वं तु व्यावहारिकम् । अतः सर्वत्र श्रुतेर्न तात्त्विकं प्रामाण्यम्, परस्परविरोधयोः तात्त्विका-(कत्वा)योगादिति ॥

Colophon:

इति श्रीमहामहोपाध्यायश्रीविष्णुध्वजाचार्यपुत्रश्रीवित्सलाञ्छनभट्टाचार्यकृतिः सिद्धान्तरत्नमाला संपूर्णा ॥

यदि वो जगज्जिगीषा यदि च परब्रह्मजिज्ञासा ।
सिद्धान्तरत्नमालां कण्ठे तदिमां बुधाः कुरुत ॥

संवत्सर १८४० ज्येष्ठशुक्लचतुर्थीभौमवासरे समाप्तम् ॥

R. No. **363.**

Paper. 11 × 8¾ inches. Foll. 212. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1911–12 from a MS. of Addēpalli Rāmaśēṣayya of Repalli.

सूर्यसिद्धान्तविवरणम्.

SŪRYASIDDHĀNTAVIVARAṆAM.

A commentary on the Sūryasiddhānta, a well-known treatise on astronomy: by Bhūdharasūrin, son of Dēvadatta and grandson of Kēśavārya of Bhāradvājagōtra, and a native of Kāmpilya country on the banks of the Ganges.

Complete.

The text to which this commentary relates is of fourteen Adhyāyas as given below :—

I. मध्याधिकारः.	VIII. योगाध्यायः.
II. स्पष्टाधिकारः.	IX. उदयास्ताधिकारः.
III. त्रिप्रश्नाध्यायः.	X. शृङ्गोन्नत्यध्यायः.
IV. चन्द्रग्रहणाध्यायः.	XI. पाताध्यायः.
V. सूर्यग्रहणाध्यायः.	XII. गोलाध्यायः.
VI. परिलेखनाध्यायः.	XIII. गोलयन्त्राध्यायः.
VII. ग्रहसमागमाध्यायः.	XIV. मानाध्यायः.

Beginning:

यस्योदये निखिलविश्वतमिस्रजाल-
विच्छेदनं भवति संकुचितं यदस्ति ।
तं विश्ववन्द्यसुरवन्दितपादपद्मं
सव्येतराच्युतदृशं प्रणमामि सूर्यम् ॥
काम्पिल्ये सुरसिन्धुबन्धुरतटे ज्योतिर्विदामग्रणीः
भारद्वाजकुलेऽमले भवति हि श्रीकेशवार्याह्वयः ।
तत्पुत्रो नृपवृन्दवन्दितपदः श्रीदेवदत्ताभिधः
कीर्त्या निर्मलयोज्ज्वलः समतनोद्यः पञ्चिसंख्यादिकम् ॥

तत्रभवान् सूर्यांशसंभूतः पुमान् श्रीदेवनमस्काररूपं शिष्टाचार-परिप्राप्तकर्तव्यताकं मङ्गलमाचरति ग्रन्थकारः—

अचिन्त्याव्यक्तरूपाय निर्गुणाय गुणात्मने ।
समस्तजगदाधारमूर्तये ब्रह्मणे नमः ॥ इत्यन्वयः ।

बृहत्त्वात् बृंहणत्वाच्च ब्रह्मेत्युक्तेः अपरिच्छिन्नाय व्यापकायेत्यर्थः । तस्य विशेषणान्यचिन्त्यादीनि ॥

End:

ज्ञात्वा तमृषयश्चाथ सूर्याल्लब्धवरं मयम् ।
. . . . . ज्ञानं पप्रच्छुरादरात् ॥

स तेभ्यः प्रददौ प्रीतः ग्रहाणां चरितं महत् ।
अत्यन्तमद्भुतं लोके रहस्यं ब्रह्ममुत्तमम् ॥
उदयादुदयमित्यादीनामेषां व्याख्या सुगमा ।

Colophon:

इति श्रीज्योतिर्विद्देवदत्तात्मजभूधरसूरिविरचिते सूर्यसिद्धान्तविवरणे मानाध्यायश्चतुर्दशः समाप्तः ॥

भागादिखचरस्त्रिघ्नः स्वयुगाद्भाजितो भवेत् ।
नक्षत्रात्स ग्रहः स्याच्चेत् स्वयुगाद्गुण्यते यदि ॥
त्रिभिर्भक्तं तु तच्छेषमिति सिद्धान्तसंमतम् ।

Colophon:

सूर्यसिद्धान्तविवरणं समाप्तम् ॥

R. No. **364.**

Paper. 11 × 8⅞ inches. Foll. 44. Lines, 18 in a page. Dēvanāgarī Good.

Restored in 1911–12 from a MS. described under R. No. 102 *ante.*

(*a*) नाडीविज्ञानीयम्.

NĀḌĪVIJÑĀNĪYAM.

Foll. 1*a*—22*a*.

Same work as the one described under R. No. 102(*a*) *ante.*

Incomplete.

(*b*) योगतरङ्गिणी.

YŌGATARAṄGIṆĪ.

Foll. 22*b*—25*a*.

Same work as the one described under R. No. 102(*b*) *ante.*

Contains two Taraṅgas: Svapna and Dūta.

(*c*) अभ्रकलक्षणम्

ABHRAKALĀKṢAṆAM.

Foll. 25*b*—28*b*.

Same work as the one described under R. No. 102(*c*) *ante.*

Complete.

(*d*) नवरत्नशुद्धिः.

NAVARATNAŚUDDHIḤ.

Foll. 28*b*—31*b*. Fol. 30 is left blank.

Same work as the one described under R. No. 102(*d*) *ante*.

Complete.

(*e*) शशाङ्ककिरणम्.

ŚAŚĀṄKAKIRAṆAM.

Foll. 31*b*—32*b*.

Same work as the one described under R. No. 102(*e*) *ante*.

Complete.

Foll. 32*b* to 33*a* contain the recipe for preparing a cooling and refreshing oil.

(*f*) रससारसंग्रहः—कर्णाटकटीकासहितः.

RASASĀRASAṄGRAHAḤ: WITH KANARESE MEANING.

Foll. 33*b*—44*a*. Fol. 44*b* is left blank.

Restored in 1911–12 from a MS. in the Library.

A short treatise on alchemy.

Complete.

Beginning:

नीलकण्ठं नमस्कृत्य श्रीगङ्गाधरपण्डितम् ।
सिद्धानां रसयोगानां सङ्ग्रहं सङ्गृहीतवान् ॥

* * * *

रसो ग्राह्यः सुनक्षत्रे पलानां शतसंमतम् ।
पञ्चाशत्पञ्चविंशद्वा दशपञ्चैः क्रमेण वा ॥
पलद्वयूनं नष्टं कर्तव्यं रससंस्कारं कर्तव्यम् ।

End:

चत्वारिंशतिपुटैरेवं कान्तं तीक्ष्णं च मुण्डकम् ।
दत्वा च हिङ्गुलं यत्र म्रियते नात्र संशयः ॥

Colophon:

इति रससारसंग्रहः समाप्तः ॥

R. No. **365.**

Paper. 11 × 8⅞ inches. Foll. 76. Lines, 20 in a page. Dēvanāgarī. Good.

Restored in 1911–12 from a MS. in the Library, described under No. 4927 of the D.C.S. MSS., Vol. X.

परिकरविजयः.

PARIKARAVIJAYAḤ.

Foll. 1*a*—74*b*.

Complete.

The remaining foll. are blank.

R. No. **366.**

Palm-leaf. 16 and 15¼ × 1¼ inches. Foll. 90. Lines, 7 in a page. Telugu. Slightly injured.

Purchased in 1911–12 from K. Rāmasvāmi Ayyaṅgār of Magadi, Mysore province.

(*a*) अभिधानरत्नमाला—आन्ध्रटीकासहिता.

ABIDHĀNARATNAMĀLĀ : WITH TELUGU MEANING.

Foll. 1*a*—22*b*.

Same work as the one described under R. No. 321(*a*) *ante*. This is also called Ṣaḍrasanighaṇṭu with difference in the end.

Complete.

The names of the six Skandhas contained in this manuscript are given below :—

I. मधुरस्कन्धः.	IV. तिलस्कन्धः.
II. अम्लस्कन्धः.	V. कटुस्कन्धः.
III. लवणस्कन्धः.	VI. कषायस्कन्धः.

The difference in the end is given below.

End:

वृक्षस्तरुर्द्रुमः शाखी पादपश्च महीरुहः ।
आरोहकश्च विटपी पलाशी च नगुञ्जनः ॥ దుంప.
महाकन्दो जपाभिश्च न्यङ्कुरो मूलकीर्शिषः ॥ చిగుళ్లు.
पल्लवः स्यात् किसलयं प्रवालं शृङ्गमङ्कुरम् । మొగ్గలు.

* * * *

Colophon:

इत्यभिधानरत्नमालायां षष्ठः कषायस्कन्धः ॥

(*b*) कविकर्णभूषणम्.

KAVIKARṆABHŪṢAṆAM.

Foll. 23*a*—29*b*.

Witty stanzas on various subjects : by Dēvaṇācārya, the son of the minister of Kāñcipura.

Complete.

Beginning:

लक्ष्मीं तनोतु महतां जगतां त्रयाणां
कात्यायनीरमणमौलिशशाङ्करेखा ।
मन्दाकिनीसलिलशीकरिणी विधत्ते
यासौ विभिन्ननवमौक्तिकशुक्तिशङ्काम् ॥
अर्थो न केवलमिह प्रकृतोपयोगी
. . . वचसां हि गिरा कवीनाम् ।
अर्थान्तराणि च यथा निधयोऽतिगुप्ताः
सिद्धाञ्जनेन बहवः प्रकटीभवन्ति ॥

End:

श्रेयांसि सन्तु भूयांसि यावत्कल्पं पयोमुचाम् ।
विश्वेषामुपभोगाय जीवनं यैरुपार्जितम् ॥

Colophon:

इति श्रीकाञ्चीपुरामात्यपुत्रदेवणाचार्यविरचितं कविकर्णभूषणं समाप्तम् ॥

(*c*) अन्योक्तिमाला.

ANYŌKTIMĀLĀ.

Foll. 29*b*—39*b*.

A collection of witty stanzas which, while conveying the ordinary meaning, impliedly convey another meaning also.

Incomplete.

Beginning:

सूर्यान्योक्तयः—

तस्यैवाभ्युदयो भूयाद्भानोर्यस्योदये सति ।
विकासभाजो जायन्ते गुणिनः कमलाकराः ॥

खद्योतो द्योतते तावद्यावन्नोदयते शशी ।
उदिते तु सहस्रांशौ न खद्योतो न चन्द्रमाः ॥

End:

बृहत्या गदया युक्तः सत्यभामासमन्वितः ।
भवांश्च भगवांश्चेति गतो भेदः परस्परम् ॥

(*d*) स्वरमेलकलानिधिः.

SVARAMĒLAKALĀNIDHIḤ.

Foll. 40*a*—55*a*. Fol. 44 is left blank.

A treatise on music: by Rāmāmātya, son of Timmāmātya of the Tōḍaramalla family. He was a minister of Rāmarāja of Vijayanagar and wrote this work at his instance in the year Sādharaṇa corresponding to Śaka 1473 (1550 A.D.). The work has been printed in Kumbakonam.

Incomplete.

Beginning:

श्रीरागैकनिधिर्गभीरललिताकारः स्वराप्तश्रुति-
ग्रामोदारपदैकतानविलसद्भक्तिप्रवीणावृतः ।
श्रीरङ्गप्रणयी सनातनसमुत्तालाभिरामक्रियो
नादब्रह्ममयः प्रसाधितरसो नारायणस्त्रायताम् ॥
पुरा पुराणो मुनिराविरासीन्मुरारिनाभीनलिनान्तरालात् ।
संगीतसारः किल सामवेदात् वेदान्तशास्त्रादिव तत्त्वबोधः ॥
अस्मादभूदत्रिरमुष्य नेत्रादमर्त्यबन्धुर्विधुराविरासीत् ।
यत्पादसङ्गादखिलाश्च गङ्गानद्योऽभवन्नर्मकृते पयोधेः ॥
अक्षीभवन् कुक्षिभवो मुरारेरादर्शयत्कारणकार्य(व्य)साध्या(ह्य)म् ।
कलानिधिर्योऽनवगीतरत्नाकरं च पुष्णाति कनत्प्रवालम् ॥
ततो बुधोऽभूत्तनयोऽस्य तस्मात् पुरूरवाः पुण्यकृदायुरस्मात् ।
ययातितातो नहुषोऽपि तस्य वंशे बभूवुर्भरतादयोऽन्ये ॥
एषां कुलालंकृतिरेष जज्ञे श्रीरङ्गनाथो जितराजराजः ।
तया सदाचार(दृशा) विविन्ते राजर्षिभावं रमितक्षमो यः ॥
तिम्माम्बिका तस्य बभूव देवी साध्वीजनानामिव या समष्टिः ।
सती यशोदा विनतानसूया सुदक्षिणा सत्यवती सुभद्रा ॥
तपोविशेषेण तयोरशेषराजाधिराजोऽजनि रामराजः ।
कन्याप्रदोऽस्मै स हि कृष्णरायः कन्यापितृत्वं बहुमन्यते स्म ॥

* * * *

यः खड्गै(:) सहितः सहानुजयुगो निर्गत्य विद्यापुरात्
लब्ध्वा गुत्तिगिरौ सदाशिवमहीपालं निरालम्बनम् ।
स्वामिद्रोहकृतः प्रतीपनृपतीन् निर्जित्य भद्रासने
कर्णाटे भग(व)निव ध्रुवमयं कीर्त्या सहास्थापयत् ॥

* * * *

तस्यानुजौ विश्रुततिम्मराजश्रीवेङ्कटाद्री भुवि रेजतुस्तौ ।
अजातशत्रोरभिजातवृत्तेर्भीमार्जुनौ भीमभुजाविवार्यौ ॥
अमुक्तपार्श्वद्वितयोऽनुजाभ्यां रामावतारो भुवि रामराजः ।
दिवानिशं दीव्यति शीतभानुदिनाधिपाभ्यामिव रत्नसानुः ॥
विजित्य सर्वानपि पारसीकान् रणेषु तत्कीर्तिपटच्चराणि ।
आधूय भूयो हरितो वधूटीः विशोभयत्येष यशोदुकूलैः ॥
श्रीरामयामात्यवरेण रत्नकूपा(टा)भिधं कारितमेष सौधम् ।
आलोकयन्निर्जितवैजयन्तं हर्षोद्धुरो विस्मितमानसोऽभूत् ॥

* * * *

अथासनस्थोऽन्तिकभाजमेनमधीतसंगीतकलारहस्यम् ।
श्रीरामयामात्यमिदं बभाषे श्रीरङ्गराजाधिपरानराजः ॥

* * * *

संगीतशास्त्रेषु मतान्तराणि सन्त्येव सारांशमुपाददानः ।
संगृह्य तल्लक्षणलक्ष्ययुक्तं संगीतशास्त्रे सरसं विधेहि ॥

* * * *

अचिराद्विरचय्याहं स्वरमेलकलानिधिम् ।
तमस्मै चोपदीकृत्य गम्यासं कृतकृत्यताम् ॥
सोऽयं संगीतसाहित्यलक्ष्मीदक्षिणनायकः ।
इत्थं निश्चित्य तं राममन्त्री वक्तुं प्रचक्रमे ॥
रामामात्यप्रणीतेऽस्मिन् स्वरमेलकलानिधौ ।
उपोद्घातप्रकरणं स्वरप्रकरणं ततः ॥
वीणाप्रकरणं चातो मेलप्रकरणं परम् ।
रागप्रकरणं चेति पञ्च प्रकरणानि हि ॥

End:

गानोपयोगिनां तालप्रबन्धानां तु लक्षणम् ।
रत्नाकरे शार्ङ्गदेवसूरिणा कथितं स्फुटम् ॥

गान्धर्वमखिलं चापि तत्रैव स्पष्टमीरितम् ।
तत एवावगन्तव्यं तस्मान्न कथितं मया ॥

शाके श(शु)क्रधराधराब्धिधरणीगण्येऽथ साधारणे
वर्षे श्रावणमासि निर्मलतरे पक्षे दशम्यां तिथौ ।
रामामात्यविनिर्मिता स्वरततेर्निर्मथ्य रत्नाकरं
सोऽयं मेलकलानिधिर्मतिमतामाकल्पमाकल्पताम् ॥

Colophon:

इति श्रीमदभिनवभरताचार्यवाग्गेयकारतोडरमल्लतिम्मामात्यनन्दन-रामामात्यनिर्मिते स्वरमेलकलानिधौ रागप्रकरणं पञ्चमं समाप्तिमगमत् ॥

(e) सङ्गीताध्यायः.

SAṄGĪTĀDHYĀYAḤ

Foll. 55a - 57b.

Similar to the above.

Breaks off in the second Āśvasa.

Beginning:

सप्तस्वरैः समस्तं यो जगदेतच्चराचरम् ।
संमोदयति विश्वात्मा स नो विष्णुः प्रसीदतु ॥

अथातः संप्रवक्ष्यामि सा . . . तु लक्षणम् ।
समीक्ष्य बहु संशोध्य गानशास्त्रविदां मतम् ॥

सप्त स्वरास्त्रयो ग्रामा एकविंशतिमूर्च्छनाः ।
ताना एकोनपञ्चाशदित्येतत्स्वरम . . . ॥

षड्जम(श)र्षभगान्धारा(रौ) मध्यमः पञ्चमस्तथा ।
दै(धै)वतश्च निषादश्च सप्तैते स्वराः स्मृताः ॥

* * * *

आमरी राक्षसी चैव स्वराणां योषितः स्मृता(:) ।
स्वराणां लक्षणं सम्यक् सोमनार्येण कीर्तितम् ॥

Colophon :

इति गीताध्याये प्रथमाश्वासः ॥

End :

स्वस्वापान्तश्रुतीत्येवं नियमो नारदान्मुनेः ।
प्रवर्तितः स्वर्गलोके श्रमो ह्येष महीपते ॥
मन्द्रादिषु चतुःषष्टिश्रुतयः क्रमशो भवेत् ।
क्रमात् ग्रामत्रये . . . . . ॥

Fol. 58 is blank.

(*f*) भिल्लकन्यापरिणयः.

BHILLAKANYĀPARIṆAYAḤ.

Foll. 59*a*—81*b*.

A work in verse and prose (Campukāvya) describing the alleged marriage between God Narasiṁha and Kanakāṅgī, the daughter of one Hēmāṅga, a chieftain of hunters.

Incomplete.

Beginning :

श्रीवक्राम्बुजदर्शनोत्सवदरस्मेरं पुरस्तान्नम
त्प्रह्लादाभयदानवाक्यचटुलं प्रान्तोच्चलत्केसरम् ।
दंष्ट्राकान्तिविचित्रकुण्डलरुचिप्रस्फीतगण्डस्थलं
देयान्मर्त्यहरेर्मुखाब्जमचिराच्छ्रेयांसि भूयांसि नः ॥
आलोक्यात्मकरस्थपुस्तकगतं ग्रन्थावलीनां चिरा-
देकैकं विगणय्य विस्फुटधिया भ्रान्ताक्षमालाच्छलात् ।
वीणावादनभव्यगानविधिना कीराय वक्तीव या
सान्तर्वाणिमियं करोतु मुदिता वाणी सदा मां श्रितम् ॥

* * * *

नित्यसानुचरदन्तिसमाजः खड्गशोभनकरः सुमनोभिः ।
भूम्यां पांसूनुद्धृत्य तैः कृष्णाजिने पुरुषाकृतिं कृत्वा मधुना सर्पिषा वा संसिच्य विधिना द(दा)हयेदिति विज्ञायते ।

* * * *

यमयज्ञं दिष्टगमनात्यन्त ।

(*b*) गौरीन्द्राणीपूजा.

GAURĪNDRĀṆĪPŪJĀ.

Foll. 13*a*—14*b*.

On the mode of worship of Pārvatī, Indrāṇī (Indra's wife) and other goddesses performed with a view to secure the longevity of married persons.

Incomplete.

Beginning:

प्राणानायम्य शुभे मुहूर्ते दम्पत्योरायुष्याभिवृद्ध्यर्थं गीरी[री)न्द्राणी-पूजां करिष्ये इति सङ्कल्प्य,

गौरी रमा शची मेधा सावित्री विजया जया ।
देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥

आवाहनादिषोडशोपचारपूजां कुर्यात् ।

End:

बृहत्सामेत्यस्य मन्त्रस्य कुत्स ऋषिः, रुद्रो देवता, त्रिष्टुप् छन्दः, मेधाविधारणे विनियोगः । बृहत्साम . . . सगरेण रक्ष । यस्य स्मृत्या तु ।

R. No. **379.**

Palm-leaf. 15½ × 1¼ inches. Foll. 30. Lines, 7 in a page. Grantha and Tamil. Slightly injured.

Purchased in 1911–12 from the Sarasvatī-Bhāṇḍāgāra of Triplicane.

रहस्यचरमश्लोकचन्द्रिका.

RAHASYACARAMAŚLŌKACANDRIKĀ.

This contains the successive chapters on the same subjects contained in two treatises, viz., Rahasyacandrikā and Caramaślōkacandrikā, written alternately. They treat of the differences in doctrine between the Vaḍagalai and the Tengalai sects of the Śrī-Vaiṣṇavas, the former work being by Pelāpūrdīkṣita and the latter by Śuddhasattvadāsa. It is noteworthy that the treatment of the subjects in the two works is so much alike that the language is identical except when they have to express a difference of opinion and have to support the same by quotations.

Incomplete.

Beginning:

रहस्यत्रयसारस्य प्रक्रिया तन्यते लघुः ।
पेलापूर्दीक्षितेनेयमुत्तमश्लोकचन्द्रिका ॥

प्रथमं श्रीमद्रहस्यत्रयसारश्रवण एव मोक्ष इति प्र(तिपा)द्यते तदनुसारेणैवोत्तमश्लोकनिर्णयः श्रेयस्कर इति वक्तुम् । तथाहि—उत्तारकरुचिपरिगृहीतार्थ एव प्रपन्नैः श्रेयस्कामैः उपादेय इ(त्यत्र स)र्वेषामविवादः । वचनानि च भवन्ति—

'को धर्मः सर्वधर्माणां भवतः परमो मतः ॥'
'एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ॥'

इत्यादीनि । तत्र द्वयोपदेष्टैव उ(त्तारकः) । न हि द्वयोच्चारणमेव वा द्वयमेव वा उत्तारकम्, द्वयस्याभावार्थत्वेनाफलजनकत्वात्, फलाजनकस्य चाकरणात् ।

* * * *

Colophon:

इति रहस्यचन्द्रिकायां द्वयोपकारकत्वप्रकाशिका नाम प्राथमिकी कला संपूर्णा ॥

श्रीमद्वचनभूषायाः प्रक्रिया तन्यते लघुः ।
शुद्धसत्त्वाख्यदासेन चरमश्लोकचन्द्रिका ॥

प्रथमं श्रीवचनभूषणश्रवणवतामेव मोक्ष इति प्रतिपाद्यते तदनुसारेणैव चरमश्लोकार्थनिर्णयः श्रे(यस्क)र इति वक्तुम् ।

* * * *

Colophon:

इति चमरश्लोकचन्द्रिकायां मन्त्ररत्नोत्तारकत्वप्रकाशिका नाम प्राथमिकी कला संपूर्णा ॥

* * * *

इति चरमश्लोकचन्द्रिकायां मन्त्ररत्नविधायकत्वप्रकाशिका नाम द्वितीया कला ॥

* * * *

इति रहस्यचन्द्रिकायां द्रमिडोपनिषदां केवलश्रुत्यर्थत्वप्रकाशिका नाम तृतीया कला ॥

* * * *

इति चरमश्लोकचन्द्रिकायां द्रमिडोपनिषद्विधायकत्वप्रकाशिका नाम तृतीया कला ॥

* * * *

इति रहस्यचन्द्रिकायां शारीरकरहस्यतात्पर्यग्रहत्वप्रकाशिका नाम चतुर्थी कला ॥

* * * *

इति चरमश्लोकचन्द्रिकायां द्रमिडोपनिषद्रहस्यविवरणत्वप्रकाशिका नाम चतुर्थी कला ॥

* * * *

इति रहस्यचन्द्रिकायां रहस्यत्रयसारोत्तारकत्वप्रकाशिका नाम पञ्चमी कला ॥

* * * *

इति चरमश्लोकचन्द्रिकायां श्रीवचनभूषणोत्तारकत्वप्रकाशिका नाम पञ्चमी कला ॥

* * * *

इति रहस्यचन्द्रिकायां त्यागविधौ अनुष्ठानविरोधप्रकाशिका नाम षष्ठी कला ॥

* * * *

इति चरमश्लोकचन्द्रिकायां त्यागानुवादे आज्ञाकैङ्कर्यहानिप्रदर्शिका नाम षष्ठी कला ॥

* * * *

इति रहस्यचन्द्रिकायां त्यागविधौ गद्यत्रयोक्तिविरोधप्रदर्शिका नाम सप्तमी कला ॥

End:

इति चरमश्लोकचन्द्रिकायामनुवादपक्षे त्रिविधविकल्पापत्तिप्रकाशिका नाम अष्टमी कला ॥

अथ वाक्यभेदापत्तिः प्रतिषिध्यते—तत्रैवं पूर्वपक्षवादी मन्यते यदि ह्यत्र परित्यज्येति प्रतिषेधः स्यात् ततो वाक्यभेदः स्यात् ।

* * * *

नाप्यन्वयमात्रं विधीयते । स्थानापत्त्या कस्यचित् पदस्य विधानन पदान्तरनिषेधप्राप्तिसंभवेऽपि एवकारोपब ।

R. No. **380.**

Palm-leaf. 18¼ × 1¼ inches. Foll. 161. Lines, 10 in a page. Telugu. Slightly injured.

Purchased in 1911–12 from C. Viśvanātha Śāstrigal of Vizianagaram.

(*a*) जीवन्मुक्तिविवेकः.

JĪVANMUKTIVIVĒKAḤ.

Foll. 1*a*—48*a*. Fol. 48*b* is left blank.

Same work as the one described under No. 4579 of the D.C.S. MSS., Vol. IX.

Complete.

The scribe gives the date of transcription and his name:

वृषनामसंवत्सरे माघमासे शुद्धाष्टम्यामिन्दुवासरे श्रीरामयोगीश्वर-स्वामि . . . . नां जीवन्मुक्तिप्रकरणं लिखित्वा अ. ति. नरसिंहभट्टेन समर्पितम् ॥

(*b*) उपदेशसाहस्री—सव्याख्या.

UPADĒŚASĀHASRĪ: WITH COMMENTARY.

Foll. 49*a*—161*a*. Fol. 161*b* is left blank.

The text is the same as that of the work described under No. 4565 of the D.C.S. MSS., Vol. IX, but the commentary here is by Ānandajñāna, a disciple of Śuddhānanda.

Complete.

End:

विशेषश्चात्मनोऽद्वयत्वविषयाणां द्वयस्यासत्त्वार्थानि च सर्वाण्युपनिषद्वाक्यानि पौनःपुन्येनालोचयितव्यानीत्याह—आत्मनश्चाद्वयत्वविषयाणि द्वयस्यासत्त्वार्थानि च सर्वाण्युपनिषद्वाक्यानि विस्तरशः समीक्षितव्यानि समीक्षितव्यानीति । अभ्यासो ग्रन्थस्य गद्यपद्यात्मनः समाप्तश्चर्थः ॥

परिसंख्याप्रकरणं समाप्तम् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य[स्य]गोविन्दभगवत्पूज्यपादशिष्य-[स्य]श्रीमच्छङ्करभगवत्पूज्यपादकृतमुपदेशसहस्रिकाख्यं प्रकरणं समाप्तम् ॥

उपदेशसहस्रीयं गद्यपद्यमयी मया ।
व्याकृता व्याकृताप्यन्यैर्मन्दानुग्रहसिद्धये ॥

व्याक्रियासत्क्रिया सेयं कुर्व(रु)ता(त्) शम(र्म)निर्मलम् ।
कृतानां कृतविद्यानामाश्रिता पुरुषोत्तमम् ॥

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दभगवत्पूज्यपादशिष्य[स्य]-भगवदानन्दज्ञानकृता श्रीमदुपदेशसहस्रिकाटीका समाप्ता ॥

यत्पादाम्बुजचञ्चरीकधिषणानिर्वाणदुर्गादिगा-
पङ्क्तिर्मुक्तिनिसर्गदुर्गदुरितावाचंमया(यमा)नामियम् ।
यस्मिन्नित्यमियं शमादि समभूद्बोधाङ्कुरो मे यतः
शुद्धानन्दमुनीश्वराय गुरवे तस्मै परस्मै नमः ॥

The scribe gives the date and his name of transcription:

वृषनामसंवत्सरे फाल्गुनमासे . . . श्रीपरमहंसपरिव्राजकाचार्याणामखण्डसच्चिदानन्दनित्यपरिपूर्णानां सिंहगिरिगुहानिवासिनां श्रीरामयोगीन्द्रस्वामिनामुपदेशसहस्रिका नाम पुस्तकं अ. ति. नरसिंहभट्टेन लिखित्वा वेङ्कटेश्वरार्पितं दत्तवान् ॥

R. No. **381.**

Palm-leaf. $15\frac{1}{8} \times 1\frac{1}{2}$ inches. Foll. 60. Lines, 7 in a page. Telugu. Slightly injured.

Purchased in 1911–12 from C. Viśvanātha Śāstrigaḷ of Vizianagaram.

काव्यप्रकाशिकाव्याख्या—ऋजुवृत्तिः.

KĀVYAPRAKĀŚIKĀVYĀKHYĀ: ṚJUVṚTTIḤ.

A commentary on the Kārikā portion of Kāvyaprakāśikā, a well-known work on poetics and rhetoric by Mammaṭa: by Narasiṁhasūrin, son of Timmāji Mantrin and grandson of Raṅgaprabhu of Vellamakoṇḍa family.

Ullāsas one to three, complete; fourth, incomplete.

Beginning:

कान्ते साग(द)रवीक्षिते विवलितग्रीवं समीपं गते
रोमाञ्चश्रमवारिगोपनचणं वक्रोक्तिसंभाषिणि ।

सश्वासं शपथोद्यमे धृतरुते भ्रूभङ्गि चालिङ्गिनि
व्यामोहस्थिरतारकं विजयते सात्राजितीचेष्टितम् ॥

श्रीमद्वेल्लमुकोण्डवंशजलधेरासीद्यशःकौमुदी-
धौताशेषजगत्तमाः शुचिरुची रङ्गप्रभुश्चन्द्रमाः ।
तत्सूनुर्गुणरत्नरोहणगिरिः शास्त्रप्रवीणो बुधः
श्रीमानर्थिसुरद्रुमो विजयते तिम्माजिमन्त्रीश्वरः ॥

तस्यास्मि सूनुरमलप्रतिभश्च दृश्यश्रव्यप्रबन्धरचनाचतुरः कलावान् ।
वक्ता मृदूक्तिभिरलंकृतदर्शनानां कर्ता पुनः कृतिकृते नरसिंहनामा ॥

काव्यप्रकाशिकोक्तानि सूत्राणि स्फुटमुद्धरन् ।
कारिकारूपिणां तेषामृजुवृत्तिं करोम्यहम् ॥

इह तावत्प्रारिप्सितकाव्यमीमांसाशास्त्रनिष्प्रत्यूहपरिपूरणाय कविभारतीमेवैतच्छास्त्रप्रतिपाद्यतया प्रस्तुताभिमतत्वेन समुचितेष्टदेवतां मन्वानस्तत्प्रणामलक्षणं मङ्गलं व्यञ्जनामुखेन कविर्दर्शयति—नियतीति । कवेर्भारती जयति सर्वोत्कर्षेण वर्तते । निर्मितिं निर्माणमादधती । कीदृग्विधां तां नियम्यतेऽनेनेति नियतिः, कमलत्वादिसामान्यं तया कृतो यो नियमस्तेन रहिताम् । मुखादेः कमलत्वादिना ताद्रूप्यरूपणादिति भावः ।

End:

रसप्रतीतिस्थले च वक्राद्यौचित्याभावेन गुणपारतन्त्र्यस्याविकलत्वात् ॥

Colophon:

इति श्रीनरसिंहसूरिविरचितायां काव्यप्रकाशिकामूलसूत्रव्याख्यायामृजुवृत्तिसमाख्यायां तृतीय उत्साहः समाप्तः ॥

गुणे निरूपिते अलंकाराः प्राप्ता इति अवसरसंगत्या अलंकारे निरूपणीये शब्दार्थयोर्मध्ये.

* * * *

अन्यथा अन्यप्रकारेण योज्यत इति सा ।

R. No. **382.**

Palm-leaf. 17⅛ × 1⅜ inches. Foll. 227. Lines, 6 in a page. Telugu. Good.

Purchased in 1911–12 from C. Viśvanātha Śāstrigaḷ of Vizianagaram.

प्रायश्चित्तसुधानिधिः.

PRĀYAŚCITTASUDHĀNIDHIḤ.

Same work as the one described under No. 3490 of the D.C.S. MSS., Vol. VII, the end being different.

Breaks off in Durgādānapaddhati.

End:

ध्यानम्—

खड्गत्रिशूलपाणिं च वरदाभयसंयुताम् ।
हरा(हार)ग्रैवेयमकुटीरत्नताटङ्कभूषिताम् ॥
दिव्याम्बरावृतां देवीं महिषोपरि संस्थिताम् ॥

R. No. **383.**

Palm-leaf. 15½ × 1⅜ inches. Foll. 53. Lines, 7 in a page. Telugu. Slightly injured.

Purchased in 1911–12 from C. Viśvanātha Śāstrigaḷ of Vizianagaram.

The first five leaves are left blank.

(*a*) जैमिनिसूत्राणि.

JAIMINISŪTRĀṆI.

Foll. 6*a*—10*b*.

A treatise on astrology and horoscopy; by Jaimini. Same work as the one described under R. No. 371(*g*) *ante*.

Breaks off in the first Pāda of the second Adhyāya.

Beginning

उपदेशं व्याख्यास्यामः—अभिपश्यन्ति ऋक्षाणि । पार्श्वभे च (तन्निष्ठाश्च तद्वत् ।) दारभाग्यशूलस्थार्गलानि ध्यातुः । कामस्था तु भूयसा पापानाम् ।

End:

गोपनमन्येभ्यः । शुभवर्गेऽपवादमात्रम् । द्विग्रहे कुलमुख्यः ॥

Colophon:

इति श्रीजैमिनीये योगाध्यायस्य चतुर्थः पादः ॥ अध्यायश्च समाप्तः प्रथमः ॥

आयुः पितृदिनेशाभ्याम् । प्रथमयोरुत्तरयोर्वा दीर्घम् । . . . . . प्राणिनि शुभदृष्टे रुद्रशूलान्तमायुः । तत्रापि शुभयोगे ।

(*b*) जैमिनिसूत्रवृत्तिः.

JAIMINISŪTRAVṚTTIḤ

Foll 11*a*—53*b*.

This is a commentary on the work of Jaimini described above: by Bālakṛṣṇānandasarasvatī, who salutes, in the introductory stanzas, Gōpālānanda, Svayamprakāśa and Śrīdhara.

Breaks off in the first Pāda of the second Adhyāya.

Beginning:

वन्दामहे महीयांसमंसलम्बिजटाधरम् ।
यत्कङ्कणझणत्कारराव: शब्दा . . ॥
भावयानो हृदि श्रीमद्गोपालानन्ददेशिकान् ।
श्रीमत्स्वयंप्रकाशार्यान् श्रीश्रीधरगुरूनपि ॥
सम्यग्व्यञ्जयितुं समस्तजगतां कर्मानुरूपं फलं
संपूर्णानि विचित्रभावनिचयैर्नाना(विधान्या)तनोत् ॥
सूत्राणि स्फुरिताखिलर्षिहृदयान्यालोक्य योऽसौ मुनिः
सोऽयं नः पुरतः सदा विजयतां नाम्ना मुनिर्जैमिनिः ॥

उपदेशमित्यादि जैमिनीयं सूत्रनिकरमयं जातकम् । तस्याल्पग्र-(न्थत्वा)द्विवृतिरारभ्यते । उपदेशं व्याख्यास्यामः । उपदिश्यत इत्युप-देशः रहस्यार्थः कर्मानुरूपेण शुभाशुभसूचनप्रकारः तं व्याख्यास्यामो विशेषेण निरूपयिष्याम इति प्रतिज्ञासूत्रम् ।

End:

द्विग्रहे कुलमुख्यः । यत्र क्वापि द्विग्रहयोगे सति कुलमुख्यो भवति । इदमुपलक्षणम्, शास्त्रान्तरोक्तानां त्रिग्रहादियोगानामन्येषां नाना-विधानां तत्तत्फलानां चेति वेदितव्यम् ।

Colophon:

इति श्रीबालकृष्णानन्दसरस्वतीविरचितायां जैमिनीयसूत्रवृत्तौ यो-गाध्यायस्य चतुर्थः पादः ॥ प्रथमोऽध्यायश्च समाप्तः ॥

अध्या(था)युर्दायोपायं दर्शयति—आयुः पितृदिनेशाभ्याम् ।

* * * *

रुद्रशूलान्तायुर्दायहेतौ समुत्कर्षं कंचन दर्शयति—तत्रापि शुभ-योगे ।

R. No. **384.**

Śrītāla. 11½ × 2 inches. Foll. 125. Lines, 9 in a page. Kanarese. Good.

Purchased in 1911–12 from G. Śrīnivāsa Rao of Mysore.

(*a*) कविराक्षसीयम्.

KAVIRĀKṢASĪYAM.

Foll. 1*a*—7*b*.

A collection of 105 stanzas on seven subjects mentioned in the second stanza quoted below In the two stanzas found at the end of the commentary on this work described under (*b*) below, it is stated that Giriyappa collected together the stanzas of Kavirākṣasa.

Complete.

Beginning:

सत्प्रभुपद्धतिः—

त्रयीयुवतिसीमन्तसीमासिन्धू(न्दू)रबन्धवः ।
संसाराब्धिं पि(प)चेयुर्वः कंसारेः पादपांसवः ॥
सत्प्रभुदुष्प्रभुसज्जनदुर्जनसद्विप्रदुर्द्विजस्त्रीणाम् ।
पद्धतयोऽत्रोच्यन्ते श्लिष्टोपमया सपञ्चशतपद्यैः ॥
सुपार्थिवैश्च पद्मैश्च सर्वतोमुखभूतिभिः ।
प्रसारिते मित्रकरे त्यज्यन्ते कोशसंपदः ॥

End:

पितृपत्यभिगुप्तापि यालङ्कापथसङ्गिनी ।
सर्वदे(दै)वक्रियानर्हा सा स्त्री दिगिव दाक्षिणा ॥

Colophon:

इति स्त्रीजनपद्धतिः संपूर्णा ॥ समाप्तमिदं क(ा)विराक्षसम् ॥

(*b*) कविराक्षसीयम्—सव्याख्यानम्.

KAVIRĀKṢASĪYAM: WITH COMMENTARY.

Foll. 8*a*—60*b*.

A commentary on the work described above: by Nāgaṇa, son of Dēvaṇārādhya of Bhāradvājagōtra.

Complete.

Beginning:

सरस्वतीभूतिविजृम्भणाय सरस्वतीं तां शरणं भजामः ।
यस्याः कटाक्षक्षणवीक्षणेन भवन्ति मूका अपि वावदूकाः ॥
वंशाद्भरद्वाजमुनेः प्रसूतः स देवणाराध्यव(म)नीषिवर्ग(र्य)ः ।
तस्माद्धि जज्ञे जलधेरिवेन्दुर्विशुद्धधीर्नागणनामधेयः ॥
न विद्यते यद्गणनाथ तस्य देवद्विजात्यर्थबहुव्ययेषु ।
प्रजान्तकः(नतः) सार्थकनामधेयं तं नागणाख्यं सुधियो वदन्ति ॥

स(अ)पूर्वमेतद्विदुषा न केन व्याख्यायि काव्यं कविराक्षसीयम् ।
तस्माच्छिशूनां सुखबुद्धये तद्व्याकर्तुमाकाङ्क्षति संविविच्य ॥

इह खलु कविः काव्यादौ आलङ्कारिकोक्तेषु प्रबन्धमू(मुख)लक्षणेषु आशीर्नमस्क्रियावस्तुनिर्देशेषु अन्यतमस्य वियैत(धेयतया) प्रारिप्सितग्रन्थस्याविघ्नपरिसमाप्त्यादिप्रयोजनाय च सकलदेवतात्मकं श्रीकृष्णं भगवन्तं कीर्तयन्नाशिषं प्रयुङ्क्ते—

त्रयीयुवतिसीमन्तसीमासिन्दूरबन्धवः ।
संसाराब्धि पि(प)चेयुर्वः कंसारेः पादपांसवः ॥

कंसारेः वासुदेवस्य पादपांसवः चरणरेणवः वो युष्माकं संसरत्यनुवर्तते ऽस्मिन्निति संसारः, संसारः अब्धिरिवेत्युपमितसमासः ; सागरस्येव संसारस्य दुस्तरत्वादिवति भावः ।

End:

अत एव सर्वस्यां दैवतक्रियायां दैवतकर्मणि यज्ञादौ अनर्हा अयोग्या भवति । सङ्गिनीति । किंच सर्वस्यां दैवतक्रियायां यज्ञादौ कर्मण्यनर्हा, पित्र्ये कर्मण्येव दक्षिणादिशः प्राशस्त्यादिति भावः । साप्येवंविधा भवति ॥

Colophon:

इति कुस्त्रीपद्धतिः ॥ कविराक्षसीयः समाप्तः ॥
गिरियप्प(प्पोतिविख्यात)नामान्तर्वाणिमन्त्रिणा ।
कविराक्षसपद्यानि विशीर्णानि भृशं पुरा ॥
षट्पद्धतिक्रमेणैव संशोध्य विबुधैः सह ।
कृतानि तानि विदुषां तुष्टयै सर्वहिताय च ॥

Foll. 61 is left blank.

(c) वृत्तरत्नाकरः—सव्याख्यः.

VṚTTARATNĀKARAḤ: WITH COMMENTARY.

Foll. 62*a*—125*b*.

Same work as the one described under No. 1794 of the D.C.S. MSS., Vol. III.

Complete.

R. No. **385.**

Palm-leaf. 15¾ × 1½ inches. Foll. 51. Lines, 5 in a page. Telugu. Good.

Purchased in 1911–12 from C. Viśvanātha Śāstrigaḷ of Vizianagaram.

कविराक्षसीयम्--सव्याख्यानम्.

KAVIRĀKṢASĪYAM : WITH COMMENTARY.

Foll. 1*a*—49*b*.

Same work as the one described under No. 384(*b*) *ante*. The stanzas are commented on in a different order. The commentary is called Śliṣṭārthadīpikā.

Complete, but wants beginning.

Colophon :

इति श्रीभगवन्महेश्वरस्य देवणाराध्यस्य सूनु(ना) नागणार्येण विरचिता कविराक्षसश्लोकशतकटीका श्लिष्टार्थदीपिकासमाख्या समाप्ता ॥

साक्षरेषु भवतीह जगत्यां सर्व एव हृदि मत्सरयुक्ताः ।
साक्षरं कविजनेषु यदेनं लोक एष कविराक्षसमाह ॥

असारापि मम व्याख्या क्वचित् ग्राह्या भविष्यति ।
तृणमप्युपकाराय दण्डनिष्कषणादिषु ॥

Foll. 50 and 51 contain the horoscopes of the first son and the daughter of Dantulūri Nārāyaṇa Gajapatirājulu.

R. No. **386.**

Palm-leaf. 15¾ × 1¼ inches. Foll. 110. Lines, 9 in a page. Telugu. Slightly injured.

Purchased in 1911–12 from C. Viśvanātha Śāstrigaḷ of Vizianagaram.

The first two leaves are left blank.

(*a*) परमशिवाद्वैतकल्पलतिका.

PARAMAŚIVĀDVAITAKALPALATIKĀ.

Foll. 3*a*—100*a*. Fol. 100*b* is left blank.

A treatise in support of the view that Śiva is the Supreme Brahman: by Śāmbhavānandanātha.

Almost complete.

Beginning:

रागद्वेषविहीनानां शास्त्रसंदिग्धचेतसाम् ।
निजरूपावबोधाय मदीयो ह्येष उद्यमः ॥

यद्वार्विय(?)जनचित्तचमत्क्रियार्थ-
मत्रोद्यमोऽयमुदितोऽस्तु तदैतदास्ताम् ।

संक्षेपविस्तरविभागविविक्तशोभः
पुष्पाञ्जलिर्जयति वाङ्मय एष शम्भोः ॥

विश्वोत्पत्तिविपत्तिभूः स भगवानत्र प्रवक्ता शिवः
तस्याहं प्रतिशब्दपर्वतगुहा यन्मे न गर्वग्रहः ।

तद्दोषोऽस्तु गुणोऽस्तु वा न खलु तत् स्वायत्तमित्थं स्थिते
मात्सर्यं महतामुदेतु यदि वा वात्सल्यमुज्जृम्भताम् ॥

इह खलु निखिलजनाभिलषणीयः पुरुषार्थश्चतुर्विधः पुरुषैरर्थ्यते प्रार्थ्यत इति धर्मार्थकाममोक्षभेदेन ।

End:

अधीताः सकला वेदा इत्यादिवाक्यजातं श्रुत्वा तुतोष सन्तोषमाप। मतिमतां श्रेष्ठः सुमन्तो! आलोच्यकारिणा विचार्य प्रश्नादिकं कुर्वता त्वया सोऽहं साधु पृष्टोऽस्मि। एतत् त्वया पृष्टं केन चिन्त्यत इति काका न केनापि इति। अतः सन्तोषपूर्वकं सर्वसामरस्यस्वरूपं सम्यगुपदिशत इति पूर्वपक्षः ।

Colophon:

इति श्रीद्वैताद्वैतसमरसविलासब्रह्मविद्याचार्यश्रीशाम्भवानन्दनाथ-विरचितायां श्रीपरमशिवाद्वैतकल्पलतिकायां पूर्वपक्षरूपप्रश्नविवृतिः समाप्ता ॥

उपदेशमाह—

कर्मज्ञान(वतां पुंसां)यदैकात्म्यं प्रकाशते ।
त्वत्स्वरूपमिति ज्ञात्वा स्थिरीभव सुखी भव ॥

* * *

प्राणान् धारयन् लौकिकवत् वर्तमानो जीवन्मुक्तश्च भवेति देहान्ते परमशिवभट्टार एवेति अलमतिरहस्योन्मीलनेन । यथा कथ्यते—

'यत्ते देवि तृतीयबीजमम(ल)ज्वालावकीर्णं निभं
सर्वाधारतुरीयशक्तिपरमब्रह्माभिधाशब्दितम् ।
मूर्धन्यान्तविसर्गभूषितमहौकारापराभास्वरं
सच्चिद्रूपमनन्यतुल्यमहिम स्वान्ते मम द्योतताम् ॥' इत्यादि ।

एवं निखिलमन्त्राणामर्थव्याप्तिरुक्ता । यथोक्तं वृद्धवासिष्ठे—गायत्रीमन्त्रार्थः कथ्यते

* * *

एवमुपायत्रयमुपदिश्य इदानीं पूर्वोक्तमुपसंहरन् उपदेशसमाप्तिं दर्शयति—

स एव सिद्धः स च सिद्धरूपः स एव बुद्धः स च बुद्धरूपः ।
स एव शक्तिः स च शक्तिरूपः स एव नाम्ना स च मञ्जुनाथः ॥

इति ।

(*b*) बगलामुखीकवचम्.

BAGALĀMUKHĪKAVACAM.

Foll. 101*a*—102*b*.

Same work as the one described under No. 6703 of the D.C.S. MSS., Vol. XIII.

Complete.

Colophon:

इति श्रीरुद्रयामिले बगलावीरतन्त्रे महोग्रभैरवसंवादे षट्त्रिंशदक्षरी-प्रस्तारे बगलामुखीकवचं संपूर्णम् ॥

(*c*) किरातवाराहीमन्त्रः.

KIRĀTAVĀRĀHĪMANTRAḤ.

Foll. 103*a*—104*b*.

The work is written twice over.

Same work as the one described under No. 6082 of the D.C.S. MSS, Vol. XIII.

Complete.

Fol. 105*a* gives the manner of using the Mantra, and fol 105*b* is left blank.

(*d*) चिदम्बरपञ्चचामरस्तोत्रम्.

CIDAMBARAPAÑCACĀMARASTŌTRAM.

Foll. 106*a*—107*a*. The remaining foll. are left blank.

In praise of Śiva as worshipped in the sacred shrine at Cidambaram. The hymn consists of eight stanzas in the Pañcacāmara metre. By a disciple of Cidambaraguru

Complete.

Beginning:

कथं च काननप्रियं चिदम्बया विहारिणं
मदेभकुम्भगुम्भितस्वडिम्भलालनोत्सुकम् ।
सदम्बकामखण्डसंसदम्बुवाहिनीधरं
हृदम्बुजे जगद्गुरुं चिदम्बरं विभावये ॥

End:

चिदम्बराख्यसद्गुरोरिदं सदा विलासिनं
मुदा लिखन्ति ये सकृत् सदोपमानमष्टकम् ।

सदा पठेत्तदालये हरिप्रिया तदानने
विधिप्रिया च निश्चला जगद्गुरोरनुग्रहात् ॥

R. No. **387.**

Palm-leaf. 17¾ × 1⅛ inches. Foll. 186. Lines, 6 in a page. Telugu. Much injured.

Purchased in 1911–12 from the Sarasvatī-Bhāṇḍāgāra of Triplicane.

The first four leaves are left blank.

(*a*) सिद्धान्तसारः.

SIDDHĀNTASĀRAḤ.

Foll. 5*a*—27*b*.

A short treatise giving the substance of the Viśiṣṭādvaita view of the Vēdānta. The author of all the works described in the various sub-divisions under this number is Kandāḍai Appakoṇḍācārya, son of Appalārya and Lakṣmī and a disciple of Dharmapurīśa and Raṅgēśa. He is said to have composed 60 works in all.

Complete.

Beginning:

वन्दे महाश्वशिरसः परमस्य पुंसो
व्यासस्य लक्ष्मणमुनेश्च पदाब्जयुग्मम् ।
वेदान्तदेशिकशिरोमणिवेङ्कटेश-
रङ्गेशसद्गुरुनृसिंहगुरूत्तमानाम् ॥
सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते ।
वेदाच्छास्त्रं परं नास्ति न दैवं केशवात्परम् ॥
अणुभ्यश्च महद्भ्यश्च शास्त्रेभ्यः कुशलो नरः ।
सर्वतः सारमादद्यात् पुष्पेभ्य इव षट्पदः ॥
अनन्तशास्त्रं बहु वेदितव्यमल्पश्च कालो बहवश्च विघ्नाः ।
यत्सारभूतं तदुपाददीत हंसो यथा क्षीरमिवाम्बुमिश्रम् ॥
यथा—

असारमल्पसारं च सारं सारतरं त्यजेत् ।
भजेत्सारतमं शास्त्रे रत्नाकर इवामृतम् ॥

नानोपनिषदो यत्नादभ्यसेन्मुक्तिहेतुकैः । इत्यादिप्रमाणप्रसिद्धभगवत्परसारतमभूतवेदान्तजातं वैदिकेन सततमधीतिबोधाचर(ण)प्रचारणगोचरं कर्तव्यम् ।

End:

दृष्टेऽपह्नुत्यभावादनुमितिविषये लाघवस्यानुसारा-
च्छास्त्रेणैवावसेये विहतिविरहिते नास्तिकत्वप्रहाणात् ।
नाथोपज्ञं प्रवृत्तं बहुभिरुपचितं यामुनेयप्रबन्धै-
स्त्रातं सम्यग्यतीन्द्रैरिदमखिलतमःकर्शनं दर्शनं नः ॥
प्रणामं लक्ष्मणमुनिः प्रतिगृह्णातु मामकम् ।
प्रसाधयति यत्सूक्तिः स्वाधीनपतिकां श्रुतिम् ॥
इति विद्यातपोयोनिरयोनिर्विष्णुरीडितः ।
वाग्यज्ञेनार्चितो देवः प्रीयतां मे जनार्दनः ॥

Colophon:

इति श्रीहयग्रीवावतारभगवद्भाष्य(कारा)कारवेदान्ताचार्यकृपायत्तसत्ताकस्य कन्दाडअप्पगोण्डाचार्यस्य कृतिषु सिद्धान्तसारः संपूर्णः ॥

(*b*) मानवोल्लासः.

MĀNAVŌLLĀSAḤ.

Foll. 28*a*—43*b*.

A treatise supporting the superiority of Manusmṛti over other Smṛtis: by the same author as of the above.

Complete.

Beginning:

अस्मद्गुरुप्रभृतिसर्वगुरून् विशेषात् रामानुजं मुनिवरं शठवैरि(णं च) ।
. . . . सैन्यनाथं लक्ष्मीं रमासहचरं प्रणमामि मूर्ध्ना ॥

अव्यान्नारायणोऽस्मान्मनुनुतचरितः सर्ववेदान्तवेद्यः
ब्रह्मेशानादिहेतुः प्रकृतिमहदहंकारभूतादिदेहः ।
सृष्ट्वा संरक्ष्य विश्वं निरवधिकदयादुग्धसिन्धुः स बन्धुः
कारागारादितुल्यासुखभुवनहरः क्रीडते यः सुक(खा)ब्धिः ॥
ततः स्वयंभूर्भगवान् अव्यक्तो व्यञ्जयन्निदम् ।
महाभूतो निवृत्तौजाः प्रादुरासीत् तमोनुदः ॥

इत्यादिभिः घोरसंसारक्षयरोगभव्यदिव्यभेषज . . . .

अत्रेयं मानवसप्तश्लोकी—

आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ॥
ततः स्वयंभूर्भगवानव्यक्तो व्यञ्जयन्निदम् ।
महाभूतो निवृत्तौजाः प्रादुरासीत् तमोनुदः ॥

End:

'मनुस्मृतिविरुद्धा तु या स्मृतिः सा न शस्यते ।'

'धर्मशास्त्रेषु मानवम्' इत्यादिस्मृत्या प्रत्यक्षश्रुत्या च संस्तूयमानदिव्यमहिमा भगवान् मनुः सकलवेदवेदान्तसंरक्षणाय स्मृतिशिरोमणिं चकार । तन्निर्णयानुसारेणैव श्रीपराशरादयोऽपि विष्णुपुराणादींश्चक्रुः । मायिशैवप्रमुखाखिलकुदृष्टिविप्लावितं मनुस्मृत्याद्युपबृंहणजातमुपबृंहणीयश्रुतिजातं च भगवता भाष्यकारेण सम्यक् संरक्षितम् ।

तस्मै रामानुजार्याय नमः परमयोगिने ।
यः श्रुतिस्मृतिसूत्राणामन्तर्ज्वरमशीशमत् ॥
इति विद्यातपोयोनिः . प्रीयतां मे जनार्दनः ॥
मन्वाद्युल्लासकृद्भाष्य . . . . . ।
अप्पगोण्डकृता जीयान्मानवोल्लाससत्कृतिः ॥

Colophon :

इति श्रीहयग्रीवावतारभगवद्भाष्य(कारा)कारवेदान्ताचार्यकृपायत्तसत्ताकस्य कन्दाडअप्पगोण्डाचार्यस्य कृतिषु मानवोल्लासः संपूर्णः ॥

(c) तत्त्वनिर्णयः.

TATTVANIRṆAYAḤ.

Foll. 43*b*—58*a*.

A work, the aim of which is to prove that Viṣṇu is the Supreme Brahman: by the same author as of the above.

Complete.

Beginning :

अवतु जगदशेषप्रोद्भवानुप्रवेश-
स्थितिनियमनसत्तारक्षणान्तादिलीलः ।
प्रकृतिपुरुषकालाव्यक्तयुक्ताद्यधीशः
तुरगवदनविष्णुस्तुर्यमूर्तिः शिवाख्यः ॥

अखिलभुवनजन्मस्थेमभङ्गादिलीलत्वं परब्रह्मणो लक्षणमिति श्रुतिस्मृतीतिहासपुराणागमसूत्रवृत्त्यादिसर्वप्रमाणप्रसिद्धम् । उत्पत्तिस्थितिलयाः प्रत्येकं त्रिविधा भवन्ति—प्राकृतसृष्टिः, नैमित्तिकसृष्टिः, नित्यसृष्टिश्चेति उत्पत्तिस्त्रिविधा ।

End :

न वेदवेदान्तगणैर्विचित्रैः स्मृतीतिहासैश्च पुराणवर्गैः ।
न ब्रह्मसूत्रैर्भगवत्प्रबन्धैर्मुक्तेशभेदः प्रतिपाद्यतेऽसौ ॥
श्रुतप्रकाशिकाचार्यप्रमुखानखिलान् गुरून् ।
वन्दे यत्कृपया ब्रह्मतत्त्वज्ञानं ममाप्यभूत् ॥
श्रीमद्धर्मपुरीशाख्यदेशिकेन्द्रमुपास्महे ।
यत्प्रभावात्पशुप्राया वयमप्यात्मविन्मताः ॥
इति विद्यातपोयोनिः . . प्रीयतां मे जनार्दनः ।

अप्पलार्यः पिता यस्य माता लक्ष्मीर्गुणोत्तरा ।
तेनाप्पगोण्डगुरुणा कृतोऽयं तत्त्वनिर्णयः ॥

Colophon:

इति श्रीहयग्रीवावतारभगवद्भाष्य(कारा)कारवेदान्ताचार्यकृपायत्तसत्ताकस्य कन्दाडअप्पगोण्डाचार्यस्य कृतिषु तत्त्वनिर्णयः संपूर्णः ॥

(*d*) कुदृष्टिभङ्गः.

KUDṚṢṬIBHAṄGAḤ.

Foll. 58*a*—69*b*.

A condemnation of those systems of religion which, though accepting the authoritativeness of the Vēdas, are still opposed to the Viśiṣṭādvaita system: by the same author as of the above.

Complete.

Beginning:

श्रीमन्त्रय्यन्तराद्धान्तगुरुप्रमुखदेशिकान् ।
वन्दे यत्कृपया सर्वशास्त्रार्थोद्बोध आगतः ॥
मायावी यादवार्कावपि च शितिगलो माध्वहैरण्यगर्भौ
सांख्यो योगी च मीमांसक इह च कणादोऽपि नैयायिकश्च ।
बौद्धश्चार्वाकजैनौ यवनमतरताः शैवशाक्तेयमुख्या
श्चैतत्सिद्धान्तनिष्ठान् जयति यतिपतिः सूत्रकारावतारः ॥

बाह्यकुदृष्टिभेदेन दुर्मता(नि द्विविधानि)। तत्र चार्वाकबौद्धजैनयवनशैवशाक्तेयादयो बाह्याः । मायावियादवप्रकाशभट्टभास्करनीलकण्ठमाध्वहैरण्यगर्भसांख्ययोगमीमांसककाणादनैयायिकादयः कुदृष्टयः ।

End:

दृष्टेऽपह्नुत्यभावादनुमितिविषये लाघवस्यानुसारा-
च्छास्त्रेणैवावसेये विहतिविरहिते नास्तिकत्वप्रहाणात् ।
नाथोपज्ञं प्रवृत्तं बहुभिरुपचितं यामुनेयप्रबन्धै-
स्त्रातं सम्यग्यतीन्द्रैरिदमखिलतमःकर्शनं दर्शनं नः ॥

कपर्दिमतकर्दमप्रबलकल्पनावागुरां
दुरत्ययमतीत्य तत् द्रुहिणतन्त्रयन्त्रोदरम् ।
कुदृष्टिकुहनामुखे निपततः परब्रह्मणः
करग्रहविचक्षणो जयति लक्ष्मणोऽयं मुनिः ॥
इति विद्यातपोयोनिः . प्रीयतां मे जनार्दनः ॥
अप्पलार्यः पिता यस्य माता लक्ष्मीर्गुणोत्तरा ।
तेनाप्पगोण्डगुरुणा तत्कुदृष्टिमतं जितम् ॥

Colophon:

इति श्रीहयग्रीवावतारभगवद्भाष्य(कारा)कारवेदान्ताचार्यकृपायत्तसत्ताकस्य कन्दाडअप्पगोण्डार्यस्य कृतिषु कुदृष्टिभङ्गः संपूर्णः ॥

(*e*) तत्त्वामृतम्.

TATTVĀMṚTAM.

Foll. 69*b*—86*b*.

Similar to R. No. 387 (*c*) *ante*. By the same author as of the above.

Incomplete.

Beginning:

श्रीमद्धर्मपुरीशार्यरङ्गेशगुरुविग्रहम् ।
हयग्रीवमहं वन्दे वन्दारुजनकल्पकम् ॥
अङ्गैरनित्यतनुभिर्भगवत्प्रसाद-
लब्धाधिकारविभवैरि(र्म)म केशवस्य ।
नाभीललाटवदनप्रमुखाङ्गजन्यै-
र्ब्रह्मेशशक्रमुखकैरखिलैः सुरैः किम् ॥
आखिलनिगमनिकरसततविनुतपरब्रह्मभूतपरतत्त्वं विष्णुरेव ।
वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम् ।

ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥

नारायणाभिधानस्य ब्रह्मणः परमात्मनः ।

इत्यादिश्रीभागवतोक्तिः ।

End:

प्रत्यक्षादिप्रमाणान्तरागोचरे परब्रह्मणि वेदान्त एव प्रमाणम् । अनन्यपरनारायणानुवाकानुवादादिभिरेव वेदान्तार्थनिर्णयः कर्तव्यः । इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।

(*f*) మాయిభంగము.

MĀYIBHAṄGAMU.

Foll. 87*a*—112*b*.

A treatise in Telugu in refutation of the Advaita view of the Vēdāntas: by the same author as of the above.

Complete.

Beginning:

जीयाद्भाष्यकृता दृष्टविशिष्टाद्वैतनिर्णयः ।

सूत्रकृद्वृत्तिकृद्वाक्यभाष्यकारादिराक्षितः ॥

చరాచరాణి భూతాని సర్వాణి భగవద్వపః ' ఇత్యాద్యవస్తంబమనువాల్మీకి పరాశర భగవత్ప్రముఖవాక్యోపబృంహిత కాణ్వయాధ్యందినశుభాలోచనిషదాది సకలవేదాంతప్రసిద్ధశారీరకసూత్రవృత్తివాక్యభాష్యటీకాకారులైన వ్యాస బోధాయనటంకద్రమిడగుహదేవప్రభృతిపూర్వాచార్యులచేత సురక్షితమైన విశిష్టాద్వైతమెతత్వమాయెను. శ్రుతిస్మృతిఇతిహాసపురాణపంచరాత్రాదిసర్వశాస్త్రాలందలివాక్యాలు భేదాభేదఘటకరూపాన త్రివిధమైఉన్నవి ।

End:

శ్రీరామానుజ భాష్యకార సంవర్ధితభగవన్మత మాశ్రయించి వైదికోత్తముండైనుఖాననుండెడిది ॥

इति विद्यातपोयोनिः . प्रीयतां मे जनार्दनः ॥

अप्पलार्यः पिता यत्र(स्य) माता लक्ष्मीर्गुणांतरा ।

अप्पगोण्डगुरुः सोऽयं मायिभङ्गप्रबन्धकृत् ॥

Colopohn:

इति श्रीहयग्रीवावतारभगवद्भाष्य(कारा)कारवेदान्ताचार्यकृपायत्तसत्ताकस्य कन्दाडअप्पगोण्डाचार्यस्य कृतिषु मायिभङ्गः संपूर्णः ॥

(*g*) विशिष्टाद्वैतनिर्णयः.

VIŚIṢṬĀDVAITANIRṆAYAḤ.

Foll. 112*b*—126*b*.

An exposition of the Viśiṣṭādvaita view of the Vēdānta: by the same author as of the above.

Complete.

Beginning:

वेदान्ताः प्रतिपादयन्ति विविधा विश्वोद्भवान्तावन-
क्रीडोद्युक्तमनन्तसद्गुणगणं प्राप्यं परब्रह्म यत् ।
श्रीमत्केशववासुदेवभगवन्नारायणाद्याख्यया
विख्यातं चिदचिच्छरीरसहिताद्वैतं महः पातु नः ॥
श्रियः श्रियः सदास्थानं दिव्यं हृदयपङ्कजम् ।
बोधितं येन तं वन्दे पराशरदिवाकरम् ॥
पराशरमुखान् वन्दे . . . . ।

तत्त्वेन याश्चिदचिदीश्वरेत्यादिभिर्भवदीयगुरुपरम्परया संस्तुतेनैव भगवता ब्रह्मसूत्रकारजनकेन,

व्यक्तं विष्णुस्तथाव्यक्तं पुरुषः काल एव च ।
. . . . . - सर्वमिदं जनार्दन ॥
निर्गुणस्याप्रमेयस्य निर्गुणः प्रकृतिः परः ।

परं ब्रह्मेति प्रतिपादितत्वात् ब्रह्मणः सगुणत्वं कथमिति चेत्, अत्रोच्यते ।

End:

नमो वेदान्तगुरुवे तस्मै यस्मात्कृपाम्बुधेः ।
रक्षणं वैदिकानां च स्यादवैदिकांशेक्षणम् ॥

वेदान्ताचार्यकरुणा चिन्तामणिगणायते ।
कल्पवृक्षायते स्वानां कामधेनुशतायते ॥
श्रीभाष्यकारकारुण्याकारं वेदान्तदेशिकम् ।
वन्दे धर्मपुरीशार्यरङ्गेशगुरुरूपिणम् ॥

कन्दाडयप्पगोण्डा[च]र्यो विशिष्टाद्वैतनिर्णयम् ।
अकरोद्भगवद्दासदासदासानुदास्यकृत् ॥

Colophon:

श्रीहयग्रीवावतारभाष्यकाराकारवेदान्ताचार्यकृपायत्तसत्ताकस्य कन्दाड-अप्पगोण्डाचार्यस्य कृतिषु विशिष्टाद्वैतनिर्णयः समग्रः ॥

श्रीभाष्य(कार)करुणामृतसेचनाढ्यं वेदान्तदेशिकपदाश्रितदासदासम् ।
षष्टिप्रबन्धकरणप्रथितप्रभावं श्रीय(ला)प्पगोण्डगुरुशेखरमाश्रयामः ॥

श्रीमन्नृसिंहगुरुशेखरलब्धभाष्यं श्रीरङ्गराजगुरुवर्यपदाब्जभृङ्गम् ।
श्रीवेङ्कटार्यकृपयार्जितसर्वशास्त्रं श्रीश्रीनिवासगुरुमन्वहमाश्रयामः ॥

(*h*) तत्त्वनिष्कर्षः.

TATTVANIṢKARṢAḤ.

Foll. 127*a* – 136*b*.

Similar to the work described in sub-division (*e*) under this number. By the same author as of the above.

Complete.

Beginning:

गोविन्दकेशवनिजाह्वयनाकलोकप्राश्वत्सभानिलयनित्यचतुर्थमूर्तिः ।
विश्वं तुरङ्गवदनादिमभाष्यकारपर्यन्तादिव्यतनुभृन्मम रक्षणः स्यात् ॥

इन्द्रं गोविन्दमाहुः श्रुतिनुतपरमव्योमवासित्वयोगा-
द्गां स्वर्गं विन्दतेऽसाविह लभत इति प्राह गोविन्दशब्दः ।
गाः शब्दान् विन्दतेऽसाविति निगममुखैः सर्वशब्दैश्च वेद्यो
गोविन्दो नन्दसूनुर्निरवधिकृपया पातु गोपालकस्त्वाम् ॥

* * * *

श्रीमद्धर्मपुरीशार्यपूज्यरङ्गेशसद्गुरोः ।
स्वामिनं केशवं वन्दे भाष्यकृद्रत्नकञ्चुकम् ॥

ननु,

व्यक्तं विष्णुस्तथाव्यक्तं पुरुषः काल एव च ।

ज्योतींषि विष्णुर्भुवनानि विष्णुर्वायुर्यमोऽग्निर्वरुणः शशाङ्कः । प्रजापतिस्त्वं प्रपितामहश्च । रुद्राणां शंकरश्चास्मि । त्वं ब्रह्मा पशुपतिरित्यौद्यक्यवाक्यैरभेदसिद्धेः भेदः कथमिति चेत्, तदसंगतम् ।

End:

श्रीभाष्यकृद्दर्शिततत्त्वमार्गे तत्त्वत्रयं हृद्यमिहानवद्यम् ।
वेदान्तवेदस्मृतिसूत्रवृत्तिवाक्यादिसंतक्षितमप्रकम्प्यम् ॥
सर्वज्ञैकशिरोमणिं निजकरस्पर्शात्तमोहारिणं
शश्वद्विष्णुपदानुरागललितं सन्मण्डलं सोदयम् ।
सद्वृत्त च कलानिधिं कुवलयानन्दैकसंदायकं
संसेवे द्विजराजमन्वहमहं श्रीभाष्यकारं गुरुम् ॥
अप्पलार्यः पिता यस्य माता लक्ष्मीर्गुणोत्तरा ।
तेनाप्पगोण्डगुरुणा तत्त्वनिष्कर्ष ईरितः ॥

इति विद्यातपोयोनिः . . प्रीयतां मे जनार्दनः ॥

Colophon:

इति श्रीहयग्रीवावतारभगवद्भाष्यकाराकारवेदान्ताचार्यकृपायत्तसत्ताकस्य कन्दाडअप्पगोण्डाचार्यस्य कृतिषु तत्त्वनिष्कर्षः समाप्तः ॥

(i) सज्जनामृतम्.

SAJJANĀMṚTAM.

Foll. 137*a* –151*b*.

Herein the author arrives at the conclusion that all authoritative texts in the Hindu scriptures point out Viṣṇu to be the Supreme Brahman.

By the same author as of the above.

Complete.

Beginning:

श्रीमद्व्यासादिमौनित्रि(दशपति)मुखामर्त्यसंस्तूयमानः
श्रुत्यादौ सुप्रसिद्धः स्वनिरतदिविजानन्तरत्नोपमानः ।
साक्षाद्रक्षैकदीक्षानिपुणानिगमसंत्रासकारिश्रुतोद्य
त्साम्याकोत्तीर्णपक्षक्षयकृदवतु नः केशवाख्याप्रभावः ॥

अखिलभुवनजननसंरक्षणादिलक्षणश्चतुर्थमूर्ति परमात्मा केशवः इति वेदान्ताः प्रतिपादयन्ति । तत्तद्वेदान्तस्थितकारणोपासनादिप्रकरणश्रूयमाण-सद्ब्रह्मात्मनारायणवासुदेवविष्णुहिरण्यगर्भप्रजापतिधातृमहेश्वरशिवशंभुविश्व-कर्मत्वष्टृकश्यपसूर्येन्द्रदेवासुरर्षिप्राणाकाशज्योतिरव्याकृतादिशब्दानां विक-ल्पसमुच्चयान्यतरबाधाप्रतिकल्पेश्वरस्वरूपैक्यादिविषयत्वमनुपपन्नमिति वैष्ण-वहैरण्यगर्भशैवमायिप्रमुखाः सर्वेऽपि भाष्यकाराः सर्वशाखाप्रत्ययन्याय-गतिसामान्यन्यायच्छागपशुन्यायैरेकवस्तुपरत्वं प्राहुः । तत्र प्राप्ताप्राप्तविवे-कन्यायेन विष्णुपरत्वमेव वक्तुं युक्तं वैदिकानाम् ।

End:

'वेदैश्च सर्वैरहमेव वेद्यः' इति भगवद्वचनाच्च विविधविचित्रान-(न्दं)वैदिकवेद्यं परं ब्रह्म श्रियः पतिरिति सर्वं हृद्यमनवद्यं च ॥

वेदान्तविद्यागुरुसार्वभौमपदाब्जभक्तिः सततं ममास्तु ।
यद्वैभवाद्वैदिकवेदरूपशास्त्रार्थविज्ञाननिधानलाभः ॥

Colophon:

इति हयग्रीवावतारभगवद्भाष्यकाराकारवेदान्ताचार्यकृपायत्तसत्ता-कस्य कन्दाडअप्पगोण्डाचार्यस्य कृतिषु सज्जनामृतं संपूर्णम् ॥

(*j*) रहस्यत्रयसारार्थः.

RAHASYATRAYASĀRĀRTHAḤ.

Foll. 152*a*—182*b*.

The foll. are not in order.

An explanatory treatise on the Rahasyatrayasāra of Vēdāntadēśika: by the same author as of the above.

Breaks off in the third Adhikāra.

Beginning:

अधिगम्य गुरून् सर्वान् तत्प्रसादोपबृंहितः ।
रहस्यत्रयसारार्थस्तत्र तत्र प्रकाश्यते ॥

सर्वलोकोज्जीवनाय रहस्यत्रयविवरणमुखेन न्यासाख्यब्रह्मविद्यां निरूपयितुं रहस्यत्रयसाराख्यप्रबन्धमारभमाणो वेदान्ताचार्यः प्रथमं गुरूपसत्तिपूर्वकं परमगुरुं श्रियः पतिमभिगच्छति—गुरुभ्य इति श्लोकेन । अत्र प्रथमगुरुशब्दः स्वस्य तत्त्वज्ञानादिमुखेनोज्जीवकाव्यवाहिताचार्यपरः । पूजायां बहुवचनम् ।

End:

उक्तरूपः पुमान् नोऽस्माकं यूथस्य समूहस्य नाथः स्वामी इति ।

Colophon:

इति सारनिष्कर्षाधिकारो द्वितीयः ॥

* * * *

सर्वधर्मानिति पूर्वार्धे द्वये पूर्वखण्डे च उक्तप्रकार उपायविशेषः उत्तरखण्डे चरमश्लोकोत्तरार्धे च उक्तपुरुषार्थविशेष इत्यर्थः । अवितथा . . . . . बुद्धेरित्यर्थः । अवितथत्वमाह—प्रथिम्नेत्यादिना पदार्थेन विवरिष्यते । एतेन निष्ठाशब्दार्थो दर्शितो ।

The last four leaves are left blank.

R. No. 388.

Śrītāla. 18 × 1¾ inches. Foll. 107. Lines, 9 in a page. Telugu. Good.

Purchased in 1911–12 from G. Śrīnivāsa Rao of Mysore.

कुवलयानन्दव्याख्या—रसिकरञ्जनी.

KUVALAYĀNANDAVYĀKHYĀ: RASIKARAÑJANĪ.

Same as the work described under R. No. 73 *ante*. As this manuscript is complete, extracts from the beginning and the end are here given.

The author of the commentary is Gaṅgādharādhvarin, son of Dēvasiṁhasumati of Vādhūlagōtra and a disciple of Viśvarūpayati. He further states that he is the grandson of the brother of a disciple of Appayyadīkṣita.

Complete.

Beginning:

एकत्र बोधमुद्रां कलयन्नन्यत्र पुस्तकं पाणौ ।
व्याकुर्वन्निगमान्तं देवः पायाद्वटद्रुतलवासी ॥
अधिमौलि कलां शशिनः शम्बररिपुचीटिकामिनाथा(वाधा)य ।
हरिणाक्ष्यै निजमङ्गं योऽदत्त स मेऽस्तु मङ्गलाय विभुः ॥
निश्वसितनिगममालां निरतिशयानन्दनीरनिधिवेलाम् ।
करविलसदक्षमालां कलये निरवद्यवाङ्मयीं देवीम् ॥
यत्पादपङ्कजरजःकणिकानुषङ्ग-
मासाद्य देवगुरुमप्यधरीकरोति ।
मूकोऽपि तं पशुपते(र)परावतारं
श्रीविश्वरूपध(य)मिनं गुरुमानतोऽस्मि ॥
अस्मत्पितामहसहोदरदेशिकेन्द्र-
मप्पय्ययज्वतिलकं प्रणमामि मूर्ध्ना ।
यस्यानवद्यकृतिभिः शततोऽधिकाभिः
वैपश्चिती बुधततेः प्रसरीसरीति ॥

गङ्गाधराध्वरी प्राज्ञस्तनोति विदुषां मुदे ।
हृद्यां कुवलयानन्दटीकां रसिकरञ्जनीम् ॥

निरन्तरभगवदनुसंधानादिलब्धान्तरायविरहोऽपि ग्रन्थकारो ग्रन्थारम्भे व्याख्यातृश्रोतृणां निरन्तरायव्याख्यानश्रवणप्रचयगमनार्थं श्रीमन्नारायणानुस्मरणलक्षणं मङ्गलं निबध्नाति—उद्घाट्येति । हृदयाब्जकोशं हृत्पद्मकलिकां योगकलया योगाभ्यासपाटवेन उद्घाट्य विकासं प्रापय्य ।

End:

चन्द्रालोकनाम्नो ग्रन्थस्य सर्वोत्कर्षेण वर्तनवर्णनात् तद्भावाविष्करणरूपस्य स्वग्रन्थस्य इतरग्रन्थापेक्षया आधिक्यप्रतीतेः अर्थशक्तिमूलो वस्तुना व्यतिरेकध्वनिश्चेति शिवम् ॥

श्रीदेवसिंहसुमतेस्तनयः प्रतीतः श्रीविश्वरूपयतिराजकृपानुबन्धी ।
श्रीचन्द्रचूडचरणाम्बुजगर्भदासो गङ्गाधराध्वरिवरः श्रुतपारदृश्वा ॥

स्वां वैदुषीं प्रथयितुं विबुधावलीना-
मप्पय्यदीक्षितकृतेर्विवृतिच्छलेन ।
तास्ताः पुरातनकृतीः परिशील्य टीका-
मेनां व्यधात्कृतधियः परिशीलयन्तु ।
इयं कुवलयानन्दटीका रसिकरञ्जनी ।
अर्पिता पुष्पमालेव चन्द्रचूडपदाम्बुजे ॥

Colophon:

इति श्रीमद्वाधूलवंशमुक्ताफलतिलकश्रीदेवसिंहसुमतिनन्दनस्य श्रीविश्वरूपेन्द्रगुरुचरणदिव्यकरुणाकटाक्षवीक्षासमासादितसकलविद्यावैशारद्यस्य श्रीमत्साग्निचित्यवाजपेययाजिगङ्गाधरमनीषिणः श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदप्पय्ययज्वावतंसविरचितकुवलयानन्दटीका रसिकरञ्जनी समाप्ता ॥

ध्वनिप्रथितरूपकप्रचुरवृत्तिभेदोज्ज्वला
विरुद्धमतिकृन्मुखप्रकटदोषदूरा कृतिः ।
सभावरसमेदुरा सकलसज्जनानन्दनी
जगत्पतिपुरः सदा रसिकरञ्जनी नृत्यतु ॥

R. No. 389.

Palm-leaf. $14\frac{1}{4} \times 1\frac{5}{8}$ inches. Foll. 26. Lines, 7 in a page. Telugu. Good.

Purchased in 1911–12 from the Secretary of the Sarasvatī-Bhāṇḍāgāra of Triplicane.

कृष्णलीलातरङ्गिणी.

KṚṢṆALĪLĀTARAṄGIṆĪ.

Foll. 1*a*—23*b*. Wants some leaves in the middle.

A short poem describing the life of Śrī-Kṛṣṇa. Many parts in this work are intended to be sung. The author is Nārāyaṇatīrtha, son of Śivarāmānandatīrtha. The details of life described herein may be gathered from the headings of the various Adhyāyas given below :—

I. श्रीकृष्णप्रादुर्भाववर्णनम्.

II. श्रीकृष्णबाललीलावर्णनम्.

III. श्रीकृष्णगोवत्सपालवर्णनम्.

IV. Do.

V. श्रीकृष्णगोपीवस्त्रापहारगोवर्धनोद्धारवर्णनम्.

VI. श्रीकृष्णगोपीसमागमवर्णनम्.

VII. रासक्रीडावर्णनम्.

VIII Do.

Complete.

Beginning :

प्रह्लादनारदपराशरपुण्डरीक-
व्यासाम्बरीषशुकशौनकभीष्मदाल्भ्याम्(न्) ।
रुक्माङ्गदार्जुनवसिष्ठविभीषणादि-
पुण्यानिमान् परमभागवतान् स्मरामि ॥
नीलाचलवरनिलयं निखिलजगन्नाथमेघमाकलये ।
निरवधिवटतरुनिकटं निजसेवकवृन्दहितविधातारम् ॥

सौराष्ट्रागः—त्रिपुटतालः—

सुभद्राबलभद्रासुदर्शनसहित ।
इभराजतारक ईश माधव देव ॥

* * * *

इति श्रीशिवरामानन्दतीर्थपादुकासेवकश्रीनारायणतीर्थविरचितायां कृष्णलीलातरङ्गिण्यां श्रीकृष्णगोपीवस्त्रापहार[गो]गोवर्धनोद्धारवर्णनं नाम पञ्चमस्तरङ्गः ॥

End:

उरसा मनसा दृष्ट्या परिष्वज्य मुहुर्मुहुः ।
कृतकृत्यास्तथात्मानं कृत्वा मत्या समास्थिताः ॥
आत्मारामोऽपि भगवान् आत्मानं दर्शयन्नरम् ।
ततः प्रभाते गोपीभिः सह गोकुलमागतः ॥

Colophon:

इति श्रीनारायणतीर्थविरचितायां श्रीकृष्णलीलातरङ्गिण्यां श्रीकृष्णरासक्रीडावर्णनं नामाष्टमस्तरङ्गः ॥

Fol. 24 contains the last three stanzas, with Telugu meaning, of the fifth Sarga of the Śiśupālavadha. Foll. 25 and 26 contain a few passages from Siddhāntakaumudī.

R. No. **390.**

Paper. 9 × 4 inches. Foll. 11. Lines, 11 in a page. Dēvanāgarī. Injured.

Purchased in 1911-12 from C. Viśvanātha Śāstrigaḷ of Vizianagaram.

कोकिलाव्रतकल्पः.

KŌKILĀVRATAKALPAḤ.

This is a vow observed by women with a view to propitiate Pārvatī who is here conceived in the form of a cuckoo; and it is held to be efficacious in bestowing prosperity and happiness.

Complete. Contains Udyāpana and Vratakalpa.

Beginning:

अथ कोकिलाव्रतोद्यापनम्—

श्रावण्यां द्वितीयायां वा एकभक्तं कृत्वा, द्वितीयदिवसमध्याह्ने सुस्नात्वा, अहते वाससी परिधाय, आचम्य, गणपतिस्मरणपूर्वकं तिथ्यादि संकीर्त्य, अमुकगोत्रोऽमुकशर्माहमनया मम (प)त्न्या श्रीकोकिलारूपि[णि]-गौरीप्रीतिद्वारा भर्त्रवियोगस्नेहवृद्धिसौभाग्यैश्वर्यपुत्रादिविवृद्धिसिद्धये एक(वं) संकल्प्य स्त्रीकर्तृत्वे तु

* * * *

शरीरशुद्ध्यर्थं पुरुषसूक्तन्यासान् श्रीसूक्तन्यासांश्च विधाय ।

End:

आषाढान्ते आषाढपौर्णमास्या वैश्वदेव उत्तराषाढ(ा)दश क्रतुर्दक्षो वसुः सत्यकामः तथैव च . . . . जश्चैव तथा चैव पुरूरवाः ॥

गङ्गाधरनाचणकर(रायण)स्येदं पुस्तकम् ॥

R. No. 391.

Palm-leaf. 16½ × 1⅓ inches. Foll. 99. Lines, 6 in a page. Grantha. Slightly injured.

Purchased in 1911-12 from E. R. Kṛṣṇamācāriyar of Kalyāṇapuram.

गृह्यरत्नम्—कण्ठभूषणसहितम्.

GṚHYARATNAM WITH THE COMMENTARY KAṆṬHA-BHŪṢAṆA.

This commentary on the Gṛhyaratna of Vaidikisārvabhauma is by himself. His name is Vēṅkaṭanātha, and he is the son of Raṅganātha and grandson of Sarasvatīvallabha of Hāritagōtra. The text is the same work as the one described under No. 1198 of the D.C.S. MSS., Vol. II.

Paṭalas one to seven, complete.

Beginning:

वागीश्वरं हयग्रीवं प्रणमामि सहस्रशः ।
गङ्गाप्रवाहवद्यस्य स्मरणाद्वाग्विजृम्भते ॥
शुद्धस्फटिकसंकाशं रम्ये सिंहासने स्थितम् ।
पद्मया सहितं नित्यं हयग्रीवं भजाम्यहम् ॥

मुकुन्दः कारणध्येयो यश्चतुर्होतृसंपदम् ।
नमःस्तोमास्पदं पद्यं वन्दे सर्वोत्तरं हरिम् ॥
गृह्यतात्पर्यदर्शादिग्रन्थोक्तार्थोपबृंहितम् ।
अपेक्षितार्थसिद्ध्यर्थं गृह्यरत्नमकारि तत् ॥
गृह्यरत्नाश्रितं प्रज्ञैरर्थितं कण्ठभूषणम् ।
व्याख्यानं भुवि विख्यातमाख्यास्यामि सदा बुधैः ॥

अथ निषेकादीन् संस्कारान् व्याख्यास्यामः—

'पाणिग्रहणाद्धि सहत्वं कर्मसु' इति प्रजासहत्वकर्मणां पाणिग्रहणानन्तरभावित्वादतोऽयमथशब्दः सहधर्मचारिणीसंयोगानन्तर्ये वर्तते । निषिच्यत इति निषेकः गर्भाधानमित्यर्थः ।

* * * *

Colophon:

इति हारीतकुलतिलकस्य सरस्वतीवल्लभापरनामधेयस्य वैदिकसार्वभौमस्य श्रीवेङ्कटनाथस्य कृतिषु गृह्यरत्नव्याख्याने कण्ठभूषणे प्रथमः पटलः ॥

End:

इदानीं प्रकृतमुपसंहरन् शङ्खवचनमुदाहरति—

संस्कारैः संस्कृतः पूर्वैः उत्तरैरपि संस्कृतः ।
नित्यमष्टगुणैर्युक्तो ब्रह्मभूयाय कल्पते ॥

गृह्यरत्नस्य परिग्राह्यत्वे हेतुमाह—

गृह्यान्तरोक्तार्थविशेषमापस्तम्बाश्रयं वैदिकसार्वभौमः ।
प्राह स्मृतीर्वीक्ष्य हि गृह्यरत्नं विवेकदं तत्कथयन्तु सन्तः ॥

Colophon:

इति श्रीहारीतकुलतिलकस्य सरस्वतीवल्लभाचार्यपौत्रस्य श्रीरङ्गनाथसूरितनयस्य वैदिकसार्वभौमापरनामधेयस्य श्रीवेङ्कटनाथस्य कृतिषु गृह्यरत्नव्याख्याने कण्ठभूषणे सप्तमः पटलः ॥

यो हि प्रयोगी यदि गृह्यरत्नं दधातु संस्कारसमुज्ज्वलं सः ।
स्मार्तं चिकीर्षुः श्लथमानमानः कण्ठे भजेत् कण्ठ(विभूषणाख्यम् ॥)

* * * *

(पितृमेध)सारं व्याख्यां तयोश्च दशनिर्णयगृह्यरत्ने ।
रत्नाकरं विबुधकण्ठविभूषणं च प्राह प्रबन्धमिति वैदिकसार्वभौमः ॥

Colophon :

गृह्यरत्नव्याख्या कण्ठभूषणं संपूर्णम् ॥

R. No. **392.**

Palm-leaf. 18¼ × 1½ inches. Foll. 52. Lines, 6 in a page. Grantha. Slightly injured.

Purchased in 1911–12 from Sarasvatī-Bhāṇḍāgāram of Triplicane.

(*a*) वैद्यविषयः.

VAIDYAVIṢAYAḤ.

Foll. 1*a*—44*b*.

A medical treatise. Foll. 1*a* to 4*b* deal with feeling the pulse; 5*a* to 10*a* deal with the nature of the diet that may be prescribed; 10*a* to 44 discuss the properties of various medicinal substances, etc.

Wants beginning and end :

Beginning :

कपित्थलाजैः सलिलं प्रसिद्धं प्रसक्तमुद्गारमपाकरोति ॥
मातुलङ्गरसो लाजाशर्कराक्षौद्रसंयुतः ।
पिप्पिलीचूर्णमिलितः श्रेष्ठश्छर्दिनिवारणे ॥

* * * *

अपररात्र्यां वातनाडी चलति । मध्यरात्र्यां पित्तनाडी चलति । एतद्विपरीतेन वर्तमानां नाडीं मनुष्यप्रकृतिं च काले काले शास्त्रेण विदित्वा वैद्यश्चिकित्सां कुर्वन् ख्यातिं लभते ।

क्वचिदर्थः क्वचिद्धर्मः क्वचिन्मैत्री क्वचिद्यशः ।
क्वचिदभ्यासयोगाच्च चिकित्सा नास्ति निष्फला ॥

End:

अतिविषाय(षादि)गुणः —

कटूष्णातिविषा तिक्ता कफपित्तज्वरापहा ।
आमातिसारकासघ्नविषच्छर्दिविनाशिनी ॥

* * *

विदितोऽयं रसो राजमृगाङ्क इति कीर्तितः ।
दीपनः पाचनो रुच्यो गृहिणीपाण्डुनाशनः ॥

Fol. 45 is left blank.

(*b*) जातकचन्द्रिका.

JĀTAKACANDRIKĀ.

Foll. 46*a*—49*b*.

Fol. 50*a* is left blank. Foll. 50*b*—51*a* contain a few stanzas in Jyautiṣa. Fol. 52 is left blank.

Same work as the one described under R. No. 374(*c*) *ante*, with difference in the end. The author of the work is here said to be Vēṅkaṭēśvarārya, son of Yajñanārāyaṇa.

Complete.

End:

पापिनश्च ग्रहास्तेषामुच्चत्वे सति किं फलम् ।
बलवत्त्वे घातकानां यत्फलं लभ्यते हि तत् ॥

यज्ञनारायणाभिख्ययायजूकतनूभुवा ।
श्रीवेङ्कटेश्वरार्येण कृता जातकचन्द्रिका ॥

R. No. **393.**

Palm-leaf. 14⅜ × 1⅜ inches. Foll. 44. Lines, 5 in a page. Telugu. Good.

Purchased in 1911–12 from C. Viśvanātha Śāstrigal of Vizianagaram.

(*a*) गणितामृतम्.

GAṆITĀMṚTAM.

Foll. 1*a*—10*b*. Foll. 11 and 12 are left blank.

A treatise dealing with certain questions in astronomy: by Abbayakavi.

The five Adhyāyas contained in this manuscript are—

I. मध्यग्रहाध्यायः.
II. स्फुटग्रहाध्यायः.
III. पाताध्यायः.
IV. चन्द्रग्रहणाध्यायः
V. सूर्यग्रहणाध्यायः.

Beginning:

वागीशाच्युतशंकरेन्द्रदिनकृच्छीतांशुभौमेन्दुजान्
गीर्वाणाधिपपूज्यशुक्रदिनकृत्पुत्रेशपुत्रामरान् ।
नत्वाहं गणितामृतं रघुपतिं श्रीसौरसाम्यस्फुटं
वक्ष्याम्यब्बयसत्कवीन्द्रविबुधस्त्रिस्कन्धवित्प्रीतये ॥

नवनेत्रमुनीन्दु(१७२९)संख्यया प्रभवाद्यब्दयुतं भवेच्छकः ।
ग्रहशैलशशाङ्कवह्निभि(३१७९)र्युतकल्यादिगताश्च वत्सराः ॥

* * * *

रव्यादीनां मन्दोच्चनिर्णयः—

तिग्मांशोर्यमलौ शिलोच्चयधरा भूषाः खबाणा(२,१७,१६,५०)धरा
पुत्रास्याब्धियखेन्दवोक्षिणियमाक्षीणी(४,१०,२,२२)बुधस्याद्रयः ॥
आशासप्तयमानगाब्धिय(७,१०,२७,४७)गुरोर्बाणौ कुपक्षाधरा
हस्ता खं भृगुनन्दनस्य(५,२१,२१,०)यमलौ खेटेन्दवो भूशराः ॥

End:

अर्केन्दोरुदयाद्योमनिशार्धेऽर्कस्य पादयः ।
अंशार्हसागरार्कान्ते दृष्टेन ग्रहणे तयोः ॥

Colophon:

इति श्रीगणितामृते सूर्यग्रहणाध्यायः पञ्चमः ॥

(*b*) క్షేత్రగణితము.

KṢĒTRAGAṆITAMU.

Foll. 13*a*—44*b*.

For subject-matter and extracts see the Telugu part of this Triennial Catalogue.

Foll. 32*b*, 38*b*, 41*b* and 44*b* are blank.

R. No. **394.**

Palm-leaf. 15¼ × 1¼ inches. Foll. 19. Lines, 5 in a page. Telugu. Good.

Purchased in 1911–12 from C. Viśvanātha Śāstrigaḷ of Vizianagaram.

(*a*) भारतसावित्री.

BHĀRATASĀVITRĪ.

Foll. 1*a*—3*b*.

Same work as the one described under No. 5779 of the D.C.S. MSS., Vol. XII.

Incomplete.

(*b*) ज्ञानाङ्कुरः.

JNĀNĀṄKURAḤ.

Foll. 4*a*—19*a*. Foll. 19*b* is left blank.

Describes certain incidents in the life of a king named Suparvakṣōṇīśa by means of which he and his sons obtained a knowledge of the Advaita Vēdānta. By Kaipa Lakṣmīnṛsiṁha of Kauṇḍinyagōtra.

Wants two leaves in the beginning; otherwise complete.

The scribe's name is stated to be Bhādrava Kṛṣṇayyan.

Beginning:

. . . त्तत्रिजिघृक्षया दिवमिमौ कीर्तिप्रतापौ भुवः
सूर्याचन्द्रमसोर्मिषेण धरणीपालस्य यस्येयतुः ॥
यस्यैतस्य नृपस्य चण्डकिरणे शौर्योष्मणा निर्जिते
वैलक्ष्यादिव पाण्डुतामधिगते शीतांशुतां सेदुषि ।

नक्तं संचरति क्षपाकर इति प्राप्ताभिधाने स्वयं
शौर्योष्मा निरवग्रहा दिनकरव्याजात्समुज्जृम्भते ॥
विबुधानां परित्राणात् सुधर्माकलनादपि ।
रिपुभूभृद्विदलनात् यं महेन्द्रं चचक्षिरे ॥
सुमान्यादित्सूनां त्रिदशसुदृशां कीर्तिविभवा
यदीया मन्दाक्षानमितशिरसं दैवततरुम् ।
विधाय स्वच्छन्दं विदधति सहायक्रममसौ
सुपर्वक्षोणीशो जयति नितरां भूमिवलये ॥
तस्य राजावतंसस्य प्रादुरास सुतद्वयम् ।
ज्येष्ठस्तूष्णीक आख्यातः परो वाचालशेखरः ॥
तयोः कालेन कियता विद्याभ्यासाय भूपतिः ।
व्यादिशज्जीवसंकाशं विबुधं सरलाभिधम् ॥
स विद्वान् राजतनयौ विद्या नैवाध्यजीगपत् ।
किं तु तोषयितुं भूपमद्वैतं गुरुणा तयोः ॥
शशंसाथ महीपाय सर्वविद्यास्वधीतिनौ ।
परीक्षस्व प्रत्ययायेत्यमन्दानन्दतुन्दिलः ॥

* * * *

अथ कदाचिद्वासान्तिकचन्द्रिकाशिशिर हर्म्यतलमध्यासीनो राजमौलिः सरलमाहूय कविकण्ठीरव दक्षिणामूर्तिनवरत्नमालां व्यरचय इत्यश्रौषम् । तामाकर्णितुमुत्कण्ठते मम स्वान्तमत्यन्तम् ॥

सरलः—यथाज्ञापयति महाराजः ।

ओंकारप्रथमावतारपदवीन्यग्रोधभूमीरुह-
प्रान्तस्वैरविहारसारकलनादीक्षागुरुः संसृतेः ।
पाथोधेः परपारयात(प)नतरीरस्मानपस्मारिणोऽ-
पस्मारारिरुपेतदक्षिणमुखः पायादपायाच्छिवः ॥

End:

इत्थमुपदिश्य कतिपयदिवसानन्तरं वाराणसीं जिगमिषुरनुज्ञातो रूपरामेण कथंचित् स दैवज्ञो निर्यातः सरलो राज्ञा कियन्तं दूरमनुगतो राजानं निवर्तयन्नाशिषं प्रायुङ्क—

सौन्दर्येण जितस्मरो जितवृषा संपत्प्रकर्षेण च
प्रागल्भ्येन गिरां जितामरगुरुः स्फारप्रदानाश्रिया ।
नित्यहीणसुरद्रुमो विविदिषुर्दीर्घायुषो वैभवा-
न्मार्कण्डेयजिदाविरस्तु तनयस्ते रूपरामाचिरम् ॥

स्वात्माभेदेन विश्वेशं ध्यायन्तौ हृदयाम्बुजे ।
अध्यवात्तां विश्वनाथराजधानीमिमावुभौ ॥

श्रीमत्कौण्डिन्यगोत्रस्य कैपाभिजनसंततेः ।
सेयं लक्ष्मीनृसिंहस्य कृतिर्विजयतां परम् ॥

Colophon:

इति श्रीमन्नृसिंहमनीषिविरचितो ज्ञानाङ्कुरः समाप्तः ॥

R. No. **395.**

Paper. $10\frac{1}{8} \times 4\frac{1}{8}$ inches. Foll. 25. Lines, 7 in a page. Dēvanāgarī. Good.

Purchased in 1911–12 from C. Viśvanātha Śāstrigaḷ of Vizianagaram.

ज्ञानदीपकम्.

JÑĀNADĪPAKAM.

An astrological work dealing chiefly with the processes of arriving at conclusions on any particular subject from the nature of the reply which a person gives to questions purposely put to him.

Complete.

Beginning:

अथ ज्ञानदीपकं लिख्यते—

नमामि पूर्णचिद्रूपं नित्योदितमनावृतम् ।
सर्वाकारावभासिन्या शक्तिलिङ्ग(क्त्र्यालिङ्गि)तमीश्वर(म्) ॥

ज्ञानदीपकमादाय वर्तिं कृत्वा सदक्षरैः ।
स्वरस्नेहितसंयोज्यं स जयेदुत्तराधरे ॥
एतद्दीपकमादाय बुधस्त्रैलोक्यमीक्षते ।
प्रवक्ष्यामि विधानानि व्यापारं भुवनत्रये ॥
अथातः संप्रवक्ष्यामि ज्ञानिनस्तु शुभावहम् ।
दुष्टपृच्छकभावं तु लाभं वा मित्ररूपिणाम् ।
प्रश्नाः स्थूलाक्षरैर्ग्राह्या वर्गानुक्रमसंख्यया ॥

End:

अन्तर्ध्याने तथा धातुं मूलं जीवं तु लक्षयेत् ।
मूलजीवं तथा धातुमुष्टौ दद्याद्विचक्षणा ॥

Colophon:

इति श्रीज्ञानदीपकं संपूर्णम् ॥

R. No. **396.**

Paper. 6¾ × 3½ inches. Foll. 22. Lines, 9 in a page. Dēvanāgarī. Good.

Purchased in 1911–12 from C. Viśvanātha Śāstrigaḷ of Vizianagaram.

दक्षिणाकालिकाकवचम्.

DAKṢIṆĀKĀLIKĀKAVACAM.

Similar to the work described under No. 6366 of the D.C.S. MSS., Vol. XIII.

Complete.

Beginning:

देव्युवाच—

देवदेव महादेव भैरवानन्ददायक ।
दक्षिणाकालिकायास्तु कवचं मन्त्रगर्भकम् ॥
द्वाविंशत्यक्षरस्यास्य मनोः कवचमुत्तमम् ।
वद मे कृपया देव द्वाविंशत्यर्णसंख्यया ॥

दिव्यानां कवचानां मे द्वाविंशति वद प्रभो ।
दक्षिणाकालिकायास्तु दिव्यमन्त्राक्षरात्मनाम् ॥

भैरव उवाच—

शृणु देवि प्रवक्ष्यामि कवचानि शुभावहम् ।
दक्षिणाकालिकायास्तु द्वाविंशत्यर्णसंख्यया ॥
कवचस्यास्य देवेशि ब्रह्मा ऋषिरुदाहृतः ।
गायत्री छन्द इत्युक्तं देवी दक्षिणकालिका ।
माया बीजं समाख्यातं कूर्चशक्तिरुदाहृता ॥

End :

भैरव उवाच—

गोपयेत्परमेशानि स्कन्दादपि महेश्वरा(त्) ॥
सर्वथा गोपनीयं च ह्यन्यथा सिद्धिहानिकृत् ।
सर्वेषां चैव गोप्तव्यं गोपनीयं स्वयोनिवत् ॥

Colophon :

इति श्रीविश्वनाथसारोद्धारतन्त्रे दक्षिणाकालिकायाः द्वाविंशतिकवचानि समाप्तानि ॥

R. No. **397.**

Paper. 9½ × 3½ inches. Foll. 6. Lines, 9 in a page. Dēvanāgarī. Good.

Purchased in 1911-12 from C. Viśvanātha Śāstrigaḷ of Vizianagaram.

ज्ञानमञ्जरी.

JÑĀNAMAÑJARĪ.

Deals with horoscopy in astrology.

Contains the Naṣṭajātakaprakaraṇa.

Beginning :

ज्ञानमञ्जर्याम्—

[शशाङ्कम् (१) ।

नष्टजातकमथ प्रकटार्थं विश्व (१३)दन्त(३२)रस(६)समुद्र(४)
तद्ब्रवीमि किल जन्तुषु कर्म स्यात्करस्थमिह जन्मजरान्तम् ॥
स्यादिहादिविषकान्तसमस्तं सूर्यवर्गवशतः समकालम् ।
युग्मवह्नियुगपञ्चमवर्णैः (२,३,४,५) शेषवर्गगणनाक्रमतोऽपि ॥

End :

एकं हीनं कार्यं हीने कृते जातस्त्रयोविंशतिः (२३) ।
तथापि न संभवति तदा इदं भोग्यं ज्ञातव्यम् ॥

इति न्यायात् ज्ञातव्यम् ॥

Colophon :

इति नष्टजातकं समाप्तम् ॥

श्रेणीप्रश्नाक्षराणामुदधिगुणितं वान्त्यवर्णेन युक्तं प्रश्नाक्षराणि मात्रा-सहितानि गणयित्वा

* * *

एकेन हीना द्वादशभागः शेषं शुक्रः ॥

R. No. **398.**

Palm-leaf. 15⅝ × 1¼ inches. Foll. 50. Lines, 7 in a page. Grantha. Slightly injured.

Purchased in 1911-12 from Śaṭhakōpācāryar of Kumbakonam.

तर्कभाषाटीका—भावप्रकाशिका.

TARKABHĀṢĀṬĪKĀ : BHĀVAPRAKĀŚIKĀ.

Same work as the one described under No. 4124 of the D.C.S. MSS., Vol. VIII. The difference in the end is given below. By Gōpīnātha, son of Bhavanāthaṅkakuru.

Pratyakṣa and Anumāna, complete; but the Pratyakṣa wants beginning.

End:

एवं पर्वतो वह्निमान् धूमादित्यत्र व्याप्तिपक्षधर्मतादिसत्त्वेऽपि कथं न महानसीयादिवह्निसिद्धिः, यदि बाधो न पृथक् प्रतिबन्धकः स्यात् । अत्र विचारो भूयान् ॥

Colophon:

इति सोमकुलसमुद्भूतमहोपाध्यायभवनाथङ्ककुरुसुतगोपीनाथविरचितायां तर्कभाषाभावप्रकाशिकायामनुमानपरिच्छेदः ॥

R. No. **399.**

Palm-leaf. 15¾ × 1⅜ inches. Foll. 73. Lines, 6 in a page. Telugu. Good.

Purchased in 1911–12 from C. Viśvanātha Śāstrigal of Vizianagaram.

(*a*) महिम्नस्स्तवः—सव्याख्यः.

MAHIMNASSTAVAḤ WITH COMMENTARY.

Foll. 1*a*—3*a*.

A hymn of praise and prayer addressed to Śiva and attributed to Puṣpadanta.

Contains the first six stanzas only.

The copying of the manuscript is said to have been completed on Wednesday, the 12th of the bright fortnight of the month of Jyēṣṭha in the year Kīlaka.

Beginning:

महिम्नः पारं ते परमविदुषो यद्यसदृशी
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः ।
अथावाच्यः सर्वस्वमतिपरिणामावधि गृण-
न्नमाप्येष स्तोत्रे हर निरपवादः परिकरः ॥

हे हर तव महिम्नो महत्त्वस्य परं पारमत्यर्थमवसादमविदुषोऽजानतः पुरुषस्य स्तुतिः यद्यसदृशी अननुरूपा भूयात् ।

End:

अजन्मानो लोकाः किमवयववन्तोऽपि जगता-
मधिष्ठातारं किं भव विधिरनादृत्य भवति ।

अनीशो वा कुर्याद्भुवनजनने कः परिकरो
यतो मन्दास्त्वां प्रत्यमरवर संसेवत इमे ॥ ६ ॥

Foll. 3*b*—12*b* are left blank.

(*b*) शैवपुण्याहवाचनम्.

ŚAIVAPUṆYĀHAVĀCANAM.

Foll. 13*a*—15*a*.

Similar to the work described under No. 3367 of the D.C.S. MSS., Vol. VI.; as specially observed by Śaivas.

Complete.

Beginning:

पश्चात् मन्त्रसंहितया प्राणायामं संपाद्य बिन्दुस्थानाद्वौषडन्तं हृदयेनाङ्कुशमुद्रया तीर्थान्याहृत्य उत्पलमुद्रया जले संस्थाप्य मूलेनाशीतिमभिमन्त्र्य संरक्ष्य अवमन्थ्य आहुतीः कुर्यात् । ततः पुण्याहं वाचयेत् ।

End:

कर्तव्ये पावने शैवे याः सर्वा देवताः प्रति ।
वृद्धेशं वाचकं कुर्यादागस्तु मनसा स्मरेत् ॥

पुण्याहवाचककलशस्थोदकेन गर्भागाराद्यालयेषु यागशालायां सर्वत्र बेरादीन्यवमानेन मार्जयेत् ।

Colophon:

इति शैवपुण्याहवाचनविधिः ॥

प्राणानायम्य देशकालौ संकीर्त्य ।

Foll. 15*b*—20*b* are left blank.

(*c*) ब्रह्ममीमांसासूत्रसारसङ्ग्रहः.

BRAHMAMĪMĀṀSĀSŪTRASĀRASAṄGRAHAḤ.

Foll. 21*a*—34*a*.

A short commentary in accordance with the Advaita school of Vēdānta on the Brahmasūtras of Bādarāyaṇa: by Prajñānēndrasvāmin, a disciple of Vāsudēvēndramuni.

Breaks off in the second Pāda of the second Adhyāya.

Complete.

Beginning:

ओम् । अथातो ब्रह्मजिज्ञासा । शान्तो दान्त इत्यादिश्रुतेः, आत्मा वारे द्रष्टव्य इत्यादिश्रुतेश्च । अथ साधनचतुष्टयसंपत्त्यनन्तरम् । अतः अधिकारस्य संपूर्णत्वात् । ब्रह्मजिज्ञासा कर्तव्या ब्रह्मविचारः कर्तव्य इत्यर्थः ।

* * * *

एतेन सर्वे व्याख्याता व्याख्याताः । एतेन प्रपञ्चस्याभिन्ननिमित्तोपादानकत्वव्यवस्थापनेन । सर्वे भेदवादाः । व्याख्याताः निराकृता इत्यर्थः ॥

Colohpon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीवासुदेवेन्द्रमुनिवर्यचरणारविन्दमकरन्दमधुव्रतश्रीसाम्बसदाशिवप्रेरितप्रज्ञानेन्द्रस्वामिविरचिते वैयासिकब्रह्ममीमांसासूत्रसारसंग्रहे वैदिकोत्तमविद्वज्जनमनोहरे मन्दबुद्ध्यास्तिकभागधेयपुरुषार्थसुधानिधौ प्रथमस्याध्यायस्य प्रथमः पादः समाप्तः ॥

End:

सर्वधर्मोपपत्तेश्च । मायाविशिष्टस्य ब्रह्मणो मिथ्याभूतानां सर्वज्ञत्वादिधर्माणां संभवात् जगत्कारणत्वं ब्रह्मण उपपन्नमिति भावः ॥

Colophon:

द्वितीयाध्यायस्य प्रथमः पादः ॥

रचनानुपपत्तेश्च नानुमानम् । अनुमानम् अनुमानवेद्यं प्रधानं जगत्कारणं न संभवति । कुतः? रचनानुपपत्तेः सृष्ट्यनुकूलज्ञानरहितस्य जडस्य प्रधानस्य प्रपञ्चनिर्मातृत्वानुपपत्तेरित्यर्थः । प्रवृत्तेश्च ॥

Foll. 34*b*—64*b* are left blank.

(*d*) तर्कसंग्रहः.

TARKASAṄGRAHAḤ.

Foll. 65*a*—72*a*. Fol. 72*b* is left blank and fol. 73 gives some points in logic.

Same work as the one described under No. 4143 of the D.C.S. MSS., Vol. VIII.

Complete.

R. No. 400.

Palm-leaf. 14¾ × 1⅝ inches. Foll. 42. Lines, 9 in a page. Grantha. Good.

Purchased in 1911-12 from the Secretary of the Sarasvatī-Bhāṇḍāgāram of Triplicane

(*a*) श्रीतत्त्वसुधाव्याख्या—न्यायमन्दरः.

ŚRĪTATTVASUDHĀVYĀKHYĀ: NYĀYAMANDARAḤ.

Foll. 1*a*—32*a*. Fol. 32*b* is left blank.

Same work as the one described under No. 100(*a*) *ante*.

Complete.

(*b*) रामानुजातिमानुषस्तवः.

RĀMĀNUJĀTIMĀNUṢASTAVAḤ.

Foll. 33*a*—37*b*.

A hymn in praise of Rāmānuja, the propounder of the Viśiṣṭādvaita philosophy: by Vīrarāghava of Vādhūlagōtra.

Complete.

Beginning:

वन्दे रामानुजमुनिं त्रिविक्रममिवापरम् ।
निर्मर्यादेन शीलेन यस्य विश्वं सुखाकृतम् ॥
अतिशायितरामकृष्णवृत्तैरतियाताखिलदेवताप्रचारैः ।
अपहस्तितविश्वलोकसाम्यैरतिशिश्ये यतिसार्वभौमवृत्तैः ॥

End:

यः संस्तुतिं यतिपतेर्निजगाद हृद्यां लोकोपकारकरणीमतिमानुषाख्याम् ।
श्रीमद्वधूलकुलवारिधिशीतभानुं तं वीरराघवगुरुं शरणं भजामः ॥

(c) तात्पर्यशीकरः.

TĀTPARYAŚĪKARAḤ.

Foll. 38*a*—39*b*.

A brief summary of the principles of divine devotion taught in the well-known Tamil work, Tiruvāymoḷi, and its commentaries.

Complete.

Beginning:

सुधामाध्वीमोचासदृशनिजवाचापदयुगी-
नतानां तन्त्रेषु प्रवणधिषणानां मतिमताम् ।
दिशन्नर्थान् हृद्यान् कलिमथनदासस्य वचसां
विजेजीयान्नित्यं रघुतिलकवर्यो गुरुमणिः ॥
परः समस्तवस्तुभ्यो भजनीयः शरीरिणाम् ।
सुलभः सङ्गयुक्तानामपराधसहो नृणाम् ॥

End:

अर्चिरादिगतिप्राप्यवैशद्यातिशयप्रदः ।
एवं तत्त्वत्रयोद्वेलभक्तौ पूर्णफलप्रदः ॥
इत्येतदमृतोद्गारमुज्जगार पराङ्कुशः ।
नित्यं विष्णुपदस्थायिकलिप्रुष्टात्महर्षणः ॥
द्रमिडोपनिषद्भाष्यसुधासागरशीकरः ।
चारुं श्रीरङ्गनाथस्य मूर्तिं तारकयत्वयम् ॥

Colophon:

इति तात्पर्यशीकरः संपूर्णः ॥

सत्त्वं दाशरथिर्धिनोतु भवतां गोत्रस्य यस्ते पतिः
श्रीनारायणदेशिको विजयतां यस्ते गुरूणां गुरुः ।
माहाचार्यमथापराङ्गरुचिरं हायास्यमोजोऽस्तु ते
देयादेव च वीरराघवगुरुः श्रीसूक्तिमन्त्रोज(द)यम् ॥

The remaining leaves are left blank.

R. No. 401.

Paper. 5½ × 3⅝ inches. Foll. 2. Lines, 16 in a page. Dēvanāgarī. Good.

Purchased in 1911-12 from C. Viśvanatha Śāstrigal of Vizianagaram.

दक्षिणकालिकाहृदयम्.

DAKṢIṆAKĀLIKĀHṚDAYAM.

Similar to the work described under No. 6366 of the D.C.S. MSS., Vol. XIII.

Complete, but wants beginning.

Beginning:

ऊं कौमारी, ऋं वैष्णवी, ऌं वाराही, एं इन्द्राणी, ऐं ह्रीं क्लीं चामुण्डायै, ओं महालक्ष्म्यै.

* * *

भद्रकालिके दुष्टान् दारय २, दारिद्र्यं हन २, पापं मथ २, आरोग्यं कुरु २.

End:

न देयं यस्य कस्यापि शिवस्य वचनं यथा ।
इदं सदाशिवेनोक्तं साक्षात्कारं महेश्वरम् ॥
ये संपदं समासाद्य खेचरो जायते नरः ।

Colophon:

इति देवीयामिले महाकालभैरवसंवादे दक्षिणकालिकायाः सद्यः सिद्धिप्रदं हृदयम् ॥

R. No. 402.

Palm-leaf. 13 × 1 inches. Foll. 40. Lines, 5 in a page. Grantha. Slightly injured.

Purchased in 1911-12 from the Secretary of the Sarasvatī-Bhāṇḍāgāram of Tripheane.

(*a*) बालबोधिनी.

BĀLABŌDHINĪ.

Foll. 1*a*—4*b*.

An elementary treatise on grammar intended for the use of beginners.

Incomplete.

Beginning :

कारकाणि कर्ता कर्म करणं संप्रदानकम् ।
अपादानमाधारः षट् स्युः संबन्धस्तु सप्तमः ॥
उक्तानुक्ततया द्वेधा कारकाणि भवन्ति षट् ।
उक्तेषु प्रथमैव स्यादनुक्तेषु कर्मादिमाः ॥
कर्मणि द्वितीया कर्तृकरणयोस्तृतीयिका ।
संप्रदाने चतुर्थी तु अपादाने तु पञ्चमी ॥

End :

अङ्गुल्यग्रे करिशतमास्ते यत् प्र(परि)कीर्त्यते ।
अस्यायमिति संबन्धे षष्ठ्युत्पत्तिस्तु मुख्यतः ॥

(*b*) रसार्णवसुधाकरः.

RASĀRṆAVASUDHĀKARAḤ.

Foll 5*a*—40*b*. Fol. 25*b* is blank.

Same work as the one described under R. No. 369(*c*) *ante*.

Incomplete.

R. No. 403.

Palm-leaf. $14\frac{3}{8} \times 1\frac{1}{2}$ inches. Foll. 102. Lines, 5 in a page. Kanarese. Good.

Purchased in 1911-12 from G. Śrīnivasa Rao of Mysore.

The first three leaves are left blank.

नामलिङ्गानुशासनम्—कर्णाटकटीकासहितम्.

NĀMALIṄGĀNUŚĀSANAM WITH KANARESE COMMENTARY.

Foll. 4*a*—102*b*.

Same work as the one described under No. 1662 of the D.C.S. MSS, Vol. III.

Breaks off in Vanauṣadhivarga of the second Kāṇḍa.

R. No. 404.

Palm-leaf. $14\frac{3}{8} \times 1\frac{3}{8}$ inches. Foll. 91. Lines, 7 in a page. Grantha and Tamil. Good.

Purchased in 1911-12 from E. R. Kṛṣṇamācāriyar of Kalyanapuram.

(*a*) शरणशब्दार्थविचारः.

ŚARAṆAŚABDĀRTHAVICĀRAḤ.

Foll. 1*a*—21*b*.

An investigation into the meaning and significance of the word Śaraṇa occurring in the Dvayamantra.

Complete.

Beginning:

आचार्यं वेङ्कटार्यं परमगुरुमथाचार्यवर्यानशेषान्
सौम्यं जामातृसूरिं भुवनगुरुवरं भट्टरामा[मा]नुजार्यौ ।
श्रीमन्तं यामुनार्यं तदनु मुनिवरं नाथसंज्ञं शठारिं
सेनेशश्रीतदीशाननवरतमहं चेतसा चिन्तयामि ॥
श्रुत्वा जगद्देशिकसंप्रदायं बुद्ध्वा च वेदान्तगुरोः प्रबन्धा[न्] ।
* द्वयाद्यखण्डे शरणाख्यशब्दे विचार्यतेऽर्थो विदुषां मुदेऽस्य ।

* 'श्रीमन्त्ररत्नस्थपदे द्वितीये' इति पाठान्तरम् ।

तत्रभवन्तो लोकाचार्याः முமுக்ஷுப்படி व्याख्याने रहस्यत्रयव्याख्याने द्वयस्थशरणशब्दं உஷ் ப்ராவ்ருத்திக்கும் நிமித்தம் என்கிற நிவாரணத்திற்கும் தப்பாத உபாயமாதல் इति व्याचख्युः । तत्र विचार्यते—किमत्र शरणशब्दप्रवृत्तिनिमित्ततयाभिप्रेतमुपायत्वम् । न तावद्रक्षकत्वम् ।

End:

स्वयमेव जानीहि । परीक्ष्य विविधोपायैरित्युक्ताचार्यचिकीर्षितदार्ढ्यपरीक्षानिवर्तनायेति नात्रोद्देश्यत्वमर्थात् सिध्यतीत्यलं प्रसक्तानुप्रसक्तविचारेणेति सर्वं निरवद्यम् ॥

(*b*) प्रपत्त्यनुपायत्वविचारः.

PRAPATTYANUPĀYATVAVICĀRAḤ.

Foll. 22*a*—33*b*.

An enquiry into the view that Prapatti or self-surrender to God is not a necessary condition precedent for enabling one to attain salvation.

Complete.

Beginning:

आत्मनामात्मरक्षादावस्थानभयवारकः ।
अव्यादव्याजबन्धोर्नः सेव्यः सव्येतरः करः ॥

स्थितं तावदनालोचितविशेषाशेषलोकशरण्यः श्रीनिधिरेव सकलजीवसंजीवनोपाय इति निखिलनिगमतात्पर्यपर्यवसानभूमिरिति । अथ तन्निष्ठानां तच्चरणशरणवरणमपि अधिकारिविशेषणमात्रमित्यभिधीयते—तदिदमगायि गीताचार्येण—

अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः । इति ।

अस्य चायमर्थो रहस्यवेदिभिरादिश्यते—तमेकमेव शरणं गतस्य स एव भगवान् साधनमिति ।

End:

प्रत्युत सर्वप्रपत्तीनां साधनत्वनियम एव अमृतस्यैष सेतुरित्यादिबहुप्रमाणमूलकस्य भगवतः करणत्वव्यपदेशस्यामुख्यत्वपरिहाराय सिद्धो-

पायनिष्ठानुष्ठेयानामधिकारिविशेषणमात्रत्वमकामेनापि स्वीकर्तव्यमेवेति सर्वमवदातम् ॥

(c) नायमात्माश्रुतिव्याख्या.

NĀYAMĀTMĀŚRUTIVYĀKHYA.

Foll. 34*a*—62*a*. Fol. 62*b* is blank.

A commentary on an Upaniṣadic passage which consists of three stanzas in the second Khaṇḍa of the third Muṇḍaka beginning with नायमात्मा in the Muṇḍakōpaniṣad: by Varadārya, also called Mōrmunnaraiyan. These stanzas are interpreted to teach that the Brahman is reached only through Himself and His own grace.

Complete.

Beginning:

नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन ।
यमेवैष[न]वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम् ।

इति श्रुतिः । अस्यास्त्वर्थो द्वेधा भाष्यकारैरभिहितः—साधनलक्षणस्य द्वितीयचरणे परमतः सेतून्मानेत्याद्यधिकरणे उपपत्तेश्चेति सूत्रस्य विषयत्वेनेमां श्रुतिमुदाहृत्यास्यार्थः संग्रहेणानन्योपायत्वश्रवणादित्युक्तः ।

End:

ननु पूर्वार्धात्तं पुनरङ्कुशनिवृत्तिः श्वसृगालभक्ष्य इत्यनेन देहभोगस्य तद्भोगपरवशानां च हेयत्वं द्योत्यते ॥

Colophon:

इति मोर्मुन्नरैयन् अपरनामधेयेन वरदाचार्येण कृता नायमात्माश्रुतिव्याख्या समाप्ता ॥

(d) मीमांसापरिभाषा.

MĪMĀṀSĀPARIBHĀṢĀ.

Foll. 63*a*—91*b*.

Same work as the one described under No. 4488 of the D.C.S. MSS., Vol. IX, with difference in the end.

Complete.

End:

अथ विकल्पे अष्ट दोषा विलिख्यन्ते—

यवशास्त्रं व्रीहिशास्त्रमित्यादिविकल्पशास्त्रेषु द्रष्टव्यम् । प्राप्तप्रामाण्यपरित्यागः, अप्राप्ताप्रामाण्यस्वीकारः, स्वीकृतप्रामाण्यपरित्यागः, अस्वीकृताप्रामाण्यस्वीकारः, त्यक्तप्रामाण्यस्वीकारः, प्राप्ताप्रामाण्यपरित्यागः, अस्वीकृतप्रामाण्यस्वीकारः, स्वीकृताप्रामाण्यपरित्यागः ॥

क्वाहं मन्दमतिः क्वेयं प्रक्रिया भट्टसंमता ।
कृता पदार्थबोधाय बालानां सूक्ष्मबुद्धिनाम् ॥
मदीयां प्रक्रियां दृष्ट्वा विहसन्तु मनीषिणः ।
इति मत्वा मया भाषा कृता नूनं विशेषतः ॥

Colophon:

इति मीमांसापरिभाषा समाप्तिमगात् ॥ समाप्ता ॥

R. No. **405.**

Palm-leaf. 15 × 1⅜ inches. Foll. 15. Lines, 5 in a page. Telugu. Good.

Purchased in 1911–12 from C. Viśvanātha Śāstrigaḷ of Vizianagaram.

नारायणशब्दनिर्वचनम्.

NĀRĀYAṆAŚABDANIRVACANAM.

Foll. 1*a*—11*a*. The remaining foll. are left blank.

Similar to the work described under No. 5085 of the D.C.S. MSS., Vol. X.

The copying of this MS. is said to have been completed on the 13th day of the bright fortnight of the month of Māgha in the year Nala in the presence of Vogirāla Subrahmaṇya.

Incomplete.

Beginning:

नारायण इति महायोगविद्वद्भिर्मूर्तित्रयवाचकत्वं पुराणादिषु प्रसिद्धम् । आदौ तावत् विष्णुपरत्वं निरूप्यते—नामरूपविहीनस्य प्राकृतजलशयनेन नारायणसंज्ञाभिधीयते—

विष्णुः स्वयंभूर्भगवान् सिसृक्षुर्विविधाः प्रजाः ।
अप एव ससर्जादौ तासु वीर्यमपासृजत् ॥
आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः ॥ इति ॥

End:

ब्राह्मणानां शिवो ध्येयः क्षत्रियाणां हरिः स्मृतः ।
हिरण्यगर्भो वैश्यानामुपास्यसदृशः स्मृतः ॥ इति ।

अतः सर्वेषां पुराणानां नहिनिन्दा[रुदाहृता] न्यायेनेतरप्रशंसार्थत्वात्प्रामाण्यमिति ॥

R. No. **406**.

Palm-leaf. 14 × 1¾ inches. Foll. 91. Lines, 11 in a page. Kanarese. Good.

Purchased in 1911-12 from G. Śrīnivāsa Rao of Mysore.

बृहज्जातकम्—कर्णाटकटीकासहितम्.

BṚHAJJĀTAKAM WITH KANARESE COMMENTARY.

A well-known work on astrology: by Varāhamihira. Up to the sixth Adhyāya, the work in this MS. is commented on by Nādadēvārya, a Jaina, and from the seventh to the nineteenth Adhyāya, by Vēṅkaṭanṛsiṁha, son of Vēṅkaṭāmātya.

Breaks off in the nineteenth Adhyāya.

Beginning:

मूर्तित्वे परिकल्पितः शशभृतो वर्त्मापुनर्जन्मना-
मात्मेत्यात्मविदां क्रतुश्च यजतां भर्तामरज्योतिषाम् ।
लोकानां प्रलयोद्भवस्थितिविभुश्चानेकधा यः श्रुतौ
वाचं नः स ददात्वनेककिरणस्त्रैलोक्यदीपो रविः ॥

ಟೀಕಾ :—

ಯಾವನಾನೊಬ್ಬನು ಆತ್ಮಜ್ಞಾನಿಗಳಿಗೆ ಪರಮಾತ್ಮನೆಂತಲೂ ನಿತ್ಯಕರ್ಮ ಶೀಲರಿಗೆ ಯಜ್ಞವೆಂತಲೂ ಗ್ರಹನಕ್ಷತ್ರಾದಿ ಸಮಸ್ತದೇವತೆಗಳಂತು ।

* * * *

Colophon:

श्रीमज्जिनेन्द्रभक्तिनिस्तन्द्रज्ञानचन्द्रिकासान्द्रदहरकुहरनाददेवार्यनिं बृहज्जातकके कन्नडवातिनोल् विरचिसिद भावार्थप्रकाशिके (Kanarese).

* * * *

बालारिष्टयोगः ॥

* * * *

इति श्रीमदनन्तकल्याणगुणसंपन्नाप्रतिमप्रभावलक्ष्मीनृसिंहपादारविन्दोपासकवेङ्कटामात्यतनूभववेङ्कटनृसिंहनिं . . पिण्डायुर्दायजीवशर्मायुर्दायांशायुर्दायाः ॥ (Kanarese).

End:

शिशि(र)करसमागमेक्षणानां सदृशफलं प्रवदन्ति लग्नजातम् ।
फलमधिकमिदं यदत्र भावात् भवनभनाथगुणैर्विचिन्तनीयाः ॥

* * * *

Colophon:

इति श्रीमदनन्तकल्याणगुणसंपन्नाप्रतिमप्रभावलक्ष्मीनृसिंहपादारविन्दोपासकवेङ्कटामात्यतनूभव(वेङ्कटनृसिंह)निं . राशिशिलाध्यायः ॥ (Kanarese)

* * * *

ज्योतिर्जाडचनरेन्द्रनापितनृपक्ष्मेशा बुधाद्यैर्हरौ
तद्वद्भूपचमूपनैपुणयुताः षष्ठे शुभे स्त्र्याश्रयः ॥

R. No. 407.

Palm-leaf. $14\frac{1}{8} \times 1\frac{1}{8}$ inches. Foll. 194. Lines, 6 in a page. Telugu. Good.

Purchased in 1911–12 from C. Viśvanātha Śāstrigal of Vizianagaram.

बृहज्जातकम्—जगच्चन्द्रिकाव्याख्यासहितम्.

BṚHAJJĀTAKAM WITH THE COMMENTARY JAGACCANDRIKĀ.

Foll. 1*a*—192*a*. The remaining foll. are blank.

Same as the above, but with a different commentary called Jagaccandrikā by Bhaṭṭōtpala.

Breaks off in the twelfth Adhyāya.

Beginning:

ब्रह्माजशङ्कररवीन्दुकुजज्ञजीव-
शुक्रार्कपुत्रगणनाथगुरून् प्रणम्य ।
यः संग्रहोऽर्कवरलाभविशुद्धबुद्धे-
रावन्तिकस्य तमहं विवृणोमि कृत्स्नम् ॥

यच्छास्त्रं सविता चकार विपुलैः स्कन्धैस्त्रिभिर्ज्यौतिषं
तस्योच्छित्तिभयात् पुनः कलियुगे संश्रित्य यो भूतलम् ।
भूयः स्वल्पतरं वराहमिहिरव्याजेन सर्वं व्यधा-
दित्थं यं प्रवदन्ति मोक्षकुशलास्तस्मै नमो भास्वते ॥
वराहमिहिरोदधौ सुबहुभेदतोयाकुले
ग्रहर्क्षगणयादसि प्रचुरयोगरत्नोज्ज्वले ।
भ्रमन्ति परितो यतो लघुधियोऽर्थलुब्धास्ततः
करोमि विवृतिप्लवं निजधियाहमत्रोत्पलः ॥

* * * *

सतामयमाचारः यत् शास्त्रप्रारम्भेषु अभिमतदेवतायाः प्रसादात् तन्नमस्कारेण तत्तत्स्तुत्या वा तद्भक्तिविशेषेण वार्थसिद्धिं वाञ्छन्ति । तदयमप्यावन्तिराचार्यः श्रीवराहमिहिरो नाम द्विजोऽर्कालब्धवरप्रसादः ज्योतिःशास्त्रसंग्रहकृद्गणितस्कन्धादनन्तरं होरास्कन्धं चिकीर्षुः अशेषविघ्नोपशान्त्यर्थं भगवतः सूर्यादात्मगामिनीं वाक्सिद्धिं शार्दूलविक्रीडितेनाह— मूर्तित्वे इति ॥

मूर्तित्वे परिकल्पितः . . . किरणस्त्रैलोक्यदीपो रविः ॥
स रविर्भगवानादित्यः नः अस्मभ्यं वाचं गिरं ददातु प्रयच्छतु ।

End:

इति श्रीभट्टोत्पलविरचितायां जगच्चन्द्रिकायां बृहज्जातकविवृतौ राजयोगाध्याय एकादशः ॥

अथातो नाभासयोगाध्यायो व्याख्यायते—नाभासयोगानां चत्वारो विकल्पाः ।

* * * *

साङ्ख्ययोगाश्च विकल्पद्वयेन सप्तविंशतियोगा भवन्ति । आकृतिसाङ्ख्ययोगा आश्रयकृतेन विकल्पत्रयेण.

The remaining leaves are left blank.

R. No. **408.**

Palm-leaf. 14¼ × 1⅛ inches. Foil. 26. Lines, 5 in a page. Grantha. Slightly injured.

Purchased in 1911-12 from Śrīnivāsa-Rāghavāchāri of Conjeevaram.

मन्त्रपटलः.

MANTRAPAṬALAḤ.

Foll. 1*a*—22*a*. Fol. 22*b* is blank and foll. 23*a* to 26*b* contain an index of the Gṛhyaprayōga.

Same work as the one described under No. 62 of the D.C.S. MSS. Vol. I, Part II. A collection of certain Vedic Mantras to be used in the performance of Brahmanical domestic rites and ceremonies.

Complete.

R. No. **409.**

Palm-leaf. 17 × 1½ inches. Foll. 32. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1911-12 from Śaṭhakōpācāriyar of Kumbakonam.

मलयजाकल्याणनाटकम्.

MALAYAJĀKALYĀṆANĀṬAKAM.

A drama the subject of which is the legendary marriage between Malayāḷanāccīyār and God Varadarāja worshipped at Conjeevaram. This marriage is commemorated even now in the Kāñcīpuram Viṣṇu temple during the Paṅguni-uttiram festival. By Vīra-rāghava, son of Nṛsiṁhasūri of Dāśarathi (Mudaliyāṇḍān) family.

Complete.

Beginning:

गवार्थं हस्ताग्रे गहनभुवि गोवर्धनगिरिं
वहन् किंचित्किञ्चित्प्रणमितमुखो वक्षसि(मुहु): ।
कटाक्षैरास्तृण्वन् स्तनगिरिविसंवादपिशुनैः
किशोरो गोपो वः किसलयतु कल्याणलहरीम् ॥

नान्द्यन्ते सूत्रधारः—(समन्तादवलोक्य सहर्षम्) अविप्रकृष्ट एवास्मदिष्टो वसन्तसमयः । यत् किल—

* * * *

पारिपार्श्वकः—किं तद्रूपमास्थितास्तत्रभवन्तः ।

सूत्रधारः—दाशरथिवंशदीपस्य नरसिंहसूरेरात्मसंभवेन वीरराघवेण विरचितं मलयजाकल्याणं नाम रूपकम् ।

* * * *

पौत्रस्य परमेष्ठिनो वाजिमेधस्यापवर्गपर्यवासानं पावनवेगापगातीर्थपरिपूतपवनपरिपूतचर्यमाणपादपीठः स्तम्बेरमगोत्रकूटकुटुम्बी केनचिदपदेशेन मृगयाहेतोः मलयप्रान्तं परिजनपरिबर्हः सममेव नातिदीर्घं प्रवासमभिसंधाय प्रस्थित इति

* * * *

ततः प्रविशति देवराजो विदूषकश्च ।

देवराजः—(साशंसम्) ।

स्फुरत्ताटङ्कश्रीतरलितकपोलाञ्चलतलं
ललाटेनाश्लिष्टं हिमकरकिशोराकृतिमता ।
मुखं मुग्धापाङ्गं मुहुरभिनवस्मेरहसितं
चकोराक्ष्याश्चञ्चत्पुलककालिकं मोहयति माम् ॥

End:

तथापीदमस्तु भरतवाक्यम्—

आनन्दान् प्रदिशन्तु चेतसि सतां हृद्याः कवीनां गिरः
पुण्येयं नगरी चिरं विजयतां तुण्डीरभूषायिता ।
अत्रासौ वरदः श्रिया विहरतां तत्ताद्दशैरुत्सवैः
दोषाश्च प्रशमं प्रयान्तु कलिनोद्भूताः प्रजानां हृदि ॥

इति निष्क्रान्ताः सर्वे ॥

Colophon:

तुरीयोऽङ्कः ॥

R. No. **410.**

Palm-leaf. $17\frac{1}{8} \times 1\frac{3}{8}$ inches. Foll. 107. Lines, 7 in a page. Telugu. Slightly injured.

Purchased in 1911–12 from the Secretary of the Sarasvatī-Bhāṇḍāgāram of Triplicane.

(*a*) लघुशब्देन्दुशेखरव्याख्या—ज्योत्स्ना.

LAGHUŚABDĒNDUŚĒKHARAVYĀKHYĀ: JYŌTSNĀ.

Foll. 1*a*—48*b*.

Same work as the one described under No. 1423 of the D.C.S. MSS., Vol. III.

Breaks off in Paribhāṣāprakaraṇa.

(*b*) लघुशब्देन्दुशेखरव्याख्या.

LAGHUŚABDĒNDUŚEKHARAVYĀKHYĀ.

Foll. 49*a*—66*b*.

Same work as the one described under R. No. 357 *ante*. By Śaṅkarabhaṭṭa.

Breaks off in the Saṁjñāprakaraṇa.

Foll. 67 and 68 are left blank.

(*c*) तर्कविषयः.

TARKAVIṢAYAḤ.

Foll. 69*a*—73*b*.

Contains some discussions regarding the universality of the association of the middle term with the major premise in a logical proposition.

Incomplete.

(*d*) शब्दशक्तिप्रकाशिका.

ŚABDAŚAKTIPRAKĀŚIKĀ.

Foll. 74*a*—104*b*.

A grammatical treatise discussing the force of case-endings, the etymological and current signification of words, the meaning of compound words, etc: by Jagadīśa.

Breaks off in Avyayībhāvaprakaraṇa.

Beginning:

तर्के तन्त्रं च विदुषा विदुषां तोषकारिका ।
क्रियते जगदीशेन शब्दशक्तिप्रकाशिका ॥

ग्रन्थारम्भे विघ्नविघाताय समुचितां शब्दमयीं देवतां ग्रन्थकृत् स्मरति स्म—

अनुभवहेतुः सकले सद्यः समुपासिता मनुजे ।
साकाङ्क्षासन्ना च स्वार्थे योग्या सरस्वती देवी ॥

इतरा तावत् देवता सम्यगुपासितापि उपासके न साकाङ्क्षा । (साकाङ्क्षा)पि वा नासन्ना । आसन्नापि वा न स्वस्योपासितुरभिलषितार्थे योग्या । योग्यापि वा न समस्तोपासकेऽनुभवस्य जनिका ।

जनिकापि वा न सद्यः, किंतु कालक्रमेणैव । सरस्वती तु देवी सकल-मनुज एव साकाङ्क्षा आसन्ना योग्या चोपासिता सती सद्य एवानुभवं तनुते । अतो देवतान्तरमपेक्ष्योत्कर्षवतीयमवश्यमुपास्येत्यत्र तात्पर्यम् ।

End:

अव्ययीभावं लक्षयति—

उत्तरार्थान्वितस्वार्थाव्ययपूर्वस्तु यो भवेत् ।
समासः सोऽव्ययीभावः स्त्रीपुंलिङ्गविवर्जितः ॥

यः समासः स्वोत्तरपदोपस्थाप्यत्वे(प्ये)न यद(पदा)र्थेनान्वितस्य यदर्थस्य बोधकाव्ययपूर्वभागकः, तद्विशिष्टस्य तदर्थस्य बोधनेऽव्ययी-भावः । गृहे निर्मक्षिकम्, उपकुम्भमित्यादौ हि मक्षिकाया अभावः कुम्भादेश्च सामीप्यादिर्मक्षिकादि.

Foll. 105*a*—107*b* contain some discussions on णेरणौसूत्र of Pāṇini.

R. No. **411.**

Palm-leaf. 15¼ × 1¼ inches. Foll. 44. Lines, 10 in a page. Grantha. Slightly injured.

Purchased in 1910–11 from T. Rāmānuja Rao of Triplicane.

भावकौमुदी.

BHĀVAKAUMUDĪ.

Same work as the one described under R. No. 341(*a*) *ante*. Complete.

R. No. **412.**

Palm-leaf. 14⅝ × 1¼ inches. Foll. 92. Lines, 7 in a page. Telugu. Slightly injured.

Purchased in 1911–12 from C. Viśvanātha Śāstrigal of Vizianagaram.

स्मार्तपद्धतिविवेचनिका.

SMĀRTAPADDHATIVĪVĒCANIKĀ.

Deals with the household rituals ordained for Brahmins in Smṛtis: by Yajña-Nārāyaṇasūri, son of Vēṅkaṭasūri of Indrakaṇṭhī family.

Breaks off in Arghyavismṛtinirṇayaprakaraṇa.

Beginning :

वागीशाद्याः सुमनसः . . तं नमामि गजाननम् ॥

शिरसा नमामि जनकात्मजापतिं पवमानसूनुनिजसोदरावृतम् ।
प्र(प)विकल्पतीव्रपटुबाणकार्मुकं परविघ्ननागहरिमञ्जनप्रभम् ॥

श्रीइन्द्रकण्ठ्यन्वयसिन्धुसोमः स्मृत्यादिशास्त्रप्रवणस्त्वभूद्यः ।
प्रथामवाप्तोद्विदुषां च गोष्ठ्यां विद्युसु(द्वत्सु)सो(यो)वेङ्कटसूरिरुर्व्याम् ॥

सूत्रार्थसंग्रहकृतश्च वचांसि सूत्र-
कारस्य सूत्रचयभाष्यकृतोऽखिलानि ।
यज्ञेश्वरः परिविलोचितवानुदार-
ग्रन्थं तदात्मजरलं (?) सरलं विधात(तु)म् ।
पाकयज्ञपदवीं निधितुल्यां स्मार्तपद्धतिविवेचनिकाख्याम् ।
मौनिवाक्यनिचयं च गृहीत्वा साध्वहं विरचयामि कृतिं सः ॥

अथ पाकयज्ञानामादौ धार्याग्निर्निर्णीयते । तदाहापस्तम्बः—नित्यो धार्य इति । अस्य सुदर्शनीयव्याख्या—नित्यः पाणिग्रहणादारभ्य सर्वाचारलक्षणकर्मार्थमयमग्निर्नित्यः ।

End :

अग्नौ कृते तु नाशोऽग्नेः श्राद्धमध्ये भवेद्यदि ।
उपोष्य तद्दिने कर्ता पुनः श्राद्धं परेऽहनि ॥ इति ।

Colophon:

इति श्रीइन्द्रकण्ठीयज्ञनारायणसूरिविरचितायां स्मार्तपद्धतिविवेचनिकायामग्नौ करणविस्मृतिनिर्णयः ॥

अथ प्रसङ्गादर्घ्यविस्मृतिर्निर्णीयते । तत्र देवलः—

पितृकार्यपरो यस्तु पूर्वजो विस्मरेदिह ।
अर्घ्यपात्रोदकं विप्रपाणौ पैतृककर्मणि ॥

* * * *

ततोऽर्घ्यपात्राण्यास्तीर्य विप्राणां तु यथाविधि ।
अर्घ्यप्रदानान्तं कृत्वा शेषकर्म समापयेत् ॥

इति । विप्राणां विप्र ।

R. No. **413.**

Palm-leaf. 16 and 9⅞ × 1¼ inches. Foll. 44. Lines, 6 in a page. Grantha. Good.

Purchased in 1911–12 from T. N. Narasimhācāriyar of Triplicane.

(*a*) वात्स्यवरददेशिकवैभवप्रकाशिका.

VĀTSYAVARADADĒŚIKAVAIBHAVAPRAKĀŚIKĀ.

Foll. 1*a*—9*a*.

A treatise in prose giving a biographical account of Vātsya Varadadēśika *alias* Nadādūr Ammāḷ who was the teacher of Vēdāntadēśika's preceptor: by Varadārya of Śrī-Vatsagōtra and bearing the title of Mīmāṁsāvallabha.

Complete.

Beginning:

वात्स्यस्य वरदार्यस्य चरितं येन वर्णितम् ।
वन्देऽहं वरदार्यं तं मीमांसावल्लभश्रुतम् ॥

अस्ति खलु विस्तीर्णवैभवशालिनी सत्यव्रतक्षेत्रालङ्कारभूता सप्तसु मुक्तिनगरीषु गरीयसी काञ्ची नाम पुरी । तत्र जगत्त्रयविख्यातपवित्रताशालिवत्सवंशमुक्तामणिर्महादयाधीशो नाम ब्रह्मविच्चूडामणिरवात्सीत् ।

स च भगवतो रामानुजमुनेर्भगिन्याः कनीयस्या अपि सकलगुणगणगरीयस्याः कमलाह्वयशालिन्या द्वितीयमप्यद्वितीयमाश्रममुररीकृत्य वरदविष्णुं नाम सद्गुणभ्राजिष्णुं कमपि कुमारमजीजनत् । स च भगवद्भाष्यकारप्रियभागिनेयस्तत्र्यन्तव्यतिरिक्तनिखिलतन्त्रेषु स्वतन्त्रतामधिगत्य कणचरणाक्षिचरणादिप्रवर्तितशास्त्रपरिश्रमविशदमतिकथकततिगभीराहंकारन्यक्कारिवैखरीक एधामास ।

End:

तच्चरमकैङ्कर्यमहोत्सवं वादिहंसाम्बुवाहादयः देवराजनाम्ना तदीयकुमारेण निर्वर्त्य कृतकृत्या अभूवन् ॥

Colophon:

इति मीमांसावल्लभवात्स्यवरदकृतिषु वरददेशिकवैभवप्रकाशः संपूर्णः ॥

(*b*) कमलिनीकलहंसकथा.

KAMALINĪKALAHAṀSAKATHĀ.

Foll. 10*a*--11*a*. Foll. 9*b*, 11*b* and 12 are left blank.

Gives the story in prose of a well-known drama called Kamalinī-Kalahaṁsa, celebrating the marriage of king Kalahaṁsa with Kamalinī. By Gōvinda of Śrī-Vatsagōtra.

Complete.

Beginning :

आसीदखिलनरपतिशेखरितशासनः सारसिकारसिकः सकलकलाकलशोदधिकलानिधिः कलहंसो नाम राजावतंसः । स च कमलाकरं नाम निजमातुलं जातुचित् परिभूय तदीयदुहितरं कमलिनीं धात्रेय्या सह बकोटहतको जहारेति वार्ताहरमुखाद्वार्तामवगत्य तदुत्सिसादयिषया भ्रमरकं नाम दूतं संदिश्य सारसं नाम स्यालमन्तपालं प्रति प्राहिणोत् ।

End:

कलहंसश्च सारसिकाकमलिनीभ्यामनन्तरायीकृतसुखानुभवः पृथिवीं पालयामास ॥

बुधा यूयं कमलिनीकलहंसकथासुधाम् ।
वात्स्यगोविन्दविदुषा वितीर्णां पिबतान्वहम् ॥

(*c*) वात्स्यवरदार्यवैभवप्रदीपः.

VĀTSYAVARADĀRYAVAIBHAVAPRADĪPAḤ.

Foll. 13*a*—22*b*.

Similar to the work described under sub-division (*a*) above. By the same author as of the work described there.

Complete.

Beginning:

दुर्मतविहतालोके लोके लोकेश्वरो यदाकारम् ।
विदधे बुधदृग्दीपं स जयति वत्सान्ववायवरदार्यः ।
श्रुत्यन्तपीठधुर्यश्रीयतिराजार्यभागिनेयगुरुः ।
पौत्री येन प्रथते साक्षा . . . ॥
श्रीदेवराजसूरिर्वादे वादीन्द्रदत्तजयपत्रः ।
पुत्री येन प्रथते . . . . . ॥

End:

वात्स्यश्रीवरदार्यप्रभावदीपं जगत्तमोनुत्त्यै ।
योऽदीपयत्तमीडे मीमांसावल्लभाङ्कवरदार्यम् ॥

Colophon:

मीमांसावल्लभाङ्कवरदार्यकृतौ वात्स्यवरदार्यप्रभावदीपः संपूर्णः ॥

(*d*) वरददेशिकसंभावना.

VARADADĒŚIKASAṀBHĀVANA.

Fol. 23.

Contains the form of address to Varadadēśika, intended to be recited during the performance of religious ceremonies.

Complete.

Beginning:

श्रीमदखण्डमहीमण्डलमहनीयज्ञानवैराग्यानुष्ठानविभवविख्यातवत्स-कुलकलशकल्लोलमालिकलितजगद्भद्राकरं सुभद्रांशताराधिपावताराणां श्री-भगवद्रामानुजप्रियभागिनेयभाष्यसिंहासनप्रथमाचार्यवरदविष्णुवरदगुरुपौत्रा-णां भिदाविषयवादाहवविजितवादिजनवितीर्णजयपत्रपवित्रतरयशस्कदेवरा-जार्यपुत्राणाम् ।

End:

तत्त्वसारमङ्गलाशासनादिबहुप्रबन्धनिर्मातॄणां नडादूर् अम्माल् श्री-मद्वरददेशिकानां संभावना ॥

(*e*) वरददेशिकसुप्रभातम्.

VARADADĒŚIKASUPRABHĀTAM.

Fol. 24.

A number of stanzas wishing good morning to Varadadēśika: by the same author as of the work described under sub-division (*a*) above.

Complete.

Beginning:

श्रीमानुदेति तव शिष्य इवांशुमाली
धूतान कर्तुममतानि तमांसि गोभिः ।
अज्ञानमस्तमिव ऋच्छति चान्द्रबिम्बं
श्रीवत्सशेखर विभो तव सुप्रभातम् ॥

End:

चेतःप्रसादकरमेतदवेत लोकाः
नेतः परं किमपि विश्वसितास्मदुक्तिम् ।

जातः क्षितौ य इह सोऽभ्युदयं यदीच्छेत्
प्रातः पठेद्वरददेशिकसुप्रभातम् ॥

Colophon:

इति वात्स्यवरदकृतौ वरददेशिकसुप्रभातं संपूर्णम् ॥

(*f*) वरददेशिकदण्डकम्.

VARADADĒŚIKADAṆḌAKAM.

Foll. 25*a*—26*a*.

A hymn in praise of Varadadēśika composed in a kind of long rhythmic metre called Daṇḍaka. by the same author as of the above.

Complete.

Beginning:

श्रीवत्सवंशवाराशेरुत्सवाय कृतोदयम् ।
वन्दे तमःशमायाहं वरदार्यसुधाकरम् ॥

महितवरदविष्णुविष्ण्वन्तरङ्गत्ववर्धिष्णुसत्कीर्तिरोचिष्णुविख्यातिमद्भाष्यसिंहासनाध्यक्षमुख्या(य) ।

End:

षष्टिगुणोज्ज्वलचरणं वरदगुरूत्तंसदण्डकं वरदम् ।
नरजन्मदुःखहरणं नरजन्मानं नराः पठत ॥

Colophon:

इति वात्स्यवरदकृतौ वरददेशिकदण्डकं संपूर्णम् ॥

(*g*) वरददेशिकगद्यम्.

VARADADĒŚIKAGADYAM.

Foll. 26*a*—28*b*.

Similar to the above in substance, but purely prose in form, involving long compound words. By the same author as of the above.

Complete.

Beginning :

श्रीवत्सवंशकेतौ श्रितशुभहेतौ भवाम्बुधेः सेतौ ।
वरदाख्ये गुरुमुख्ये हृदय रमस्वान्यतो विरम ॥

विजयी भवतु विपुलकलिबलविततवितथविविधविमतकथककथितकृति-शतहृतमतिजगदवनसदयहृदय ।

End :

यद्यस्ति वो मुमुक्षा गद्यमिदं वत्सदेशिकेन्द्रस्य ।
सद्यश्चिन्तितफलदं हृद्यं संधत्त किं परैः सुधियः ॥

Colophon :

इति वात्स्यवरदकृतौ वरददेशिकगद्यं संपूर्णम् ॥

(*h*) वरददेशिकपञ्चाशत्.

VARADADĒŚIKAPAÑCĀŚAT.

Foll. 29*a*—35*b*.

Fifty stanzas in praise of Varadadēśika : by the same author as of the above.

Complete.

Beginning :

अवगाहेऽस्मदाचार्यगोष्ठीमद्भुतजाह्नवीम् ।
अभङ्गामभवस्पर्शामजडाशयसंगमाम् ॥
या भात्यार्हतशांकरादिसमयक्ष्माभागरिङ्क्षत्तमः-
क्षोभाधीनजनावनाय वचसा वैभाकरश्रीमुषा ।
सा भाष्यामृतवर्षिणी यतिवपुःशोभावती देवता
लोभादिप्रतिपन्थिनी विजयतां लाभाय नः संपदाम् ॥

End :

अष्टासु प्रथितैर्दिशासु विरुदैरष्टावधानादिभिः
स्पष्टा यस्य तु चातुरीमतिमिहाचष्टामितां पश्यतः ।
इष्टार्थप्रदया स वात्स्यवरदः शिष्टाग्रणीशासनात्
तुष्टात्मा निजवंशदेशिकमणिं तुष्टाव पञ्चाशता ॥

(*i*) वरददेशिकमङ्गलाशासनम्.

VARADADĒŚIKAMAṄGALĀŚĀSANAM.

Foll. 36*a*—37*b*.

A hymn of benedictory stanzas addressed to Varadadēśika: by Sundarārya of Śrī-Vatsagōtra.

Complete.

Beginning:

श्रीमतो वरदार्यस्य मङ्गलाशासनेन यः ।
अस्मानुज्जीवयामास सुन्दरार्यं तमाश्रये ॥
श्रीमत्यां चैत्रचित्रायां परतत्त्वस्य निर्णयम् ।
कर्तुमाविरभूद्योऽस्मै वरदार्याय मङ्गलम् ॥

End:

श्रियःपतिसमारम्भां वरदाचार्यमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥

Colophon:

इति वात्स्यसुन्दरदेशिककृतौ वरदगुरुमङ्गलाशासनं संपूर्णम् ॥

(*j*) वरददेशिकाष्टोत्तरशतनामस्तोत्रम्.

VARADADĒŚIKĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Foll. 38*a*—42*b*.

Contains one hundred and eight significant names in praise of Varadadēśika. By Varadadēśika of Śrī-Vatsagōtra.

Complete.

Beginning:

श्रीमद्वैकुण्ठनिर्देशश्रितविश्वावनादरः ।
काञ्चीपुरमहीकान्ताकमनीयशिरोमणिः ॥

End:

पठन्तः पाठयन्तश्च निःशेषश्रेयसां पदम् ।
भवेयुर्वत्ससूरीन्द्रकरुणापाङ्गरिङ्गणैः ॥

Colophon:

इति मीमांसावल्लभवरदार्यकृतौ वरददेशिकाष्टोत्तरशतं संपूर्णम् ॥

(*k*) सन्ध्यावन्दनप्रयोगः.

ANDHYĀVANDANAPRAYŌGAḤ.

Foll. 43*a*—44*b*.

On details of procedure connected with the performance of the daily prayers.

Incomplete.

Beginning:

अच्युताय नमः । अनन्ताय नमः । गोविन्दाय नमः इत्याचम्य,

अङ्गुल्यग्रैर्नासिकाग्रं संपीड्य पापनाशनम् ।
प्राणायाममिदं प्रोक्तमृषिभिः परिकीर्तितम् ॥
भूम्यादिऊर्ध्वलोकस्य उपरिस्थो दिवाकरः ।
दशप्रणवसंयुक्तं त्रिरावृत्य पुनः पुनः ॥

इति प्राणानायम्य, श्रीभगवदाज्ञया भगवत्प्रीत्यर्थं प्रातः सन्ध्यावन्दनं करिष्ये इति संकल्प्य ।

End:

सायं सन्ध्यागायत्रीजपं करिष्यामः इति संकल्पः,

वरुणः पापतरणं भया(प्रदा)स्यति सुनिश्चयात् ।
आयुःप्रदो भव त्वं हि यजमानाय सन्ततम् ॥

R. No. **414.**

Paper. 9¼ × 4¼ inches. Foll. 4. Lines, 10 in a page. Dēvanāgarī. Good.

Purchased in 1911–12 from C. Viśvanātha Śāstrigaḷ of Vizianagaram.

मातृकाप्रश्नः.

MĀTṚKĀPRAŚNAḤ.

On the repetition of Mantras formed by combining the Dēvīmantras with the various letters of the Sanskrit alphabet: by Śaṅkarācārya.

Complete.

Beginning:

अथ मातृकाप्रश्नः—

ओं क्लीं व्रीमार(म्भ)सिद्धिकारि(णि) सिद्धिं देहि स्वाहा। एतन्मन्त्रं शुभे वारे घटिकाभि(रभि)मन्त्र्य मातृकाकेवलिकाप्रश्नः कर्तव्या(:)। अकारादिह(क्ष)कारान्तस्तद्वर्गमातृका लिख्यते—

अकारे विजयं विद्याद्धनप्राप्तिस्तथैव च।
सिध्यन्ति सर्वकार्याणि पुत्रलाभस्तथा ध्रुवम्॥

End:

क्षकारे सुफलं कार्यं सर्वसिद्धिः प्रजायते।
सर्वत्र लभते सिद्धिं रुद्रवाक्यं न संशयः॥

Colophon:

इति श्रीशंङ्कराचार्यविरचिते मातृकाप्रश्नः समाप्तः॥

R. No. **415.**

Paper. 6 × 3¼ inches. Foll. 3. Lines, 17 in a page. Dēvanāgarī. Good.

Purchased in 1911–12 from C. Viśvanātha Śāstrigaḷ of Vizianagaram.

मातृकारत्नमालिका.

MĀTṚKĀRATNAMĀLIKĀ.

A treatise giving the significance of the letters of the alphabet, the presiding deity for each of them, etc.

Complete.

Beginning:

शृणु देवि प्रवक्ष्यामि मातृकाकोशमुत्तमम्।
यस्य विज्ञानमात्रेण मन्त्राः स्युः करवारिवत्॥

देव्युवाच—

भगवन् देवदेवेश श्रोतुमिच्छामि सांप्रतम्।
मातृकार्णान् सदैवत्यान् साकारान् मंन्त्रमूलकान्॥

शिव उ(वाच)—

अकारमात्मबीजं च अकारं मृत्युबीजकम् ।
आकारं पाशसंज्ञं च आकारेण तु वर्षयोः ॥

End:

एतद्रहस्यमज्ञात्वा साधकानां सुखावहम् ।
एतस्य फलबाहुल्यं मया वक्तुं न शक्यते ॥
इति ते कथितं किंचिद्वर्णमाहात्म्यमम्बिके ।
समासेन कुलेशानि किं भूयः श्रोतुमिच्छसि ॥

Colophon:

इति हरगौरीसंवादे मातृकारत्नमालिका संपूर्णा ॥

R. No. 416.

Paper. $5\frac{1}{2} \times 3\frac{7}{8}$ inches Foll. 4 Lines, 17 in a page. Dēvanāgarī. Good.

Purchased in 1911–12 from C. Viśvanātha Śāstrigaḷ of Vizianagaram.

वाञ्छाकल्पलतोद्धारः.

VĀNCHĀKALPALATŌDDHĀRAḤ.

Deals with the particulars regarding the Dēvīmantra and the mystic diagram relating to that Mantra.

Complete.

Beginning:

देव्युवाच—

भगवन् सर्वमन्त्राश्च भवता मे प्रकाशिताः ।
तत्र विद्या गणेशस्य वाञ्छाकल्पलतामनुः ॥
सूचितः कृपया देव सुगुप्तो न प्रकाशितः ।
इदानीं श्रोतुमिच्छामि सर्वलोकहिताय वै ॥

* * * *

ईश्वर उवाच—

श्रृणु देवि प्रवक्ष्यामि वाञ्छाकल्पलतामनु(नो):।
श्रीविद्यागणनाथस्य रहस्यं परमाद्भुतम् ॥

* * * *

तत्सर्वं लभते सत्यं वाञ्छाकल्पलतामनोः ।
श्रीविद्याकथितं देवि तव स्नेहान्मम प्रिये ॥

Colophon:

इति तन्त्रोक्तसारशैवतन्त्रे उमामहेश्वरसंवादे वाञ्छाकल्पलता(यां) श्रीगणेशविवरणं नामाष्टमः पटलः ॥

ईश्वर उवाच—

अथातः संप्रवक्ष्यामि वाञ्छाकल्पलतामनोः ।
आनुपूर्वीश्च ऋग्वेदसूक्तं चैव पृथक् पृथक् ॥
साधकानां सुबोधाय वाञ्छितार्थप्रसिद्धये ।
गुह्याद्गुह्यतमो देवि मन्त्रोद्धारविधिर्मया ॥

End:

असाध्यं साधयेल्लोके ह्यवश्यं वशमानयेत् ।
किमत्र बहुनोक्तेन सर्वान् कामानवाप्नुयात् ॥

Colophon:

इति मन्त्रसारे वाञ्छाकल्पलतोद्धारः ॥

R. No. 417.

Palm-leaf. 10⅝ × 1⅞ inches. Foll. 29. Lines, 6 in a page. Telugu. Good.

Purchased in 1911–12 from C. Viśvanātha Śāstrigal of Vizianagaram.

(*a*) शिवस्तोत्रम्—सव्याख्यानम्.

ŚIVASTŌTRAM WITH COMMENTARY.

Foll. 1*a*—17*a*.

A hymn of alliterative stanzas in praise of Śiva. The commentator's name is not known

Complete.

Beginning :

वाश्वारेड्ध्वजधक् धृतोड्वाधिपतिः कुप्रेड्जजानिर्गणेट्
गोराडारुडुरःसरेडुरुतरग्रैवेयकभ्राडरम् ।
उड्वीडूडूनरकास्थिधृक्त्रिदृगिभेडार्द्राजिनाच्छच्छदः
स स्यादम्बुमदम्बुदालिगलरुग्देवो मुदे वो मृडः ॥ १ ॥

अस्यार्थः—वार्षु उदकेषु चरन्तीति वाश्वाराः जलचराः मत्स्यमण्डूकादयः तेषामीट् वाश्वारेट् मत्स्यश्रेष्ठ इत्यर्थ. । स ध्वजः केतनं यस्य सः तथोक्तः मीनकेतन इत्यर्थः । तं दहतीति वाश्वारेड्ध्वजधक्, सकलऋषितपोविघ्नकारित(म)न्मथदाहीत्यर्थः ।

End :

राजाराजार्चिताङ्घ्रेरनुपचितकलो यस्य चूडामणित्वं
नागा नागात्मजार्थं न भसितधवलं यद्वपुर्भूषयन्ति ।
मा रामारागिणी भून्मतिरिति यमिनां येन वोऽदाहि मारः
सप्ताः सप्ताश्वनुन्नारुणकिरणनिभाः पातु विभ्रत्त्रिणेत्रः ॥ ९ ॥

अस्यार्थः—त्रीणि नेत्राणि सूर्यचन्द्रानलात्मकानि यस्य सः परमेश्वरः वः युष्मान् पातु रक्षत्विति आशीराशास्महे ।

* * * *

उक्तश्रुतिवाक्यार्थनिश्चितशाब्दबोधो(प)ष्टम्भनमिति निश्चयार्थः ॥

अस्माकमाशिषामोघैरमोघैरघहारिभिः ।
चिरं जीव चिरं जीव सुखी भव सुखी भव ॥

Fol. 17*b* is left blank

(b) चाटुश्लोकाः.

CĀṬUŚLŌKĀḤ.

Foll. 18a—21b. Foll. 22 and 23 are left blank. Foll. 24 to 29 give a number of stanzas from various lexicons.

A collection of witty stanzas.

The MS. is said to have belonged to Kumāri Āñjanēya Śāstri.

Beginning:

ताताज्ञया यातटविर्वातापिभुग्रातासियुक
दातासुरः पीतामृतत्राता जगन्नेता विभुः ।
आताम्रहग्वीतारिसाकेतालये पैतामहे
स्थाता भुवः पाता मुदा पातात्सदा सीतापतिः ॥
विद्वंस्त्वद्वदनाम्बुजे भगवती वाणी सदा नृत्यति
तद्द्रष्टुं कमला समागतवती लोलेति बद्धा गुणैः ।
कीर्तिः कुन्दकरीन्द्रचन्द्रकुमुदक्षीरोदहारोपमा-
त्रासादम्बुनिधीन्विलङ्घ्य सहसा नाद्यापि विश्राम्यति ॥

End:

परस्परं स्वमर्माणि ये वदन्ति नराधमाः ।
तावुभावपि नश्येतां वल्मीकोदरसर्पवत् ॥

R. No. **418.**

Palm-leaf. 16¾ × 1½ inches Foll. 29. Lines, 7 in a page. Telugu. Slightly injured.

Purchased in 1911–12 from K. Rāmasāmi Ayyaṅgār of Mysore.

वीरभद्रविजयः.

VĪRABHADRAVIJAYAḤ

A work in prose and verse in commemoration of the exploits of Vīrabhadra, a manifestation of Śiva. by Ēkāmbradīkṣita, son of Muktīśvaradīkṣita and a disciple of Sukhacidrūpabhāratī, who was a descendant of Rāmaliṅgādhvarin. The author was a Paṇḍit in the court of Elahaṅka Mummaḍikōpa, a chieftain of Viśālā.

Complete.

The author refers to a king of the Kīra country.
Complete in five Ullāsas.

Beginning:

श्रेयो मे विदधातु शङ्करजटागङ्गातरङ्गानिल-
व्यालोलेन्दुकलानिरर्गलगलत्प्रोद्दामधारासुधा ।
यामालोक्य करप्रसारणपरो मायाकरीन्द्रो गुहो
वामाङ्कस्थितपार्वतीस्तनयुगस्तन्यं पिबन्मोदते ॥

* * * *

दुर्वेद्यानाद्यविद्याविलसितविषयाध्यासदोषानुषङ्ग-
च्छन्नस्वानन्दसिद्ध्या(मुद्ध)न्मनुजपरिजिघृक्षोद्यतैकप्रतीकम् ।
ज्योतिः कारुण्यशीलं कलयतु सुखचिद्रूपभारत्यभिख्यं
मुख्यं मद्भागधेयं मुहुरपि हृदयं मामकीनं सुखेन ॥
सद्यो निर्भिन्नमत्र(त्त)द्विपरदसुभगंभावुकाशेषशास्त्र-
व्याख्याविख्यातिधारापरिमललहरीपूरिताशावकाशम् ।
तं वन्दे रामलिङ्गाध्वरिकुलतिलकं सर्वतन्त्रस्वतन्त्रं
येनेत्थं भावितोऽहं सकलकविबुधश्लाघनीयोऽधुनास्मि ॥

* * * *

बहवो देशाः । तत्र च विचित्राणामावासः, विनयस्य जन्मभूमि

* * * *

कामितार्थानां कोशः । तत्र—

मेरूपमः सुमनसां वसतिः प्रजाना-
मिष्टार्थसाधनमनोहरकल्पवृक्षः ।
सामन्तदुर्ग इति सर्वजगत्प्रसिद्धः
शैलो विभाति शशलाञ्छनबिम्बचुम्बी ॥

* * * *

सदृशी च पुराणभोगवत्या सदृशी याजनि हन्त भोगवत्या ।
भुवि या लसते सभा विशालाप्यतिचित्रा नगरी विभा विशाला ॥

* * * *

तत्र—

सजलजलदमूर्तिश्चन्द्रसंकाशकीर्तिः
परिहृतविनतार्तिः प्रौढविज्ञानमूर्तिः ।
समरजनितरौद्रः सर्वरक्षाविनिद्रः
प्रचुरगुणसमुद्रो राजते वीरभद्रः ॥

End:

नन्दीश्वरनरेन्द्रोऽयं नगरं निजमाविशत् ।
ततस्तदा जनाः सर्वे ततं देशमथागमन् ॥

* * * *

पुष्णन् पादावनम्रान् पुरहरचरणाम्भोजपूजां वितन्वन्
धिन्वन् कामैः कवीन्द्रान् द्विषदवनिपतीन् भञ्जयन् दोर्विलासैः ।
रक्षन् सानन्दमुर्वीमवहितमनसा धर्मशास्त्राणि शृण्वन्
श्रीमान् कीरावनीराडनुभवति सदा सर्वसाम्राज्यलक्ष्मीम् ॥

Colophon :

इति श्रीसकलतन्त्रस्वतन्त्रबिरुदसमर्थनसमर्थवैदुषीकरम्बितहरजटाजूटनटनभङ्गगङ्गातरङ्गरिङ्गणघाणङ्घणीप्रियंवदगवीगुम्भसंभावितपुंभावशारदारूपस्य मुक्तीश्वरदीक्षितस्य तनूभुवा एलहंकमुम्मडिकोपभूपालसभाभरणेन एकाम्रदीक्षितेन विरचिते श्रीवीरभद्रविजये श्रीमति चम्पूप्रबन्धे पञ्चमोल्लासः । समाप्तश्चायं ग्रन्थः ॥

R. No. **419.**

Paper. 8¼ × 6¼ inches. Foll. 92. Lines, 16 in a page. Grantha. Good.

In this MS. there are many omissions due perhaps to lacuna in the original of which this is a copy.

Purchased in 1911-12 from M. Rāmakṛṣṇakavi of Vanaparti.

जाम्बवतीकल्याणनाटकम्.

JĀMBAVATĪKALYĀṆANĀṬAKAM.

A drama based on the Puranic account of the marriage between Kṛṣṇa and Jāmbavatī: by Kṛṣṇarāya of Vijayanagar.

Complete.

Beginning:

वासिष्ठंस्स(ञ्छितं स)ततं देयात्तद्वारणमुखं महः ।
यच्चन्द्रमौलेरानन्दनिष्यन्दं प्रथमं विदुः ॥

अपि च—

सौख्यं समग्रयतु वः स जगन्निवासः
यस्योरसि स्फुरति कौस्तुभरत्नहारः ।
गाढोपगूढकमलाहृदयानुराग-
निष्यन्दबिन्दुरिव निश्चलसंनिवेशः ॥

* * * *

नान्द्यन्ते सूत्रधारः—(सानन्दं परिक्रम्य, सपुष्पाञ्जलिक्षेपम्)

* * * *

अद्य खलु चराचरगुरोरपारकरुणापारावारस्य नमदमरशिरोमन्दार-पादारविन्दस्य विजयनगरनिवासवासनावधीरितधनदनगरविहारदोहलस्य हेमकूटगिरिकट(क)वास्तव्यकुटुम्बिनः कर्णाटराज्यरक्षामणेः श्रीविरूपाक्ष-देवस्य चैत्रोत्सवावलोकनाय संगता परिषत् ।

* * * *

. . . . . (श्रीकृष्णरायः कविः

सूक्तिः कर्णरसायनं सुमनसां श्लाघ्यस्वभावा सभा ।
चारित्रं यदुवंशशेखरमणेर्देवस्य सर्वोत्तरः
पारम्पर्यकृतश्रमाः पुनरमी नाट्येन पारा वयम् ॥

* * * *

(ततः प्रविशति नारदः) नारदः—अहो महतामपि परोरजो मनः सर्वजनप्रवर्तनाय स्वयमपि संसारमनुरुणद्धि । यतः—

देवे यादववंशमौलिमणितां याते जगद्रक्षितुं
जाता जाम्बवतः कुले जलधिजां सा जाम्बवत्याख्यया ।
पौत्रीं तामरविन्दभूर्घटयितुं पुंसा परेणामुना
मामादिक्षदमन्दसंमदवशादावि स्मितैराननैः ॥

End :

तथापीदमस्तु भरतवाक्यम्—

लक्ष्मीः स्थैर्यं भजतु विदुषां मन्दिरेषु प्रकामं
सन्तः काव्यं परिणतरसं सन्ततं भावयन्तु ।
कोदण्डाङ्कं किमपि करुणापूरपूर्णायताक्षं
श्यामं धाम श्रयतु सततं चेतनां मामकीनाम् ॥

एवमस्तु । इति निष्क्रान्ताः सर्वे ॥

पञ्चमोऽङ्कः—

धर्मं पादचतुष्टयेन कृतवत् स्थैर्यं समालम्बतां
चातुर्वर्ण्यमुपैतु कर्म सततं स्वस्वाधिकारोचितम् ।
शेषक्ष्माधरनायकस्य कृपया सप्तार्णवीमध्यगां
रक्षन् गामिह कृष्णरायनृपतिर्जीयात् सहस्रं समाः ॥

Colophon :

समाप्तमिदं राजाधिराजराजपरमेश्वरसकलकलाभोजराजविभवमूरूराय-(र)गण्ड श्रीमत्कृष्णरायमहारायविरचितं जाम्बवतीकल्याणं नाम नाटकम् ॥

R. No. **420.**

Palm-leaf. 13¾ × 1⅛ inches. Foll. 144. Lines, 6 in a page. Telugu. Good.

Purchased in 1911–12 from the Secretary of the Sarasvatī-Bhāṇḍāgāram of Triplicane.

ताजकसारः.

TĀJAKASĀRAḤ.

An astrological treatise dealing with horoscopy, divination and the forecasting of meteorological conditions. It has three sections, namely, Saṁjñātantra (8 Adhyāyas), Pṛcchātantra (7 Adhyāyas), and Varṣacaryā (11 Adhyāyas) : by Vēṅkaṭanātha, son of Appayārya of Kāśyapagōtra and disciple of Vēṅkaṭēśa Raghunātha, who was the son of Śaṅkara of Ātrēyagōtra, a disciple of the author. He refers to another work of his named Sarvārthacintāmaṇi. The author lived about Śaka 1577 (1654 A.D.).

The first Khaṇḍa is said to be complete in 26 Adhyāyas.

Beginning :

श्रीमद्वेङ्कटनायकं हृदि विभुं नत्वा रमावल्लभं
विघ्नेशं शरदिन्दुकुन्दधवलां वाग्देवतामम्बिकाम् ।
लोकानां स्थितिसंयमोद्भवविधौ भान्विन्दुमुख्यान्ग्रहान्
यं सर्वे सकृदेव जन्मजलधेः संयान्ति पारं परम् ॥
दिक्पालान् निगमाङ्गशास्त्रकुशलान्प्राश्नेयकाख्यार्णवा-
दुद्धृत्यातिविचित्रमर्थसुलभं शास्त्रस्तवं प्रारभे ।
श्रीमत्काश्यपवंशजातसुमतेर्जातोऽप्पयार्यात्कलौ
श्रीमद्वेङ्कटनायकः शकमितैस्तर्काब्धिबाणेन्दुभिः ॥
ज्योतिःशास्त्रविवेकसारविदुषां त्रिस्कन्धविप्रीतये
लोकानां फलनिश्चयेऽतिसुकरं सारं समालोक्य (त)त् ।
मुक्त्वा ताजकशास्त्रमार्गरचनां नान्यत्र शास्त्रान्तरं
तस्माद्वर्षचरीमनेन विधिनोपायैः समस्तैरहम् ॥
गुरूपदेशादखिलार्थयुक्तं विचित्रशास्त्रान्तरमार्गतोऽपि ।
यथा स्वबुद्ध्या कुसुमेषु भृङ्गस्तन्त्रत्रयं ताजकशास्त्रसारे ॥
संज्ञा(ख्य)तन्त्रं प्रथमं हि पृच्छातन्त्रं द्वितीयं परतस्तृतीयम् ।
वर्षप्रवेशोद्भवलग्नरीत्या तद्वर्षचर्याख्यमिहामनन्ति ॥

* * * *

आत्रेयान्वयसंभूतशंकरार्यसुरा(ता)र्चितः ।
श्रीवेङ्कटेशकृपया वेङ्कटेश्वरशर्मणः ॥
प्राश्नेयकस्य सिद्धान्तादुद्धृत्य विदुषां मुदे ।
एतत्पञ्चदशाध्यायमकरोदप्पयात्मजः ॥

Colophon :

इति ताजकसारे पञ्चदशोऽध्यायः । इति पृच्छातन्त्रः समाप्तः ॥

End :

इति ताजकसारेऽस्मिन् वर्षचर्या मया कृता ।
श्रीमद्वेङ्कटनाथेन दशमाध्यायवर्णनम् ॥

Colophon :

इति ताजकसारे वर्षचर्यामासचरीफलकथनं नाम दशमोऽध्यायः ॥

* * * *

निष्ठुरं क्रूरवाक्यादिभाषणं नीचमूढगाः ।
स्वोच्चस्वक्षेत्रगाः पापास्तत्तद्यामे सुशोभनम् ॥
पञ्चाशदूनसाहस्रश्लोकमात्रं सुनिश्चितम् ।
अध्यायस्त्विह संग्राह्यस्त्वेकादशविभागतः ॥

Colophon :

इति ताजकसारे षोड(एकाद)शोऽध्यायः ॥
श्रीवेङ्कटेशोऽप्पयभूसुरार्यात् त्रिस्कन्धवित्काश्यपगोत्रजातात् ।
जातोऽथ सिद्धान्तसुनिश्चितार्थः श्रीवेङ्कटेशाङ्घ्रिसरोजचित्तः ॥
तन्त्रत्रयं ताजकशास्त्रमार्गे रत्नाकरादुद्धृतरत्नसारम् ।
प्रोक्तं महागोप्यमतीव रम्यं विनिश्चितार्थं महतां हितार्थम् ॥
इति ताजकसारे प्रथमखण्डं संपूर्णम् ॥

R. No. 421.

Palm-leaf. 13⅞ × 1¼ inches. Foll. 273. Lines, 7 in a page. Telugu. Good.

Purchased in 1911–12 from C. Viśvanātha Śāstrigaḷ of Vizianagaram.

The first two leaves are left blank.

दैवज्ञविलासः.

DAIVAJÑAVILĀSAḤ.

Foll. 3*a*—247*b*.

A comprehensive treatise on the calculation to be made in preparing a calendar. This is said to form the second of the works of Lolla Lakṣmaṇa. But there is another treatise of this name by this author, which deals with astronomy and astrology in 108 Ullāsas, and which is therefore different from this work.

Incomplet e.

Beginning :

ततो नु दैवज्ञविलासनाम्नि ग्रन्थे सुदैवज्ञहिताय सम्यक् ।
खण्डं द्वितीयं खलु कालवेद्यमारभ्यते कालगुणाभिरामम् ॥
कालवेद्याम(ह्न)यं खण्डं द्वितीयं वक्ष्यते मया ।
सर्वतन्त्रोपकारार्थं लोल्लक्ष्मणयज्वना ॥

तत्रादावब्दनिर्णयः ब्रह्मसिद्धान्ते—

चान्द्रसावनसौराणां मानानां तु प्रभेदतः ।
चान्द्रसावनसौरास्तु त्रयः संवत्सरा अपि ॥

आयुर्वेदे—

सौरबृहस्पतिसावनशशधरनाक्षत्रकाः क्रमेण स्युः ।
मातुलपातालनतुलविमलवराङ्गवत्सराः पञ्च ॥

End :

स्त्रैणोऽल्पवाङ्महाशूरो दीनात्मा दीनबुद्धिमान् ।
अल्पायुर्भुग्विनीतः स्यादादौ जातस्तु तोयभे ॥
दृढस्नेहोऽतिसुभगः परिहासप्रियः सदा ।
रोगी गर्वी तथा कोपी द्वितीयेंऽशे तु तोयभे ॥
महोदारी मातृहीनो गुणग्राही शुचिर्भवेत् ।
भाग्यवान् सुभगश्चैव . . . . ।

The remaining foll. are left blank.

R. No. **422.**

Palm-leaf. 17½ × 1⅜ inches. Foll. 123. Lines, 8 in a page. Grantha. Good.

Purchased in 1911-12 from Śrīnivasa-Rāghavācāriyar of Conjeevaram.

आचारनवनीतम्.

ĀCĀRANAVANĪTAM.

Foll. 1*a*—120*a*. The remaining foll. are left blank.

Same work as the one described under No. 2741 of the D.C.S. MSS., Vol. V.

Śrāddhaprakaraṇa, complete.

This MS. is said to have been copied by Gōmaṭham Periya Vīrāsāmi Ayyaṅgār from the original which is said to have been transcribed by one Aviñji Vīrāsāmi Ayyaṅgār of Pūṇḍi in the month of Paṅguni in the year Khara.

R. No. **423.**

Palm-leaf. 15½ × 1⅝ inches. Foll. 29. Lines, 6 in a page. Telugu. Injured.

Purchased in 1911-12 from E. R. Kṛṣṇamācāriyar of Kalyanapuram.

वृत्तरत्नावली.

VṚTTARATNĀVALĪ.

A treatise on dietetics consisting apparently of five chapters, the subjects dealt with being—

१. प्रभातप्रशंसा 40 Ślōkas.

२. भूषणधारणप्रशंसा 20 Ślōkas.

३. चन्दनधारणगुणप्रशंसा 22 Ślōkas.

४. भोजनपात्रगुणप्रशंसा 20 Ślōkas.

The author refers to Dravyaguṇāvali as an ancient medical treatise and states that he consulted this work.

Breaks off in the fifth chapter.

Beginning:

शुक्लाम्बर . . . . . शान्तये ॥

नमामि धन्वन्तरिमादिदेवरमापतिं रम्यगुणप्रभावम् ।
दुर्वाररोगाभ्रसमूहवायुं सर्वार्थदं सान्द्रदयाप्रपूरम् ॥

अस्मिन् ग्रन्थे प्रतिपाद्यमानगुणप्रशंसाभिधानानु(न्यु)च्यन्ते—

सम्यक् प्रभातपटभूषणगन्धलेपपुष्पालिभाजनसुभोजनवीटिकानाम् ।
आरोहणीव निधतत्त्वरतिप्रजानां वक्ष्यामि वैद्यकथिताः सुगुणप्रशंसाः ॥

इह खलु सर्वेषां जनानामायुरारोग्यादिरूपफलवत्त्वेनावश्योपादेयत्वात् द्रव्यगुणावल्यादिपुरातनग्रन्थानामतिविस्तृतत्वात् सम्यगवलोक्य तत्रोक्तान् गुणरत्नगणान् संगृह्य वृत्तरत्नावल्याख्यग्रन्थे आदौ ब्रह्ममुहूर्तमारभ्य शयनावधिकाह्निकादिमत्त्वात् प्रातःकालप्रशंसामाह—

उत्थायाशु निशावसानसमये यामावशिष्टे सुधीः
स्वस्यायुःपरिपालनाय पुरुषः पुण्यादिकान् चिन्तयेत् ।
विध्युक्तेन पुरीषमूत्रविगमं कुर्यात् सुखोष्णाम्बुना
कृत्वा शौचमनन्तरं शुचिमनाः प्रातः स्थितः प्राङ्मुखः ॥

Colophon:

इति श्रीविद्वद्वैद्यकविकण्ठभूषणवृत्तरत्नावल्यां भोजनपात्रगुणप्रशंसा परिपूर्णा ॥

End:

अथ क्रमप्राप्तोदकगुणप्रशंसामाह—

प्राणं भवेत्प्राणभृतां तु नीरं तस्माद्विना नश्यति जीवलोकः ।
तेनैव नित्यं सचराचरं स्याज्जगत्तु जीवं भवति क्षणेन ॥

* * * *

నదీమత్స్యాలు.

नद्युद्भवास्स्वच(च्छ)वृषाश्चरूक्षाः स्निग्धा विपाके मधुराश्च हृद्याः ।

చెరువుమత్స్యాలు.

तटाकमत्स्या गुरुबृंहणीयाः स्निग्धाः सुशीता रुचिराश्च मूत्रलाः ॥

R. No. **424**.

Paper. 9⅞ × 4¾ inches. Foll. 14. Lines, 14 in a page. Dēvanāgarī. Good.

Purchased in 1911-12 from C. Viśvanātha Śāstrigal of Vizianagaram.

शतचण्डीसहस्रचण्डीप्रयोगः.

ŚATACAṆḌĪSAHASRACAṆḌĪPRAYŌGAḤ.

Details connected with the worship of Dēvī: by Kamalākara, son of Rāmakṛṣṇa.

Complete.

Beginning:

अथ शतचण्डीसहस्रचण्डीप्रयोगः—

नत्वा गणेश्वरं देवं पितरौ राघवं शिवम् ।
रामकृष्णतनूजेन कमलाकरशर्मणा ॥
डामरं यामलं चैव योगिनीतन्त्रमेव च ।
वाराहीतन्त्रमन्यांश्च ग्रन्थानालोक्य यत्नतः ॥
सहस्रचण्डिकायाश्च शतचण्ड्यास्तथैव च ।
नवार्णन्यासविधिना प्रयोगः प्रोच्यतेऽधुना ॥

तत्र यजमानः शुभे देशे मण्डपं चिकीर्षुर्गणेशशेषकर्मत्रसुधानां पूजनं कृत्वा शतचण्ड्यां षोडशहस्तं सहस्रचण्ड्यां विंशतिहस्तमण्डपं प्रसाध्य तदाग्नेयस्तम्भावटे वा पूर्वोक्तदेवानां पूजनं कृत्वा

* * * *

ततः सदस्यं वृत्वा अस्मिन् कर्मणि ऋत्विक्त्वेन त्वामहं वृण इति शतचण्ड्यां नव ऋत्विजो वृणुयात् सहस्रचण्ड्यां शतम् । ततोऽष्टौ द्वारपालान् वृत्वा संभवे सर्वेषां मधुपर्कपूजां कृत्वा अङ्गुलीयकर्णभूषण-वस्त्रद्वयजलपात्रासनार्घ्यपात्राणि दद्यात् ।

End:

कर्मेश्वरार्पणं कृत्वा सुहृद्युतो भुञ्जीत । इदमेव पूजाहोमबल्यादिविधानं नवरात्रज्ञेयम् । विशेषतस्तु मत्कृते निर्णयसिन्धौ नवरात्रनिर्णये ज्ञेयम् ॥

Colophon:

इति शतचण्डीसहस्रचण्डीप्रयोगः ।

इदं पुस्तकं पटवर्धनो(प)नामकजगन्नाथदीक्षितेन लिखितम् ।

R. No. **425.**

Śrītāla. 10¼ × 2¼ inches. Foll. 76. Lines, 15 in a page. Grantha. Good.

Purchased in 1911-12 from T. N. Narasiṁhācāriyar of Triplicane.

शतदूषणी.

ŚATADŪṢAṆĪ.

Foll. 1*a*—75*a*. The remaining leaves are left blank.

Same work as the one described under No. 5037 of the D.C.S. MSS., Vol. X.

Bhaṅgas 1 to 35, complete.

R. No. **426.**

Palm-leaf. 18½ × 1¼ inches. Foll. 78. Lines, 7 in a page. Grantha. Slightly injured.

Purchased in 1911-12 from T. N. Narasiṁhācāriyar of Triplicane.

शतदूषणी.

ŚATADŪṢAṆĪ.

Same work as the one described under No. 5037 of the D.C.S. MSS., Vol. X.

Bhaṅgas 1 to 22, complete.

R. No. **427.**

Palm-leaf. 17⅛ × 1⅜ inches. Foll. 181. Lines, 8 in a page. Grantha. Injured.

Purchased in 1911-12 from T. N. Narasiṁhācāriyar of Triplicane.

शतदूषणी.

ŚATADŪṢAṆI.

Fol. 1*a*—179*b*. The remaining leaves are left blank.

Same work as the one described under No. 5037 of the D.C.S. MSS., Vol. X.

Bhaṅgas 18—66, complete. The eighteenth Bhaṅga wants beginning.

R. No. 428

Palm-leaf. $17\frac{4}{8} \times 1\frac{3}{8}$ inches. Foll. 40. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1911–12 from T. N. Narasiṁhācāriyar of Triplicane.

शतदूषणी.

ŚATADŪṢAṆĪ.

Same work as the one described under No. 5037 of the D.C.S MSS., Vol. X.

Breaks off in the tenth Bhaṅga.

R. No. 429.

Palm-leaf. $17\frac{7}{8} \times 1\frac{3}{8}$ inches. Foll. 155. Lines, 8 in a page. Grantha. Injured.

Purchased in 1911–12 from T. N. Narasiṁhācāriyar of Triplicane.

शतदूषणीव्याख्या ---चण्डमारुतः.

ŚATADŪSAṆĪVYĀKHYĀ: CAṆḌAMĀRUTAḤ.

Same work as the one described under No. 5042 of the D.C.S. MSS., Vol. X.

Skandhas one to seventeen only.

R. No. 430.

Palm-leaf. $17\frac{1}{8} \times 1\frac{3}{8}$ inches. Foll. 103. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1911–12 from T. N. Narasiṁhācāriyar of Triplicane.

शतदूषणीव्याख्या—चण्डमारुतः.

ŚATADŪṢAṆĪVYĀKHYĀ: CAṆḌAMĀRUTAḤ.

Foll. 1*a*—100*a* The remaining foll. are left blank.

Same work as the one described under Nos 5041 and 5042 of the D.C.S. MSS., Vol. X.

Contains Skandhas 17 to 24 complete; wants some leaves in the middle.

R. No. 431.

Palm-leaf. 19¼ × 1⅝ inches. Foll. 195. Lines, 10 in a page. Grantha. Slightly injured.

Purchased in 1911-12 from T. N. Narasiṁhācāriyar of Triplicane.

शतदूषणीव्याख्या—चण्डमारुतः.

ŚATADŪṢAṆĪVYĀKHYĀḤ: CAṆḌAMĀRUTAḤ.

Same work as the one described under No. 5042 of the D.C.S. MSS., Vol. X.

Skandhas 33 to 54 only, of which 33 to 37 were copied by one Sāmi of Karuppūr on the 3rd of Vaikāśi in the year Jaya and 38 to 54 by one Dēśika on the 10th of the bright fortnight in the month of Aipaśi (Tulā) in the year Durmukhi.

R. No. 432.

Palm-leaf. 14½ × 1½ inches. Foll. 263. Lines, 7 in a page. Grantha. Slightly injured.

Purchased in 1911-12 from T. N. Narasiṁhācāriyar of Triplicane.

The first two leaves are left blank.

शतदूषणीव्याख्या—चण्डमारुतः.

ŚATADŪṢAṆĪVYĀKHYĀ: CAṆḌAMĀRUTAḤ.

Foll. 3*a*—263*b*. Fol. 151 is left blank.

Same work as the one described under No. 5042 of the D.C.S. MSS., Vol. X.

Skandhas 33 to 44 only. Skandhas 33 to 38 were copied by one Rāmānujācārya. A former owner of the MS. is said to be Cakravarti Veṅkaṭācār, son of Cakravarti Śrīnivāsācār

---

R. No. 433.

Palm-leaf. 21½ × 1⅝ inches. Foll. 175. Lines, 10 in a page. Grantha. Injured.

Purchased in 1911-12 from T. N. Narasiṁhācāriyar of Triplicane.

The first two leaves are left blank.

शतदूषणीव्याख्या—चण्डमारुतः.

ŚATADŪṢAṆĪVYĀKHYĀ: CAṆḌAMĀRUTAḤ.

Foll. 3*a*—173*b*. Foll. 61, 174 and 175 are left blank.

Same work as the one described under No. 5042 of the D.C.S. MSS., Vol. X.

Skandhas 33 to 54 only.

A former owner of the MS. is said to be Cakravarti Veṅkaṭācār, son of Cakravarti Śrīnivāsācār of Kumbakonam.

R. No. **434.**

Palm-leaf. 18⅛ × 1⅝ inches. Foll. 222. Lines, 7 in a page. Grantha. Good.

Purchased in 1911–12 from T. N. Narasiṁhācāriyar of Triplicane.

The first two leaves are left blank.

शतदूषणव्याख्या—चण्डमारुतः.

ŚATADŪṢAṆĪVYĀKHYĀ: CAṆḌAMĀRUTAḤ.

Foll. 3*a*—222*a*. Fol. 222*b* is left blank.

Same work as the one described under No. 5042 of the D.C.S. MSS., Vol. X.

Skandhas 31 to 41 only. Foll. 155—182 and 200—206 are half broken.

R. No. **435.**

Palm-leaf. 18¼ × 1⅜ inches. Foll. 111. Lines, 8 in a page. Grantha. Good.

Purchased in 1911–12 from T. N. Narasiṁhācāriyar of Triplicane.

शतदूषणीव्याख्या—चण्डमारुतः.

ŚATADŪṢAṆĪVYĀKHYĀ: CAṆḌAMĀRUTAḤ.

Foll. 1*a*—109*b*. The remaining leaves are left blank.

Same work as the one described under No. 5042 of the D.C.S. MSS., Vol. X.

Skandhas 42 to 57, complete; 58, incomplete.

R. No. 436.

Palm-leaf. 20 × 1½ inches. Foll. 45. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1911–12 from T. N. Narasiṁhācāriyar of Triplicane.

शतदूषणीव्याख्या—नृसिंहराजीया.

ŚATADŪṢAṆĪVYĀKHYĀ: NṚSIṀHARĀJĪYĀ.

Same work as the one described under No. 5043 of the D.C.S. MSS., Vol. X.

Contains Vādas three to ten complete; eleventh incomplete.

R. No. 437.

Palm-leaf. 17¾ × 1⅝ inches. Foll. 125. Lines, 7 in a page. Slightly injured.

Purchased in 1911–12 from Śrīnivāsa-Rāghavācāriyār of Conjeevaram

शान्तिकल्पः.

ŚĀNTIKALPAḤ.

Details of procedure relatings to various propitiatory rites prescribed for averting various kinds of evil.

Contains the following subjects :—

Foll.		Foll.	
1*a*—2*a*	सर्वारिष्टशान्तिः.	5*b*	एकनक्षत्रजननशान्तिः.
2	गौलीपतनशान्तिः.	5*b*—6*b*	गोमुखजननशान्तिः
2*b*	मधुशान्तिः.	6*b*—7*b*	कृकलासपतनशान्तिः
2*b*—3*a*	शिरोजदग्धशान्तिः.	7*b*—8*a*	नानाविधरोगशान्तिः
3	दन्तजननशान्तिः.	8	अद्भुतोत्पातशान्तिः. कुड्यभेदादिफलानि
3*b*—5*a*	पूर्वाषाढपुष्यनक्षत्रजननशान्तिः.	9*b*—10*a*	अशनिपातशान्तिः.
5	तिथ्यादिगण्डशान्तिः		

Foll.	
10a	क्रमुकादिफलादिकृफलम्.
10	मूषिकादिदष्टवस्त्रशान्तिः.
10b—12a	उपरागशान्तिः.
12	ग्रहणशान्तिः.
12b—13a	अष्टदिक्पालकमन्त्रः
13	वायसादिशान्तिः.
13b—14a	अर्कविवाहविधिः.
14a	शिथिलीजननशान्तिः.
14a—15a	वल्मीकशान्तिः.
15b	निमित्तशान्तिः.
15b—16a	शिथिलीशान्तिफलानि.
16a—17a	श्वेतार्ककल्पः.
17a	कदलीशान्तिः.
17b	कपोतशान्तिः.
17b—18a	उत्पातशान्तिः.
18a—19a	परिवेषफलम्.
19a	इन्द्रधनुर्लक्षणम्.
19	सत्यादिविकृतशान्तिः
19b	अकालप्रसवशान्तिः.
19b—20a	यमलजननशान्तिः.
20b—21a	दर्शजननशान्तिः.

Foll.	
21	ज्वरशान्तिः.
22a	मृत्युंजयकल्पः.
22a—23a	नागप्रतिष्ठा.
23	त्रिपुण्ड्रधारणमाहात्म्यम्.
23b—24b	संक्रान्तिजननशान्तिः.
Same work as the one described under R. No. 173 *ante*.

Complete.

The remaining leaves are left blank.

R. No. **569.**

Paper. $10\frac{1}{4} \times 4\frac{7}{8}$ inches. Foll. 40. Lines, 14 in a page. Telugu. Injured.

Presented in 1911–12 by C. Viśvanātha Śastrigal of Vizianagaram.

शक्तिवादः.

ŚAKTIVĀDAḤ.

Same work as the one described under No. 4302 of the D.C.S. MSS., Vol. VIII.

Incomplete.

R. No. **570.**

Paper. $11\frac{1}{8} \times 5\frac{1}{2}$ inches. Foll. 74. Lines, 15 in a page. Grantha and Telugu. Injured.

Presented in 1911–12 by Rāmacandrayyar of Manalur.

मुक्तावलीव्याख्यानम्—दिनकरभट्टीयम्.

MUKTĀVALĪVYĀKHYĀNAM: DINAKARABHAṬṬĪYAM.

Same work as the one described under No. 3955 of the D.C.S. MSS., Vol. VIII.

Wants beginning and end.

R. No. **571.**

Paper. 11 × 5 inches. Foll., 154. Lines, 12 in a page. Dēvanāgarī. Good.

Presented in 1911-12 by Ramacandrayyar of Manalur in the Tanjore district.

भवानन्दीयप्रकाशः.

BHAVĀNANDĪYAPRAKĀŚAḤ.

Same work as the one described under No. 4098 of the D.C.S. MSS., Vol. VIII.

Anumāna, incomplete.

R. No. **572.**

Paper. 15⅜ × 6⅝ inches. Foll. 338. Lines, 15 in a page. Dēvanāgarī. Good.

Presented in 1911-12 by C. Viśvanātha Śāstrigaḷ of Vizianagaram.

भागवतम्—सव्याख्यानम्.

BHĀGAVATAM WITH COMMENTARY.

Same work as the one described under No. 2199 of the D.C.S. MSS., Vol. IV, Part I.

Contains Skandhas 2—5 complete.

R. No. **573.**

Paper. 12½ × 4 inches. Foll. 254. Lines, 8-10 in a page. Dēvanāgarī. Good.

Presented in 1911-12 by C. J. Rāmacandra Rao of Madras.

(*a*) ईशावास्योपनिषद्.

ĪŚĀVĀSYŌPANIṢAD.

Foll. 1*a*—2*b*.

Same work as the one described under No. 300 of the D.C.S. MSS., Vol. I, Part III, but without the Śantipāṭha

Complete.

The scribe's name as given in fol. 2:

शानभोगश्रीनिवासः श्रीनिवासस्य तुष्टये ।
ईशावास्योपनिषदो लेखनं कृतवान्मुदा ॥
श्रीमत्सत्यपरायणगुरुवरहृदयाब्जवासिनो विष्णोः ।
प्रीत्यै श्रुतिशिरोभाष्याण्यमलान्यालिखन्मुदैव श्रीवासः ॥

(*b*) माण्डूक्योपनिषद्.

MĀṆḌŪKYŌPANIṢAD.

Fol. 3.

Same work as the one described under No. 694 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*c*) तलवकारोपनिषद्.

TALAVAKĀRŌPANIṢAD.

Foll. 4*a*—5*b*.

Same work as the one described under No. 376 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*d*) तैत्तिरीयोपनिषद्.

TAITTIRĪYŌPANIṢAD.

Foll. 6*a*—14*a*. Fol. 14*b* is left blank.

Same work as the one described under No. 486 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*e*) प्रश्नोपनिषद्.

PRAŚNŌPANIṢAD.

Foll. 15*a*—19*b*.

Same work as the one described under No. 610 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*f*) अथर्वणोपनिषद्.

ATHARVAṆŌPANIṢAD.

Foll. 20*a*—24*b*.

Also called मुण्डकोपनिषद्.

Same work as the one described under No. 713 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*g*) काठकोपनिषद्.

KĀṬHAKŌPANIṢAD.

Foll. 25*a*—32*b*.

Same work as the one described under No. 334 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*h*) मायावादखण्डनव्याख्या.

MĀYĀVĀDAKHAṆḌANAVYAKHYĀ.

Foll. 33*a*—40*b*.

Same work as the one described under No. 4836 of the D.C.S. MSS., Vol. X.

Complete.

(*i*) तत्त्वविवेकव्याख्या.

TATTVAVIVĒKAVYĀKHYĀ.

Foll. 41*a*—48*a*. Fol. 48*b* is left blank.

Same work as the one described under No. 4786 of the D.C.S. MSS., Vol. X.

Complete.

(*j*) ब्रह्मसूत्रानुव्याख्यानन्यायविवरणपञ्चिका.

BRAHMASŪTRĀNUVYĀKHYĀNANYĀYAVIVARAṆA-PAÑCIKĀ.

Foll. 49*a*—69*a*. Fol. 69*b* is left blank.

A commentary on the work described under No. 4822 of the D.C.S. MSS., Vol. X; by Jayatīrtha.

Breaks off in the third Pāda of the first Adhyāya.

Beginning:

जयन्ति जानकीभर्तुश्चरणाम्भोजरेणवः ।
नमत्सुरकिरीटस्थान् ये मणीनतिशेरते ॥
दुरन्तदुरितध्वान्तविध्वंसनपटीयसे ।
बादरायणसंज्ञाय परस्मै महसे नमः ॥
नमामि श्रीमदानन्दतीर्थाचार्यं परं गुरुम् ।
यस्य वाणीकृपाणीयं निकृन्तति भवाटवीम् ॥
प्रणम्य चरणाम्भोजे गुरूणां तत्कृपाबलात् ।
सन्न्यायविवृतिव्याख्यां करिष्यामि यथामति ॥

ग्रन्थारम्भे विघ्नविघाताद्यर्थमाचार्यः समुचितविशिष्टेष्टदेवतां नारायणमुपश्लोकयति—चेतनेति । जन्मादिसूत्रे यत्सकलजगज्जननादिहेतुत्वं सार्वज्ञ्याद्यशेषगुणवत्त्वं चेति द्विविधं ब्रह्मलक्षणमभिप्रेतं तदाद्यपदद्वयेन नारायणस्य सूचयता समुचितत्वं प्रतिपादितम् । चेतनाचेतनेति सकलजगत्संग्रहार्थम् ।

End:

उपासनार्थत्वादिति । तदिदमुक्तं शब्दादिभ्य इत्यादिना । सूक्तादिव्यवस्था तु सूत्रकृतैव समर्थिता ।

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादविरचितन्यायविवरणपञ्चिकायां जयतीर्थमुनिविरचितायां प्रथमाध्यायस्य द्वितीयः पादः ॥

तृतीयेऽस्मिन् पादेऽनुव्याख्यायामधिकरणविषयाः संगृह्योक्ताः ।

* * * *

तानिदानीं विवृण्वंस्तावत् बाहुल्यलिङ्गशब्दानामिति प्रथमाधिकरणपूर्वपक्षन्यायं विवृणोति । यस्मिन् द्यौरिति ।

(*k*) उपाधिखण्डनम्—सटीकम्.

UPĀDHIKHAṆḌANAM WITH COMMENTARY.

Foll. 70*a*—83*a*. Fol. 83*b* is left blank.

Same work as the one described under Nos. 4781 and 4782 of the D.C.S. MSS., Vol. X.

Incomplete.

(*l*) तन्त्रसारसंग्रहः.

TANTRASĀRASAṄGRAHAḤ.

Foll. 84*a*—110*a*. Fol. 110*b* and 111 are left blank.

Same work as the one described under No. 5412 of the D.C.S MSS., Vol. XI; but, as that manuscript is wanting in the beginning and the end, the beginning, the end and the colophon required are given here.

Adhyāyas 1 to 4, complete.

Beginning:

जयत्यब्जभवेशेन्द्रवन्दितः कमलापतिः ।
अनन्तविभवानन्दशक्तिज्ञानादिसद्गुणः ।
विधिं विधाय सर्गादौ तेन पृष्टोऽब्जलोचनः ।
आह देवो रमोत्संगविलसत्पादपल्लवः ॥
अहमेकोऽखिलगुणो वाचकः प्रणवो मम ।
अकाराद्यतिशान्तान्तः सोऽयमष्टाक्षरो मतः ॥

End:

अशेषदोषोज्झितपूर्णसद्गुणं सदा विशेषापगतोरुरूपम् ।
नमामि नारायणमप्रतीपं सदा प्रियेभ्यः प्रियमादरेण ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमत्तन्त्रसारसंग्रहे चतुर्थोऽध्यायः ॥

(*m*) छान्दोग्योपनिषद्भाष्यम्.

CHĀNDŌGYŌPANIṢADBHĀṢYAM.

Foll. 112*a*—170*b*. Foll. 171, 172 and 173*a* are blank.

Same work as the one described under No. 469 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*n*) ऋग्भाष्यम्.

ṚGBHĀṢYAM.

Foll. 173*b*—254*a*. Foll. 205, 206*a*, 234*b*, 235*a* and 254*b* are left blank.

Same work as the one described under No. 31 of the D.C.S. MSS., Vol. I, Part I.

Complete.

A TRIENNIAL CATALOGUE OF MANUSCRIPTS

COLLECTED DURING THE TRIENNIUM

1910-11 TO 1912-13

FOR THE

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS.

BY

M. RANGACHARYA, M.A., RAO BAHADUR,

PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE, AND CURATOR, GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS

AND

S. KUPPUSWAMI SASTRI, M.A.,

PRINCIPAL, SANSKRIT COLLEGE TIRUVADI, AND FOR SOME TIME AG. PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, AND AG. CURATOR, GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS.

Prepared under the orders of the Government of Madras.

VOL. I.—PART I.—SANSKRIT, C.

MADRAS:

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.

1913.

A TRIENNIAL CATALOGUE OF MANUSCRIPTS.

1910-11 TO 1912-13.

PART I—SANSKRIT—C.

R. No. **574.**

Palm-leaf. 16½ × 1½ inches. Foll. 103. Lines, 7 in a page. Grantha. Injured.

Purchased in 1912–13 from Tirumalācāriyar of Kalyanapuram.

(*a*) न्यायसिद्धान्तमञ्जरीटीका—आमोदः.

NYĀYASIDDHĀNTAMAÑJARĪṬĪKĀ : ĀMŌDAḤ.

Foll. 1*a*—90*b*.

A commentary on the work described under No. 4215 of the D.C.S. MSS., Vol. VIII.

Wants the first leaf; otherwise the Pratyaksaparicchēda is complete.

Beginning:

त्वमित्येवं रीत्या बोद्धव्यम् । (नास्ति)कादिग्रन्थेषु तु समाप्तिप्रतिबन्धकदुरितनाशात् जन्मान्तरे मङ्गलाज्जातः स्वतःसिद्धविघ्नविरहो वा वर्तत इति कल्पनाददोषः । न च स्वतः(सिद्धविघ्नवि)हर(रह)स्थलीयमङ्गलस्य वैयर्थ्यं स्यादिति वाच्यम्, स्वतःसिद्धप्रत्यवायविरहस्थलीयतदाशङ्काचरितप्रायश्चित्तस्येवेष्टत्वादिति संक्षेपः । प्रणामः स्वावधिकोत्कृष्ट-(त्वप्रकारकज्ञानं) मत्तस्त्वमुत्कृष्ट इत्याकारकम् । ल्यप उत्तरकालीनत्वमेककर्तृकत्वं चार्थः । अयं च धात्वर्थेऽन्वेति ।

End:

तादात्म्येन द्रव्यस्य हेतुताया एव लघुत्वात् न तादृशकार्यकारणभावसिद्धिरित्यस्वरसादाह—अप्रयोजकत्वमिति । इदं विभुत्वसाधकानुमानम् ॥

Colophon :

इत्यामोदे प्रत्यक्षपरिच्छेदः समाप्तः ॥

The date of transcription and the name of the scribe are thus given :—

व्ययाब्दे फाल्गुने मासि पञ्चम्यामिन्दुवासरे ।
वेङ्कटार्येण मञ्जर्यामोदोऽलेखि सुहृङ्मुदे ॥

Fol. 91 is left blank.

(*b*) न्यायसिद्धान्तमञ्जरी.

NYĀYASIDDHĀNTAMAÑJARĪ.

Foll. 92*a*—103*b*.

Same work as the one described under No. 4215 of the D.C.S. MSS., Vol. VIII.

Pratyaksa incomplete.

R. No. **575.**

Palm-leaf. 16⅞ × 1½ inches. Foll. 51. Lines, 7 in a page. Grantha. Injured.

Purchased in 1912–13 from Tirumalācāriyar of Kalyanapuram

(*a*) काव्यार्थचूडामणिः.

KĀVYĀRTHACŪḌĀMAṆIḤ.

Foll. 1*a*—21*b*.

A treatise on rhetoric. The name of the author is not known. Contains up to Arthāntaranyāsa.

Beginning :

. . . . भवति करणव्यापारलल . . . .
. . . . . शब्दरूपां पराम् ।
. . . . . .
विज्ञानां समुदायमेरुमथने वज्रायितं यत्पदं
. . . . दानसुकृतं संतानवृक्षायितम् ।

अज्ञानान्धतमोनिरोधनविधौ चण्डांशुबिम्बायितं
तद् द्वैमातुरमम्बिकासुतमिति ख्यातं महः (संश्रये) ॥

* * * *

(नाना)लंकृतिवाचकैरभिनवैर्वाचां गुणैरद्भुतै-
स्तद्व्याख्यानपरार्थभेदगहनाद्व्यावृत्य पद्यक्रमात् ।
. . . . प्रबन्धमतुलं काव्यार्थचूडामणिं
प्रख्यातं भुवि सर्वसंमतममोघं सर्वबोधप्रदम् ॥

* * * *

एकद्वित्र्यनुपादानाल्लुप्ता स्याद्वाचकादिषु ।
पूर्णा च द्विविधा प्रोक्ता श्रौती चार्थी च संमता ॥

End:

अथार्थान्तरन्यासः—

सामान्यो वा विशेषो वा तदन्येन समर्थ्यते ।
यत्र सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा ॥

* * * *

गुणानामेव दौरात्म्याद्धुरि धुर्यो नियुज्यते ।
असंजातक्रिणस्कन्धः सुखं जीवति गौर्गली ॥

* * * *

अथ विरोधः—

विरोधः सोऽविरोधेऽपि विरुद्धत्वेऽपि यद्वचः ।

(b) दयाशतकम्—(शैवम्).

DAYĀŚATAKAM (ŚAIVAM).

Foll. 22*a*—26*a*. Fol. 26*b* is left blank.

A centum of stanzas of praise and prayer seeking the grace of Śiva (here personified as a goddess).

Contains 1—83 stanzas.

Beginning:

श्रेयांसि सन्दिशति कन्दलयत्यमन्दमानन्दमस्य दलयत्यघवृन्दमार्तिम् ।
धूनोति किङ्करयति द्रुहिणादिकांश्च मातस्तवैष उदयो हि दये पुरारेः ॥

End:

श्रीकण्ठाय क्ष्वेलं रोचितवत्या दये ननु भवत्याः ।
मामकमन्तुकदम्बे केवलमम्बेह वद विलम्बः कः ॥

(*c*) सुभाषितरत्नमाला.

SUBHĀṢITARATNAMĀLĀ.

Foll. 27*a*—47*a*. Foll. 36*b* and 47*b* are blank.
Similar to the one described under R. No. 149(*b*) *ante*.
Complete.

Beginning:

आदौ सज्जनपद्धतिः—

चन्दनं चन्द्रिकाचक्रं विपश्ची चम्पकस्रजः ।
पञ्चमः पञ्चमश्चेति पञ्चभ्योऽजनि सज्जनः ॥

End:

अथोलूपः—

उत्तुङ्गैस्तरुभिः किमेभिरफलैराकाशसंस्पर्धिभिः
धन्योऽसौ नितरामुलूपविटपी नद्यास्तटे तिष्ठति ।
एवं यः कृतबुद्धिरुद्धतजलव्यालोलवीचीवशा-
न्मज्जन्तं जनमुद्धरामि यदि वा तेनैव मज्जाम्यहम् ॥

Colophon:

इति सुभाषितरत्नमालायां वृक्षविशेषपद्धतिः ॥

(*d*) सुभाषितानि.

SUBHĀṢITĀNI.

Foll. 48*a*—51*a*. Fol. 51*b* is left blank.
Similar to the above.
Contains 54 stanzas.

R. No. 576.

Palm-leaf $16\frac{7}{8} \times 1\frac{1}{4}$ inches. Foll. 19. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1912–13 from Tirumalacāriyar of Kalyanapuram.

प्रपत्तिशब्दार्थविचारः.

PRAPATTIŚABDĀRTHAVICĀRAḤ.

Foll. 1*a*—19*b*.

An investigation into the true significance and character of Prapatti or self-surrender to God as accepted by Vēdāntadēśika.

Wants beginning and end

Beginning :

. . . कारैरेव कण्ठतस्तात्पर्याद्वा परिहृतः । तथापि सुखबोधाय यथाश्रुति परिहार उच्यते । यत्तावदुक्तमाचार्यग्रन्थे

* * * *

प्रार्थनाविशिष्टभरन्यासस्यैव प्रतिपादनेन तदङ्गित्वप्रतिपादनपरे கஜ்ஜ-ரு-ஒமாவது इति वाक्ये ।

End :

इत्थं न्यासविद्याया आनुकूल्यसंकल्पप्रभृतिगोप्तृत्ववरणान्त . . . . . केवलभरन्यासरूपत्वम्, न तु केवलोपायत्वप्रार्थनारूपत्वं तदन्वितभरन्यासरूपत्वं वेत्याचार्यसकलग्रन्थेषु सुप्रतिष्ठितम् ।

R. No 577.

Palm-leaf. $17\frac{1}{8} \times 1\frac{1}{2}$ inches. Foll. 28. Lines, 9 in a page. Grantha. Injured.

Purchased in 1912–13 from Tirumalācāriyar of Kalyanapuram.

(*a*) पदार्थतत्त्वनिरूपणम्.

PADĀRTHATATTVANIRŪPAṆAM.

Foll 1 —7*a*. Foll. 4 and 5 are duplicates of the foll. 1—3.

Same work as the one described under No. 4262 of the D.C.S. MSS., Vol. VIII

Complete.

(*b*) पदार्थतत्त्वनिरूपणव्याख्या.
PADĀRTHATATTVANIRŪPANAVYĀKHYA.

Foll. 7*a*—28*b*.

Same work as the one described under No. 4264 of the D.C.S. MSS., Vol. VIII.

Incomplete.

R No. **578.**

Palm-leaf. 18 × 1½ inches. Foll. 183. Lines, 8 in a page. Grantha. Much injured.

Purchased in 1912–13 from Tirumalācāriyar of Kalyanapuram.

तत्त्वचिन्तामणिप्रकाशव्याख्या— तर्कचूडामणिः.
TATTVACINTĀMAṆIPRAKĀŚAVYĀKHYĀ: TARKACŪḌĀMAṆIḤ.

Same work as the one described under No 4102 of the D.C.S. MSS., Vol. VIII.

Anumāna complete.

R. No. **579.**

Palm-leaf. 15 × 1¼ inches. Foll. 15. Lines, 7 in a page. Grantha. Good.

Purchased in 1912–13 from Tirumalācāriyar of Kalyanapuram.

हरिगुणमौक्तिकमाला.
HARIGUṆAMAUKTIKAMĀLĀ.

A hymn of 100 stanzas in praise of Viṣṇu: by Śrīnivāsa, a disciple of Śrīśailadēśika. Each stanza is intended to describe the characteristics of Viṣṇu as given in a series of successive ten names occurring in the Viṣṇusahasranāmastōtra, the interpretation of Parāśarabhaṭṭa being taken as the guide in determining the significance of the names.

Complete.

Beginning:

श्रीहयवक्त्रमुखस्य श्रीमच्छ्रीशैलदेशिकाकारम् ।
श्रीमन्नामसहस्रप्रमितिगुणैः संस्तवानि रङ्गेशम् ॥
भट्टपराशरपादव्याख्यामेवानुसृत्य निरवद्याम् ।
संगृह्णाति दशानामर्थान् प्रतिपद्यमत्र संज्ञानाम् ॥
एकस्मिन्नामार्थे न प्रथमान्तद्वयं विनैव वेन(यत्नेन) ।
तच्चेदेका संज्ञा सन्न्यु(द्यु)क्तं तद्विशेषणं क्रियते ॥

* * * *

पूर्णो हृद्यानवद्यैर्गुणतनुविभवैर्व्याप्य तिष्ठन्नशेषं
स्वेच्छायत्तं समस्तं विदधदपि भवद्भूतभाव्येकशेषी ।
स्रष्टा तेषां निजार्थेऽधिकरणमपि तैरंशवांस्तच्छरीरी
तद्वृद्धेः कारकस्तद्गतमलरहितः पातु मां रङ्गराजः ॥

End:

भूभारक्लेशहारी बहिरबहिरि(ररी)न्नाशयन् पाञ्चजन्यं
बिभ्रन्नन्द्याच्च मामित्यसिमपि विधरन् स्यन्दनाङ्गस्य शेषी ।
बिभ्रच्चापं स्वयोग्यं निजकरधृतकौमोदकीको रथाङ्गं
पाणौ कुर्वन् प्रपन्नाभयसुदृढमतिर्दिव्यसर्वायुधाढ्यः ॥
इत्थं पद्यैः शतेन क्रमसुगमदशाव्याक्रियाचातुरीकैः
श्रीमन्नाम्नां सहस्रं व्यवृणुत लालैतैः श्रीनिवासो विपश्चित् ।
तेषामेषां सहार्थैः श्रवण(सु)पठनोच्चारणे च प्रपन्नः
सद्यो दद्यात् पुमर्थान्निरवधिकरुणाशेवधिः श्रीनिवासः ॥
नाम्नामाम्नायचूडापदनिहितरहस्यार्थगर्भं सहस्र
व्यक्तं प्राचीकशद्यो गुरुततिरपि या तद्रहस्यं विवव्रे ।
भाष्यं योऽस्य न्यबध्नादनवधिमहिमा यश्च तद्व्याप्यभूतः
सर्वे ते साहसं मे निरुपधिकरुणानिघ्नचित्ताः क्षमन्ताम् ॥

श्रीशैलदेशिकेन्द्रश्रीपदपाथोरुहैकशरणेन ।
हरिगुणमौक्तिकमाला रचिता तत्प्रीतिमादधातुतराम् ॥

Colophon :

हरिगुणमौक्तिकमाला संपूर्णा ॥

R. No. **580.**

Palm-leaf. 18 × 1½ inches. Foll. 44. Lines, 8 in a page. Grantha. Injured.

Purchased in 1912–13 from Tirumalacāriyar of Kalyanapuram in the Tanjore district.

वाल्मीकिभावप्रकाशिका.

VĀLMĪKIBHĀVAPRAKĀŚIKA.

Foll. 1*a* – 44*a* Fol. 44*b* is blank.

A commentary on the Rāmāyaṇa of Valmīki : by Hari Paṇḍita.

Breaks off in the Yuddhakāṇḍa.

Beginning :

श्रीजानकीलताश्लिष्ट श्रितद्विजफलप्रदः ।
श्रेयसे भूयसे मेऽस्तु श्रीरामामरपादपः ॥

तत्रभगवान् वाल्मीकिः स्वचिकीर्षितस्य ग्रन्थस्याविघ्नपरिसमाप्त्यर्थं,

मङ्गलाचारयुक्तानां नित्यं च प्रयतात्मनाम् ।
जपतां जुह्वतां चैव विनिपातो न विद्यते ॥

इत्यादिस्मृत्या शिष्टाचारेण च प्राप्तं मङ्गलमाचरन् ।

* * * *

प्रमाणानुसारेण गुरुं नारदमुपसंपाद्य स्वजिज्ञासितमखिलमर्थविशेषं पृच्छति—तपःस्वाध्यायेति । अत्र तपश्शब्देन तप आलोचन इति धातुनिष्पन्नेन ज्ञानवाचिना ज्ञानविशेषरूपो न्यास उच्यते ।

* * * *

Colophon:

इति हरिपण्डितेन विरचितायां वाल्मीकिभावप्रकाशिकायां बालकाण्डस्समाप्तः ॥

End:

पित्रा दत्तं राज्यं पूर्वमङ्गीकृत्य तदनुसारेण . . . . ति अम्ब पित्रा नियुक्तोऽस्मि प्रजापालनकर्मणि इत्येवमङ्गीकृत्य हस्तगतराज्यमुत्सृ . . . . . कार्यं सीताहरणादिकर्तव्यांशं कृतमावश्यकत्वेन निश्चितम् । ननु इष्टस्य ।

R No. **581.**

Palm-leaf. $16\frac{7}{8} \times 1\frac{1}{2}$ inches. Foll 38. Lines, 8 in a page. Grantha. Injured.

Purchased in 1912–13 from Tirumalācariyar of Kalyanapuram.

(*a*) आख्यातवादः.

ĀKHYĀTAVĀDAḤ.

Foll. 1*a*—8*a*. Fol 8*b* is left blank.

Same work as the one described under No. 3921 of the D.C.S. MSS., Vol. VIII.

Wants beginning; otherwise complete.

(*b*) आख्यातवादटिप्पणी.

ĀKHYĀTAVĀDAṬIPPAṆĪ.

Foll. 9*a*—38*b*.

Same work as the one described under No. 3924 of the D.C.S. MSS., Vol. VIII.

Incomplete.

R. No. **582.**

Palm-leaf. 16¼ × 1¼ inches. Foll. 16. Lines, 9 in a page. Grantha. Slightly injured.

Purchased in 1912–13 from Tirumalācariyar of Kalyanapuram.

सुभाषितमञ्जरी.

SUBHĀṢITAMAÑJARI.

Foll. 1*a*—15*b*. Fol. 16 contains Sītacakra and Ramacakra.

A poem composed in the form of an anthology by Cakravarti Vēṅkaṭārya, a disciple of Gōpaladēśika.

Contains Paddhatis 1—38 complete.

The subjects dealt with therein are—

१. उपोद्घातपद्धतिः.
२. भावुकपद्धतिः.
३. अभव्यपद्धतिः.
४. दानपद्धतिः.
५. दातृपद्धतिः.
६. दात्रभिमुखीकरणपद्धतिः.
७. उपेक्षानिवृत्तिपद्धतिः.
८. दातृदोषनिवर्तनपद्धतिः.
९. याच्ञापद्धतिः.
१०. दुर्विधिहतपद्धतिः.
११. लुब्धपद्धतिः.
१२. लुब्धनिन्दापद्धतिः.
१३. असद्व्ययनिन्दापद्धतिः.
१४. अन्यदाननिवारकलुब्धनिन्दापद्धतिः.
१५. दुर्गतपद्धतिः.
१६. दुर्गतनिन्दापद्धतिः.
१७. मूर्खपद्धतिः.
१८. मूर्खनिन्दापद्धतिः.
१९. दृप्तपद्धतिः.
२०. दृप्तनिन्दापद्धतिः.
२१. अनभिज्ञपद्धतिः.
२२. नीरसपद्धतिः.
२३. रसिकपद्धतिः.
२४. रसिकाश्वासपद्धतिः.
२५. गुणपद्धतिः.

२६. निमित्तभेदपद्धतिः.
२७. अनौचित्यपद्धतिः.
२८. खलपद्धतिः.
२९. सौजन्यपद्धतिः.
३०. सज्जनपद्धतिः.
३१. साधुपद्धतिः
३२. निकृष्टन्यक्कारपद्धतिः.
३३. गानधनपद्धतिः.
३४. दैवविपर्ययपद्धतिः.
३५. विपर्ययनिवृत्तिपद्धतिः.
३६. अनभिज्ञकृत्यपद्धतिः.
३७. महतामपि स्वोत्कृष्टनिरस्कारपद्धतिः.
३८. अज्ञकृत्यैकदेशनिन्दा पद्धतिः.

Beginning:

तरुणतुलसीदामश्रीमद्भुजान्तरमन्दिर-
श्रियमभिनवाम्भोदश्यामं दयामृतसागरम् ।
विनतजनतारक्षादीक्षाविशृङ्खलवैभवं
रघुपतिसमाराध्यं रङ्गाधिपं शरणं भजे ॥
वल्लीपालविलासिनीषु विदितं यद्ब्रह्मचर्यं बुधै-
रङ्गालं क्षितिपात्मजं विदधता तद्येन सत्यार्पितम् ।
स्तेयोपार्जितगव्यभुक्तिसमये यस्यौतुरावेशिकः
तस्मै नित्यपवित्रचित्रचरितस्थेम्ने विभूम्ने नमः ॥

श्रीचक्रवर्तिकुलसिन्धुसुधाकरेण गोपालदेशिकपदाम्बुजसंश्रयेण ।
श्रीवेङ्कटार्यकविना रचिता बुधानां कण्ठेऽवतंसतु सुभाषितमञ्जरीयम् ॥

कवयः कति वा न सन्ति तेषां कृतयो वातुलचातुरीगुणाः ।
रचयन्ति तथापि काव्यमन्ये रसयन्त्येव तदत्र पण्डिताः ॥

En p:

परिपुष्टं स्वसुतधिया कलकण्ठं चेन्निहन्ति बलिपुष्टः ।
निजपरिपोषकमपि तं व्याघ्राटो हन्तु नाम को दोषः ॥

Colophon:

इत्यज्ञकृत्यैकदेशनिन्दापद्धतिः ॥

R. No. **583.**

Palm-leaf. 18⅜ × 1¾ inches. Foll. 23. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1912–13 from Tirumalācāriyar of Kalyanapuram.

सामान्यनिरुक्तिपत्रम्.

SĀMĀNYANIRUKTIPATRAM.

Similar to the work described under No. 4323 of the D.C.S. MSS., Vol. VIII.

Incomplete.

R. No. **584.**

Śrītāla. 14¼ × 2 inches. Foll. 13. Lines, 10 in a page. Grantha. Good.

Purchased in 1912–13 from Tirumalācāriyar of Kalyanapuram.

व्युत्पत्तिवादपत्रम्.

VYUTPATTIVĀDAPATRAM.

Similar to the work described under No. 4299 of the D.C.S. MSS., Vol VIII.

Contains द्वितीयाप्रकरण only.

R. No. **585.**

Palm-leaf. 16½ × 1¼ inches. Foll. 18. Lines, 8 in a page. Grantha. Injured.

Purchased in 1912–13 from Tirumalācāriyar of Kalyanapuram.

चतुर्दशलक्षणीक्रोडपत्रम्.

CATURDAŚALAKṢAṆĪKRŌDAPATRAM.

Similar to the work described under No. 4240 of the D.C.S. MSS., Vol. VIII.

Incomplete.

R. No. 586.

Palm-leaf. $11\frac{1}{2} \times 1\frac{5}{8}$ inches. Foll. 25. Lines, 9 in a page. Grantha. Injured.

Purchased in 1912–13 from Tirumalācāriyar of Kalyanapuram.

नयमयूखमालिका.

NAYAMAYŪKHAMĀLIKĀ.

Same work as the one described under No. 1908 of the D.C.S. MSS., Vol. X.

Incomplete.

R. No 587.

Palm-leaf. $16\frac{1}{2} \times 1\frac{1}{2}$ inches. Foll. 99. Lines, 8 in a page. Grantha. Much injured.

Purchased in 1912–13 from Tirumalācāriyar of Kalyanapuram.

रामानुजसिद्धान्तसंग्रहः.

RĀMĀNUJASIDDHĀNTASAṄGRAHAḤ

Similar to the work described under No. 5354 of the D.C.S. MSS., Vol. XI.

Incomplete.

R. No. 588.

Palm-leaf. $16 \times 1\frac{1}{2}$ inches. Foll. 141. Lines, 8 in a page. Grantha. Good

Purchased in 1912–13 from E. R. Kṛṣṇamācāriyar of Kalyanapuram in the Tanjore district.

परिभाषेन्दुशेखरव्याख्या—गदा.

PARIBHĀṢĒNDUŚĒKHARAVYĀKHYĀ : GADĀ.

A commentary, apparently by one Vaidyanātha, on Nāgōjibhaṭṭa's Paribhāṣēnduśēkhara described under No. 1463 of the D.C.S. MSS., Vol. III.

Almost complete.

Beginning:

. . . . . गङ्गाद्भुतं मस्तकदेशवासिनी ।
वामार्धदेहापि न चण्डिकायाः [य] ध्यायामि देवं सनकादिवन्द्यम् ॥
वैद्यनाथः . . . . . रं गुरुम् ॥
विवृतिं परिभाषेन्दुशेखरे तनुते गदाम् ॥

प्रारिप्सितग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थमिष्टदेवतानतिरूपं मङ्गलमाच . . . . . णामनुषङ्गतो मङ्गलाय च निबध्नाति—नत्वेति । निर्गुणमूर्तेर्नत्यसंभवादाह—साम्बेति । रूपकमिदम् । बालानां . . . . . र्थानां परिभाषा एव इन्दुः, अर्थप्रकाशकत्वात्; स शेखरे यस्येति ग्रन्थपक्षे ।

End:

प्रायेणेत्युक्तस्य फलमाह . . . . . तदेवोपपादयति—तत्रेति । अचीतिसूत्रे इत्यर्थः । तयोर्मध्ये इति वार्थः । ग्रहणे चेति पाठः । इतीति इतिपदच्छेदा . . . . एवोक्तम् । विभक्तिनिर्देश इति; संहितायां तु सार्धमात्राद्वयमेवेति बोध्यम् । तथेति तथा इति भाष्ये त्वा . . कैयटोक्तेरित्यर्थः । . . . . . लाघवमपीत्यर्थः । कृत्(सू)त्रभाष्यं तु पदलाघवपक्षेणापि रूपोत(उपपन्न)मिति तत्र तदुक्तमेव ।

R. No. **589.**

Palm-leaf. 18⅜ × 1¼ inches. Foll. 40. Lines, 7 in a page. Telugu. Good.

Purchased in 1912-13 from Sāmbaśiva Śāstri of Tirunancoil in the Tinnevelly district.

Fol. 28 is lost.

रसविवेकः.

RASAVIVĒKAḤ.

This is a treatise on Rasa or artistic delectableness, consisting of three chapters dealing with (1) रसस्वरूपनिर्णय, (2) रसाधिकरण-निरूपण and (3) रसभेदनिरूपण. The author's name is not known, but he states that he is the brother of Saujanyabhūsaṇakavi and salutes Daksiṇāmūrtisūri as a preceptor.

Complete

Beginning:

जयत्यप्राकृतं ज्योतिर्दूरं वाक्चेतसोरपि ।
विवृत्तिं यस्य मन्यन्ते बुधाः शब्दार्थरूपिणीम् ॥
इदमस्तु नमस्तस्मै दक्षिणामूर्तिसूरये ।
यत्पादपद्मरजसा जगदासीत् परोरजः ॥
जयति रसाख्यं तत्त्वं सुहृदां स्वानन्दसंविदा वेद्यम् ।
यदुदाहरन्ति कवयो ब्रह्मास्वादस्य नेदिष्ठम् ॥

* * * *

शब्दार्थौ रसतत्त्वं तत्स्वसंवेद्यं सतां मतम् ॥
तस्यास्य रसतत्त्वस्य विचारे प्रयतामहे ।
मन्दधीप्रतिपत्त्यर्थं ज्ञात्वा तद्ग्रन्थविस्तरान् ॥
नालंकृतेरधिगमो न च शब्दविद्या
विज्ञानसंपदथवा न विवेकपाकः ।
वाचालयत्यपि तु मां रसबोधनेऽस्मि-
न्सौजन्यभूषणकवेरनुजत्वगर्वः ॥

* * * *

तत्रासौ रसः किमात्मा, किमधिकरणः, कतिसंख्यश्चेति त्रिविधो विचारः । ननु रस एवासिद्धः, विचारः किमाश्रय इति चेन्न ।

End:

पश्येत्कश्चिच्चल चपल रे का त्वराहं कुमारी
हस्तालम्बं वितर हहहा व्युत्क्रमः क्वासि यासि ।

इत्थं पृथ्वीपरिबृढ भवद्विद्विषोऽरण्यवृत्तेः
कन्या काचित्फलकिसलयान्याददानाभिधत्ते ॥

अत्र शङ्कासूयाधृतिमतिश्रमदैन्यादीनां शबलता ॥

Colophon:

इति रसविवेकनाम्नि काव्यादर्शे रसभेदविचारो नाम तृतीय उल्लासः ॥

The date of transcription and the name of the scribe are given thus:—

नले वर्षे सहोमासे पूर्णिमायां ज्ञवासरे ।
ग्रन्थो रसविवेकाख्यः कृष्णेन लिखितोऽभवत् ॥

R. No. **590.**

Palm-leaf. 16¼ × 1½ inches. Foll. 180. Lines, 10 in a page. Grantha. Good.

Purchased in 1912–13 from Sāmbaśiva Śāstri of Tirunanoil in the Tinnevelly district.

Fol. 1*a* gives the name of a former owner of the MS. to be Nīlakaṇṭhasvāmidīkṣitar. Fol. 1*b* is blank.

तन्त्रशिखामणिः.

TANTRAŚIKHĀMAṆIḤ.

Foll. 2*a*—177*a*. Fol. 177*b* is left blank.

Same work as the one described under No. 4420 of the D.C.S. MSS., Vol. IX, which wants beginning and end.

Rājacūḍāmaṇidīkṣita, the author of this work, states in the introduction to the commentary on the seventh Adhyāya that he composed it at the command of his preceptor Vēṅkaṭēśvaradīkṣita, who was the son of Gōvindayajvan and Nāgamāmbā, and who is said to have composed Sāhityasāmrājya (a poem), Śulbamīmāṁsā, Karmāntavārtika and Vārtikābharaṇa, which last is a

commentary on Ṭupṭikā. Rājacūḍāmaṇidikṣita gives the date of the composition of the work to be the month of Śrāvaṇa in the year Īśvara, corresponding to Śaka 1 59 (1637 A.D.).

Contains Adhyāyas 7 to 9 complete

Beginning:

अनन्यप्रकृतेर्यस्मात् समग्रगुणसंपदः ।
काङ्क्षितानि लभन्तेऽन्ये तमीडे सोममव्ययम् ॥
अस्ति गोविन्दयज्वेन्द्रनागमाम्बातपःफलम् ।
श्रीवेङ्कटेश्वरमखी सर्वतन्त्रस्वतन्त्रधीः ॥
येनेष्टं साग्निचित्याप्तवाजपेयादिभिर्मखैः ।
कृतं साहित्यसाम्राज्यनाम काव्यमनुत्तमम् ॥
व्यतानि शुल्बमीमांसा तथा कर्मान्तवार्तिकम् ।
टुप्टीकायाः कृता टीका वार्तिकाभरणाभिधा ॥
प्रतिष्ठापितचोलक्ष्माजानेस्तस्य नियोगतः ।
चूडामणिर्वितनुते यज्वा तन्त्रशिखामणिम् ॥

गोविन्ददीक्षिताचिरन्तनभाग्यराशेः श्रीवेङ्कटेश्वरमखीशितुराज्ञया मे ।
तन्त्राणवं तरितुमाहितसाहसस्य सांयात्रिकीभवतु तत्करुणाकटाक्षः ॥
श्रीवेङ्कटेश्वरमखिप्रणीतं प्रविविक्षुभिः ।
वार्तिकाभरणाम्भोधिं नौरियं क्रियतां कृतिः ॥
धीमन्मान्ये शकस्याब्दे हायने चेश्वराभिधे ।
चूडामणिः कलयते यज्वा तन्त्रशिखामणिम् ॥

श्रुतिप्रमाणत्वाच्छेषाणां मुख्यभेदे यथाधिकारं भावः स्यात् ।

End:

पत्नीवदुद्देशेन क्रियमाणः समानदेवत्यतया तच्छेषसमापनामिव भवतीति शेषसमापनपदे सादृश्यादुपपन्ने इति ध्येयम् ॥

Colophon:

इति श्रीमदद्वैतविद्याचार्यसर्वतन्त्रस्वतन्त्रसाग्निचित्याप्तवाजपेययाजि-श्रीवेङ्कटेश्वरदीक्षितनियोगानुभवसमुन्मिषितमनीषाविशेषस्य विश्वजिद्याजिनः श्रीराजचूडामणिदीक्षितस्य कृतिषु तन्त्रशिखामणौ नवमस्याध्यायस्य चतुर्थः पादः । समाप्तश्चाध्यायः ॥

धीमन्मान्ये शकस्याब्दे हायने चेश्वराभिधे ।
श्रावणे मासि नवमः पूर्णस्तन्त्रशिखामणौ ॥

Fol. 178 contains the horoscope of one Gīrvāṇēndradīksita. Fol. 179 is left blank. Fol. 180*a* contains an account of receipts and disbursements relating to some unknown person. Fol. 180*b* is left blank.

R. No. **591.**

Palm-leaf. 17 × 1⅜ inches. Foll. 99. Lines, 8 in a page. Grantha Good.

Purchased in 1912–13 from Sāmbaśiva Śāstri of Tirunancoil in the Tinnevelly district.

(*a*) तत्त्वकौस्तुभः.

TATTVAKAUSTUBHAḤ.

Foll. 1*a*—33*a*. Foll. 33*b* is left blank.

Same work as the one described under Nos. 4533 and 4584 of the D.C.S. MSS., Vol. IX.

Breaks off in the third Pāda of the first Adhyāya in the second Pariccheda.

(*b*) मध्वतन्त्रमुखमर्दनव्याख्या—व्यध्वविध्वंसनम्.

MADHVATANTRAMUKHAMARDANAVYĀKHYĀ:

VYADHVAVIDHVAṀSANAM.

Foll. 34*a*—71*b*.

Same work as the one described under No. 4704 of the D.C.S. MSS., Vol. IX.

Wants beginning; otherwise complete.

(c) पिष्टपशुतिरस्करणी.

PIṢṬAPAŚUTIRASKARAṆĪ.

Foll. 72*a*--97*b*.

This is a work denouncing the performance of sacrifices by using Piṣṭapaśu, *i.e.*, images of animals made of rice-flour, instead of the real animals, thus condemning the view of Ānandatīrtha on this subject. The author of the work is Rāmēśvara, who lived near the banks of the river Kṛṣṇā.

Complete.

Beginning:

पगरूपेण तिष्ठन्तीं पश्यन्त्यादिप्रभेदतः ।
प्रकटां नौमि वाग्देवीं वीणापुस्तकधारिणीम् ॥

* * * *

अवैदिकैर्दूषितमानसानां शङ्कानिवृत्त्यै श्रुतिवर्त्मगामिनाम् ।
रामेश्वरः पिष्टपशुप्रयोगं प्रमाणकूटैः परिहर्तुमुद्यतः ॥

अग्नीषोमीयं पशुमालभेतेतिवाक्यस्थपशुपदं न चेतनपरम्, किंतु तण्डुलपिष्टसंपादितपश्वाकृतिद्रव्यपरमित्याधुनिकाः श्रौततात्पर्यानभिज्ञा जगुः । तान् प्रत्ययं प्रश्नः—पशुपदशक्तिः कुत्राङ्गीक्रियते । न तावन्नैयायिकमतमनुसृत्य जात्याकृतिव्यक्तिषु एकशक्तिमङ्गीकृत्य तन्मतसिद्धिः ।

End:

वेदबाह्यैरतत्त्वज्ञैर्दूषिता वेदपद्धतिः ।
रामेश्वरेण कृतिना शोधिता विदुषां मुदे ॥
सेऽयं विश्वेश्वरो देवो यो मामत्र न्ययोजयत् ।
तस्यैव चरणे न्यस्ता तेन प्रीणातु शंकरः ॥

Colophon :

इति श्रुतिस्मृत्येकशरणकृष्णाकूलनिवासिना रामेश्वर(रेण) विरचिता पिष्टपशुतिरस्करणी समाप्ता ॥

Foll. 98 and 99 are left blank.

R. No. **592.**

Palm-leaf. 18½ × 1½ inches. Foll. 162. Lines, 10 in a page. Telugu. Injured.

Purchased in 1912–13 from K. Śrīnivāsācāriyar of Sriperumbudur in the Chingleput district.

The first two leaves are left blank.

पञ्चपादिकाविवरणोज्जीवनी.

PAÑCAPĀDIKĀVIVARAṆŌJJĪVANĪ.

Foll. 3*a*—162*b*.

A commentary on the Pañcapādikāvivarṇa of Prakāśātman, which is itself a commentary on Padmapadācārya's Pañcapādikā: by Yajñēśvaradīkṣita, son of Carkūri Koṇḍubhaṭṭōpādhyāya and Gangāmbikā of Kāśyapagōtra and a follower of the Bahvṛcaśākhā.

The author also composed Prabhāmaṇḍala, a commentary on Śāstradīpikā. He was the brother of Tirumaladīkṣita and a disciple of his grandfather Yajñēśa, and of Kṛṣṇāśrama. Nṛsiṁhāśrama's work is also referred to in the introduction.

Complete.

Beginning :

पूर्तये संपदां चारुकीर्तये . . . . विभूतये ॥

* * * *

मनोहरदयादृष्टिमन्दहासलसन्मुखः ।
मङ्गलाय सदा देवो मैथिलीजानिरस्तु मे ॥
शिष्यवाग्वैखरीमात्रजितपण्डित(मण्डलान्) ।
. . . . . कोण्डुभट्टारकाह्वयान् ॥
गिरो यदीया भुवने वहन्त्यो वीच्यः पयोधेरिव मध्यमा(नात्) ।
. . . साक्षादमृतं सुसान्द्रं तांश्चिन्तयामः शुभतातपादान् ॥

ऊरीकुर्वन्ति शारीरकम(म)लधियो भाष्यमेकं यदीयं
दूरीकुर्वन्त्यहारीभवदितरकृतग्रन्थदुर्गन्धभारम् ।
एष प्रामाण्यजोषप्रवणतमवचोवीचिराम्नाय . . .
. . . कल्पस्य वेषो जयति यतिवरः शंकराचार्यवर्यः ॥
रे रे काणाद काणो भवसि नयपथे पाणिनीया भवन्तो
नास्माभिर्भाषणीया गुरुतमतमसा गौतमा वीतमानाः ।
यूयं भाट्टाः प्रयात प्रतिभटपटलारट्टकुट्टाट्टसाल-
. . . ल्पन्त्यनल्पं स्फुटमिति महिताः शंकराचार्यशिष्याः ॥
यच्छिष्यो बौद्धरण्यां निकषमुपनिषत्काननाध्वाध्वनीनः
पाषण्डोत्खण्डनोत्को बुधजनपटलीमण्डनो मण्डनार्यः ।
यस्यान्तेवासिनेऽदादनिमिषतटिनीपादविक्षेपभूमिः
हे(मा)म्भोजानि तस्मै द्रढयति (च) नमस्कुर्महे शंकराय ॥
टीकाविवरणे प्रौढीं धिनुते यत्सरस्वती ।
एतान् विवरणाचारा(र्या)न् वन्देऽमन्दतरश्रियः ॥
वेदान्ततन्त्रसुविचारविधिस्वतन्त्राः
मन्त्रोपदेशगुरवो मम लोकमान्याः ।
कृष्णाश्रमा इति समस्तजगत्प्रसिद्धाः
कृ(तृ)ष्णाश्रमोपशमने निपुणा जयन्ति ॥
श्रीपितामहयज्ञेशगुर्वनुग्रहबोधितः ।
व्याख्यां विवरणस्याहं करोम्युज्जीवनीमिमाम् ॥
नृसिंहाश्रमयोगीन्द्रग्रन्थशाणनिकाषतः ।
क्षुद्रग्रन्थानुपेक्ष्याहं करोमि विमलां धियम् ॥

अत्र तत्रभवन्तः प्रकाशात्मश्रीपादाः शिष्टाचारपारम्परीं(प्रति)पालयन्तश्चिकीर्षितग्रन्थस्य निर्विघ्नपरिसमाप्तिं प्रचयगमनं च आशासानाः

स्वेष्टदेवतानमस्का(ररूपं मङ्गलमादावाचरन्ति)—पालने इति । सते पर-ब्रह्मणे नमः । नमस्कारं करोमीत्यध्याहारेण योजनीयम् । परब्रह्मनमस्कारस्य प्रयोजनं निर्दिशति—पालने स्वरक्षणे ; चर्मणि द्वीपिनं हन्तीतिवत् निमित्ते सप्तमी, प्रागुक्तरीत्या कर्मयोगसत्त्वात् ; मम संरक्षणार्थं नमस्कारं करोमीत्यर्थः ।

* * * *

Colophon :

इति श्रीकाश्यपगोत्रबह्वृचाग्रेसरसकलपण्डितमण्डलाखण्डलपदवाक्यप्रमाणपारदृश्वश्रीचर्कूरिकोण्डुभट्टोपाध्यायसूनुना गङ्गाम्बिकाशुक्तिमुक्तामणिना तिरुमलदीक्षितप्रियसोदरेण दक्षिणामूर्तिकिंकरेण यज्ञेश्वरदीक्षितेन विराचितायां विवरणोज्जीवन्यां प्रथमवर्णकं संपूर्णम् ॥

End :

तस्मादद्वितीयब्रह्मज्ञानेन सकलभेदभ्रमनिवृत्तिः ।

Colophon :

(इति श्रीकाश्यपगोत्रबह्वृचाग्रेसरसकलपण्डितमण्डलाखण्डलपदवाक्यप्रमाण)पारदृश्वश्रीचर्कूरिकोण्डुभट्टोपाध्यायसूनुना गङ्गाम्बिकाशुक्तिमुक्तामणिना तिरुमल(दीक्षितप्रियसोदरेण दक्षिणामूर्तिकिंकरेण यज्ञेश्वरदीक्षितेन विराचिता) विवरणोज्जीवनी संपूर्णा ॥

R. No. 593.

Palm-leaf. $15\frac{5}{8} \times 1\frac{3}{8}$ inches. Foll. 67. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1912-13 from R. V. Kṛṣṇamacariyar of Tiruvadi in the Tanjore district.

The first two leaves are left blank.

परिभाषाभास्करः.

PARIBHĀṢĀBHASKARAḤ.

Foll. 3*a*—67*a*. Fol. 67*b* is left blank.

Same work as the one described under No. 1481 of the D.C.S. MSS., Vol III.

Incomplete.

R. No. **594.**

Palm-leaf. 15¾ × 1½ inches Foll. 32. Lines 10 in a page. Grantha. Good.

Purchased in 1912–13 from R. V. Kṛṣṇamâcariyar of Tiruvadi.

The first leaf is left blank.

लघुशब्देन्दुशेखरव्याख्या—चन्द्रिका.

LAGHUŚABDĒNDUŚĒKHARAVYĀKHYĀ: CANDRIKĀ.

Foll. 2*a*–28*a*.

A gloss on Nāgēśabhaṭṭa's commentary on the Siddhanta-kaumudī: by Rāghavacārya of Ātrēyagōtra and a pupil of Nīlakaṇṭha.

Contains the Saṁjñāprakaraṇa complete.

Beginning:

पाणिनिवररुचिशेषान् नत्वा शब्देन्दुशेखरव्याख्याम् ।
वितनोमि चन्द्रिकाख्यां परिभाव्याशेषशेषार्थान् ॥
नानाक्षेपान् समुद्धर्तुं विद्वत्कल्पैरनुद्धृतान् ।
समर्थयन् मुकुन्दस्य पादयो . . . . ॥

पातञ्जल इति । महाभाष्ये जले पातं कृत्वा तनुते इत्यपि केचित् । सतीदेव्या इति ; स्त्रीशब्दस्य पातिव्रत्यनिमित्तकस्य नित्यस्त्रीत्वान्न पुंवत् । सतीं पार्वतीं पातिव्रत्येन विजिगीषतीत्यपि केचित् । अरिकक्षेति ; कक्षस्तु दोर्मूले शुष्ककानन इति त्रिकाण्डशेषः । तनुत इति ; अनेकजनसंबन्धं करोतीत्यर्थः ।

End:

सन्धिकार्येति ; सौत्रेत्यपि पूरणीयम् । तेन घसंज्ञाया अनुदात्तत्वेऽपि न क्षतिः ॥

Colophon:

इति श्रीमदात्रेयवंशपयःपरावारराकासुधाकरसकलकलापारदृश्वना नीलकण्ठान्तेवासिना श्रीराघवाचार्यविदुषा विरचितायां चन्द्रिकाभिख्यायां शब्देन्दुशेखरव्याख्यायां संज्ञाप्रकरणं समाप्तम् ॥

Fol. 28*b* and the remaining leaves are left blank

R. No. **595.**

Palm-leaf. 17 × 1½ inches. Foll. 25. Lines, 7 in a page. Grantha. Injured.

Purchased in 1912–13 from R. V. Kṛṣṇamācariyar of Tiruvadi.

यतिराजसप्ततिव्याख्या.

YATIRĀJASAPTATIVYĀKHYĀ.

A commentary by Rāmānujācārya on the Yatirājasaptati, which is a hymn of seventy stanzas composed in praise of Rāmānuja by Vēdāntadēśika.

Complete.

Beginning:

श्रीमान् वेङ्कटनाथार्यः . संनिधत्तां सदा हृदि ॥
श्रीमत् . . . . . वस्तु निर्मलम् ।
अस्तु प्रशस्तकरुणापरिणाहि ममाग्रतः ॥
कुलदैवतमस्माकं कुर्वे हृदि यतीश्वरम् ।
येन संत्यजता सर्वं संगृहीता वयं पुनः ॥
कवितार्किकसिंहस्य कल्याणगुणवारिधेः ।
कलये शिरसा पादौ कलिकल्मषहारिणौ ॥
प्रणतिं वेङ्कटेशस्य पदयोर्विदधीमहि ।
यदुक्तयो यतीन्द्रोक्तिरहस्यानां रसायनम् ॥
प्रसीदतु यतीशानप्रसादनपटीयसी ।
सप्ततिर्यतिराजस्य दत्तहर्षोदया स्वयम् ॥

इह खलु भगवान् कवितार्किकसिंहः सर्वतन्त्रस्वतन्त्रः श्रीमद्वेङ्कटाचार्यो वेदान्ताचार्यः प्रधानस्तोतव्यो . . . बह्व्यः प्रमितयः इति वचनशत-विहित एवाचार्यः . . . . . श्रीमद्रामानुजार्यं यतिराजसप्तत्या-ख्यप्रबन्धमुखेन प्रसादयिष्यन् गुरुपरम्परां नमस्यन्नुपदेशप्राथम्यात् प्रथम-गुरुभूतं विशिष्टदेवं नमस्यति—कमपीति । स्वयं स्वासाधारणकारणेन, न तु बौद्धार्हतादिमतवत् तामसजीवाधिष्ठानद्वारा तामसगुणाधिष्ठानद्वारा वेत्यर्थः ।

End:

श्रुतिवतंसितसूनृतसूक्तयः श्रुत्यलंकारकरमधुरतरसूक्तयः समत्सरान् दुर्वादिनः दिवसतारकयन्ति दिवानक्षत्रीकुर्वन्ति तिरस्कुर्वन्तीत्यर्थः ॥

Colophon:

इति श्रीरामानुजाचार्यविरचितयतिराजसप्ततिटीका संपूर्णा ॥

R. No. 596.

Palm-leaf. $16\frac{5}{8} \times 1\frac{3}{8}$ inches. Foll 27. Lines, 9 in a page. Grantha. Slightly injured.

Purchased in 1912–13 from R. V. Kṛṣṇamacāriyar of Tiruvadi.

कृष्णयजुर्वेदब्राह्मणभाष्यम्.

KṚṢṆAYAJURVĒDABRĀHMAṆABHĀṢYAM.

Similar to the work described under No. 166 of the D.C.S. MSS., Vol. I., Part II.

Contains Acchidra from the third Pañcāśat of the fifth Anuvāka to the end of the eighth Anuvāka.

The MS. is said to have been copied by one Viśvanathārya.

R No. 597.

Palm-leaf. $15\frac{1}{4} \times 1\frac{1}{4}$ inches. Foll. 13. Lines, 8 in a page. Grantha Injured.

Purchased in 1912–13 from R. V Kṛṣṇamacāriyar of Tiruvadi.

माधवाभरणम्.

MĀDHAVĀBHARAṆAM.

Foll. 1*a*—13*a*. Fol. 13*b* is left blank.

This is a short grammatical treatise establishing the correctness of the two forms Vṛtraghna and Vṛtraghṇa given by Madhava in his Dhātuvṛtti. The author of the work is Cakravarti Kavi tārkikasiṁha Vēdāntadēśika.

Complete.

Beginning:

श्रीभूमिनीलासहितं सर्वविद्याधिदैवतम् ।
कुन्दमन्दारसुभगं नौमि श्रीहयकन्धरम् ॥
कौमुदी[लक्षण]युतमनोरमोत्सुकैर्दुर्निबोधविभवः स माधवः ।
वेदमौलिगुरुसूक्तिदृश्वभिर्दोषहीनगुणवान् विबुध्यते ॥

सुब्वृत्तौ तावत् वृत्रघ्नः वृत्रघ्ण इति रूपद्वयं माधवेनोदाहृतम् । तत्र तदाशयानिर्ज्ञानोपज्ञावज्ञानिरासाय तदाशयः स्फुटीक्रियते—अत्रेत्थं तदाशयः आधुनिकैरस्मादृशैर्लक्षणैकचक्षुष्कतया लक्षणप्रवृत्त्यनुरोधेन प्रवर्तितव्यम् । अत्र च प्रमाणानामैककण्ठ्ये संभवति तेषां परस्परपराङ्मुखीभावकल्पनं न प्रामाणिकहृदयंगमम् ।

End:

माधवोदाहृतस्य वृत्रघ्नः वृत्रघ्णः इति रूपद्वयस्यैव सूत्रवार्तिकभाष्यानुगृहीतत्वेन माधवमतमेव सहृदयहृदयंगममिति सिद्धम् ॥

श्रीचक्रवर्तिकवितार्किकसिंहलक्ष्मीवेदान्तदेशिकपदेन कृतं सुवर्णैः ।
श्रीमाधवाभरणमर्पितमद्भुतं श्रीलक्ष्मीपतेर्हृदि चिराय जयाय भूयात् ॥

R. No. **598.**

Palm-leaf. 14¾ × 1¼ inches. Foll 34. Lines, 9 in a page. Grantha. Injured.

Purchased in 1912–13 from R. V. Kṛṣṇamacariyar of Tiruvadi.

व्याकरणक्रोडपत्राणि.

VYĀKARAṆAKROḌAPATRĀṆI.

A critical tract on the meaning of some grammatical aphorisms of Pāṇini.

Incomplete.

Beginning:

न पदान्ताट्टोरनामिति सूत्रात् नेत्यनुवर्तते । तोः षीति सूत्रात् तोरिति । शकारात् (परस्य श्चुत्वं न भवतीत्य)र्थः । विश्नः प्रश्नः इत्युदाहरणम् ।

* * * *

ननु ञमङणनानां नासिका चेति नासिकास्थानाधिक्यात् वर्गेष्वाद्यैश्चतुर्भिर्वर्णैः सह तुल्यस्थानत्वाभावेन सावर्ण्याभावात् य(न)स्तोः श्चुनेति तुशब्देन नकारो गृह्यते ।

End:

न च डा(डेरा)मादेशे परत्वान्नित्यत्वाच्चाटि ङकारस्य प्रत्ययादित्वाभावेन इत्संज्ञा न स्यादिति वाच्यम्, अन्तरङ्गत्वात् पूर्वमित्संज्ञाप्रवृत्तेः । न च वार्णपरिभाषाबाधः ।

R. No. **599.**

Palm-leaf. 15⅛ × 1⅝ inches. Foll. 100. Lines, 10 in a page. Grantha. Good.

Purchased in 1912-13 from N. Rāmasvāmi Ayyaṅgār of Puliyur.

श्रीभाष्यसंग्रहः.

ŚRĪBHĀṢYASAṄGRAHAḤ.

Foll. 1*a*—98*b*. Foll. 63*b*, 97*b*, 99 and 100 are left blank.

A brief summary of the commentary of Rāmānuja on the Brahmasūtras of Vyāsa: by Vēṅkaṭaraṅga, son of Cakravarti Vēṅkaṭavaradācārya.

Contains Sūtras 1-2-1 to 1-2-17, 3-1-1 to 3-2-30 and 3-3-1 to 3-3-32.

Beginning:

सर्वत्र प्रसिद्धोपदेशात् । यथा चोदनालक्षणोऽर्थो धर्म इत्यत्र प्रमाणमेव चोदना चोदनैव प्रमाणमित्यवधारणद्वयम् । तत्र प्रमाणमेव चोदनेत्यवधारणमौत्पत्तिकसूत्रे साधितम् । चोदनैव प्रमाणमित्यवधारणं प्रत्यक्षसूत्रे स्थापितम् । तथा जन्मादिसूत्रेऽपि ब्रह्म कारणमेव ब्रह्मवै कारणमित्यवधारणद्वयमपि विवक्षितम्, जन्मादिकारणत्वस्य ब्रह्मलक्षणत्वात् ।

* * * *

Colophon:

श्रीचक्रवर्तिकुलसंभूतश्रीमद्वेङ्कटवरदाचार्यपुत्रैः श्रीवेङ्कटरङ्गाचार्यैः कृते श्रीमद्रामानुजभाष्यसंग्रहे तृतीयस्याध्यायस्य प्रथमः पादः ॥

End:

अश्व इव रोमाणि विधूय पापमिति श्रुतिबलात् ब्रह्मविदः शरीरपातसमये सर्वकर्मक्षयार्चिरादिगतिविराज(रजा)तरणब्रह्मप्राप्त्यादिना.

R. No. **600**.

Palm-leaf. 15⅞ × 1⅜ inches. Foll. 23. Lines, 11 in a page. Grantha. Good.

Purchased in 1912-13 from N. Rāmasvāmi Ayyaṅgār of Puliyur.

सारवाक्यावली.

SĀRAVĀKYĀVALĪ.

A discussion bearing on some of the chief points in the Brahmasūtras: according to the Viśiṣṭādvaita view of the Vēdānta.

Contains the fourth Adhyāya which breaks off in the third Pāda thereof.

Beginning:

एवं तृतीये विद्या साधनैः सह चिन्तिता । चतुर्थे फलं प्राधान्येन चिन्त्यते । तत्र पूर्वाध्यायैर्विद्यायाश्चिन्तितत्वेऽपि द्वयोरपि संबन्धिनोरेकाध्यायप्रतिपाद्यत्व एव एकप्रतीत्युपारोहेणास्य साध्यस्येदं साधनमिति साध्यसाधनभावसंबन्धः सुग्र(हः) स्यादिति साध्यसाधनभावज्ञापनार्थं

भक्तिरूपापन्नज्ञानस्य प्रीतिरूपतया फलकोटिनिवेशज्ञापनार्थं च विद्याया एव प्रागनिरूपितांशः प्रथमं निरूप्यते ।

* . . .

Colophon :

इति सारवाक्यावल्यां चतुर्थस्याध्यायस्य प्रथमः पादः ॥

Colophon :

इति सारवाक्यावल्यां चतुर्थस्याध्यायस्य द्वितीयः पादः ॥

End :

मार्गभेदे संकोचः संकोचान्मार्गभेदः इत्यन्योन्याश्रयादैक्यं तु प्रत्यभिज्ञासिद्धम् । अथैतयोः पथोरिति देवयानपितृयानमार्गाद्वित्वश्रुतिस्वारस्याच्च ।

* * * *

उपासनविध्येकवाक्यत्वं निवारयति—न ह्युपासीत खल्विति । वचनव्यक्तिघटते (?) ।

R. No. 601.

Palm-leaf. 13¾ × 1⅜ inches. Foll. 12. Lines, 11 in a page. Grantha. Good.

Purchased in 1912-13 from N. Ramasvāmi Ayyaṅgār of Puliyur.

(*a*) सन्ध्यावन्दनप्रमाणानि.

SANDHYĀVANDANAPRAMĀṆĀNI.

Foll. 1*a*—2*b*.

This gives the various authoritative texts in relation to the details connected with the performance of the Sandhyāvandana (the morning, noon and evening prayers of the Brahmins).

Incomplete.

Beginning:

प्रातस्संध्याविधिः । तदाह भरद्वाजः—

उत्थाय पूर्वं संध्यायाः कृत्वा चावश्यकादिकम् ।
स्नानान्तं विधिवत् सर्वं संध्याकर्म समाचरेत् ॥

उत्तमा तारकोपेता मध्यमा लुप्ततारका ।
अधमा मण्डलोपेता प्रातस्संध्या प्रकीर्तिता ॥

End:

चन्द्रिकायाम्—

सर्वदा दर्भपाणिः स्याद् दैवे पित्ये च कर्मणि ।
पादशौचं गन्धलेपं . . . . . ॥

(*b*) प्रपन्नपारिजातम्.

PRAPANNAPĀRIJĀTAM.

Foll. 3*a*—11*a*. Foll. 11*b* and 12 are left blank.

Same work as the one described under No. 5310 of the D.C.S. MSS., Vol. XI.

Breaks off in the 9th Paddhati.

R. No. **602.**

Palm-leaf. 8¾ × 1¼ inches. Foll. 69 Lines, 6 in a page. Grantha. Good.

Purchased in 1912–13 from N. Rāmasvāmi Ayyaṅgār of Puliyur.

The first leaf is left blank.

मालविकाग्निमित्रम्—गुणोत्तराव्याख्यासहितम्.

MĀLAVIKĀGNIMITRAM WITH THE COMMENTARY GUṆŌTTARĀ.

Foll. 2*a*—69*b*.

A well-known drama of Kālidāsa together with a commentary which seems to have been written by one Śrīkaṇṭha.

Complete.

Beginning :

एकैश्वर्ये स्थितोऽपि प्रणतिबहुफले यः स्वयं कृत्तिवासाः
कान्तासंमिश्रदेहोऽप्यविषयमनसां यः पुरस्ताद्यतीनाम् ।
अष्टाभिर्यस्य कृत्स्नं जगदपि तनुभिर्बिभ्रतो नाभिमानः
सन्मार्गालोकनाय व्यपनयतु स वस्तामसीं वृत्तिमीशः ॥

प्र(णतिबहु)फले नमस्कारेणातिशयप्रयोजनफलदे एवंविधे एकैश्वर्ये मुख्यसंपदि अणिमाद्यष्टगुणोपेते संपदि स्थितोऽपि ।

End :

अग्निमित्रे अग्निमित्रनाम्नि । मयि न संपत्स्यत इति न, संपत्स्यत एव; सर्वाः प्रजा मयि प्रकृष्टप्रेमाण एवेति भावः । तस्मात् त्वत्प्रसादमात्रं मम प्रार्थनीयमित्यर्थः ॥

Colophon :

श्रीकण्ठीया गुणोत्तरा नाम मालविकाग्निमित्रव्याख्या संपूर्णा ॥

The stanza given below gives the date of transcription and the name of the scribe :—

हेविलम्ब्याख्यवर्षेऽस्मिन् कालिदासेन निर्मितम् ।
मालविकाग्निमित्रीयं नाटकं सह टीकया ॥
वात्स्यवेङ्कटदासेन लिखितं प्रीतये हरेः ।
विलोकयन्तु सततं बुद्धिमन्तः प्रसिद्धये ॥

R No. 603.

Palm-leaf. 17½ × 2 inches. Foll. 35. Lines, 8 in a page. Grantha. Injured.

Purchased in 1912–13 from N. Rāmasvāmi Ayyaṅgār of Puliyur.

सालग्रामलक्षणम्.
SĀLAGRĀMALAKṢAṆAM.

Foll. 1*a*—33*b*.

Same work as the one described under No. 5809 of the D.C.S. MSS., Vol. XII.

Complete.

The remaining leaves are left blank.

R. No. **604.**

Palm-leaf. 15⅝ × 1⅜ inches. Foll. 48. Lines, 9 in a page. Grantha. Much injured.

Purchased in 1912–13 from N. Rāmasvāmi Ayyaṅgār of Puliyur.

उपक्रमपराक्रमः.
UPAKRAMAPARĀKRAMAḤ.

Same work as the one described under No. 4409 of the D.C.S. MSS., Vol. IX.

Incomplete.

R. No. **605.**

Palm-leaf. 14⅜ × 1⅛ inches. Foll. 80. Lines, 6 in a page. Grantha. Injured.

Purchased in 1912–13 from N. Rāmasvāmi Ayyaṅgār of Puliyur.

Wants the foll. numbered 3, 39, 63, 71 and 72.

प्रमाणसंग्रहः.
PRAMĀṆASAṄGRAHAḤ.

Same work as the one described under No. 5316 of the D.C.S. MSS., Vol. XI.

Incomplete.

R. No. **606.**

Palm-leaf. 17⅜ × 1⅝ inches. Foll. 7. Lines, 8 in a page. Grantha. Good.

Purchased in 1912–13 from Sudarśanam Śrīnivāsa-Rāghavācāriyar of Kumbakonam.

पुरुषकारमीमांसा.

PURUṢAKĀRAMĪMĀṀSA.

Same work as the one described under No. 5298 of the D.C.S. MSS., Vol. XI.

The author of this work is said to be Nārāyaṇamuni *alias* Śrīvatsāṅka-Vipaścit.

Complete.

Colophon:

नारायणेन मुनिना श्रीवत्साङ्कविपश्चिता ।
सैषा पुरुषकारस्य मीमांसा निर्मितामिता ॥

R. No. **607.**

Palm-leaf. 17¼ × 1¼ inches. Foll. 17. Lines, 8 in a page. Grantha. Very much injured.

Purchased in 1912–13 from Sudarśanam Śrīnivāsa - Rāghavācāriyar of Kumbakonam.

भगवदाराधनकारिका.

BHAGAVADĀRĀDHANAKĀRIKĀ.

Similar to the work described under No. 5205 of the D.C.S. MSS., Vol. XI.

Incomplete.

R. No. **608.**

Palm-leaf. 14 × 1⅛ inches. Foll. 51. Lines, 7 in a page. Grantha. Much injured.

Purchased in 1912–13 from Sudarśanam Śrīnivāsācāriyar of Kumbakonam.

(*a*) परवादित्रयखण्डनम्.

PARAVĀDITRAYAKHAṆḌANAM.

Foll. 1*a*—5*a*.

Same work as the one described under No. 4992 of the D.C.S. MSS., Vol X.

Wants beginning; otherwise complete.

(*b*) व्यावहारिकखण्डनम्.

VYĀVAHĀRIKAKHAṆḌANAM.

Foll. 5*b*—13*b*.

A refutation of the view that the world of external manifestation is unreal : by Varada.

Incomplete.

Beginning :

परमार्थविदां पथ्यमित्थं वरदनामकः ।
वेदान्तदेशिकश्चक्रे व्यावहारिकखण्डनम् ॥

आकर्णयध्वमाचार्या वर्णयामस्तावत् वेदान्तसिद्धान्तनिर्णयम् ।
अवधूतदुर्नयपलापं भवतु च लब्धवर्णानां भवतां कर्णामृतमेतत् ।
अत्र केचिदाहुः—व्यावहारिकमेव विश्वस्य सत्यत्वं न प्रामाणिकम् । प्रा-(मा)णिकं तु सत्यत्वं परस्य ब्रह्मणः प्रतिपद्यामहे । प्रमाणानि च वेदान्तवाक्यानि तत्त्वविदामस्माकम् । तानि च सदेव सौम्येदमग्र आसीदित्येवमादीनीति, तदेतत् ग्राम्यजनकदर्थीकरणम् ।

End :

पञ्चदशोऽपि पक्षः पञ्चत्वमेव प्रतिपद्यते, अलौकिकानां स्वर्गादीनां व्यावहारिकत्वाभावप्रसङ्गात् । तेषामस्मदलौकिकत्वेऽपि तत्तल्लोकवासिजनव्यवहारगोचरत्वेन लोकप्रतीतिसिद्धत्वम् ।

(*c*) अविद्याखण्डनम्.

AVIDYĀKHAṆḌANAM.

Foll. 14*a*—17*a*.

This denounces the view that Avidyā or ignorance in relation to Brahman is the cause of the manifested world.

Complete.

Beginning :

समस्तकल्याणगुणात्मकस्य निरस्ततुल्याभ्यधिकस्य पुंसः ।
विभूतिभेदः सकलप्रपञ्चः सत्योऽक्षजातानुमितिश्रुतिभ्यः ॥

अविद्यायाः कोऽयमाश्रयः ? किं ब्रह्म, उत जीवः ? जीव इति चेन्न, जीवस्याविद्यापरिकल्पितत्वेनान्योन्याश्रयप्रसङ्गात् । बीजाङ्कुरन्यायेन

जीवभावाविद्ययोः प्रवाहानादित्वादविरोध इति चेत्, तदपि न, योगाचारमतसंकरप्रसंगात् ।

End:

ब्रह्मणोऽनर्थाभावान्माया न दोष इति चेन्न, तत्त्वतो जीवब्रह्मणोरेकत्वात् जीवानर्थकारिणी माया ब्रह्मानर्थकारिणीत्यवधार्यम् । जीवस्य एकजीवगतानर्थः, ब्रह्मणस्तु अनेकजीवगतानर्थ इति विशेषः ॥

Colophon:

अविद्याखण्डनं समाप्तम् ॥

(*d*) अपूर्वभङ्गः.

APŪRVABHAṄGAḤ.

Foll. 17*a*—21*b*.

A short work in condemnation of the view of Mīmāṁsakas that the fruits of our action arise out of what is called Apūrva: by Śrīvatsāṅkasūri, a disciple of Varadācārya of Śrīvtsagōtra and the grandson of the nephew of Rāmānujācārya.

Complete.

Beginning:

श्रीमल्लक्ष्मणयोगीन्द्रभागिनेयात्मजात्मजम् ।
वन्दे तं वरदाचार्यं वत्सवंशविशेषकम् ॥
प्रणम्य परमात्मानं प्रणतार्तिहरं हरिम् ।
भङ्गः पराभ्युपेतस्य कार्यस्य प्रतिपाद्यते ॥

इह केचिदत्यन्तालौकिकं कार्यपदास्पदं किमपि वेदप्रतिपाद्यमङ्गीकृत्य तत्प्रतिपाद्यत्वेन वैदिकाग्रगण्यैः अभ्युपेतं निरस्तसमस्तदोषगन्धं समस्तकल्याणगुणगणाश्रयं पुरुषोत्तममवजानते । एवं तेषामाशयः— व्युत्पत्त्यायत्तं हि शब्दस्य प्रामाण्यम् ।

End:

उपनिषद्भागैस्तु स्वरूपेणैव प्रतिपादितोऽपवर्गाख्यं फलं ददातीति प्रतिपाद्यत इति विशेषतः पुरुषोत्तम एव वेदप्रतिपाद्य इति सिद्धम् ॥

वात्स्यस्य वरदार्यस्य चरणाम्भोजरेणुना ।
विहितोऽपूर्वभङ्गोऽयं श्रीवत्साङ्केन सूरिणा ॥

Colophon:

अपूर्वभङ्गः समाप्तः ॥

(*e*) सगुणवादः.

SAGUṆAVĀDAḤ.

Foll. 25*a*—31*a*.

This endeavours to establish that the Supreme Brahman has attributes.

Complete.

Beginning:

ननु सद्ब्रह्मात्मादिशब्दवाच्यपरमेश्वरस्य सकलकल्याणगुणाकरत्वमनुपपन्नम्, तस्य निर्गुणत्वात् । तथाहि श्रुतिः – अस्थूलमनणु अह्रस्वं निर्गुणं निरञ्जनं निष्कलं शान्तम्, यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह ।

End:

ज्ञानाश्रयत्वादिप्रतिपादनेन निरस्तसमस्तहेयप्रशस्तकल्याणगुणैकतान- . . . . . गुणास्पदं जीवविलक्षणः श्रुतिसिद्धः इति ब्राह्मवेदनिन्दापरं निकृतिविधायकस्मृत्यन्तरमन्वेषणीयमिति ॥

Colophon:

इति सगुणवादः ॥

(*f*) भेदवादः.

BHĒDAVĀDAḤ.

Foll. 31*a*—34*a*. Fol. 34*b* is left blank.

This treatise is in support of the view that the individual soul is different from and not identical with the Supreme Brahman.

Complete.

Beginning :

नन्वेवमपि जीव(वि)लक्षणः परमात्मा परमेश्वरः इ(त्यादिकमसंगतम्) जीवेश्वराभेदप्रतिपादकबहुश्रुतिविरोधात् । तत् त्वमसि, अयमात्मा ब्रह्म, अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि, स यो ह वै तद्ब्रह्म वेद ब्रह्मैव भवति ।

End:

जीवेश्वरभेदसिद्धौ तत् त्वमसि, ब्रह्म(वेद) ब्रह्मैव भवति, इत्यादि वाक्यानां ब्रह्मज्ञानवान् ब्रह्मसदृशो भवतीत्येवमेव उपचरितार्थत्वकल्पनमेव युक्तम्, आदित्यो यूपः यजमानः प्रस्तरः इत्यादौ तथा दर्शनादित्यास्तां विस्तरः ॥

Colophon:

इति भेदवादः ॥

(*g*) प्रपञ्चमिथ्यात्वखण्डनम्.

PRAPAÑCAMITHYĀTVAKHAṆḌANAM.

Foll. 35*a*—53*b*. Fol. 54 gives details of procedure connected with the performance of Āyusyahōma.

Similar to the work described under sub-division (*b*) above.

Incomplete.

Beginning :

विप्रतिपन्नः प्रपञ्चो मिथ्या, संप्रतिपन्नशुक्तिरजतवत् इत्यत्र प्रपञ्चशब्दार्थः कः ? किं ब्रह्मव्यतिरिक्तत्व किं वा कल्पितत्वं किं वा जडत्वं किं वा दृश्यत्वम् ? । प्रथमे कल्पे आत्मन्यनैकान्तिकता । कल्पितत्वे कार्यत्वम्, आहोस्विदनिर्वचनीयत्वम् ? । यदि कार्यत्वं तर्हि अव्याकृतेऽनैकान्त्यम् ।

End:

यदुक्तं स्वरूपभेदपक्षे स्वरूपस्य स्वरूपान्तराभावात् स्वरूपे भिन्न-व्यवहारो न स्यादिति । तदपि मन्दम्, स्वरूपं नाम स्वासाधारणं रूपम् । तत् संस्थानस्याप्यस्त्येव ।

R. No. **609.**

Palm-leaf. 8 × 1⅛ inches. Foll. 99. Lines, 6 in a page. Grantha. Good.

Purchased in 1912-13 from Subrahmaṇya Śāstri of Tiruvadi.

(*a*) बिल्हणचरितम्.

BILHAṆACARITAM.

Foll. 1*a*—4*a*. Fol. 4*b* is left blank.

Same work as the one described under R. No. 244(*b*) *ante*.

Wants beginning and end.

(*b*) सुभाषितानि.

SUBHĀṢITĀNI.

Foll. 5*a*—17*b*.

Similar to the work described under R. No. 582 *ante*. By Nīlakaṇṭhadīkṣita.

Breaks off in the 45th stanza.

Beginning:

छायावृक्षमुपाश्र(य)न्ति पथिषु श्रान्ता (हि) पान्थाः समं
तेष्वेकोऽस्य शुभं शुभेन मनसा हृष्यन्ननुध्यायति ।
अन्यो हर्तुमपेक्षतेऽस्य विटपानाधारयष्टेः कृते
कश्चिन्निश्चिनुते कवाटफलकं कर्तुं तमेव क्षणात् ॥

End:

पीता(य)न्तां तमसा दिशो विदधतां नीचाः पिशाचाः स्वयं
व्याक्रोशन्तु शिवाः कियच्चिरमसौ कालः सखे स्थास्यति ।

अद्योदेष्यति भानुरेष्यति दिशामद्य प्रसादो मुखे-
ष्वद्य स्वां प्रकृतिं नयेत च महीं कोक क्षणं क्षम्यताम् ॥

(c) महानाटकसुधानिधिः.

MAHĀNĀṬAKASUDHANIDHIḤ.

Foll. 18a –34b.

A collection of stanzas narrating the story of the Rāmayaṇa: by Immiḍadēvarāja.

Contains the Ayōdhyakaṇḍa complete, and the Āraṇyakāṇḍa incomplete

Beginning :

कोपादाकर्ण्य कर्णज्वरकरणपटुं रामचन्द्राभिषेक-
प्रत्यूहोदन्तमन्तःपुरजनकथितं लक्ष्मणस्तत्क्षणेन ।
शिञ्जासंधानु(न)कूल(ज)द्व(ल)यकलकलोत्कर्णजैत्रप्रशास्तः
संरम्भादर्धमार्गे शरमपि शरभेरुद्धरन्नभ्यधावत् ॥

* * * *

श्रीमन्निम्मिड(म्मडि)देवराजनृपतिः स्वर्लोलकल्लोलिनी-
कल्लोलप्रतिमल्लसूक्तिविभवो विद्वज्जनश्लाघितः ।
द्वैतीयीकवरेण्यकाण्डविषयान् व्यस्तान् महानाटक-
श्लोकान् वर्णपदक्रमोज्ज्वलतरान् रम्यानकार्षीत्प्रभुः ॥

Colophon :

अ(योध्याकाण्डः समा)प्तः ॥

End :

जानीषे न हि देवि राघववचो नेदं तु मायाकृतं
तस्याखण्डितविक्रमस्य न भयं देवीति मद्भाषितम् ।
श्रुत्वा दुःश्रवमाह मां जनकजा वाच्यं न तच्चाग्रतो
देवस्याथ मया कृताथ धनुषो रेखा ततोऽस्म्यागतः ॥

Foll. 33 and 34a contain a few passages relating to astrology. Fol. 34b is blank.

(*d*) रतिरहस्यम्.

RATIRAHASYAM.

Foll 35*a*—70*a*.

Same work as the one described under No. 3895 of the D.C.S. MSS., Vol. VIII.

Similar to the work described under R. No. 639(*b*) *ante*. According to Śaṭyāyana.

Contains the ninth Khaṇḍa complete and the tenth incomplete.

(e) गृह्यकर्मक्लृप्तिः.

GṚHYAKARMAKḶPTIḤ.

Foll. 41*a*—68*b*.

An exposition of the religious ceremonies to be performed by a Brahmin of Āpastambasūtra in connection with the sacred fire in his house: by Puruṣōttamabhaṭṭa, son of Dēvarājārya

Incomplete.

Beginning:

यज्ञेश्वरं विभुं देवं यज्ञानां फलदायिनम् ।
श्रीभूमिनीलासहितं नौमि सर्वार्थसिद्धये ॥
पुरुषोत्तमभट्टेन देवराजार्यसूनुना ।
गृह्योक्तकर्मणां क्लृप्तिः सुस्पष्टं क्रियतेऽधुना ॥

अथ परिभ . . . . गृह्योक्तानां कर्मणामुदगयनपूर्वपक्ष. पुण्याहेषु प्रागावर्तनादह्नः कालोऽनादेश आदिष्टकालविशेषाणां सोऽप्यन्ती-होमजातकर्मादीनामाश्वयुज्यादीनां चादिष्ट एव कालो विज्ञेयः ।

End:

पुनः परिषिच्य, माणवकं स्नानकर्मणा संस्करिष्यामि तदङ्गमभ्युदयं पुण्याहं च कृत्वा आप्लवने पुरस्तादाचार्य इति ध्येयम् ॥

Foll. 69*a*, 70 and 71 contain दर्शपूर्णमासस्थालीपाकाकरणप्रायश्चित्तप्रयोग.

Fol. 60*b* is left blank.

R. No. **744.**

Śrītāla $7\frac{3}{8} \times 2\frac{1}{4}$ inches. Foll. 97. Lines, 20 to a page. Grantha Slightly injured.

Presented in 1912-.3 through Śēṣaśāyi Ayyaṅgār of Kottaiyur.

(*a*) विष्णुसहस्रनामावलिः.

VIṢṆUSAHASRANĀMĀVALIḤ.

Foll. 1*a*—5*b*.

Gives the one thousand names of Viṣṇu contained in the Viṣṇusahasranāmastōtra described under R. No. 160 (*j*) *ante* for the purpose of being used in Pūjā.

Complete.

Beginning:

ओं विश्वाय नमः। ओं विष्णवे नमः। ओं वषट्काराय नमः। ओं भूतभव्यभवत्प्रभवे नमः।

End:

ओं रथाङ्गपाणये नमः। ओं अक्षोभ्याय नमः। ओं सर्वप्रहरणायुधाय नमः ॥

(*b*) लक्ष्म्यष्टोत्तरशतनामावलिः.

LAKṢMYAṢṬŌTTARAŚATANĀMĀVALIḤ.

Foll. 5*b*—6*b*.

One hundred complete sentences containing one hundred names of the goddess Lakṣmī arranged for the purpose of being used in Pūjā.

Complete.

Beginning:

ओं प्रकृत्यै नमः । ओं विकृत्यै नमः । ओं सर्वभूतहितायै नमः ओं ईश्वर्यै नमः ।

End:

ओं महाविद्यायै नमः । ओं भुवनेश्वर्यै नमः । ओं श्रीरङ्गनायक्यै नमः ॥

Colophon:

लक्ष्म्यष्टोत्तरशतनाम संपूर्णम् ॥

(c) वैश्वदेवप्रयोगः.

VAIŚVADĒVAPRAYŌGAḤ.

Fol. 7.

Similar to the work described under No. 3793 of the D.C.S. MSS., Vol. VII.

Complete.

Fol. 8 contains a few lines regarding आधारशक्तितर्पण.

(d) सामवेदब्राह्मणम्.

SĀMAVĒDABRĀHMAṆAM.

Foll. 9*a*—59*b* and 69*a*—77*b*.

Same work as the one described under No. 58 of the D.C.S. MSS., Vol. I, Part II.

Contains up to संहितोपनिषद्ब्राह्मण with मन्त्रखण्ड.

Foll. 60—66*a* contains द्राह्यायणापरसूत्र complete. Fol. 66*b* is left blank. Foll. 67 and 68 contain a few lines from द्राह्यायणपूर्वप्रयोग; foll. 78—85 contain सामोपाकर्मप्रयोग complete. Foll. 86—97 contain खादिरगृह्यसूत्र in complete.

R. No. 745.

Palm-leaf. 17¾ × 1⅛ inches. Foll. 79. Lines, 10 in a page. Grantha. Slightly injured.

Presented in 1912–13 through Śēsaśāyi Ayyaṅgār of Kottaiyur.

(*a*) शान्तिकल्पः.

ŚĀNTIKALPAḤ.

Similar to the work described under R. No. 437 *ante*.

Deals with the following subjects :—

Foll		Foll	
1	कुहूशान्तिः.	47*a*—48*b*	शूलहरशान्तिः.
2*a*—3*a*	सर्वारिष्टशान्तिः.	49*a*—52*b*	यक्ष्मरोगशान्तिः.
3	मृत्युञ्जयकल्पः.	52*b*—55*b*	शूलरोगहरशान्तिः.
3*b*—5*a*	ग्रहणशान्तिः.	55*b*—56*a*	मूलरोगशान्तिः.
5*b*—6*b*	धनिष्ठादिशान्तिः.	56*a*—65*a*	ज्वरहरशान्तिः.
7*a*—9*b*	शूलहरशान्तिः.	65*b*	is left blank.
10*a*—11*b*	ज्वरहरशान्तिः.	66	दारिद्र्यहरशान्तिः.
12*a*—14*b*	वास्तुहोमः.	67*a*—68*b*	ग्रहादिशान्तिः.
28*a*—33*b*	आयुष्यहोमप्रयोगः.	69*a*—71*b*	पुष्पवनितात्वहरशान्तिः.
38*a*—46*a*	कूश्माण्डहोमः.		
46*b*	is left blank.	77*a*—79*b*	कामिलारोगशान्तिः.

(*b*) पिण्डपितृयज्ञकल्पः.

PIṆḌAPITṚYAJÑAKALPAḤ.

Foll. 15*a*—16*b*.

Similar to the work described under No. 1111 of the D.C.S. MSS., Vol. II.

Complete.

(*c*) ब्रह्मकूर्चपञ्चगव्यविधिः.

BRAHMAKŪRCAPAÑCAGAVYAVIDHIḤ.

Foll. 17*a*—18*b*.

Similar to the work described under No. 3744 of the D.C.S. MSS., Vol. VII. By Śūlapāṇi.

Complete.

(*d*) त्यागविधिः.

TYĀGAVIDHIḤ.

Foll. 19*a*—22*a*.

Similar to the work described under No. 3057 of the D.C.S. MSS., Vol. VI.

Complete.

Beginning:

गौतमः - त्यजेत्पितरं राजघातकं शूद्रयाजकं शूद्रार्थयाजकं वेद-विप्लावकं भ्रूणहनं यश्चान्तावसायिभिः सह संवसेत् ।

End:

एकस्मिन् दिवसे कृत्वा नारायणबलिं ततः ।
परेऽहनि विदध्याच्च त्याग एष विधीयते ॥

Colophon:

इति शूलपाण्युक्तत्यागविधिः ॥

(*e*) वैश्वदेवप्रयोगः.

VAIŚVADĒVAPRAYŌGAḤ.

Foll. 22*a*—27*b*.

Similar to the work described under No. 3799 of the D.C.S MSS., Vol. VII. According to Sāmavēdins.

Complete.

(*f*) सन्तानयागविधिः.

SANTĀNAYĀGAVIDHIḤ.

Foll. 34*a*—37*b*.

Similar to the work described under R. No. 285(*e*) *ante*.

Incomplete.

Beginning:

अथ सन्तानसंसि(द्धौ)समाकुलितचेतसाम् । वत्सरत्रयादर्वाक् पुत्रो जायते देवशक्त्या इत्यन्तैः ग्रन्थैरुक्तमखिलमर्थः ग्रन्थबाहुल्यभयात् केवलमर्थत एव वक्ष्यते—देवर्षिपित्रतिथिपूजादानादिरतदोषेऽपशदपुत्रता-प्रसक्तौ सत्यां तत्परिहारार्थं वक्ष्यमाणेन विधिना प्रतिदर्शं संवत्सरत्रयं दैविकपैतृकविषयं यागब्राह्मणभोजनवृद्धि[क्षय]युतं कुर्यात् ।

End:

शुभं गमिष्ठौ सुयमेभिरश्वैः । ययोर्वां देवौ देवेष्वनिशितमोजस्तौ नो मुञ्चतमागसः ।

(*y*) अपामार्जनविधिः.

APĀMĀRJANAVIDHIḤ.

Foll. 72*a*—76*b*.

On the performance of certain pacificatory rites by touching all the limbs of an ailing person with the ends of Kuśa grass for the purpose of removing his ailments and trobles due to poisons or caused by evil spirits.

Complete.

Beginning:

भगवन् प्राणिनः सर्वे विषरोगाद्युपद्रवैः ।
दुष्टग्रहोपघातैश्च सार्वकालमुपद्रुताः ॥

* * * *

गृहीत्वा तु समूलाग्रान् कुशान् शुद्धानुपस्पृशन् ।
मार्जयेत् सर्वगात्राणि कुशाग्रैर्दालभ्य शान्तिकृत् ॥

End:

अपामार्जनकं शस्तं विष्णोर्नामाभिमन्त्रितः ।
एते कुशा विष्णुशरीरभावा जनार्दनोऽहं स्वयमेव चाग्रतः ।
हतं मया दुष्टमशेषमस्य स्वस्थो भय(व)त्येष यथा वचो हरेः ॥

* * * *

विष्णुभक्तेन कर्तव्यमापामर्जनकं परम् ।
अनेन सर्वदुःखानि प्रशमं यान्त्यसंशयः ॥
सर्वभूतहितार्थाय कुर्यात्तस्मात्सदैव हि ।
कुर्यात्तस्मात्सदैव ओं नम इति ॥

R. No. 746.

Palm-leaf. $14\frac{3}{8} \times 1\frac{1}{8}$ inches. Foll. 36. Lines, 7 in a page. Grantha. Injured.

Presented in 1912-13 through Śēṣaśāyi Ayyaṅgār of Kottaiyur.

(*a*) नारायणबलिप्रयोगः.

NĀRĀYAṆABALIPRAYŌGAḤ.

Foll. 1*a*—9*b*. Fol. 6*a* is left blank.

Similar to the work described under No. 3655 of the D.C.S. MSS., Vol. VII.

Incomplete.

(*b*) उदकशान्तिविधिः.

UDAKAŚĀNTIVIDHIḤ.

Fol. 10.

Similar to the work described under No. 3253 of the D.C.S. MSS., Vol. VI.

Complete.

(*c*) षष्ट्यब्दपूर्तिशान्तिः.

ṢAṢṬYABDAPŪRTIŚĀNTIḤ.

Foll. 10*b*—12*a*.

Same work as the one described under No. 3450 of the D.C.S. MSS., Vol. VII; but according to Sāmavēdins.

Complete.

(*d*) पुत्रस्वीकारविधिः.

PUTRASVĪKĀRAVIDHIḤ.

Foll. 12*b*—13*b*.

Similar to the work described under No. 3184 of the D.C.S. MSS., Vol. VI; but according to Drāhyāyaṇa.

Complete.

(e) अरिष्टशान्तिः.
ARIṢṬAŚĀNTIḤ.

Foll. 13*b*—14*a*.

Similar to the work described under No. 3461 of the D.C.S. MSS., Vol. VII.

Complete.

(*f*) नालवेष्टनशान्तिः.
NĀLAVĒṢṬANAŚĀNTIḤ.

Foll. 14*b*—15*a*.

Similar to the work described under No. 3356 of the D.C.S. MSS., Vol. VI.

Complete.

(*g*) गौलीपतनशान्तिः.
GAULĪPATANAŚĀNTIḤ.

Foll. 15*a*—19*a*.

Similar to the work described under No. 3295 of the D.C.S. MSS., Vol. VI.

Complete.

(*h*) मृत्तिकास्नानविधिः.
MṚTTIKĀSNĀNAVIDHIḤ.

Foll. 19*a*—21*a*.

Similar to the work described under No. 3758 of the D.C.S. MSS., Vol. VII.

Complete.

(*i*) कूश्माण्डहोमः.
KŪŚMĀṆḌAHŌMAḤ.

Foll. 21*a*—22*a*. Fol. 22*b* is left blank.

Similar to the work described under No. 3596 of the D.C.S. MSS., Vol. VII; but according to Drāhyāyaṇa.

Complete.

(*j*) वामनकारिका.

VĀMANAKĀRIKĀ.

Foll. 23*a*—34*b*.

Same work as the one described under No. 3784 of the D.C.S. MSS., Vol. VII.

Incomplete.

(*k*) वास्तुहोमप्रयोगः.

VĀSTUHŌMAPRAYŌGAḤ.

Foll. 35*a*—36*b*.

Similar to the work described under No. 3420 of the D.C.S. MSS., Vol. VI.

Incomplete.

R. No. **747.**

Palm-leaf. 7 × 1½ inches. Foll. 68. Lines, 12 in a page. Grantha. Slightly injured.

Presented in 1912-13 through Śēṣaśāyi Ayyaṅgār of Kottaiyur.

(*a*) अष्टाक्षरमन्त्रः.

AṢṬĀKṢARAMANTRAḤ.

Fol. 1.

Same work as the one described under No. 5917 of the D.C.S. MSS., Vol. XII.

Complete.

(*b*) शरणागतिमन्त्रः.

ŚARAṆĀGATIMANTRAḤ.

Fol. 2*a*. Foll. 2*b* and 3 contain Caramaślōkamantra, Dvādaśākṣara and Ṣaḍakṣara.

Similar to the work described under No. 7318 of the D.C.S. MSS., Vol. XIV.

Complete.

(c) छान्दोग्योपनिषत्.

CHĀNDŌGYŌPANIṢAD.

Foll. 4*a*—37*a*. The remaining leaves are left blank.

Same work as the one described under No. 451 of the D.C.S. MSS., Vol. I, Part III.

Breaks off in the sixth Adhyāya.

R. No. **748**.

Palm-leaf. 16½ × 1¾ inches. Foll. 63. Lines, 7 in a page. Grantha. Slightly injured.

Presented in 1912-13 through Śēṣaśāyi Ayyaṅgār of Kottaiyur.

(a) उपाकर्मनिर्णयः.

UPĀKARMANIRṆAYAḤ.

Foll. 1*a*—22*b*.

Similar to the work described under No. 3100 of the D.C.S. MSS., Vol. VI. According to Sāmavēdins.

Complete.

(b) यतिसंस्काराविधिः.

YATISAṀSKĀRAVIDHIḤ.

Foll. 23*a*—32*b*.

Similar to the work described under No 3765 of the D.C.S. MSS., Vol. VII.

Incomplete.

Fol. 33 contains श्रीचूर्णपरिपालनप्रयोगः.

(c) यतिसंस्कारविषयः.

YATISAṀSKĀRAVIṢAYAḤ.

Foll. 34a—36b.

Similar to the work described under No. 3764 of the D.C.S. MSS., Vol. VII.

Incomplete.

(d) आतुरसंन्यासविधिः.

ĀTURASANNYĀSAVIDHIḤ.

Foll. 36b—37b.

Similar to the work described under No. 3542 of the D.C.S. MSS., Vol. VII.

Complete.

(e) यतिसंस्कारविधिः.

YATISAṀSKĀRAVIDHIḤ.

Foll. 38a—45b.

Similar to the work described under No. 3765 of the D.C.S. MSS., Vol. VII.

Incomplete.

Fol. 46 contains a few verses relating to सामोपाकर्मप्रयोग.

(f) यज्ञोपवीतप्रतिष्ठा.

YAJÑOPAVĪTAPRATIṢṬHĀ.

Foll. 47a—48b.

Same work as the one described under No. 2850 of the D.C.S. MSS., Vol. V.

Complete.

Foll. 49 and 50 contain a few lines on सामोपाकर्म and [illegible].

(*g*) अपरप्रयोगविषयः.

APARAPRAYŌGAVIṢAYAḤ.

Foll. 51*a*—60*b*.

Similar to the work described under No. 3047 of the D.C.S. MSS., Vol. VI.

Incomplete.

(*h*) विधुराग्निसंधानादिविषयः.

VIDHURĀGNISANDHĀNĀDIVIṢAYAḤ.

Foll. 61*a*—63*b*.

A dissertation in support of the view that the ceremony of Agnisandhāna should not be performed by a widower.

Incomplete.

Beginning:

अयज्ञो वा एषः । योऽपत्नीकः । पाणिग्रहणादधि गृहमेधिनो व्रतम् इति पञ्च क्लृप्ता महायज्ञाः ।

* * * *

पतिपुत्रविहीना या विधवा सा प्रकीर्तिता ।
पत्नीपुत्रविहीनो यो विधुरः स प्रकीर्तितः ॥

इत्यापस्तम्बः ।

* * * *

अपत्नीकस्य नात्राधिकारः ।

प्रातर्होमं तु निर्वर्त्य समुद्धृत्य हुताशनात् ।
शेषं महानसे कृत्वा तत्र पाकं समाचरेत् ॥

End:

गृहस्थो वैश्वदेवाख्यं कर्म प्रारभते दिवा ।
अन्नस्य चात्मनश्चैव संस्कारार्थं तदिष्यते ॥

R. No. 749.

Palm-leaf. 14½ × 1¼ inches. Foll. 101. Lines, 7 in a page. Grantha. Injured.

Purchased in 1912–13 from Appā Śēṣācāriyar of Kalyāṇapuram.

प्रमाणसंग्रहः.

PRAMĀṆASAṄGRAHAḤ.

Similar to the work described under No. 5316 of the D.C.S. MSS., Vol. XI. The subjects dealt with in the work are indicated in the extracts from the beginning given below.

Incomplete; breaks off in the Ūrdhvapuṇḍrādidhāraṇa

Beginning:

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

. . . परतत्त्व . . सर्वस्मात्परत्वं ब्रह्मणः स्मृतम् ।
तेनान्यसमबुद्धेश्च दोषहेतुत्वमुच्यते ॥

विष्णोः स्वरूपमाहात्म्याद्यज्ज्ञानं च ततः परम् ।
ब्रह्मादीनां च . . . . . स्य सहायता ॥

तेषां च कर्मवश्यत्वं तेषामैश्वर्यकारणम् ।
विष्णोराराधनायत्तं तेषामापन्निवारणम् ॥

तेषामप्यनुपास्यत्वं संशयच्छेदपूर्वकम् ।
इच्छैव हेतुरुत्पत्तेर्नान्यथात्वं हरेस्तथा ॥

तस्मात्तस्यैव विष्णोश्च संहर्तृत्वमथोच्यते ।
कर्मवश्यत्वराहित्यं जगत्सृष्ट्यादिकारणम् ॥

ब्रह्मरुद्रादिसृष्टादेर्विष्ण्वधिष्ठितकारणम् ।
विष्णोरेवाप्युपास्यत्वं स्वाराध्यत्वं ततः परम् ॥

मोक्षप्रदत्वं सकलफलदत्वं तथा हरेः ।
कल्याणगुणयुक्तत्वं विशिष्टत्वं विलक्षणैः ॥
विग्रहैः संयुतत्वं च पत्रादिपरिचारकैः ।
तस्यैवाप्राकृतस्थानं परमं पदमप्यधः ॥
विष्ण्वाश्रयाणामखिले . . . . ष्टप्राप्तृत्वमुच्यते ।
तथानिष्टनिवृत्तिं च परेषां हीनतामपि ॥
माहात्म्यं च हरेर्नाम्नः कथायाः स्मरणादिकम् ।
चक्रादिधारणं चैव ऊर्ध्वपुण्ड्रादिधारणम् ॥
विष्णोराराधनं चैव तन्निवेदितभोजनम् ।
विष्णुपादाम्बुमाहात्म्यं यज्ञादीनां च कर्मणाम् ॥
तदाराधनरूपं च तद्भक्तेरपि वैभवम् ।
अभ्युक्षणादिमाहात्म्यं तथा तद्गेहमार्जनम् ॥
माहात्म्यमपि दीपस्य कौतुकायतने तथा ।
जीर्णोद्धारणमाहात्म्यं तद्दानस्य फलं तथा ॥
प्रणामलक्षणं चैव प्रादक्षिण्यफलं तथा ।
विष्णोर्जगच्छरीरत्वं शास्त्रप्रामाण्यमप्यथ ॥
तथैवादिपुराणानामप्रमाणत्वमुच्यते ।
कर्मणो दुर्लभत्वं च भौतिकानां न नित्यता ॥
फलं दाने च दोषश्च दत्तापहरणे तथा ।
तटाकस्य फलं चैव व्रजसंस्थापनस्य च ॥
अहिंसाथ दया सत्यमात्मनश्च गुणास्तथा ।
* * * *
एवमादीनि संगृह्य पुराणादिषु चोच्यते ॥

End:

ब्रह्मचारी गृहस्थो वा वानप्रस्थोऽथवा यतिः ।
अवश्यं धारयेत्पुण्यमूर्ध्वपुण्ड्रं सुशोभनम् ॥

पारमेष्ठ्यसंहितायाम्—

. . . . . पितृदेवार्चनादिषु ।
शिखोपवीतवद्धार्यमूर्ध्वपुण्ड्रं द्विजन्मनाम् ॥

Fol. 101 is blank.

R. No. 750.

Paper. 11⅝ × 9⅛ inches. Foll. 98. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1912–13 from a MS. of Vaḍakkuttirumāḷikai in Āḷvārtirunagari.

Foll. 4*b*, 66, 67*a*, 94*b*, 96 to 98 are left blank.

तर्कसंग्रहदीपिकाव्याख्यानम्.

TARKASAṄGRAHADĪPIKĀVYĀKHYĀNAM.

A commentary on the Tarkasaṅgrahadīpikā of Annambhaṭṭa described under No. 4154 of the D.C.S. MSS., Vol. VIII: by Śaṭhakōpa, younger brother of Rāmānuja, who was a disciple of Vēṅkaṭārya.

Contains the Pratyakṣa Khaṇḍa incomplete.

Beginning:

तुषाराद्रिसमच्छायं तुलसीदामशेखरम् ।
तुरङ्गमुखं वन्दे तुङ्गसारस्वतप्रदम् ॥

* * * *

नानालोकमुखाब्जमित्रवदनं वन्दे सदा सुन्दरं
वाचा भञ्जितवादिवारणगणं मन्दस्मितं भासितम् ।
अम्भोजायतलोचनैरभिमुखैरादर्शितस्वोदयं
संघातैरपि वन्दितं सुमनसां रामानुजार्यं मुनिम् ॥

श्रीवेङ्कटार्यपदपङ्कजभृङ्गराजं श्रीमद्यतीन्द्रगुरुवर्यमतातिधुर्यम् ।
श्रीकारिसूनुकरुणामृतपात्रभूतं रामानुजाख्यमथ नौमि ममाग्रजातम् ॥

तैलाद्रक्ष जलाद्रक्ष रक्ष मां परहस्ततः ।
शठकोपेन धीरेण किरीटस्थमणेः समा ।
अन्नम्भट्टीयटीकायाष्टीकेदाना विरच्यते ॥

प्रारिप्सितग्रन्थपरिसमाप्तिप्रतिबन्धकदुरितरूपविघ्नविघातकं परमेश्वरनत्यादिकं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नाति—विश्वेश्वरमिति । विश्वेश्वरं जगत्कर्तारं साम्बमूर्तिमम्बया लक्ष्म्या सहिता मूर्तिर्यस्य सः साम्बमूर्तिः नारायणः तम् ।

End:

एतेनैव धूमबाष्पयोरस्पार्शनत्वेऽपि चाक्षुषत्वम्, अन्यथा तद्गतसंयोगादीनामप्रत्यक्षता.

R. No. **751.**

Paper. 13⅔ × 9⅓ inches. Foll. 120. Lines, 9—16 in a page. Dēvanāgarī. Good.

Transcribed in 1912-13 from a MS. of Tātācāriyar of Kumbakonam.

परिभाषाप्रदीपार्चिः.

PARIBHĀṢĀPRADĪPĀRCIḤ.

Explains the Paribhāṣās relating to the grammatical Sūtras of Pāṇini, described under No. 1458 of the D.C.S. MSS., Vol. III. By Nānāpāṭhaka *alias* Udayaṅkara, who states that he wrote the Mitavṛttyarthasaṅgraha which is a commentary on Pāṇinisūtras.

Contains the first Adhyāya complete.

Beginning:

अमन्दहृदयानन्दनिदानं शिवयोश्चिरम् ।
नमस्कुरुत हेरम्बं निष्प्रत्यूहफलाप्तये ॥
वल्लकीपुस्तककरां पुण्डरीकासनस्थिताम् ।
शारदां नी(क्षी)रकुन्देन्दुधवलां भावयेतराम् ॥
कृत्वा पाणिनिसूत्राणां मितवृत्त्यर्थसंग्रहम् ।
परिभाषाप्रदीपार्चिस्तत्रोपायो निरूप्यते ॥

तत्र तावत्परिभाषात्वं नाम लिङ्गवत्त्वे सति संदिग्धार्थनियामकत्वम् ।

End:

अत एव लेखग्रहणेन ज्ञापकेन भाष्ये पृथगेव साधितः सः । अपञ्चम्या इति निषेधस्य तु रदाभ्यामित्यादावेव प्रयोजनमिति दिक् ॥

परिभाषाप्रदीपार्चिष्युदयंकरदर्शिते ।
प्रथमो व्याकृतोऽध्यायः संगतः संगतः सताम् ॥
न तुष्यन्ति मितोक्तचैके परे मूढा बहूक्तिषु ।
करवाणि ततो वाणि सकलावर्जनेऽञ्जलिम् ॥

Colophon:

इति नानापाठकीयपरिभाषाप्रदीपार्चिषि प्रथमोऽध्यायः ॥

R. No. 752.

Paper. 11¼ × 9½ inches. Foll. 26. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1912–13 from a MS. of Vaḍakkuttirumāḷikai in Āḷvārtirunagari.

Foll. 1*a* and 2*a* give the name of the work and of its author:

शृङ्गारकोशभाणः—अभिनवकालिदासकृतः.

Foll. 1*b*, 2*b*, 25*b* and 26 are left blank.

शृङ्गारकोशभाणः.

ŚṚṄGĀRAKŌŚABHĀṆAḤ.

Foll. 3*a*—24*b*.

A kind of drama, known technically as Bhāṇa, dealing with the love of Śṛṅgāraśēkhara to Anaṅgalēkhā: by Abhinavakālidāsa of Kāśyapagōtra, whose family deity was Ēkāmranātha worshipped at Conjeevaram.

Complete.

Beginning:

यमालोक्य स्वस्मिन्मणिमुकुरहासिस्तनतटे
स्फुरद्भ्रूकाकारं कररुहपदाशङ्किहृदया ।
सलज्जा हस्ताभ्यां स्थगयति नवोढा मुहुरुमा
स बालेन्दुः का(क्ला)न्ति हरमकुटवासी हरतु वः ॥

अपि च—

पिबति निबिडं कान्ते बिम्बाधरं रतिलोलुपे
स्फुरितकपटक्रोधं भ्रूवल्लिनर्तनलीलया ।
मसृणमुकुलापाङ्गं मा मेति वादमनोहरं
मुखमवतु वो मुग्धाक्षीणामभङ्गुरसीत्कृतम् ॥

नान्द्यन्ते सूत्रधारः—

* * * *

अस्ति खलु काश्यपगोत्रतिलकभूतः कश्चिदभिनवकालिदासनामा कविः ।

यस्यामनन्ति कुलदैवतमिन्दुमौलिमेकाग्रमौलिनिलयं पतिमम्बिकायाः ।
यस्याग्रजं च कविताकृतपट्टबन्धं साहित्यभूषणमसोढमिदं कवीनाम् ॥

तस्य कृतिं शृङ्गारभूषणं नाम भाणं प्रयोगतो दर्शयन् आर्यमिश्रानुपस्थास्ये ।

End:

तथापीदमस्तु भरतवाक्यम्—

अतिरतिरसाधीनं भूयादनङ्गवशं परं
हृदयमसकृच्छृङ्गाद्वैत(तं वि)शृङ्खलितं नृणाम् ।
शशधरकलाचूडं श्यामारुणं करुणामयं
शमयतु पुनर्जन्मक्लेशं ममापि परं महः ॥

Colophon:

इत्यभिनवकालिदासशृङ्गारकोशं नाम भाणः संपूर्णः ॥

Foll. 24*b* and 25*a* contain a few Cāṭuślōkas.

R. No. **753**.

Paper. 11⅜ × 9⅛ inches. Foll. 10. Lines, 20 in a page. Grantha. Good.

Transcribed in 1912–13 from a MS. of Vaḍakkuttirumāḷikai in Āḷvārtirunagari.

(*a*) श्रीरङ्गराजपञ्चाशत्.
ŚRĪRAṄGARĀJAPAÑCĀŚAT.

Foll. 1*a*—6*b*.

A hymn of 50 stanzas in praise of Raṅganātha as worshipped in the sacred shrine at Śrīraṅgam: by Vēṅkaṭavarada of Kauṇḍinyagōtra and a disciple of Śrīnivāsa who was a son of Varadanārāyaṇa also of Kauṇḍinyagōtra. The author praises one Vādhūla Varadārya in the introduction.

Complete.

Beginning:

श्रीमत्कौण्डिन्यवरदनारायणगुरोः सुतम् ।
श्रीनिवासगुरुं वन्दे तदायत्तस्वरूपकम् ॥

* * * *

श्रीरङ्गनामनगरी नगरीतिसाला सालाधिभूरुहयुतातिविशालशाला ।
यस्यां विराजति हि निष्कपटान्नदाता वाधूलमण्डनमणिर्वरदार्यवर्यः ॥

* * * *

श्रीरङ्गेश्वरमाश्रयामि तमहं यस्य प्रियायामहो
चक्रौ चन्द्रधृतिं शशी घनधृतिं सोऽप्यद्रिकूटोद्धृतिम् ।
पद्मौ तारततीश्च ता नवसुधाः पर्यन्तसौदामनीः
कुर्वाते कुरुते करोति कुरुतः कुर्वन्त्यलंकुर्वते ॥

End:

विलोक्य कौण्डिन्यकुलावतंसं श्रीश्रीनिवासार्यमिमं गुरुं मे ।
त्वदङ्घ्रिदिव्याम्बुजराजहंसं क्षमस्व मन्तुं मम रङ्गराज ॥

Colophon:

श्रीरङ्गराजपश्वाशज्जीयाल्लोकेषु विश्रुता ।
कौण्डिन्यवेङ्कटवरप्रदेन भणितं सदा ॥

(*b*) यतिराजसप्तश्लोकी.

YATIRĀJASAPTAŚLŌKĪ.

Foll. 6*b*—7*a*.

Seven stanzas in praise of Yatirāja *alias* Rāmānujācārya, the propounder of the Viśiṣṭādvaita view of the Vedānta: by Vēṅkaṭa-varada, the same person as the author of the previous work.

Complete.

Beginning:

यत्पादाम्बुजसंगतेन पयसा यद्भुक्तशेषाशनै·
र्यस्यापाङ्गविलोकनैरनुपदं तीर्थीकृतं जन्म मे ।

किंचासीन्मुखरं मुखं सुकविताशास्त्रैर्मनोहारिभिः
कौण्डिन्यः स च संपदे भवतु मे श्रीश्रीनिवासो गुरुः ॥

विकासयति मे मनःकमलकोशमुद्भिद्य य-
त्समस्तदुरिते महत्यखिललोकरक्षावहे ।
कुबुद्धिरजनीहरे मयि न सिद्धिमेत्यञ्जसा
यतीश्वरदिनेश्वरे निजविलोकनैः का कला ॥

End :

विलोक्य कौण्डिन्यकुला . . यतिराजसूरे ॥

Colophon :

श्रीमद्रामानुजार्यस्य सप्तश्लोकी मया कृता ।
कौण्डिन्यवेङ्कटवरप्रदेन विदुषां मुदे ॥

(c) श्रीनिवाससप्तविभक्तिः.

ŚRĪNIVĀSASAPTAVIBHAKTIḤ.

Foll. 7*b*—8*b*.

Seven stanzas, apparently by Vēṅkaṭavarada, in praise of his preceptor Śrīnivāsa, of Kauṇḍinyagōtra, who lived in Śrīmuṣṇa. The nameof the Guru occurs in the stanzas in the seven different declensional cases in order.

Complete.

Beginning :

श्रीमानसौ जयति देशिकसार्वभौमः श्रीभूवराहकमलाकरुणैकपात्रम् ।
श्रीमुष्णमण्डनमणिः श्रितपारिजातः श्रीश्रीनिवासगुरुरद्भुतदिव्यचर्यः॥

End :

कौण्डिन्यवंशकलशाम्बुधिपूर्णचन्द्र श्रीश्रीनिवासविबुधार्य महानुभाव ।
आप्ताखिलागसमनाथमकिंचनं मां त्वात्किंकरं जनमिमं सततं कुरुष्व ॥

Colophon :

इति कौण्डिन्यश्रीनिवाससप्तविभक्तिः समाप्ता ॥

(*d*) सुदर्शनसप्तविभक्तिः.

SUDARŚANASAPTAVIBHAKTIḤ.

Foll. 8*b*—9*b*.

Seven stanzas by the same author as that of the abovei in praise of Sudarśana, or Viṣṇu's discus. The word Sudarśana occurs in the stanzas in the seven declensional cases in order.

Complete.

Beginning:

श्रीमत्कौण्डिन्यवरदनारायणगुरोः सुतम् ।
श्रीनिवासगुरुं वन्दे तदायत्तस्वरूपकम् ॥
षट्कोणवर्तिने तुभ्यं सहस्राराय संततम् ।
पश्चान्नृसिंहरूपाय चक्रेशायास्तु मङ्गलम् ॥

End:

विलोक्य कौण्डिन्य . . क्षमस्व मन्तुं मम चक्रराज ॥

Colophon:

इति सुदर्शनसप्तविभक्तिः समाप्ता ॥

Fol. 10 is left blank.

R. No. **754**.

Paper. 11⅜ × 9⅛ inches. Foll. 100. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1912–13 from a MS. of Raṅganāthācāriyar of Tiruvadi.

तत्त्वप्रकाशिकाटीका—तत्त्वसुबोधिनी.

TATTVAPRAKĀŚIKĀṬĪKĀ: TATTVASUBŌDHINĪ.

A commentary on the Tattvaprakāśikā of Ānanda tīrtha described under No. 1782 of the D.C.S MSS., Vol. X: by Śrīnivāsa, son of Ānandācārya, a disciple of Raghūttamatīrtha.

Adhyāyas 2 to 4 complete.

Beginning:

उक्तः समन्वयः साक्षादित्यनुव्याख्यानानुसारेण उक्तार्थे इति भाष्याभिप्रायमाह — अशेषशास्त्रप्रामाण्येनेति । अत्र जगज्जन्मादिकर्तृत्वादिविष्णुधर्मस्य स्मृत्यनवकाश इत्यादौ साक्षात् न विलक्षणत्वादित्यादौ तु वेदप्रामाण्याक्षेपमुखेन मुक्त्यादिविरोधपरिहारस्य क्रियमाणत्वादेवमुक्तम् ।

End:

उत्पत्तेः स्थितिं प्रति उपजीव्यत्वेनाभ्यर्हितत्वात् अभ्यर्हितं पूर्वमिति विशेषशास्त्रेणैव उत्पत्तिशब्दस्य प्राक्प्रयोगोपपत्तिरिति अशेषमति मङ्गलम् ॥

इति अनावृत्त्यधिकरणम् ॥

नरसिंहपदद्वन्द्वं संप्रणम्य गुरूनपि ।
तत्प्रसादबलेनैव भावोऽयं वर्णितो मया ॥
तेन प्रसन्नो भवतु भक्ताभीष्टप्रदो हरिः ।
अवद्यगन्धविधुरः पूर्णो निजगुणादिभिः ॥
आनन्दाचार्यपितृतः श्रुत्वा तत्त्वप्रकाशिकाम् ।
श्रीनिवासोऽकरोट्टीकां हरितत्त्वसुबोधिनीम् ॥

Colophon:

इति श्रीमद्रघूत्तमतीर्थपूज्यपादशिष्यानन्दाचार्यसुतश्रीनिवासकृततत्त्वसुबोधिन्यां चतुर्थाध्यायस्य चतुर्थः पादः ॥

R. No. **755.**

Paper. 11⅔ × 9¼ inches. Foll. 76. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1912–13 from a MS. belonging to Paṇḍit S. P. V. Raṅganāthasvāmi, proprietor of the Arsha Press in Vizagapatam.

धातुप्रदीपः.

DHĀTUPRADĪPAḤ.

Foll. 1*a*—75*b*.

A treatise explaining, according to Pāṇinisūtras, the conjugation of verbal roots and the formation and declension of verbal derivatives. The author is Maitrēyarakṣita, who has also written Tantrapradīpa, which is a commentary on the Kāśikāvṛttipañcikā of Jainēndra. He is a disciple of Mañjughōṣa and follows in his work the Dhātupāṭha of Bhīmasēna. He refers to Kālāpa and Cāndra grammars.

Complete.

Beginning:

मञ्जुघोषप्रसादेन धातूनां वृत्तिमारभे ।
बहुशोऽमून्यथा भीमः प्रोक्तवांस्तद्वदागमात् ॥

अप्रयुक्तत्वात्सत्तालक्षणस्यार्थस्य सर्वपदार्थव्यापकत्वेन प्राधान्यात् धातुसंज्ञायां भवतेरनुवादेन च भूप्रभृतिशब्दसन्तानवाचकस्य भूवादिशब्दस्य निपातनात् साधुत्वार्थमजन्तवदुन्नेतुं व्यापिभवतिमेव प्रथमं निर्दिशति—भू सत्तायाम् । सतो भावः सत्ता तत्परं सामान्यमपि भवत्यादिपदैः सत्ता साध्यस्वभावतयोच्यत इति ।

End:

पच्छभाण्डचीवराण्णिङिति न वक्तव्यमित्यर्थः । सिद्धशब्दोऽयं मङ्गलार्थः । आदौ च वृद्धिशब्दः । मध्ये च टु ओ श्वि गतिवृद्ध्योरिति वृद्धिशब्द एव । एवं त्रिमङ्गलमिदं शास्त्रं समाप्तमिति ॥

वृत्तिन्यासं समुद्दिश्य कृतवान् ग्रन्थविस्तरम् ।
नाम्ना तन्त्रप्रदीपं यो विवृतास्तेन धातवः ॥
आकृष्य भाष्यजलधेरथ धातुनाम-
पारायणाक्षपणपाणिनिशास्त्रवेदी ।
कालापचान्द्रमततत्त्वविभागदक्षो
धातुप्रदीपमकरोज्जगतो हिताय ॥

* * * *

Colophon:

इति श्रीमैत्रेयरक्षितकृतौ धातुप्रदीपे (चुरादिवृत्तिः) ॥
धातुप्रदीप एव(श्च) परिसमाप्तश्चाय(श्शुभम्) ॥

The name of the former owner of the manuscript and the date of transcription :

लिखितमिदं श्रीरघुनन्दनशर्मणः पुस्तकमिदं केनचित् शकाब्दाः १४९० विभवीय १६ आषाढस्य ॥

Fol. 76*a* contains a few Cāṭuślōkas. Fol. 76*b* is left blank.

R. No. **756.**

Paper. 11⅜ × 9½ inches. Foll. 298. Lines, 20 in a page. Grantha. Good.

Transcribed in 1912–13 from a MS. of Vaḍakkuttirumāḷikai in Āḷvārtirunagari.

आत्मतत्त्वपरीक्षा.

ĀTMATATTVAPARĪKṢĀ.

Foll. 1*a*–297*a*. The rest are blank.

An original work on Advaitavēdānta : by Bhāskaradīkṣita, son of Umāmahēśvara of the Chōla country. He says that he follows Upavana.

The headings of the Prakaraṇas are—

१. अहमर्थपरीक्षा.	५. साक्षिपरीक्षा.
२. मनोधर्मत्वपरीक्षा.	६. भ्रान्तिपरीक्षा.
३. Not given.	७. अज्ञानपरीक्षा.
४. मिथ्यात्वपरीक्षा.	८. अखण्डार्थपरीक्षा.

Breaks off in the 8th Prakaraṇa.

Beginning :

. . . . . रक्षा सेव्यतां बुधैः ।
यतः सैषा सुविणि(हि)ता मदन्तर्यामिशम्भुना ॥

इह खल्वधीतसाङ्गवेदान्तनिकुरुम्बस्यापातप्रतिपन्नात्मानन्दैकरसब्रह्मस्वरूपस्य पूर्वजन्मसमुपार्जितपुण्यपुञ्जपरिपाकवशेन

* * * *

अथातो धर्म(ब्रह्म) जिज्ञासेति सूत्रोपक्रमम् अनावृत्तिः शब्दादिति सूत्रावसानं ब्रह्ममीमांसाशास्त्रं प्रणिनाय । तत्र स्वकर्तव्यविचारशास्त्रारम्भोपयोगिविषय

प्रयोजनप्रतिपादनपरमिदमादिमं सूत्रम्—अथातो ब्रह्मजिज्ञासा इति । तत्र प्रथमं प्रकरणदशकेन भगवदुपवर्षोपदर्शितन्यायकलापैरद्वैतवाद्युपन्यस्तयोः शास्त्रारम्भोपयोगिविषयप्रयोजनयोरसंभवः प्रदर्श्यते ।

* * * *

Colophon:

इति श्रीमच्चोलदेशाभरणहरितान्वयोमामहेश्वरतनुजभास्करदीक्षित-विरचितायामात्मतत्त्वपरीक्षायामहमर्थपरीक्षा प्रथमं प्रकरणं समाप्तम् ॥

End:

तस्मात् तत्त्वमस्यादिवाक्यमपि नाखण्डार्थनिष्ठमिति सिद्धम् ॥

Colophon:

इति भास्करदीक्षितविरचितायामात्मतत्त्वपरीक्षायामखण्डार्थपरीक्षाख्य-मष्टमं प्रकरणं समाप्तम् ॥

* * * *

स यथा सैन्धवमित्यादिवाक्यं जीवस्य प्रस्तुतब्रह्मविद्यानिमित्तकात्यन्तिकशरीराकारपरिणतभूतेन्द्रियाद्युपाधिप्रलयवर्णनार्थमिति मिथ्यात्वपरीक्षायामुपपादितम् । ततश्च जीवविषये स यथा सैन्धवघन इति वाक्ये अयमात्मेत्ययंशब्दः इदं महद्भूतमितीदंशब्दश्चानन्तरप्रकृतं परमात्मानमुल्लङ्घ्याहं सुखी दुःखीत्यादिप्रत्यक्षसिद्धजीवान.

R. No. 757.

Paper. 11 × 9 inches. Foll. 72. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1912–13 from a MS. of N. Rāmasvāmi Ayyaṅgar of Puliyur.

आह्निकोत्तरपरिच्छेदः.

ĀHNIKŌTTARAPARICCHĒDAḤ.

Foll. 1*a*–70*b*.

Deals with the conduct of the worship of Viṣṇu, giving extracts from various authoritative works on the subject.

Incomplete.

Beginning:

अथेज्योपयुक्तविशेषवचनानि कानिचित्प्रदर्श्य लिख्यन्ते—

भरद्वाजः—

अर्चायामधिकप्रीतिरेकान्ते हरिमर्चयेत् ।
तदभावेऽग्निहृत्सूर्यभूम्यम्बुगगनादिकम् ॥
यस्य गेहेऽन्यदेवार्चासक्तो वा न जनार्दनः ।
तस्यान्नं नैव भोक्तव्यमपि क्रतुसहस्रिणः ॥

* * * *

अथर्वणवेदे—

कृत्रिमं देवं पूजयेत्ससालग्रामस्तस्योदकपानेनापोऽशनं यथा हि सोमपाने तन्निवेदनप्राशनेनापोऽशनं तथा इडाभक्षणे इति ।

End:

लक्ष्मीतन्त्रे तु—

कालाग्न्यर्कसहस्राभां निर्धूमाङ्गारसन्निभाम् ।
गां स्मृत्वा मन्मुखोत्थेन वह्निना निर्दहेद्ध्रुवम् ॥
सोमायुताभवक्त्राब्जजना . . . . . ।

Foll. 71 and 72 are blank.

R. No. **758.**

Paper. 11×9 inches. Foll. 74. Lines, 16 in a page. Grantha. Good.

Transcribed in 1912–13 from a MS. procured by A. M. Śrīnivāsācāriyar of Agaram in the Chingleput district.

(*a*) श्रीगुणरत्नकोशः—सव्याख्यः.

ŚRĪGUṆARATNAKOŚAḤ WITH COMMENTARY.

Foll. 1*a*—48*a*. Fol. 48*b* is blank.

Same work as the one described under R. No. 160(*f*) *ante*, but with the addition of a commentary by Śrībhāṣya Nārāyaṇa guru, a disciple of Veṅkaṭaguru.

Complete.

Beginning :

श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः ।
श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे ॥
लक्ष्मीसद्गुणमाणिक्यकोशव्याख्या विधीयते ।
श्रीभाष्यवंशसंभूतनारायणविपश्चिता ॥

श्रीमान् कूरपयःपारावारसुधाकरश्रीरामानुजमुनीन्द्रकृपालब्धश्रीभाष्यादिप्रबन्धपरिचयमहिमोल्लसितबुद्धिः द्रविडोपनिषद्गभीराशयविवरणचणः श्रीरङ्गराजकमलापदलालितः श्रीरङ्गनाथदिव्याज्ञालब्धपराशरभट्टारकनामधेयः कैशिकपुराणश्रवणसमुदितमहिमोल्लसितभासुररङ्गरमणकरुणासमासितब्रह्मरथवैभवः यतिवरचरणाम्भोरुहप्रवणान्तेवासिजनाग्रेसरकूरेश्वरतनूभवः सकलशास्त्रविद्वदग्रेसरश्रीभट्टारकदेशिकः, जगदुदयविभवलयलीलां, भगवतः स्वरूपनिरुपमनिरूपकभूतां, भगवन्नारायणाभिमतानुरूपस्वरूपरूपगुणविभवां, निखिलचेतनसमुज्जीवनसंजीवनीं, प्राप्यप्रापकभूतां श्रियं तत्कृतमहोपकारातिशयानुसंधानेन दयावात्सल्यादिगुणातिशयपरिशीलनेन च स्तोतुकामः प्रारिप्सितग्रन्थाविघ्नपरिसमाप्त्यर्थं प्रचयगमनार्थं च शिष्टाचारपरिप्राप्तं मङ्गलमाचरन् आदौ तामेव प्रणमति ।

End :

त्वमम्बा पिता सर्वं चानुक्तं भ्रात्रादिकमपि त्वमेव माता पितेत्यादि श्रुत्युक्तमनुसंहितम् । उपायोऽपि त्वमेव । प्राप्यभूतोऽपि त्वमेवेति वा । तत्र त्वमम्बेत्यादिनोपायत्वं त्वमेवेत्यनेनोपेयत्वम् । सर्वं धर्ममपि त्वमेवेति पाठोऽस्ति, तत्रार्थः स्पष्टः । अकस्मात् कृपां स्वीकुरु । उपायोपेयत्वयोस्तव स्वरूपत्वाभिर्हेतुकामेव दयां स्वीकुर्विति सर्वं समञ्जसम् ॥

Colophon :

इति यतिवरचरणाम्बुरुहभृङ्गायमाणश्रीवेङ्कटगुरुकृपालब्धश्रीभाष्यान्वयेन श्रीभाष्यनारायणगुरुणा विरचितेषु श्रीगुणरत्नकोशव्याख्या समाप्ता ॥

(b) श्रीगुणरत्नकोशः -- सव्याख्यः.

ŚRĪGUṆARATNAKOŚAḤ WITH COMMENTARY.

Foll. 49*a*—73*a*. Foll. 73*b* and 74 are blank.
Same as the above, but with a different commentary.
Complete.

:

श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः ।
श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे ॥

श्रीपराशरभट्टारकः श्रीगुणरत्नकोशं करिष्यमाणः सन् नमस्काररूपं मङ्गलमादावाचरति—

श्रियै समस्तचिदचिद्विधानव्यसनं हरेः ।
अङ्गीकारिभिरालोकैः सार्थयन्त्यै कृतोऽञ्जलिः ॥

हरेराश्रितदुरितहरस्य श्रीरङ्गनायकस्य समस्तचिदचिद्विधानव्यसनं समस्तयोर्निखिलयोश्चिदचितोः चेतनाचेतनयोः विधाने सृष्टौ व्यसनं परिश्रमः अङ्गीकारिभिः भवता साधु कृतमित्यङ्गीकारवद्भिः आलोकैः कटाक्षैः सार्थयन्त्यै श्रियै पुरुषकारतया समस्तचेतनाश्रयणीयायै लक्ष्म्यै अञ्जलिः कृतः ।

End:

त्वमम्बा जननी पिता जनकः सर्वं च ममापि त्वमेव भव नः । तस्मात् अकस्मात् कृपाम् निर्हेतुकृपाम् अस्मद्विषयिणीं स्वीकुरु ॥

Colophon:

इति श्रीहरितकुलतिलकश्रीवत्साङ्कमिश्रसूनोः श्रीरङ्गराजदिव्याज्ञा-लब्धश्रीपराशरभट्टारकनामधेयस्य कृतिषु श्रीगुणरत्नकोशः सम्पूर्णः ॥

R. No. **759.**

Paper. 11 × 9 inches. Foll. 8. Lines, 9 in a page. Dēvanāgarī. Good.

Transcribed in 1912-13 from a MS. of Śrīnivāsapāṭṭarācāryar of Kumbakonam.

कुम्भघोणमाहात्म्यम्.

KUMBHAGHŌṆAMĀHĀTMYAM.

On the sanctity and religious importance of the sacred place known as Kumbakonam in the Tanjore district.

This work is said to occur as the 40th Adhyāya of Śēṣadharma, forming part of the Harivaṁśa

Beginning:

वैशम्पायनः—

श्रुत्वैतद्रङ्गनाथस्य वैभवं भाग्यवर्धनम् ।
विस्मयानं महाप्राज्ञं भीष्मो धर्मसुतं जगौ ॥

भीष्मः—

अथातः संप्रवक्ष्यामि रङ्गनाथस्य वैभवम् ।
चन्द्रपुष्करिणी नाम शाश्वती पुण्यदायिनी ॥

* * * *

श्रीभगवान्—

प्राचीभागे नमस्यन्ति योजनानां चतुष्टये ।
आस्ते तत्र सरस्तीर्थे स्वर्णपङ्कजकानने ॥
कुम्भघोणमिति ख्यातं क्षेत्राणामुत्तमं विदुः ।
लक्ष्मीसरोवरं नाम तत्र तिष्ठति सम्प्रति ॥

निर्मितं तपसा देव्या शुद्धान्तहृदया तया ।
आदावपि च यत्क्षेत्रं देवर्षिगणसेवितम् ॥
धर्मवृद्धिकरं क्षेत्रं कुम्भघोणं विदुर्बुधाः ।
कुम्भघोणे मातिर्यस्य तस्य लोको ममैव हि ॥

End:

हरिश्चन्द्रो नलो राजा पुरुकुत्सः पुरूरवाः ।
सगरः कार्तवीर्यश्च षडेते चक्रवर्तिनः ॥
ख्यातिं लोके महासत्त्वं धर्मश्रद्धां महाधनम् ।
अवापुस्तत्र कृपया तपसा च शुभौव्रता(मैर्व्रतैः) ॥
शृण्वतां वदतां चेदमेतद्भाग्य वदेद्ध्रुवम ।

Colophon:

इति श्रीहरिवंशे आश्चर्यपर्वणि शेषधर्मे चन्द्रपुष्करिणीप्रशंसायां कुम्भघोणमाहात्म्यकथनं नाम चत्वारिंशोऽध्यायः ॥

R. No. **760.**

Paper. 11 × 9 inches. Foll. 42. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1912–13 from a MS. obtained from K. V Chōyi Vaidyar of Calicut in Malabar.

रसमञ्जरी.

RASAMAÑJARĪ.

Deals chiefly with the manner of purifying mercury for use in the preparation of medicines: by Śalinātha, son of Vaidyanātha.

The following are the subjects dealt with in the work :—

१. रसशोधनम्.
२. रसजारणादिकथनम्.
३. उपरसशोधनमारणसञ्चपातन-रसातिमारणकथनम् ॥
४. विषलक्षणविषसेवाविषप्रतिकार-कथनम्.
५. स्वर्णादिधातुशोधनमारणम्.
६. रसक्रियादयः.
७. ....
८. नेत्राञ्जनकेशरञ्जनम्.
९. स्तम्भनादिबालग्रहिणीमारणम्.

Contains the Adhyāyas 1 to 9 complete.
Fol 42 is blank.

Beginning:

यद्गण्डमण्डलगलन्मदवारिबिन्दु-
पानालसातिनिभृता गलितालिमालाः ।
संजृम्भितेन विनिहन्ति नवेन्द्रनील-
शङ्कां स वो गणपतिः शिवमातनोतु ॥

* * * *

श्रीवैद्यनाथतनयः सुतपाः सुशीलः
श्रीशालिनाथ इति विश्रुतनामधेयः ।
तेनावलोक्य विविधान् रसवादबन्धान्
आरभ्यते सुकृतिनां रसमञ्जरीयम् ॥

हरति सकलरोगानूर्जितोऽयं नराणां
विचरति किल बन्धं खेचरत्वं जवेन ।
सकलसुरमुनीन्द्रैर्वन्दितः शम्भुबीजं
स भवति भवसिद्ध्यै पारदः पारदो यः ॥

End:

पूजयेत्सर्वदेवानामर्धरात्रे तथा बलिः ।
निवृत्तनामदेवेन बलिदानं प्रदीयते ॥

तस्य मन्त्रः—

ओं नमो भगवते अमुकदेवते बालं मुञ्च बलिं गृहाण हूर्ण स्वाहा ॥

Colophon:

इति श्रीवैद्यनाथसुतशालिनाथविरचिते रसमञ्जरीप्रकाशे वीर्यस्तम्भ-नादिबालग्राहिणीमारणं नाम नवमोऽध्यायः ॥

R. No. 761.

Paper. 11×9 inches. Foll. 20. Lines, 10 in a page. Dēvanāgarī. Good.

Transcribed in 1912–13 from a MS. of Śrīnivāsapāṭṭarācāryar of Kumbakonam.

दत्तसंग्रहः.

DA'TTASAṄGRAHAḤ.

Foll. 1*a*—19*a*.

A treatise on the Hindu law of adoption : by Bhīmasēna.

Incomplete.

Beginning:

नत्वा व्यासमुखान् सर्वान् स्मृतिकर्तॄन् सतां मुदे ।
भीमसेनाख्यविदुषा क्रियते दत्तसंग्रहः ॥

अत्र पुत्रस्वीकारविधिविवेचकप्राचीनानेकनिबन्धनानुसारेण यथामति संक्षिप्य पुनः(त्र)स्वीकारविधिर्निरूप्यते—

तत्र जायमानो वै ब्राह्मणस्त्रिभिरृणवा जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः इति श्रुत्या ब्रह्मचर्ययज्ञप्रजारूपदेवर्षिपितृ[तम]ऋणत्रयसम्बन्धस्य जायमानत्वेन बोधनात् तत्र परिहारेच्छुनाऽवश्यं पुत्रः सम्पादनीय इति बोध्यते ।

End:

कामतः संसर्गे पुनः स्मृत्यन्तरेऽभिहितः—

पञ्चाहे तु चरेत्कृच्छ्रं दशाहे तप्तकृच्छ्रकम् ।
पराकं त्वर्धमासे स्यान्मासे चान्द्रायणं चरेत् ॥

Foll. 19*b*—20*b* are blank.

R. No. 762.

Paper. 11 × 9 inches. Foll. 98. Lines, 20 in a page. Grantha. Good.

Transcribed in 1912–13 from a MS. of Vaḍakkuttirumāḷikai in Āḷvārtirunagari.

पाञ्चरात्रसारसङ्ग्रहः.

PĀÑCARĀTRASĀRASAÑGRAHAḤ.

A summary of the important subjects dealt with in the Pāñcarātrāgama.

Breaks off in the 16th Adhyāya.

The subjects dealt with herein are given below :—

१. स्नानविधिः.
२. मानसयोगः.
३. मन्त्रासनविधिः.
४. स्नानासनविधिः.
५. उत्सवः.
६. उत्सवपद्धतिः.
७. होमद्रव्यफलम्.
८. तीर्थनक्षत्रम्.
९. वल्मीकम्.
१०. चलनप्रायश्चित्तम्.
११. आशौचप्रायश्चित्तम्.
१२. ध्वजस्तम्भः.
१३. शिल्पिस्पर्शप्रायश्चित्तम्.
१४. शवस्पर्शप्रायश्चित्तम्.
१५. वैखानसविधिः.
१६. बालस्थानप्रायश्चित्तम्.
१७. जलसम्प्रोक्षणम्.
१८. अर्घ्यप्रदानफलम्.
१९. मात्रादानविधिः.
२०. ताम्बूलविधिः.
२१. ध्वजदण्डविधिः.
२२. सर्पमूषिकादिस्पर्शप्रायश्चित्तम्.
२३. दीपद्रव्यविधिः.
२४. पञ्चशुद्धिः.
२५. पात्रविधिः.
२६. महाविधिः.
२७. मधुपर्कः.
२८. द्वारविशेषहोमः.
२९. मूलबेरस्वरूपम्.
३०. गर्भसूत्रसङ्ख्या.
३१. चित्राभासविधिः.
३२. पञ्चविधस्नानम्.
३३. प्रसादफलम्.
३४. आचार्याय प्रसादसमर्पणम्.
३५. श्रीभूमिलक्षणम्.
३६. वासुदेवादिमूर्तिलक्षणम्.
३७. दीपदण्डविधिः.
३८. सूत्रपातविधिः

३९. अधिकमासविधिः.
४०. अङ्कुलिविधिः.
४१. सम्प्रोक्षणम्.
४२. प्रासादभेदः.
४३. अङ्गोपाङ्गसन्धाः.
४४. परिवारकावाहनम्.
४५. संस्कारविधिः.
४६. अष्टाक्षरयन्त्रम्.
४७. महायन्त्रप्रस्तारः.
४८. अस्त्रभेदः.
४९. वैखानसतन्त्रभेदविधिः.
५०. आचार्यसाङ्कर्यविधिः.
५१. रथादिप्रायश्चित्तविधिः.
५२. सौन्दर्यदीपः.
५३. नित्ययागक्रियासूचन-विधिः.
५४. कृत्तिकोत्सवविधिः.
५५. सृष्टिस्थितिसंहारः.
५६. स्नपनविधिः.
५७. अभिषेकफलम्.
५८. अष्टाक्षरन्यासः.
५९. सृष्टिन्यासः.
६०. स्थितिन्यासः.
६१. लक्ष्मीन्यासः.
६२. रथप्रतिष्ठा

Beginning:

साधकस्याथ वक्ष्यामि स्नानकर्म यथाक्रमम् ।
देवस्य सर्वकर्माणि स्नानपूर्वं तु कारयेत् ॥
संप्रबुद्धः प्रभाते तु उत्थाय शयने स्थितः ।
नाम्नां सङ्कीर्तनं कुर्यात् षोडशानां प्रकीर्तनम् ॥
ओं नमो वासुदेवाय नमः सङ्कर्षणाय ते ।
प्रद्युम्नाय नमस्तेऽस्तु अनिरुद्धाय ते नमः ॥
क्रमशः केशवादीनां यावद्दामोदरः स्मृतः ।
नमो नमः केशवाय नमो नारायणाय ते ॥
नदीषु देवखातेषु निर्झरेषु तथा ह्रदे ।
एतेषु पुण्यतीर्थेषु स्नापयेद्देशिकोत्तमः ॥

कूपस्नानं न कुर्वीत नद्यादौ स्नानमाचरेत् ॥
नद्यादावसमर्थश्चेत्तस्मात्तोयैस्समुद्धृतैः ।
स्नानं कुर्वीत तत्तैर्वा ज्ञात्वा धातुबलाबलम् ॥

* * * *

स्वगृहंतु समाविश्य श्रौताग्निं सम्प्रपूजयेत् ।
तस्मात्तमग्निमथवा गृहे विष्णुं समर्चयेत् ॥

इति श्रीपाञ्चरात्रसारसंग्रहे स्नानविधिर्नाम प्रथमोऽध्यायः ॥

End :

आचार्यं तत्र सम्पूज्य वस्त्रहेमाङ्गुलीयकैः ।
सम्पूज्य पूर्ववत्पश्चात् ब्राह्मणानांतु दक्षिणैः ॥

Colophon :

इति श्रीपाञ्चरात्रे परमपुरुषसंहितायां रथारोहणविधिर्नाम पञ्चदशोऽध्यायः ॥

प्रथमं दारुसंग्राहं द्वितीयं लक्षणं तथा ॥
तृतीय एव सूत्रं च विस्तारं तु चतुर्थकम् ।
पञ्चमं दारुविच्छेदं प्रमाणं षष्ठमेव च ॥
निर्मितं सप्तमं चैव प्रतिष्ठा अष्टमं तथा ।
नवममुच्छ्रयं चैव दशमं प्रार्थनं तथा ॥
एकादशार्चनं चैव द्वादशार्चाफलप्रदम् ।
एवमेव प्रकारेण रथनिर्माणमाचरेत् ॥

R. No. **763.**

Paper. 11 × 9 inches. Foll. 126. Lines, 20 in a page. Grantha. Good.

Transcribed in 1912–13 from a MS. of the Vaḍakkuttirumāḷikai in Āḷvārtirunagari.

तर्कभाषाभावप्रकाशिकाव्याख्यानम्—तर्कतिलकम्.

TARKABHĀṢĀBHĀVAPRAKĀŚIKĀVYĀKHYĀNAM: TARKATILAKAM.

Foll. 1*a*—125*a*.

A commentary on the Tarkabhāṣābhāvaprakāśikā of Gōpīnātha, for which see No. 4124 of the D.C.S. MSS., Vol. VIII.

Wants beginning; otherwise complete.

Beginning:

दश दाडिमानि षडपूपा इतिप(व)दसाङ्कत्यपरिहारायाह—प्रत्यक्षेति। प्रत्यक्षप्रमाणेत्यर्थः। अनुमानस्येति। अनुमानप्रमाणस्येत्यर्थः। उद्देशादिति। उद्दिष्टत्वादित्यर्थः। ननूद्देशस्यासङ्गतित्वात् कथमसाङ्कत्यपरिहारः। नचोद्देशोऽपि सङ्गतिरेवेति वाच्यम्, सप्रसङ्ग उपोद्घातो हेतुतावसरस्तथा। निर्वाहकैककार्यत्वे षोढा सङ्गतिरिति परिगणनविरोधापत्तेः।

End:

पक्षतावच्छेदकसाध्यसामानाधिकरण्याभावोऽसङ्कीर्णबाधः। यथा काञ्चनमयो वह्निमान् धूमादित्यादौ। तत्र च न व्यभिचारगन्ध इति निगमः। तदेतदाह—विचारो भूयानिति।

Colophon:

इति तर्कभाषा[भाषा]भावप्रकाशिकाव्याख्यायां तर्कतिलकाख्यायामनुमानपरिच्छेदः समाप्तः॥

Foll. 125*b*—126*b* are blank.

R. No 764.

Paper. 11 × 9 inches. Foll. 32. Lines, 20 in a page. Telugu. Good.

Transcribed in 1912–13 from a MS. of the Vaḍakkuttirumāḷikai in Alvārtirunagari in the Tinnevelly district.

षड्रसनिघण्टुः.

SAḌRASANIGHAṆṬUḤ.

Same work as the one described under R. No. 321(*a*) *ante*.

Breaks off in the second Skandha.

R. No. 765.

Paper. 11 × 9 inches. Foll. 230. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1912-13 from a MS. of the Vaḍakkuttirumāḷikai in Āḷvārtirunagari.

शास्त्रदीपिकाव्याख्या—न्यायकर्पूरवार्तिका.

ŚĀSTRADĪPIKĀVYĀKHYĀ : NYĀYAKARPŪRA-VARTIKĀ

Similar to the work described under No. 4497 of the D.C.S. MSS., Vol. IX.

By Rājacūḍāmaṇidīkṣita, son of Satyamaṅgala Ratnakhēṭa Śrīnivāsadīkṣita and Kāmākṣī, grandson of Lakṣmībhavasvāmin and great grandson of Kṛṣṇabhaṭṭa of Viśvāmitragōtra.

Contains the ninth Adhyāya complete.

Beginning :

यस्योपवीतगुण एव फणावृतैकवक्षोरुहः कुचपटीयति वामभागे ।
तस्मै ममास्तु नमसामवसानसीम्ने चन्द्रार्धचारुशिरसे महसे नमस्या ॥

टीकाया नवमाद्याङ्केर्लिखिता वेङ्कटाद्रिणा ।
भागिनेयेन सैवात्र शिष्यप्रीत्या विलिख्यते ॥

सूत्रम्—

यज्ञकर्म प्रधानं तद्धि चोदनाभूतं तस्य द्रव्येषु संस्कारः तत्प्रयुक्तस्तदर्थत्वात् ।

वृत्तवार्तिष्यमाणलक्षणयोर्हेतुहेतुमद्भावलक्षणां सङ्गतिं दर्शयन् लक्षणार्थविचारं प्रतिजानीते—सिद्ध इति । ऊहस्यातिदिष्टप्रयाजादिविषयताभ्रमं वारयितुमूहविषयान् परिगणय्य दर्शयति—मन्त्रेति । यद्यपि साम्नामृक्संस्कारकतया संस्कारग्रहणेनैव ग्रहणं संभवति, तथापि वक्ष्यमाणस्य सामोहस्यावघाताद्यूहविलक्षणत्वात् पृथगुपादानमिति ध्येयम् ।

End:

नन्वेवमपि तृतीयायाः का गतिरित्यत आह—तृतीयेति । साप्यर्थप्राप्तकरणत्वसम्बन्धानुवादिनीत्यर्थः । शिष्यबुद्धिसौकर्यार्थमेतस्मिन्नध्याये प्रतिपादितमुत्तरस्मिन्नध्याये प्रतिपादयिष्यमाणं चार्थं श्लोकेन गृह्णाति—प्राकृतार्थेति ॥

Colophon:

इति श्रीदन्तिद्योतिदिवाप्रदीपाङ्कविश्वामित्रवंशमुक्ताफलाद्वैतविद्याचार्यश्रीकृष्णभट्टपौत्रलक्ष्मीभवस्वामिभट्टपुत्रसाग्निचित्यविश्वजिदतिरात्रयाजिसत्यमङ्गलरत्नखेटश्रीनिवासदीक्षिततनयस्य कामाक्षीगर्भसंभवस्य श्रीमदर्धनारीश्वरदीक्षितगुरुचरणसहजतालब्धविद्यावैशद्यस्य श्रीराजचूडामणिदीक्षितस्य कृतिषु शास्त्रदीपिकाव्याख्यायां कर्पूरवर्तिकाख्यायां नवमाध्यायस्य चतुर्थः पादः समाप्तः ॥

R. No. **766.**

Paper. 11 × 9 inches. Foll. 138. Lines, 20 in a page. Grantha Good

Transcribed in 1912–13 from a MS. of Vaḍakkuttirumāḷikai in Ālvārtirunagari.

सर्वार्थसिद्धिव्याख्या—गूढप्रकाशः

SARVĀRTHASIDDHIVYĀKHYĀ : GŪḌHAPRAKĀŚAḤ.

A commentary on the Sarvārthasiddhi of Vēdāntadēśika described under No. 4900 of the D.C.S. MSS., Vol. X. By Saumyavaradarāmānujamuni, a disciple of Śrīnivāsaguru *alias* Tātayadēśika

Breaks off in the third Sara.

Beginning:

श्रीनिवासगुरुं नत्वा श्रीमत्तातयदेशिकम् ।
सर्वार्थसिद्धिगूढार्थप्रकाशः क्रियते मया ॥

. . . . . सर्वो व्याख्यातव्य-

करणवेलायां सम्प्रदायपरम्परागतानां समीचीनानामर्थानां तत्साधकप्रमाणानां परपक्षप्रतिक्षेपयुक्तीनांच परिस्फुरणं

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥

इति श्रुतेर्गुरुप्रसादाधीनमिति मन्वानो गुरुपङ्क्तिहारयष्टिनायकभूतं श्रीमद्भाष्यकारं स्तुवन् तत्स्मृतिरूपस्वनिर्मितयतिराजसप्तत्याख्यप्रबन्धमध्यपतितं सकलं मङ्गलमावहन् जयशब्दोपक्रमपद्यविशेषमनुसन्धत्ते—जयतीति । एवमदृष्टद्वाराविघ्नपरिसमाप्तिप्रचयगमनोपायभूतं गुरुनमस्कारात्मकं मङ्गलमारचय्य प्रचयगमनदृष्टोपायभूतं विषयप्रयोजनसम्बन्धाधिकारिरूपमनुबन्धचतुष्टयं तत्तद्ग्रन्थशास्त्रादिप्रसिद्धजयादिहेतुभावमुक्ताकलापोपायसमाधिमुखेन प्रदर्शयति—तारकल्प इति ।

End:

पूर्वेषामपीति । अन्तिमस्यासत्त्वे उपान्त्यस्याप्यर्थक्रियाविरहादसत्त्वेन तत्पूर्वस्याप्येवमेव सत्त्वं . . . . त् पूर्वस्याप्येवमिति शून्यत्वं स्यादिति भावः ।

Colophon:

इति श्रीभगवत्सौम्यवरदरामानुजविरचिते सर्वार्थसिद्धिप्रकाशे जीवसरो द्वितीयः ॥

व्याप्त्याद्यव्या . . . . . लाभिरिति । प्रकरणविच्छेदं दर्शयन् सङ्गतिप्रदर्शनपूर्वकमयमिदानीं विचार्यत इत्याह—तदेवमिति ।

* * * *

एतेनेति । पूर्वोक्तसर्वविकल्पदूषणं परामृश्यते, निर्व्यापार(सव्यापार)पदाभ्यां निष्क्रियत्वसक्रियत्वे विवक्षिते । तेन किञ्चित्कारविकल्पेन न पौनरुक्त्यम् । स्वभावत्वे असाधारणकारणत्वे . . . र्थः । सर्वे प्रत्यपि स्यातामिति ।

R. No. 767.

Paper. 11×9 inches. Foll 166. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1912-13 from a MS. of Vadakkuttirumālikai in Āḷvārtirunagari.

तत्त्वचिन्तामणिसारः.

TATTVACINTĀMANISARAḤ

Same work as the one described under Nos 4031 and 4033 of the D.C.S MSS., Vol. VIII.

Contains Śabdakhanda complete

R. No. 768.

Paper. 11×9 inches. Foll. 30. Lines, 30 in a page. Dēvanāgarī. Good.

Transcribed in 1912-13 from a MS. of Vaḍakkuttirumālikai in Āḷvārtirungari.

अधिकरणसारार्थदीपिका.

ADHIKARAṆASĀRĀRTHADĪPIKĀ.

Same work as the one described under No 4853 of the D.C.S. MSS., Vol. X. By Mahācārya *alias* Śrīnivāsasūri of Vādhūlagōtra, a disciple of Samarapuṅgavācārya of the same Gōtra.

Complete.

The original manuscript is stated to have been written by Rāmānujadāsa of Vaḍakkuttirumāḷikai.

Colophon:

इति वाधूलकुलतिलकश्रीमत्समरपुङ्गवाचार्यसम्प्राप्तशारीरकभाष्यहृदयेन तत्कुलालङ्कारभूतेन महाचार्यापरनामधेयेन श्रीनिवासस्रिणा विरचितायामधिकरणदीपिकायां चतुर्थस्याध्यायस्य चतुर्थः पादः ॥ चतुर्थोऽध्यायः । समाप्तं च शास्त्रम् ॥

उपन्यसनमातनोदधिकृतिक्रमात्सुग्रहं
यतीश्वरवचस्सुधां समरपुङ्गवार्योऽसकृत् ।
अधीत्य घनदेशिकं शमदमादिवार्धिं विय
न्महाद्रिमुनिपादयोर्निहितसर्वभारं भजे ॥
सूत्राणां निगमान्तस्य घनदेशिकनिर्मितम् ॥
भाष्यादिकृत्युपन्यासं श्रीनिवासाभिधोऽलिखत् ॥
अध्यायो वेदवत्प्रोक्तः पादो विकृतिवत्तदा ।
शास्त्रे त्वधिकृतिः प्रोक्ता षट्पञ्चाशच्छताधिकाः ।'

R. No. **769.**

Paper. 11 × 9 inches Foll. 16. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1912–13 from a MS. of Vaḍakkuttirumāḷikai in Āḷvārtirunagari.

रसोल्लासभाणः.

RĀSŌLLĀSABHĀṆAH.

A form of drama, technically called Bhāṇa, dealing with the love between Kāmaśēkhara and Muktāvali: by Śrīnivāsa, son of Vēṅkaṭārya, grandson of Śrīnivāsa and great grandson of Vēdāntārya *alias* Vṛṣaguru of Ātrēyagōtra His maternal grandfather was Bhaktārtihṛt, a descendant of Rāmānuja of Hārītagōtra. In the introduction the author refers to Bhūtapurī, *i.e.*, Sriperumbudur, as being the place where the drama was first enacted.

Incomplete.

Beginning:

लक्ष्मीं पद्मलयन्तु कामिजनताचक्षुश्चकोरीशर-
त्सम्पूर्णामृतरश्मिसान्द्रकिरणस्रोतांसि नः सन्ततम् ।
उन्मीलस्सितकेतकीदलशिखालीलायितानि स्वयं
रत्यन्ते मधुरस्मितानि सुदृशामस्त्राणि चेतोभुवः ॥

नान्द्यन्ते सूत्रधारः—आर्ये समादिष्टोऽस्मि सकलवृन्दारकवृन्दमौलि-मन्दारकुसुमस्यन्दमानमकरन्दबिन्दुसन्दोहसान्द्रतरचरणारविन्दद्वन्द्वस्य भव-

जलनिधिनिमज्जज्जीवजातमहापोतस्य निरवधिककरुणानिधेः श्रीभूतपुरी-तपःफलायमानस्थादिकेशवस्योपवनयात्रोत्सवसेवादरसमेतैः करतलबदराय-माणानिखिलकलापैरशेषविमतमतातिमिरषण्डखण्डनचण्डभानुभिराखिलैरमीभि-रार्यमिश्रैः । यथा—

अस्ति ह्यत्रिकुलाम्बोधिशरत्पूर्णसुधाकरः ।
श्रीनिवासः कविर्यस्य वाणी विद्वन्मनोहरा ॥

विद्यावृत्तविशेषविस्मितबुधश्रेणीवितीर्णोल्लस-
द्वेदान्तार्यसमाख्ययुग्वृषगुरोर्नप्तृत्वधन्योदयः ।
तादृग्वैभवशोभिनो गुणनिधेः श्रीश्रीनिवासस्य यः
पौत्रः क्षान्तिदयाशमादिभवनः श्रीवेङ्कटार्यात्मजः ॥

अपि च—

हारीतवंशकलशाब्धिसुधामयूखरामानुजार्यकुलनन्दनकल्पशाखी ।
भक्तार्तिहृत् भुवनभाग्यफलावतारो मातामहश्चरितपुण्यचयस्य यस्य ॥

तत्प्रणीतेन निखिलरसिकजनोल्लासनेन रसोल्लासनाम्ना भाणतिलकेन उपतिष्ठस्वास्मानिति ।

End:

ततश्च तत्पुरनिवासी प्रियसुहृत् बालचन्द्रो नाम कयाचन् विला-सिन्या सह सहसोपेत्य वयस्य तव मनोरथसिद्धिपुष्टेः पुरस्स्फुरन्ती सौदामिनीयं झटिति करतलमुपेतं च ते मनीषितमवधारयेत्यवोचत् । आकर्ण्य चाहममृतोपमानं वचनमानन्दसंभृतमानसः सखे केयं कथञ्चैत-दित्यनुयुज्य तेन च त्वदीयाचि ॥

Foll. 1*b* and 16 are blank.

R. No. **770.**

Paper. 11 × 9 inches. Foll. 30. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1912 13 from a MS. of the Vaḍakkuttirumāḷikai in Āḷvārtirunagari.

तालदीपिका.

TĀLADĪPIKĀ.

A treatise dealing with the subject of ताल or measurement of time in music: by Gōpatippabhūpāla of the Sāluva family.

Contains the following three Pariccheḍas complete.

१. मार्गतालविवेकः.

२. देशितालविवेक..

३. मार्गतालप्रस्तारादिनिरूपणम्.

Beginning:

ताले(लो)घन इति प्रोक्तः कलापातलयान्वितः ।
कालस्तस्य प्रमाणं हि विज्ञेयं तालयोक्तृभिः ॥
या लौकिकी कला काष्ठा निमेषश्च स्मृतो बुधैः ।
न सा तालकला ज्ञेया ह्यन्यैषा तालजा लक्ष्मा(कला) ॥
निमेषकाले मात्रा स्यान्मात्रायोगात्कला स्मृता ।
निमेषाः पञ्च विज्ञेया गीतकाले कलान्तरम् ॥
ततः कला कालकृतो लय इत्यभिसंज्ञितः ॥
त्रयोऽनघास्तु विज्ञेया भू(द्रु)तमध्यविलम्बिताः ।
यस्तत्र मध्ये विलयस्तत्प्रमाणा कला भवेत् ॥
कलाकालप्रमाणेन ताल इत्यभिधीयते ।
इति कण्ठत एवोक्तं मुनिना तत्त्वलक्षणम् ॥
अथ शैलादिहनुमच्छाब्ददेवादिसम्मतम् ।
तावन्निरूपयिष्यामस्तालसामान्यलक्षणम् ॥

End:

प्राचीनतालफलवत् यत्पादाम्बुजसेविनाम् ।
सम्पकेष्टार्क(र्थ)संसिद्धिस्तस्मै मित्यात्मने नमः ॥
यच्चरेद्धट्टसंभक्तेर्वाचा च पुटभेदनम् ।
मनुजानां न संसिद्धं तस्यै तनुमहेऽञ्जलिम् ॥

Colophon:

इति सालुववंशार्णवपूर्णिमाचन्द्रस्य भरतमतपारावारपारीणस्य श्री-गोपतिप्पभूमिपालस्य तालदीपिकायां मार्गतालप्रस्तारादिप्रत्ययनिरूपणप्रकरणम् ॥

Fol. 29*a* contains some stanzas on music. Fol. 30 is blank.

R. No. **771.**

Paper. 11 × 9 inches. Foll. 456. Lines, 20 in a page. Grantha. Good

Transcribed in 1912–13 from a MS of Vaḍakkuttirumāḷikai in Āḷvārtirunagari.

वेदान्तकण्टकोद्धारः.

VĒDĀNTAKAṆṬAKŌDDHĀRAḤ.

Same work as the one described under No. 5004 of the D.C.S. MSS., Vol. X.

By Campakēśārya, son of Varadācārya of Kauśikagōtra and of the Tōḷappa family, descended from one of the 74 priests ordained by Rāmānujācārya.

Contains Prathamasūtraśōdhana and Jīvāṇutvasamarthana.

Wants beginning.

The original manuscript is said to have been copied by Rāghavācāriyar, son of Komāṇḍūr Vēṅkaṭācāriyar, a resident of Viḷāgam village, at the instance of Āttān Varadācāriyar of Śrīvatsagōtra of Tirunagari; and the copying was completed on Monday, the 4th day of the dark fortnight in the month of Vaikāśi, when the moon was in the constellation Mṛgaśīrṣa in the year Pārthiva.

Foll. 57*b* and 454*b*—456*b* are blank.

Beginning:

इदं पुरुषसूक्तं हि सर्ववेदेषु पठ्यते ।
ऋतं सत्यञ्च विख्यातमृषिसिंहेन चिन्तितम् ॥

इति भारतवचनात्,

श्रुतिषु प्रबला मन्त्रास्तेष्वप्यध्यात्मवादिनः ।
तत्रापि पौरुषं सूक्तं न तस्माद्विद्यते परम् ॥

वेदेषु पौरुषं सूक्तमित्यादिपाद्मादिवचनैश्च प्रत्यक्षतो वेदत्रयेऽपि पठ्यमानत्वाच्च पुरुषसूक्तस्य सर्ववेदतात्पर्यनिर्धारकत्वे सिद्धे तत्र च सहस्रशीर्षा इत्यादि सविशेषोपक्रमात्, पूर्वे साध्याः सन्ति देवा इति तथा निगमनात्, वेदाहमेतं पुरुषं महान्तमादित्यवर्णमित्याद्यभ्यासादपूर्वताद्यैश्च भेदपरत्वे सर्ववेदवादानामपि दुर्वारं भेदपरत्वम् ।

* * * *

इति हारीतान्वयपारिजातरामानुजार्यसमरपुङ्गवाचार्यकारुण्यकलितसत्ताककौशिकवरदाचार्यचरणारविन्दविन्यस्तात्मभरस्य चम्पकेश्वरस्य कृतिषु वेदान्तकण्टकोद्धारे प्रथमसूत्रपरिशोधनं संपूर्णम् ॥

End :

अतः श्रुतिस्मृतिसूत्रन्यायमहाजनानुरोधात् एषोऽणुरात्मेति वचनं स्वाभाविकमेव जीवाणुत्वं प्रतिपादयतीति सर्वं समञ्जसम् ।

प्रतिपदमयुतानि प्रौढतर्कप्रघट्टैः
प्रकटयितुमुदाराः प्रायशः कल्पनानि ।
वयमपि तु परास्ते पञ्चषैः प्रत्यनीकैः
किमिति विततिभेदैः कार्यमस्माकमत्र ॥

Colophon :

इति भगवद्रामानुजायीनयोमतचतुस्सप्ततिसङ्ख्याकभद्रपीठप्रतिष्ठितगुरुगणविभूषणतन्नियमितानेकबिरुदावलीशोभमानकौशिक . . . मित्रदेशिककुलजलधिकौस्तुभस्य श्रीमद्वरदाचार्याभिधानतातपादश्रीपादकमलमधुव्रतायमानस्य कविकुलसार्वभौमस्य कथकजनकण्ठीरवस्य श्रीमद्रामानुजसिद्धान्तनिर्धारणजयध्वजस्य श्रीचम्पकेशार्यस्य कृतिषु जीवाणुत्वसमर्थनं सम्पूर्णम् ॥

लक्ष्मणार्यमनिशं भजाम्यहं रक्षणाय मम कल्पितदीक्षम् ।
लक्ष्मणार्यमुनिसूक्ति(सु)धाब्धेः निष्कलङ्कमपि पूर्णहिमांशुम् ॥

R. No. **772.**

Paper. 11 × 9 inches. Foll. 278. Lines, 20 in a page. Grantha. **Good.**

Transcribed in 1912–13 from a MS. of Vaḍakkuttirumaḷikai in Āḷvārtirunagari.

प्रमाणसङ्ग्रहः

PRAMĀṆASAṄGRAHAḤ.

Same work as the one described under No 5316 of the D.C.S. MSS., Vol. XI.

The original is said to have been copied by one Vēṅkatavarada of Tiruvaḷundūr.

Complete.

R. No. **773.**

Paper. 11½ × 9 inches. Foll. 162. Lines, 10 in a page. Dēvanāgarī. Good.

Transcribed in 1912–13 from a MS. of the Yajñēśvara Śāstrigaḷ of Tanjore.

आश्वलायनश्रौतसूत्रप्रयोगवृत्तिः.

ĀŚVALĀYANAŚRAUTASŪTRAPRAYŌGAVṚTTIḤ.

Same work as the one described under No. 1032 of the D.C.S. MSS., Vol. II.

Incomplete.

R. No. **774.**

Paper. 11 × 9 inches. Foll. 24. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1912–13 from a MS. of Nārāyaṇa Śāstri of Tiruvadi.

ईश्वरोल्लासः.

• ĪŚVARŌLLĀSAḤ.

A poem in a Prākṛt language in praise of Śiva as Īśvara. Complete.

Beginning :

जावोहुआकमिच संवहि सव्वसत्तिरूवाणिर प्पइ परासतणू अहंता ।
साऊससेइ सममेव्व जिणा अणण्ण साहारणेसरपआद्धि महं णवेमि ॥
सद्दस्मईसपुरिसोत्तिसुइट्टिअस्सासाहारणो गिरिसकुंतिहरीकिमत्थे ।
एवं बुहाणमुहळेघणपुव्वपक्के सिद्धन्तिदंवि अहरीवितमित्थिआसी ॥

End :

गिरिणाधजाणअणणुण्णधोरणी चळिदच्छिकोणगळिदा महेसरी ।
गिरितुल्लुकट्टुहिमुणाइणासिअ महुदा(अ) तुज्झसुकिबासुमंगलम् ॥

Colophon :

इति ईश्वरोल्लासे भाषासङ्करः ॥

Foll. 20*b* and 24 are blank.

R. No. **775**

Paper. 11 × 9 inches. Foll. 16. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1912–13 from a MS. of the Vaḍakkuttirumāḷikai in Āḷvārtirunagari

वसन्तभूषणभाणः.

VASANTABHŪṢAṆABHĀṆAḤ.

A kind of love drama: by Varadārya, son of Anantārya and grandson of Śrīnivāsācārya of Bhāradvājagōtra and a disciple of Varadāryadēśika who was himself the disciple of Śrutaprakāśikācārya.

The copying of the original manuscript is stated to have been completed on Thursday, the 17th of Āḍi, when the moon was in the constellation Ārdrā, in the year Bahudhānya, corresponding to 994 of the Kollam era.

Complete.

Beginning:

भद्रं देवो विनिद्रं वितरतु करुणापूरपूर्णायताक्षो
मर्त्यामर्त्यातिसृष्टिस्थितिलयरचनागण्यलीलाविभूतिः ।
सूनुर्यस्यातिवीरस्त्रिभुवनविजयी पुष्पबाणैर्मनोभू-
र्जोयामेयप्रभावा वलजिदजमहेशानवन्द्याङ्घ्रिपद्मा ॥

* * * *

रसिकजनचित्तरञ्जनमभिनेतव्यं विलासिनो वृत्तम् ।
शृङ्गाररसोद्दीपकमभिनवमभिरूपकं भवता ॥

अस्ति खलु भारद्वाजकुलकलशाब्धिसोमः सामागमाधिदेवतावतारस्य निखिलविद्यानिकषोपलजिह्वाञ्चलस्य शिष्टजनाशास्यशुद्धचर्यस्य श्रीनिवासाचार्यस्यात्मजवर्योऽनन्तार्यो नाम ।

सामास्थि(ब्धि)पारगास्ते शिष्या यस्य क्रतुक्रियादक्षाः ।
वेदान्ततत्त्ववेदी सोऽनन्तार्योऽतिशीलवान् जयति ॥
तनयस्तस्य सञ्जातविनयो नयकोविदः ।
वरदार्य इति ख्यातः कविरासीद्गुरुप्रियः ॥

* * * *

प्रसिद्धः किलाप्रमेयमहिमा वेदान्तदेशिकापरावतारः श्रुतप्रकाशिकाचार्यान्तेवासी . . . वरदार्यदेशिक इति ।

सूत्रधारः—स एवास्य गुरुः ।

तदन्तेवासिनानेन मयि वात्सल्यशालिना ।
वसन्तभूषणं नाम भाणो हि कविना कृतः ॥

End:

तथापीदमस्तु भरतवाक्यम्—

वाणी मदीयरसनाञ्चलनर्तकी स्यात्
क्षोणी सदा सकलसस्यवती च भूयात् ।

ख्यातिं भजन्तु मम च प्रभवो वदान्याः
प्रीतिं कृतौ सुकवयः कलयन्त्वमुष्मात् ॥
इति निष्क्रान्तः पल्लवशेखरः ॥

Foll. 45 and 46 contain some erotic stanzas.

R. No. **776.**

Paper. 11 × 9 inches. Foll. 22. Lines, 20 in a page. Grantha. Good.

Transcribed in 1912-13 from a MS of Vaḍakkuttirumāḷikai in Āḷvārtirunagari.

पाञ्चरात्रवचनसागरः.

PĀÑCARĀTRAVACANASĀGARAḤ.

Foll. 1*a*—21*a*. Foll. 21*b* and 22 are blank.

This work gives quotations from the various Saṁhitās of the Pāñcarātrāgama in relation to the following subjects connected with the worship carried on in Viṣṇu temples :—

१. नैवेद्यक्रमः.
२. एकादशीवचनम्.
३. दीपपात्रदेवता.
४. दासीलक्षणम्.
५. षट्कालपूजा.
६. अष्टाङ्गप्रणामः.
७. तिथिनक्षत्रनिर्णयः.
८. शक्तिनिर्णयः.
९. पुष्पधारणफलम्.
१०. पलाशभस्मस्नपनफलम्.
११. सप्तदशकलशस्नपनफलम्
१२. पञ्चविंशतिकलशस्नपनम्.
१३. ग्रासमुद्रा.
१४. बलिभ्रमणम्.
१५. गर्भालयप्रवेशदोषः.
१६. तटाकशिलाग्रहदोषः.
१७. दीपारोपणफलम्.
१८. पद्माक्षमालाफलम्.
१९. अन्यस्पर्शपाञ्चरात्रवैखानसपूजा.
२०. सम्मार्जनोलपनफलम्.
२१. दीपारोपणफलम्.
२२. उदकाभ्युक्षणम्.
२३. भूमिपुष्पोद्यानफलप्रकारः.

२४. वापीकूपतटाकप्रतिष्ठाफलम्.
२५. बिम्बजीर्णशक्तिनिर्णयः.
२६. स्थूलसूक्ष्मरूपम्.
२७. गर्भगृहप्रमाणम्
२८. नृसिंहविषयः.
२९. दर्भमालालक्षणम्.
३०. उत्सवमध्ये कल्याणं न कार्यम्.
३१. सालग्रामपूजा.
३२. भूमिगायत्री.
३३. पक्षिगायत्री.
३४. जपलक्षणम्.
३५. स्थूलसूक्ष्मपरम्.
३६. आधारशक्तिपूजाक्रमः.
३७. द्वारदेवतालक्षणम्.
३८. बाल्ययौवननिर्णयः.
३९. बलितीर्थबिम्बम्.
४०. कुण्डम्.

Beginning:

महावातैर्महावर्षैराकाशे मेघडम्बरे ।
बहिर्बलिं न कुर्वीत अन्तर्बलिमथाचरेत् ॥
अष्टाक्षरं जपेत्साये मध्याह्ने द्वादशाक्षरम् ।
प्रातश्च विष्णुगायत्र्या सर्वमष्टाक्षरं तु वा ॥
उषःकाले मरीच्यन्नं पूर्वाह्णे दधिमिश्रितम् ।
मध्याह्ने सस्यभोज्यं स्यात्सायाह्ने गुडमिश्रितम् ॥
रात्रौ तु पायसं दद्यात्क्षीरान्नञ्च निवेदयेत् ॥
सायाह्नश्च प्रदोषश्च अर्धरात्रमुषस्तथा ।
प्रातर्मध्यन्दिनश्चैव षट्कालं तु विधीयते ॥

नैवेद्यक्रमः—

बिम्बहे मूलबेरस्य आदौ नैवेद्यकं भवेत् ।
तथा उत्सवदेवस्य नैवेद्यञ्च समर्पयेत् ॥

* * * *

अस्त्रेण प्रोक्षणम्। कवचेन परिषेचनम् । प्रणवेनार्हणम् । हस्ततालत्रयम् अस्त्रेण दशदिग्बन्धनम् । दक्षिणहस्ते रं द्वादशाराय चक्राय नमः । तन्मध्ये हं सूर्याय नमः । दीप्ते तद्रश्मिभिः दग्धानि ध्यात्वा वामहस्ते शङ्खाय षोडशदळयुताय विकस्वरश्वेतपद्ममध्ये वं षोडशकलायुताय अमृतमयाय चन्द्रमसे नमः इति स्पर्शयित्वा सुरभिमुद्रां प्रदर्श्य.

End:

अन्येन कारयेन्मोहाल्लोभाद्वा यदि पद्मज ।
कर्ता कारयिता चैव राजा राष्ट्रं विनश्यति ॥
तस्मात्समानलोहेन बिम्बं पीठं प्रभां तथा ।
कारयेदुक्तमार्गेण रथाङ्गाद्यायुधानि च ।
कृत्वा संस्थाप्य विधिवद्यथाशास्त्रोक्तमर्चयेत् ॥

Colophon:

इति वचनसागरं समाप्तम् ॥

R. No. **777.**

Paper. 8⅝ × 7 inches. Foll. 60. Lines, 16 in a page. Dēvanāgarī. Good.

Transcribed in 1912-13 from a MS. of the Benares Sanskrit College.

आपस्तम्बशुल्बसूत्रभाष्यम्.

ĀPASTAMBAŚULBASŪTRABHĀṢYAM.

Foll. 1*a*, 2*a* and 60*b* are left blank.

A commentary on the Āpastambaśulbasūtra described under No. 1058 of the D.C.S. MSS., Vol. II: by Kapardisvāmin.

Complete in six Paṭalas.

Beginning:

उक्ता यज्ञास्तेषामायतनानि यतप्रमाणानि यतदेशानि तेषामायामविस्तारान् वक्तुकाम आह—विहारयोगान् व्याख्यास्यामः । विह्रियन्तेऽस्मिन्नमय इति विहाराः प्राग्वंशादयः, गार्हपत्यादयश्च । युज्यन्तेऽनेनेति योगो रज्जुविशेषः । विहाराणां योगो विहारयोगः । विहारसम्पादनार्थान् रज्जुविशेषान् व्याख्यास्यामः प्रतिपादयामः । अथवा आयामादीनां विहरणमेव विहारस्तेषां योगो विहारयोगः सम्यक् सम्पादनमित्यर्थः ।

End:

ननु सप्तविध इत्यत्रापि सङ्ख्यैव विधीयते । वाक्यान्तरेण तत्रा-रत्निप्रादेशा निविशन्ते । न तत्र सप्तसङ्ख्यासंयोगः । पुरुषाभ्यास एव नारत्निप्रदेशानाम् । तत्र श्लोकः —

विधे नरः . . प्रोक्ता विस्तावत्तिविभावसोः ।
एकविंशे ततो न्यूनं तिलानाञ्चैव सप्ततिः ॥
द्विरुक्तिर्मङ्गलार्था ॥

Colophon:

षष्ठः पटलः ॥

इत्यापस्तम्बीयशुल्बभाष्यं कपर्दिस्वामिकृतं समाप्तम् ॥

संवत् १९६९ ॥

R. No. **778.**

Paper. 9 × 5½ inches Foll 107. Lines, 8 in a page. Dēvanāgarī. Good.

Transcribed in 1912–13 from a MS. of Nīlakaṇṭha Śāstrigal of Tiruvadi.

शाक्तदर्शनम्.

ŚĀKTADARŚANAM.

A comprehensive Sūtra treatise on Śākta religion and philosophy, composed apparently in imitation of the Brahmasūtras of Bādarāyaṇa.

Complete.

Beginning:

अथातश्शक्तिजिज्ञासा । विचित्रजगन्निर्माणादिसामर्थ्यरूपा शक्तिः । न भिन्ना । नाभिन्ना । भेदाभेदा । नैकत्र तमःप्रकाशयोरिव । कल्पित-भेदाभेदानिर्वचनीयतादात्म्यसम्बन्धः । न सुषुप्तावात्मन्यज्ञानं पृथक् भाति । अद्वितीय आत्मा ।

End:

इयं हयग्रीवविद्या ब्रह्मैक्यदायिनी । अष्टादशाध्यायिनी । द्विसप्ततिपादोपेता । शतप्रकरणान्विता । अशीत्युत्तरत्रिशतोपेतसहस्रराजिता ॥

Colophon:

इति शाक्तदर्शनं सम्पूर्णम् ॥

Foll. 105*b*—107*b* are blank.

R. No. **779**.

Paper. 11×9 inches. Foll. 38. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1912–13 from a MS of Vaḍakkuttirumāḷikai in Āḷvārtirunagari.

सङ्गीतसुधाकरः.

SAṄGĪTASUDHĀKARAḤ.

A treatise dealing with Hindu music: by a king named Haripāladēva who is said to be the son of king Kṛmmīri and the author of one hundred works. He also bore the title of Vicāracaturmukha.

Complete, excepting that it wants the beginning.

Beginning:

भूजानिर्गम(र्भ)देवस्सुरभिभुजयशोगर्भसौराष्ट्रनारी-
सङ्गीताकृष्टपाणिप्रणयिमृगचमत्कारवत्सोमनाथः ।
तस्माज्जज्ञे गिरीशात् गुह इव कुशली प्राज्यसाम्राज्यलक्ष्मी(ः)
कृम्मीरिस्सा[मान्या]नुरागव्यतिकरितभुजो वीरगोष्ठीगरिष्ठः ॥
यस्मिन् विस्मयनीयविक्रमकथानिर्धूतपूर्वेश्वरे
दोस्स्तम्भद्वितयावधीरितकुलक्षोणीपचक्रे सति ।
धन्वी मन्मथ एव बन्धमकुटः शैलूष एवोर्जितो-
र्जायांघातन एव सिन्धु(र)बलो विन्ध्याद्रिरेवाभवत् ॥

. . . भूपाल इत्यभिहितस्तस्याभवन्नन्दन-
स्त्यागी सत्यगिरः पराक्रमकथाविस्रम्भविश्वंभरः ।
यस्य स्फूर्जति गर्जितस्मरसुधाव्याजं च मित्रा यशः-
शम्भोः सोमपतेर्विनेतुमिव तां कण्ठस्थितां कालिता(का)म् ॥

अभिनवसुरनाथं हारिसंगीतविद्यं प्रशमितकविखेदं स्पर्शनैः काञ्चनानाम्
अनिशमभिनन्दं यादवीनेत्रचन्द्रो मुदमयति सवेणुर्द्वारवत्यां मुकुन्दः ॥

अरिनृपवधूहस्ती ख्यातो विचारचतुर्मुखः
प्रथितविभवो नित्यं प्रत्यर्थिशाकरशंकरः ।
कलिबलतमश्छेत्ता काव्येतिहासपुराणवित्
जलनिधिरिव [यः] स्वादुः संस्तूयते गुणरत्नविभूम(षकः) ॥

ऐन्द्रस्थानमपाणितेषु कविषु प्राच्येषु भूमण्डली-
मम्भःकम्पनजृम्भदम्बुधिकृतावेष्टामिमां रक्षतः ।
षड्भाषारचितास्पदा रसगुणालंकारिणी निस्तुषा
वक्त्रे यस्य परं विहाररसिका जाता गिरां देवता ॥

वीणातन्त्रविशारदेन विबुधैरङ्गैरभङ्गोज्ज्वलै-
रन्यूना रसनिर्भरं विदधिरे येन प्रबन्धाः शतम् ।
आलापस्वनमात्रभू(घू)र्जरवधूकण्ठानुकण्ठाभ्रम-
न्मूर्च्छामुग्धमनोज्ञगीतिहृदयः कण्ठोपरागोद्यतः ॥

यस्यैवासीदजस्रं कविभणितिसखी सम्यगर्थज्ञदृष्टि-
र्येनैवास्थापि गाढं वचसि मधुरिमा कोऽपि वैदग्ध्यमिश्रः ।
यस्मादेव प्रसेदुः परिचयगहना धर्मकामार्थविद्या-
यस्मिन्नेवोर्जितानां परिणतिरभवद्गीतिविद्यालतानाम् ॥

स सर्वविद्याश्रममेदिनीनां गोपायिता भूजनचक्रवर्ती ।
व्यधत्त सङ्गीतसुधाकराख्यं प्रबन्धमालोलितपूर्वशास्त्रः ॥

नाट्यवेदं पुरा प्रादात् भरताय चतुर्मुखः ।
ताण्डवं तत्र गिरिशस्ताण्डवे समुपादिशत् ॥

लास्यं विलासजनकं मङ्गल्यं सर्वमङ्गला ।
ददौ बाणस्य कन्यायै बहुमानपुरस्सरः ॥

* * * *

एवंविधगुणोपेतं चिरकालप्रयोगतः ।
सङ्क्षिप्तमनभिव्यक्तमथ . . संप्रवर्तितम् ॥
इदं लोकहितार्थाय यथावत्प्रतिपाद्यताम् ।
एवमभ्यर्थितस्तैस्तैर्हरिपालमहीपतिः ॥
प्रबन्धमात्मविहितं स सङ्गीतसुधाकरम् ।
सर्वलक्षणसम्पूर्णमशिक्षयदनुक्रमात् ॥

End:

लयमध्ये कलासः स्याद्यत्र सेनागतग्रहः ।
स स्यात्समग्रहो यत्र कलासस्सर्वसम्मतः ॥
लघुद्रुतौ मुखे यस्य सताले विषमा ग्रहाः ।
तालद्वितीयमध्ये या शून्ये तासलयास्त्रितः ॥
जानन्ति तालान् स(क)लान् सभेदान् यथैव बाला अपि लीलयैव ।
व्यधात्तथा लक्षणमेष तेषां विचारवेधा विबुधाधिपश्रीः ॥

Colophon:

इति श्रीविचारचतुर्मुखश्रीहरिपालदेवविरचिते सङ्गीतसुधाकरे द्वितीयं कान्ताधिकरणं समाप्तम् ॥

रन्ध्रस्यात्ममुखाब्जनिर्गतमरुत्पूर्णानि वेणोः क्रमा
दावृत्त्याङ्गुलिपल्लवैरभिनवान् रागानभिव्यञ्जयत् ।

Fol 37 is left blank.

R No. 780.

Paper. 9 × 5¼ inches. Foll. 44 Lines, 9 in a page. Grantha. Good.

Transcribed in 1912–13 from a MS. of the Vaḍakkuttirumāḷikai in Āḷvārtirunagari.

नक्षत्रमालाव्याख्या—प्रभा.

NAKṢATRAMĀLĀVYĀKHYĀ : PRABHĀ.

A commentary on the Nakṣatramālā described under R. No. 173(*n*) *ant* : by Gārgya-Vēṅkaṭārya, a disciple of Ramyajāmātṛmuni.

Complete

Beginning :

सौम्यजामातुरार्यस्य चरणाम्बुरुहं भजे ।
शठारेर्यत्कृता शुद्धा चित्रा नक्षत्रमालिका ॥
रम्यजामातृयोगीन्द्रदयेशार्यपदाश्रयः ।
गार्ग्यः श्रीवेङ्कटार्योऽस्याः प्रभां वितनुते शुभाम् ॥
अस्मासु वत्सलतया कृपया च भूयः
स्वेच्छावतीर्णमिव सौम्यवरं मुनीन्द्रम् ।
आचार्यपौत्रमभिरामवराभिधान-
मस्मद्गुरुं गुणनिधिं गुरुमाश्रयामः ॥
श्रीमान् पराङ्कुशमुनिर्जीयाद्यज्ज्ञानमुद्रया ।
नेन्द्रियाश्वयुजो नणां नित्यं विषयवीथयः ॥

श्रीमानिति—सा हि श्रीरमृता सतामित्युक्तश्रीसमेतः । सहस्रशाखोपनिषत्समागमरूपद्राविडवेदद्रष्टृतयेति भावः । यद्वा श्रीर्हि मनुष्यस्य स्वर्गो लोक इत्युक्तरीत्या निरतिशयानन्दस्वरूपपरमपदसम्पदस्ति स्वाश्रितानां दातुमिति श्रीमान् । अथवा अन्तरिक्षगतः श्रीमान्, स तु नागवरः श्रीमान्, लक्ष्मणो लक्ष्मिसम्पन्न इत्याद्युक्तभगवत्सेवासमृद्धिमान्, पराङ्कुशमुनिः ।

End :

पराङ्कुशपदाब्जेन परेषां बाह्यकुदृशाङ्कुशायितसूक्तिमतोऽस्माकं प्राप्तशेषिणः पदाब्जेन परिष्कारवती अलङ्कारवती भवेत् । नक्षत्रमालिकायाः शठारेः पदपद्मपरागेण नायकवत्तया सफलं भवतीति भावः ॥

प्रभा नक्षत्रमालाया भाविता भक्तिशालिना ।
पराङ्कुशमुनेर्गार्ग्यवेङ्कटार्यविपश्चिता ॥

Colophon :

इति श्रीगार्ग्यवेङ्कटार्यविरचिता नक्षत्रमालिकाप्रभा सम्पूर्णा ॥

Fol. 44*b* is blank.

R. No. **781.**

Paper. 9×5½ inches. Foll. 12 Lines. 10 in a page. Dēvanāgarī. Good.

Transcribed in 1912–13 from a MS of the Vaḍakkuttirumāḷikai in Āḷvārtirunagari.

श्रीसुन्दरगुरुकाव्यम्.

ŚRĪSUNDARAGURUKĀVYAM.

A poem in praise of saint Śaṭhakōpa *alias* Nammāḷvār.

Incomplete.

Beginning :

श्रीमतो हंसराजस्य गुरोस्सारविदः कवेः ।
चारुपद्मस्य चरणौ लसतां मम मानसे ॥
कल्याणं केसराङ्केन्दुः कल्लोलयतु नस्सदा ।
कारुण्यात् नयनापाङ्गैरारुण्यादब्जवन्दितैः ॥
श्रीमन्तं वकुलधरं तमन्तरिन्धे
सीमन्ते लसितपदं यतीश्वरस्य ।
यो मन्ता मधुरकवीन्द्रभक्तिगीतैः
यो मन्त्रैः सुघटिततालनाथदृष्टः ॥
अस्त्यद्भुतवपुस्तेजोनिस्तुलन्तिन्त्रिणीतले ।
यस्मिन् प्रस्तजगज्ज्योतिर्द्योततेऽव्यक्तविग्रहम् ॥

End :

निजेन वै स्वरूपेण सर्वदाप्यनुभूतया ।
अपूर्ववस्तुवन्नित्यं विस्मयं विदधानया ॥

आत्मानुरूपसगुणसुरूपसुविलासया ।
आश्चर्यस्थास्नुकौमारसौकुमार्यमनोज्ञया ॥

Fol. 12*b* is blank.

R. No. **782**.

Paper. 9×5½ inches. Foll. 60. Lines, 8 in a page. Dēvanāgarī. Good.

Transcribed in 1912–13 from a MS of Nīlakaṇṭha Śāstrigaḷ of Tiruvadi.

गाणेशदर्शनम्.

GĀṆĒŚADARŚANAM.

A treatise in 800 Sūtras on the philosophy underlying the worship of Gaṇēśa as the Supreme Brahman. It is written in imitation of the Brahmasūtras and many of the Sūtras herein found are adaptations therefrom.

Complete.

Beginning :

अथातो गणेशजिज्ञासा । गणेशो वै ब्रह्म । यतोऽस्य संभूत्यादि । ब्रह्मयोनित्वात् । समन्वयात् ब्रह्म । न प्रधानमीक्षतेरात्मशब्दाच्च । अभ्यासादानन्दमयं ब्रह्म । तद्धर्मोपदेशादन्तरादित्यः । तत्प्राणाकाशेन्द्रज्योतिश्शब्दैः । ओंगणेशाद्या अभिधेयाः । अप्राप्यमज्ञेयन्तद्विशुद्धमचित् ।

End :

गणेशलोकगा न पुनरावर्तन्ते । शिष्यगणान् मुक्तान् करोतीति गणकः । मुदं शिष्येभ्यो गलतीति मुद्गलः । भृगुवत्तुङ्गो मुनिषु भृगुः । मत्कृतेयं मीमांसा वसुशतसूत्रात्मिका । अस्या ज्ञाता न पुनरावर्तत इति भृगुः ॥

Colophon :

इति श्रीगाणेशदर्शने चतुर्थाध्याये चतुर्थः पादः ॥

Foll. 59*b*—60 are blank.

R. No. **783.**

Paper. 9×5¾ inches. Foll. 40. Lines, 8 in a page. Dēvanāgarī. Good.

Transcribed in 1912–13 from a MS. of the Vaḍakkuttirumāḷikai in Ālvārtirunagari.

पुरुषसूक्तव्याख्यानम्—सारार्थदीपः.

PURUṢASŪKTAVYĀKHYĀNAM : SĀRĀRTHADĪPAḤ.

A commentary on the Vedic hymn Puruṣasūkta described under No. 200 of the D.C.S. MSS., Vol. I, Part II : by Varadavallabha, son of Dēvarajācārya of Vādhūlagōtra. The hymn is interpreted here so as to describe the greatness of God Varadarāja, worshipped in the Viṣṇu temple at Conjeevaram.

Complete.

Beginning :

अश्वमेधे महायज्ञे स्वयंभुविहिते पुरा ।
प्रादुर्भूतोऽथ दिव्याय पुरुषाय नमो नमः ॥
इतिहासपुराणाभ्यां तस्य तात्पर्यमुच्यते ।
ऋग्भिः षोडशभिर्धात्रा प्रोक्तं वरदवैभवम् ॥
विदुषः फलमन्त्याभ्यां द्वाभ्यामृग्भ्यामिहोच्यते ।

तत्रादौ वरदस्य जगन्मयत्वं सर्वसुलभत्वञ्चाह—सहस्रेति । सहस्रं शिरांसि यस्य स तथोक्तः । शीर्षञ्छन्दसीति शिरश्शब्दस्य शीर्षन्नादेशः ।

* * * *

अत्र वरदस्यानन्तशिरस्कत्वादिकं तदवयवभूतानां देवानामानन्त्यादिति भावः । अङ्गान्यन्या देवता इति श्रुतेः, अङ्गानि देवाः स्वयमन्तरात्मा इति ब्रह्माण्डवचनाच्च, तथा च जगन्मयो वरद इति भावः । यथोक्तं शेषधर्मे—

काञ्ची दिव्यपुरी ज्ञेया तस्यामास्ते जगन्मयः । इति ।

End :

इष्टम् आराधनम् मनिषाण अङ्गीकुरु, तदर्थममुं विग्रहं मनिषाण सर्वं नमस्कारादिकञ्च मनिषाण, इत्येवमब्रुवन्निति पूर्वेणान्वयः । एतत्सर्वं सम्प्रदायावगतमिति सर्वं समञ्जसम् ॥

श्रीमद्वाधूलवरदवल्लभाचार्यनिर्मितः ।
सारार्थदीपस्तत्त्वज्ञैर्हृद्गुहायां समाप्यताम् ॥

Colophon :

इति श्रीमद्वाधूलकुलतिलकश्रीदेवराजाचार्यतनयस्य श्रीवरदवल्लभाचार्यस्य कृतिषु सारार्थदीपः सम्पूर्णः ॥

The last fol. is blank.

R. No. **784.**

Paper. 11 × 9 inches. Foll. 232. Lines, 18 in a page Grantha. Good.

Transcribed in 1912–13 from a MS of Bēlūr in the Mysore province.

Foll. 1—3 give the contents of the work entitled सात्वतामृत. Fol. 4 is left blank.

(*a*) सात्वतामृतम्.

SĀTVATĀMṚTAM.

Foll. 5*a*—182*b*.

A manual of ritualistic procedure connected with the worship of divine images in temples, especially with the worship of Nārāyaṇa in the shrine at Yadugiri, *i.e.*, Melkota (in the Mysore State). The work is said to be based on the Sāttvatasaṁhitā of the Pāñcarātrāgama, supplemented wherever necessary from the Īśvarasaṁhitā. It consists of five chapters, the subjects dealt with therein being given in the introduction: they are also apparent from the names of the Pariccheḍas given below.

By Yōgānandabhaṭṭārya, son of Nṛsiṁhabhaṭṭārya of Mauñjāyana family and chief priest in the temple at Melkota.

(१) भगवदाराधनविधिः ।

(२) महोत्सवाद्यखिलोत्सवविधिः ।

(३) प्रधानादिविंशतिविधस्नपनक्ष्मापरिग्रहपूर्वकभगवद्बिम्बादिनिखिलप्रतिष्ठाविधिः ।

(४) जीर्णोद्धारादिप्रायश्चित्तविधिः ।

(५) दीक्षाभिषेकविधिः ।

Complete.

Beginning:

श्रीमद्यादवशैलाग्रशेखरं सद्गुणाकरम् ।
योगानन्दनृसिंहाख्यदैवतं पर्युपास्महे ॥
श्रीशं श्रियञ्च सर्वेशं शठजिन्नाथयामुनान् ।
श्रीमद्रामानुजार्यादीन् सन्ततं हृदि चिन्तये ॥
शाण्डिल्याद्या इमे पञ्च दीक्षाचार्या मुनीश्वराः ।
दिशन्तु बुद्धिं संशुद्धां भगवच्छास्त्रवर्त्मनि ॥
मौञ्जायनकुलाब्धीन्दुर्यद्वद्रीशपदार्चकः ।
योगानन्दार्यभट्टार्यस्तनुते सात्त्वतामृतम् ॥
आलोक्य(ड्य) सात्त्वताम्भोधिमुद्धृतं सात्वतामृतम् ।
आदाय यादवाद्रीशमाराधयत सज्जनाः ॥
सङ्कर्षणादिभिर्ज्ञेया क नु सात्त्वतसंहिता ।
काहमज्ञस्तथाप्यत्र भक्तिर्नस्समचोदयत् ॥
सङ्गृह्य सात्त्वतोक्तार्थास्तदनुक्तांस्तु चाखिलान् ।
ईश्वराभिधतन्त्राच्च सात्त्वतार्थोपपादकान् ॥
सङ्गृह्य सुखबोधार्थं प्रयोगोऽयं विलिख्यते ।
आराधनं प्रथमतो द्वितीये निखिलोत्सवाः ॥
अभिषेकविधिर्बिम्बप्रतिष्ठा च तृतीयके ।
प्रायश्चित्तं चतुर्थे तु दीक्षाकार्यन्तु पञ्चमे ॥
इत्थं पञ्चपरिच्छेदैः सात्वतामृतसंस्थितिः ।

आदौ तावद्भगवदाराधनविधिरुच्यते—

End:

क्षन्तव्यं सुप्रसन्नेन श्रद्धापूतेन चेतसा ॥

इति विज्ञाप्य श्रीपादतीर्थं गृहीत्वा, चुलकेन त्रिवारं पीत्वात्मानं सम्प्रोक्ष्य ।

अयमाज्ञाकरो दासः कृतकृत्यस्तवाधुना ।

इत्यात्मनिवेदनं कृत्वा, आचार्याय गोभूहिरण्यादिकं यथाशक्ति समर्प्यान्यांश्च यतीन् भागवतान् दक्षिणाभिस्सन्तोष्याचार्येणानुज्ञातः शिष्य आचार्यचिह्नैः स्वस्तिवाचनैः सह रथादिकं यानमारुह्य ग्रामप्रादक्षिण्येन स्वगृहं प्रविश्य भागवतान् भोजयित्वा दक्षिणादिकं दत्वा गुरोराज्ञया दीक्षितैः भ्रातृसुहृत्सम्बन्धिबान्धवैः सह स्वयञ्चाश्नीयात् ॥

इत्यभिषेकविधिस्सम्पूर्णः ॥

Colophon:

इति श्रीमौङ्गयायनकुलकलशपारावारसुधाकरनृसिंहभट्टार्यतनयेन श्रीपाञ्चरात्रशास्त्रपारङ्गतेन श्रीमद्यदुगिरिशिखरशेखरायमाणश्रीमन्नारायणपादपाथोजकैङ्कर्यधुरन्धरेण योगानन्दभट्टाचार्येण विरचिते श्रीसात्वतामृते दीक्षाभिषेकविधिर्नाम पञ्चमः परिच्छेदः ॥

(*b*) सात्वतामृतसारः.

SĀTVATĀMṚTASĀRAḤ.

Foll. 183*a*—232*a*. Fol. 232*b* is left blank.

A compendium of the work described in the last subdivision dealing with all the important points mentioned therein: by the same author as that of the last.

Complete.

Beginning:

श्रीमद्यादवशैलाग्रशेखरं सद्गुणाकरम् ।
योगानन्दनृसिंहाख्यदैवतं पर्युपास्महे ॥
ग्रन्थविस्तरभीतानां सुखेनाभ्याससिद्धये ।
सात्वतामृतसारोऽयं लिख्यतेऽत्र समन्त्रकः ॥

देशिको ब्राह्मे मुहूर्ते समुत्थाय स्वनित्यकर्माणि निर्वर्त्य, पाणिपादौ प्रक्षाल्याचम्य, मन्दिरान्तः प्रविश्य, प्रणम्य, प्रदक्षिणीकृत्य, विष्वक्सेनादीन् नमस्कृत्य, घण्टानादं कृत्वा, शङ्खादीनाघोष्य ।

प्रबुद्ध त्वं जगन्नाथ प्रबुद्ध परमेश्वर ।
प्रबुद्ध पुण्डरीकाक्ष भक्तानामनुकम्पया ॥

End:

ओं सर्वाकर्षणकरमहामायाय ओमङ्कुशाय फट् । ओमखण्डितपराक्रमाय मुद्गराय फट् । ओं दर्पप्रशमनकर्त्रे वज्राय फट् । ओं तेजोमालिने शक्तयै फट् । इति किरीटादिभूषणवाहनचक्राद्यायुधमन्त्राः लक्ष्मीसुदर्शनादिमन्त्राः भक्तमन्त्राः परिवारमन्त्राश्च नित्याराधनोक्ताः ॥

श्रीयोगानन्दभट्टार्यतनयेन विपश्चिता ।
सात्वतामृतसारोऽयमुद्धृतस्सात्वतामृतात् ॥

Colophon:

इति सात्वतामृतसारस्सम्पूर्णः ॥

R. No. 785.

Paper. 11 × 9 inches. Foll. 56. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1912–13 from a MS. belonging to Śrīnivāsapāṭṭarācāriyar of Kumbakonam.

(*a*) रामभद्रशतकम्.

RĀMABHADRAŚATAKAM.

Foll. 1*a*—12*b*.

A centum of stanzas of praise and prayer addressed to Rāma: by Rāmabhadradīkṣita.

Complete.

Beginning:

त्रातारं कमुपैमि कस्य भुवने भूतानुकम्पेति च
ध्यातासु त्रिदशावलीषु न भवत्येतादृगेकोऽपि यत् ।
वातापत्यनिवेशितप्रणयिनीदूताधिकारं ततः
सीताविभ्रमदेशिकं मृगयते जातादरं मे मनः ॥

End:

वल्गत्कल्लोलमालं वलदहिकमठग्राहपाठीनशैलं
शुष्यन्मुक्ताप्रवालं चुरिचुरितमहाबाडबज्वालमालम् ।
सिन्धौ(न्धू)रुत्वाधिवेलं ज्वलदिषुधनुषो यस्य भेजेऽङ्घ्रिमूलं
देवे तस्मिन् सखेलं वसति मनसि मां वीक्षितुं कोऽपि नालम् ॥

Colophon:

इति श्रीरामभद्रदीक्षितविरचितं रामभद्रशतकं समाप्तम् ॥

(*b*) नारदस्मृतिः.

NĀRADASMṚTIḤ.

Foll. 13*a*—24*a*.

A work giving rules relating to the conduct of life by pious Hindus: by Nārada. The portion contained in this manuscript deals with the conduct of the worship of Viṣṇu and the performance of Sandhyāvandana.

Breaks off in the second Adhyāya.

Beginning:

नारदं मुनिमासीनं नारायणपरायणम् ।
यथान्यायं सम्प्रणम्य कण्वः प्राह तपोनिधिः ॥
भगवन् सर्वधर्मज्ञ सर्वलोकहिते रत ।
कैः कर्मभिर्नरा लोकानुत्तमाधममध्यमान् ।
प्राप्नुवन्ति महाभाग तानि कर्माणि मे वद ॥

नारदः—

अधुना सम्प्रवक्ष्यामि त्रिविधं कर्म तत्त्वतः ।
सात्त्विकं राजसञ्चैव तामसं त्रिविधं स्मृतम् ॥

* * * *

कण्वः—

विष्ण्वर्चनाविधिं ब्रह्मन् तत्त्वतो वद साम्प्रतम् ।
अहमप्यर्चयित्वा तं यास्यामि परमां गतिम् ॥

नारदः—

शृणु कण्व प्रवक्ष्यामि विष्ण्वर्चनविधिं शुभम् ।
यत्कृत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥

Colophon:

इति नारदस्मृतौ प्रथमोऽध्यायः ॥

अथ द्वितीयोऽध्यायः—

अथातस्सम्प्रवक्ष्यामि सन्ध्यां स्मृतिभिरीरिताम् ।
नोपासयति तां मोहात्पतत्येव न संशयः ॥

End:

प्राणायामे तु गायत्र्या वसिष्ठ ऋषिरुच्यते ।
छन्दस्तु देवी गायत्री परमात्मा श्रियः पतिः ॥

Fol. 24*b* is blank. Foll. 25*a*—26*b* contain a list of the number of varieties of Sālagrāma which is a kind of black river-worn ammonite regarded as representing Viṣṇu and therefore worshipped by Hindus.

Foll. 27 and 28 are blank.

(*c*) सालग्रामलक्षणम्.

SĀLAGRĀMALAKṢAṆAM.

Foll. 29*a*—56*a*. Fol. 56*b* is left blank.

Same work as the one described under No. 5809 of the D.C.S. MSS. Vol. XII.

Incomplete.

R. No. **786.**

Paper. 11 × 8⅝ inches. Foll. 31. Lines, 10 in a page. Telugu. Good.

Transcribed in 1912–13 from a MS. in the possession of V. Paṭṭābhirāmamūrti of Vizianagaram.

सारसिद्धान्तकौमुदी.

SĀRASIDDHĀNTAKAUMUDĪ.

Similar to the work described under No. 1455 of the D.C.S. MSS., Vol. III. By Varadarāja, son of Durgātanaya. This work is different from the Laghusiddhantakaumudī and Madhyasiddāntakaumudī by the same author.

Deals with the following subjects :—

1*a*	संज्ञाप्रकरणम्.	26*a*	कारकाणि.
2*a*	अच्सन्धिः.	27*a*	अव्ययीभावः.
5*a*	हल्सन्धिः.	27*b*	तत्पुरुषः.
6*b*	विसर्गसन्धिः.	29*a*	बहुव्रीहिः.
7*b*	शब्दाधिकारः.	29*b*	द्वन्द्वः.
15*b*	तिङन्तप्रकरणम्.	30*a*	तद्धिताः.
25*a*	कृत्प्रत्ययाः.	31*b*	स्त्रीप्रत्ययाः.

Complete.

Beginning:

नत्वा वरदराजः श्रीपाणिन्यादिमुनित्रयम् ।
करोति बालबोधाय सारसिद्धान्तकौमुदीम् ॥

अइउण्, ऋलृक्, एओङ्, ऐऔच्, हयवरट्, लण्, ञमङणनम्, झभञ्, घढधष्, जबगडदश्, खफछठथचटतव्, कपय्, शषसर्, हल्.

इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि । अ(ह्)कारादिष्वकार उच्चारणार्थः ।

हकारो द्विरुपात्तोऽयमटि शल्यपि वाञ्छता ।
अर्हेणाधुक्षदित्यत्र द्वयं सिद्धं भविष्यति ॥

End:

सूर्याद्देवतायाञ्चाप्; सूर्यस्य स्त्री सूर्या । देवतायां किम्? सूर्यागस्त्ययोश्च्छे च ङ्योश्च यलोपः; सूरी कुन्ती । ऊङुतः । उदन्तादूङुत्पत्तिः । कुरूः । श्वशुरस्योकाराकारलोपश्च : श्वश्रूः । यूयस्तिः; युवतिः । इति स्त्रीप्रत्ययाः ॥

कृता वरदराजश्रीदुर्गातनयसूनुना ।
वेदवेदप्रकाशोऽयं सारसिद्धान्तकौमुदी ॥

R. No. **787.**

Paper. 11 × 9 inches. Foll. 6. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1912-13 from a MS. of the Vaḍakkuttirumāḷikai in Ālvārtirunagari.

कोहलरहस्यम्.

KŌHALARAHASYAM.

A treatise specially dealing with the various kinds of musical modes, such as those appropriate (1) for the morning hours, (2) for the evening hours, (3) those intended to be sung by males, (4) those intended to be sung by womenkind, etc. The sage Kōhala, son of Bharata, on being reqested by Mataṅga, is said to have revealed this subject to him.

Contains the thirteenth Adhyāya only.

Beginning:

पुरा हिमवतश्शृङ्गे सुरम्ये हेममण्टपे ।
माणिक्यवज्रवैडूर्यवितानपरिशोभिते ॥
यक्षगन्धर्वसिद्धौघसुराकिन्नरशोभिते ।
तस्मिन् गीतिसभामध्ये ब्रह्माणमिव तेजसा ॥
सुखोपविष्टं वरदं कोहलं भरतात्मजम् ।
कृताञ्जलिपुटो भूत्वा मतङ्गः परिपृच्छति ॥

कति रागाः प्रगातव्याः प्रभाते मुनिसत्तम ।
तथैव कति रागाश्च सायङ्काले शुभप्रदाः ।
कति रागाः षाडबाश्च सम्पूर्णा औडवास्तथा ।
स्त्रीपुन्नपुंसका रागाः कति वा प्रतिपादिताः ॥

End:

या स्त्री स्यात्पुरुषध्वाना यः पुमान् स्त्रीध्वनिर्भवेत् ।
तयोः श्रोतुश्च नियतमायुर्लक्ष्मीश्च नश्यति ।
सुस्वरं श्रुतिसंयुक्तं सुव्यक्तं मधुरान्वितम् ।
नादमीदृग्विधं श्रेष्ठमायुर्लक्ष्मीश्च पुष्यति ॥

Colophon:

इति कोहलरहस्ये त्रयोदशोऽध्यायः ॥

Fol. 5*b* gives some stanzas relating to Saṅgīta. Fol. 6 is blank.

R. No. **788.**

Paper. 11×9 inches. Foll. 36. Lines, 20 in a page. Dēvanāgarī Good.

Transcribed in 1912–13 from a MS. of the Vaḍakkuttirumāḷikai in Āḷvārtirunagari (Tinnevelly district).

सुभद्रापरिणयः.

SUBHADRĀPARIṆAYAḤ.

Foll. 1*a*—35*a*. Foll. 35*b* and 36 are blank.

A drama in five acts based on the Puranic account of the marriage between Subhadrā, Kṛṣṇa's sister, and Arjuna: by Nallākavi, son of Bālacandradīkṣita of Kauśikagōtra, and a resident of Kaṇḍaramāṇikka, a village in the Chōla land, which is said to have been the place of residence of the celebrated poet Uddaṇḍa. According to the introduction, the drama was first put on the stage before an audience assembled on the occasion of the annual temple festival at Madhyārjuna, called Tiruvidamarudur in Tamil, in the Tanjore district.

Complete.

Beginning:

चूडाचुम्बितकैरवप्रणयिनो लम्बोदरस्य प्रभोः
गण्डाभोगतरङ्गितो वितरतु श्रेयांसि दानद्रवः ।
स्तोकान्दोलितकर्णताळयुगलव्यापारदूरीकृता-
प्यन्वेति स्वयमेव यं रसवशादभ्येत्य भृङ्गावलिः ॥

नान्द्यन्ते सूत्रधारः—

तातेनानुमता स्वबन्धुभिरपि श्रेयःपरामर्शिभिः
भक्त्या संयमिवेषभूषिततनुं शुश्रूषमाणा शिवम् ।
आलापैर्मधुरैरपाङ्गवलनैश्चोद्भिन्नचेतोभुवा
तेनैवाग्रकरस्पृशा बहुमता कात्यायनी पातु वः ॥

(सविनयं सभाभिमुखमुपसृत्य) भो भो भूभृत्कुमारीकामुकस्य भगवतो मध्यार्जुनप्रभोः यात्रायामुपस्थितास्सर्वे सामाजिकाः एषको विज्ञापयामि—

उदारवस्तुविस्तारमुन्मस्तकरसोदयम् ।
नवसन्दर्भितं किञ्चिन्नाटकं वः प्रदर्श्यते ॥

(नेपथ्याभिमुखमवलोक्य) आर्ये इतस्तावत् ।

प्रविश्य नटी—अ॰अ इअंहि ।

सूत्रधारः—आर्ये स्मर्यते किल सुभद्रापरिणयं नाम नाटकम् ।

प्रबन्धो यस्योर्वीं तिलकयति नल्लाकविरिति
प्रतीतः प्रागल्भ्यं दधदखिलतन्त्रेष्वपि समम् ।
मनोवास्तव्यश्रीगजवदनदानाम्बुलहरी-
विवर्तैर्बाग्गुम्भैर्विहरणनिकेतीकृतमुखः ॥

नटी—अ॰अ कहं विसुमरिस्सम्। सि॰खिदा खु अस्सि क॰व॰पबन्धे जाणामि अ॰अस्स कइम्। जोगोहणसेळादो मणी विअ अप्पण्णो वाळचन्ददि-किख आदो। केदु इमिणा को देसो अलंकरिज्जदित्ति ण आणेमि।

सूत्र—स खलु अधिवसति चोलमण्डलमण्डनमुद्दण्डपण्डिताध्युषितं कण्डरमाणिक्कमिति ख्यातं महदग्रहारमाणिक्यम्। तदेतन्नाटकं प्रयोक्तुकामोऽस्मि।

End:

राजानो जगतीमवन्तु जनितामोदा भवन्तु प्रजाः
वर्णास्सन्तु सदा स्वधर्मनिरताः काले वृषा वर्षतु।
ब्रह्माणः कवयन्तु सुन्दरगिरः पुष्यन्तु काव्यश्रियः
प्रत्यग्वस्तुनि नित्यमस्य च कवेः स्याद्वृत्तिराभ्यन्तरी॥

इति निष्क्रान्तास्सर्वे॥ पञ्चमोऽङ्कः॥

Colophon:

इति श्रीमत्कौशिकान्वयकलशसिन्धुचन्द्रबालचन्द्रदीक्षितेन्द्रतनूभव-श्रीमन्नल्लाकविकृतिषु सुभद्रापरिणयं नाम नाटकं समाप्तम्॥

R. No. **789.**

Paper. 11×9 inches. Foll. 88. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1912-13 from a MS. of the Vaḍakkuttirumāḷikai in Ālvārtirunagari.

श्रीभाष्यदीपिका.

ŚRĪBHĀṢYADĪPIKĀ.

Foll. 1*a*—86*a*.

A gloss on the Śrībhāṣya of Rāmānujācārya described under No. 4943 of the D.C.S. MSS., Vol. X. The author, whose name is not given here, salutes Mahācārya in the first stanza.

Breaks off in the fourth Pāda of the fourth Adhyāya.

Beginning :

आनम्य श्रीमहाचार्यं श्रियं श्रीवेङ्कटा . . . ।

. . . . . अखिल-
चेतनोज्जिजीवयिषया आदौ तावन्मीनरूपेणावतीर्य चतुर्मुखद्वारा चेतने-
भ्यो नित्यनिर्दोषमपौरुषेयं वेदाख्यप्रमाणं प्रदाय पुनः स्वयमेव व्यास
रूपेणावतीर्य स्वशिष्येण जैमिनिना पूर्वभागस्याराधनरूपकर्मप्रतिपादकत्वे
प्रतिपादिते सति आराध्यस्वरूपप्रतिपादकोत्तरभागवैशद्याय शारीरकसूत्रा-
णि चकार । तान्यपि सूत्राणि बाह्यकुदृष्ट्यादिभिरुपद्रुतानीति मत्वा
बोधायनद्रमिडगुहदेवभारुचिटङ्कार्यप्रभृतिभिः परमतनिरसनपूर्वकस्वमत-
स्थापकत्वेन व्याख्यातानि । तेषां व्याख्यानानां . . . . .
यांतसबो . . . . . सदसद्विवेक
. . . . . चार्यविरचितं प्राचीनमेव समीचीनं
स्वान . . . . कीकुर्वन् शारीरकं शास्त्रं व्याचिख्यासिषुः(सुः)
प्रारिप्सितस्य ग्रन्थस्याविघ्नपरिसमाप्तिप्रचयगमनार्थं स्मृत्याचारसिद्धमिष्ट-
देवतोपासनरूपं मङ्गलमाचरति—अखिलेत्यादिश्लोकेन । अत्र वेदान्ताचार्यै-
रनुगृहीतम्—शिष्टाचारादिसिद्धमिष्टदेवताभक्त्याशीरूपं मङ्गलं स्वात्मा-
नुष्ठितमपि शिष्यशिक्षार्थं स्वकृतानुकीर्तनेन तेषां महिष्ठमङ्गलार्थश्चादौ
निबध्नाति भगवान् भाष्यकारः ।

गुरोराचारमाश्रित्य वर्तन्ते मङ्गलार्थिनः ।
यान्यस्माकामिति . . . यते ॥

इत्युक्तत्वादखिलेत्यादि . . . . दशार्थास्साध . .
. . ता । इत्यारभ्य योजनाभेदेनार्थदशकं प्रतिपाद्यत इति ।
मङ्गलाचारयुक्तानामित्यादि स्मर्यते । श्रोतृबुद्धिसमाधानार्थं शास्त्रार्थसङ्-
क्षेपश्चार्थतः क्रियते । तेन वस्तुनिर्देशः कृतः ।

End:

एवं गतिपादे प्रथमाधिकरणे अर्चिरादिमार्गेणैव विदुष मित्युक्तम् । वायुशब्दादित्यधिकरणे वायुदेवलोकयोरेकार्थत्वम् । तटितोधिरित्यधिकरणे तटितोऽनन्तरं वरुणादीनां निवेशः । आतिवाहिका इत्यधिकरणे अर्चिरादयः आतिवाहिका इत्युक्तम् । कार्यं बादरिरित्यधिकरणे प्रतीकालम्बनव्यतिरिक्तान् ब्रह्मोपासीनानेव नयतीत्युक्तम् ॥

Colophon:

इति श्रीशारीरकमीमांसाभाष्यदीपिकायां चतुर्थस्याध्यायस्य तृतीयः पादः समाप्तः ॥

चतुर्थे पादे मुक्तानामैश्वर्यचिन्ता क्रियते । तत्र प्रथमाधिकरणे । "सम्पद्याविर्भावस्स्वेन शब्दात्" ॥

* * * *

चतुर्थाध्याये आवृत्तिरसकृदुपदेशादित्यारभ्य उत्क्रान्तिपादे सम्पद्याविर्भावस्स्वेन शब्दादित्याद्यधिकरणेषु प्राप्तेः फलस्वरूपं संज्ञा.

Foll. 86*b*—88*b* are blank.

R. No. 790

Paper. 11×9 inches. Foll. 26. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1912-13 from a MS. of the Vaḍakkuttirumāḷikai in Āḷvārtirunagari.

वेदान्तविलासव्याख्या — रत्नदीपिका.

VĒDĀNTAVILĀSAVYĀKHYĀ: RATNADĪPIKĀ.

A commentary on the Vēdāntavilāsa, also called Yatirājavijaya, which is a drama in six acts based on the leading incidents in the life of Rāmānujācārya.

Complete.

Beginning:

श्रीवेदान्तविलासस्य नाटकस्य यथामति ।
प्रणम्य वरदं व्याख्या क्रियते रत्नदीपिका ॥
अन्तर्वेदान्तसाम्राज्यं बहिस्साहित्यसौरभम् ।
विदग्धः खलु वेदान्तविलासं भोक्तुमर्हति ॥

अत्र राधया सह सुप्तस्सन् कृष्णः श्रीभूमिनीलादेवीरुत्स्वप्नयितवान् । इदमुच्यते—पद्मोते । अत्र पद्मे नीले महीति च सम्बुद्धयः । राधापक्षे पद्मे इति नयने रूप्येते । नीले इति कुन्तलविशेषणम् । महितैः पूजितैः । अनेन भाष्यान्तरात् सूत्रविषयवाक्यानां योजनाभेदस्सूच्यते । कयाचित्स्वदुहितुर्मोहकारणं पृष्ट्वा काचिदीक्षणिका दैवज्ञातं मोहकारणं व्यञ्जनावृत्त्या धूर्तकृष्ण एवेत्याह—कूल इति ।

End:

अचिदिति । मन्त्रार्थवादादिरूपेषु सर्वेषु वेदार्थेषु परमार्थतः प्रामाण्याभ्युपगमादिति भावः । मन्त्रित्वमर्थनिर्वाहकत्वम् । इति यत्किञ्चिदस्माभिरुपात्तम् । अन्यच्च सर्वमध्यात्मनाटकतत्त्वविद्भिः स्वयमूहनीयम् ॥

Colophon:

इति वेदान्तविलासटीकायां षष्ठोऽङ्कस्समाप्तः ॥

R. No. **791.**

Paper. 11 × 8¼ inches. Foll. 152. Lines, 20 in a page. Telugu. Good.

Transcribed in 1912-13 from a MS. of S. P. V. Raṅganāthasvāmi of Vizagapatam.

तत्त्वकौस्तुभः.

TATTVAKAUSTUBHAḤ.

Same work as the one described under No. 4583 of the D.C.S. MSS., Vol. IX.

This being a complete copy, the end is extracted below.

End:

अयन्ते योनिरिति मन्त्रे नम इति पदं भित्त्वा नमस्सन्नारोहेति योजनामाश्रित्य मातृगमनकर्तव्यताया अपि त्वया स्वीकर्तव्यतापत्तेः । तस्मात्सकलवैदिकमर्यादां न्यायोपष्टम्भं चोल्लङ्घ्य प्रवृत्तमिदं मध्यदर्शनं प्रामाणिकैरुपेक्षणीयमिति स्थितम् । एवं स्थिते सति श्रीशङ्करभगवत्पाद-कृतं निसर्गोज्ज्वलं वाचस्पतिमिश्रप्रभृतिभिः पण्डितवर्यैः निष्कर्षं प्रापितः शारीरकमेव भाष्यम् ॥

Colophon:

इति श्रीमद्विद्वन्मकुटमाणिक्यलक्ष्मीधरभट्टसूनुभट्टोजिभट्टविरचिते तत्त्वकौस्तुभे द्वितीयपरिच्छेदे चतुर्थस्याध्यायस्य चतुर्थः पादः ॥

Fol. 152*b* is blank.

R. No. **792.**

Paper. 11 × 9 inches. Foll. 60. Lines, 20 in a page. Grantha. Good.

Transcribed in 1912–13 from a MS. of the Vaḍakkuttirumāḷikai in Āḷvartirunagari.

(*a*) पदार्थतत्त्वखण्डनम्.

PADĀRTHATATTVAKHAṆḌANAM.

Foll. 1*a*—49*a*.

Same work as the one described under No. 4264 of the D.C.S. MSS., Vol. VIII.

Complete.

(*b*) ज्ञानद्वयकारणताविचारः.

JÑĀNADVAYAKĀRAṆATĀVICĀRAḤ.

Foll. 49*b*—58*b*. Foll. 59 and 60 are blank.

A discussion on the necessary antecedence of the two premises required for drawing a logical inference.

Complete.

Beginning :

अनुमितिं प्रति साध्यव्याप्यत्वाद्यवच्छिन्नहेतुकप्रकारतानिरूपितपक्ष-विशेष्यताशालिज्ञानत्वरूपविशिष्टपरामर्शत्वेन . . . . . व्याप्यत्वावच्छेदकप्रकारकव्याप्तिज्ञानत्वेन व्याप्यतावच्छेदकप्रकारकपक्ष-धर्मताज्ञानत्वेन च हेतुताद्वयम् । इत्थञ्च . . . . . प्यो धूम-वान् पर्वत इत्याकारकज्ञानद्वयात्तथाविधसमूहालम्बनाद्वानुमितिरुत्पद्यते ।

End :

गौरवं मीमांसकमते । नैयायिकमते तत्स्थलीयतादृश्यानुमितिसामग्री-नियतत्वोपदर्शितसामग्रीणामनन्तानां प्रतिबध्यतावच्छेदकगौरवमेव समी-चीनतया प्रतिभाति ॥

Colophon :

इति ज्ञानद्वयकारणताविचारः समाप्तः ॥

R. No **793.**

Pape . 11×9 inches. Foll. 76. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1912-13 from a MS. of the Vaḍakkuttirumāḷikai in Āḷvārtirunagari.

वकुलमालिनीपरिणयः.

VAKULAMĀLINĪPARIṆAYAḤ.

A drama in four acts dealing with the marriage of Vakulamālinī, the daughter of a king named Kārivasu, with Kṛṣṇa, the Lord of Dvāraka : by Vīravalli Śrīnivāsa, son of Varadanārāyaṇa of Kauṇḍinyagōtra and a resident of Śrīmuṣṇa. The author is said to have written another drama called Ambūjavallīpariṇaya.

Complete.

Beginning:

नान्दी—

चन्द्राकारयदीयचारुनखरश्रेणीप्रभामालिका
सेवानम्रसुराङ्गनाकचभरे मन्दारमालायते ।
मुक्तामञ्जरिकायतेऽधिहृदयं श्रीमुष्णधाम्नो हरेः
भूयादम्बुजवल्लितत्पदयुगी भूम्ने मुदां संपदाम् ॥

अपि च—

कस्याश्चिन्मुखचुम्बनैः सहृदयैः कस्याश्चिदालोकनैः
कस्याश्चित्कुचपीडनैरपि दृढैः कस्याश्चिदालिङ्गनैः ।
सर्वासामिति संमदं जनयतः श्रीसत्यभामापतेः
दाक्षिण्यं दिशतादिदं नखदशामुद्राणि भद्राणि नः ॥

* * * *

. . . कारी खु सो कई । छा— अम्बुजवल्लीपरिणयकारी खलु स कविः ।

* * * *

(नेपथ्याभिमुखमवलोक्य) आर्ये पश्यैष ते भागिनेयो मदिङ्गितज्ञः चोलमण्डलाधिपेन विजयधन्वना निजमनोरथलिप्सुना युधि निबद्धस्य पाण्ड्यमण्डलाखण्डलस्य महाराजकारिवसोरमात्यसिद्धयोगस्य बन्धनान्निर्गतस्य भूमिकामादाय इत एवाभिवर्तते ।

मालवः—देव ज्ञायते खलु निजकुमारिकानिमित्तं निखिलनृपालकुमारप्रतिच्छन्दकं संपादितवती तत्रभवतीति ।

सिद्ध—अये मालव किमत्र चित्रम् । अन्यदपि ज्ञायत एव । तत्रापि द्वारकानाथप्रतिबिम्बालम्बनात् तूलायापि न सा मेने भूपालान् भर्तृदारिका ।

End:

तथापीथमस्तु भरतभारती—

नित्यं सस्यनिरन्तरास्तु पृथिवी सौख्यं सतामेधतां
देशोऽयं निरुपद्रवोऽस्तु सततं राजा स्वयं धार्मिकः ।
श्रेयोभिः परिवर्धतां नवनवैः श्रीराजगोपः प्रभुः
नित्यं श्रीर्भविता सभापतिरयं श्रीमुष्णधामा हरिः ॥

इति निष्क्रान्तास्सर्वे ॥

Colophon:

इति श्रीमुष्णनगरनिवासिकौण्डिन्यकुलतिलकायमानश्रीवीरवल्लिवरद-नारायणगुरुतनयश्रीनिवासमहागुरुकृतिषु वकुलमालिनीपरिणयनाम्नी नाटिका सम्पूर्णा ॥

Foll. 2 and 74*b*—76*b* are blank.

R. No. **794.**

Paper. 11 × 9 inches. Foll. 76. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1912-13 from a MS. of S. P. V. Raṅganāthasvāmi of Vizagapatam.

क्षीरतरङ्गिणी.

KṢĪRATARAṄGINĪ

Foll. 1*a*—74*b*.

A commentary on the Dhātupāṭha of Pāṇini dealing with the meanings of verbal roots and other important grammatical points relating to them: by Bhaṭṭakṣīrasvāmin.

Complete.

Beginning:

तरङ्गसुभगं क्वणन्मधुपकिङ्किणीजालिनं
करं प्रचलपुष्करारुणशिखाग्रमुल्लासयन् ।
विभुर्जयति विघ्नजिद्भुवनपृष्ठमारोपयन्
दुरन्तदुरितक्षयाद्विजयवैजयन्तीमिव ॥

धातुवैषम्यशमनाद्वाङ्मयाप्यायिनी सताम् ।
क्षीरस्वामिप्रसूतेयं वृत्तिः क्षीरतरङ्गिणी ॥

सूत्रव्याख्या कार्यजातं गणानां सेट्त्वानिट्त्वोपग्रहादि टीफ(दीत्फ)लश्च ।
अष्टाध्याय्यां ये विशेषप्रयोगा धातोर्धातोर्दर्शितास्ते विशेषात् ॥

End:

धातूनामर्थनिर्देशोऽयं निदर्शनार्थ इति सौनागाः । यदाहुः—

क्रियावाचित्वमाख्यातुमेकैकोऽर्थः प्रदर्शितः ।
प्रयोगतोऽनुसर्तव्या अनेकार्था हि धातवः ॥

Colophon:

इति भट्टक्षीरस्वाम्युत्प्रेक्षितधातुवृत्तौ क्षीरतरङ्गिण्यां चुरादिगणः संपूर्णः ॥

Foll 75 and 76 are blank.

R. No. **795.**

Paper. 11 × 9 inches. Foll. 86. Lines, 20 in a page. Telugu. Good.

Transcribed in 1912–13 from a MS. of Paṭṭābhirāma Śāstrin of Vizianagaram.

आपस्तम्बीयाध्वरतन्त्रव्याख्या—प्रयोगरत्नमाला.

ĀPASTAMBĪYĀDHVARATANTRAVYĀKHYĀ: PRAYŌGARATNAMĀLĀ

A commentary on the Śrautasūtra of Āpastamba which is a treatise on Vedic sacrifices. It is called Prayōgaratnamālā and is by Caunḍappācārya, son of Cinnārya and elder brother of Ādityadēva and Mañcapārya, and minister of the king Bhūpati, who was the son of Yuva Bukkabhūpāla and Tippāmbā and grandson of Vīraharihara, king of Vijayanagar. It is stated in the introductory stanzas that the commentary was written at the command of the king Bhūpati, and that Vidyāraṇya, having been requested by Paṇḍits like Caunḍapārya to comment on the Śrautasūtras, explained the Hautra and Audgātra portions thereof.

Contains Paṭalas 1 to 5 complete in the first praśna.

Beginning :

नमो विरिञ्चिविष्ण्वीशभेदेन परमात्मन ।
सर्गस्थितिविनाशानां व्यक्तयेऽव्यक्तमूर्तये ॥

* * * *

पदवाक्यप्रमाणानां पारदृश्वा महामतिः ।
सांख्ययोगरहस्यज्ञो ब्रह्मविद्यापरायणः ॥
वेदार्थविशदीकर्ता वेदवेदाङ्गपारवित् ।
विद्यारण्ययतिर्ज्ञात्वा श्रौतस्मार्तक्रियापरैः ॥
श्रीचौण्डपार्यप्रमुखैर्विद्वद्भिर्ब्राह्मणोत्तमैः ।
व्याचक्ष्वाध्वरतन्त्रं त्वं समन्त्रार्थमिति स्फुटम् ॥
प्रार्थितो बहुशः श्रौतं विशदीकर्तुमुद्यतः ।
कल्पसूत्रेष्वनेकेषु सर्वत्र तु समन्वयात् ॥
आपस्तम्बाचार्यसूत्रं प्रधानं प्रचुरं त्विति ।
तत्सूत्रमेव व्याचष्टे हौत्रौद्गात्रप्रसङ्गतः ॥
करपूरितसर्वाशः श्रीमान् हरिहरेश्वरः ।
शश्वदाकामितानब्धिभुवं नानानृपाश्रयाम् ॥
व्यधादपि पुराणानि महादानानि षोडश ।
तस्मादभूद्धूरिधामा ये(यु)वबुक्कमहीपतिः ॥

* * * *

तिप्पाम्बा नाम तस्याभूद्राज्ञो गुणगरीयसी ।

* * * *

तस्मादस्यां समुदभूद्भूपतिः श्रीभुवोः पतिः ।
कर्मब्रह्माध्वनीनेन कविर्येन कृती कृतः ॥

* * * *

स कदाचिद्भूपतीन्द्रः पालयन् धर्मतः प्रजाः ।
संप्रार्थितो द्विजैः श्रौतं विशदीकर्तुमुद्यतः ॥
विचार्य विदुषां मध्ये चौण्डपार्यमदीदिशत् ।
व्याचक्ष्वाध्वरतन्त्रं त्वं समन्त्रार्थमिति स्फुटम् ॥

किं स्तुमश्चौण्डपाचार्यं जातं तत्र महाकुले ।
वसिष्ठारुन्धतीमुख्या यत्कुले गृहमेधिनः ॥
व(वि)शिष्टवासिष्ठकुले रेचिदू(चिन्नया)र्यः सतां मतः ।
कामाम्बा गृहिणी तस्य भारद्वाजकुलेऽजनि ॥
आर्यादिवातो मिथुनादभूवन्निहिताः सुताः ।
चौण्डपार्यादित्यदेवमश्वपार्याभिधास्त्रयः ॥

* * * *

प्रयोगरत्नमालेयं तन्यते हृदयंगमा ।
गणयन्तो गुणानेव सर्वे तां बहुमन्य(न्व)ताम् ॥

* * * *

अनन्यलभ्यो विषयः पुमर्थः स्यात्प्रयोजनम् ।
संबन्धस्तत्र शक्तिः स्यात् फलस्वाम्याधिकारवान् ॥
व्याख्याया विषयः सूत्रं तस्य यज्ञः प्रयोजनम् ।

* * * *

Colophon:

इति श्रीमद्राजाधिराजपरमेश्वरश्रीवीरहरिहरमहाराजसाम्राज्यधुरंधरप्रतापवीरयुवबुक्कभूपालक्षीरार्णवपूर्णचन्द्रस्य राजव्यासवाल्मीकेः कर्मब्रह्माध्वनीनस्य श्रीवीरभूपतिभूमिपालस्य मन्त्रिणा चिन्नार्यनन्दनेन आदित्यदेवमश्वपार्याग्रजन्मना चौण्डपाचार्येण विरचितायामापस्तम्बीयाध्वरतन्त्रस्वतन्त्रव्याख्यायां प्रयोगरत्नमालायां परिभाषापरिच्छेदः ॥

कर्मब्रह्माध्वनीनस्य मन्त्री भूपतिभूपतेः ।
व्याचष्टे चौण्डपाचार्यः प्रकृतेर्दर्शपूर्णिमे ॥

End:

शकटाच्छादनमन्त्रं विना निरसनाभिमन्त्राणि समन्त्रके वा कुर्यात् । अथ यजमानः करस्त्वा युनक्तु स त्वा युनक्त्विति सर्वे विहारमनुवीक्षणेन यज्ञं युनक्ति॥

यजमानीया[ह]दिमाङ्गतन्त्रव्याख्यासुगन्धिभिः ।
सूक्तिप्रसूनैः पुष्णातु पुमर्थान् पुरुषोत्तमः ॥

Colophon:

इति श्रीमद्राजाधिराजपरमेश्वरश्रीवीरहरिहरमहाराजसाम्राज्यधुरन्धरप्रतापयुवबुक्कभूपालक्षीरार्णवपूर्णचन्द्रस्य राजव्यासवाल्मीकेः कर्मब्रह्माध्वनीन(स्य) श्रीवीरभूपतिभूमिपालस्य मन्त्रिणा चिन्मया(न्नार्य)नन्दनेन आदित्यदेवमश्वपारियाग्रजन्मना चौण्डपाचार्येण विरचितायामापस्तम्बीयाध्वरतन्त्रस्वतन्त्रव्याख्यायां प्रयोगरत्नमालायां प्रथमप्रश्ने पञ्चमः पटलः ॥

कर्मब्रह्माध्वनीनस्य मन्त्री भूपतिभूपतेः ।
व्याचष्टे चौण्डपाचार्यः प्रोक्षणादिक्रियाक्रमम् ॥

Fol. 86*b* is blank.

R. No. **796.**

Paper. 11 × 9 inches. Foll. 77. Lines, 20 in a page. Telugu. Good.

Transcribed in 1912-13 from a MS. of the Paṭṭābhirāma Śāstri of Vizianagaram.

आपस्तम्बसूत्रध्वनितार्थकारिका.

ĀPASTAMBASŪTRADHVANITĀRTHAKĀRIKĀ.

Foll. 1*a*—77*a* Fol. 77*b* is left blank

Same work as the one described under No. 1065 of the D.C.S. MSS., Vol. II.

Incomplete.

R. No. **797.**

Paper. 11×9 inches. Foll. 128. Lines, 20 in a page Dēvanāgarī. Good.

Transcribed in 1912-13 from a MS. belonging to Mysore.

सायणीयसुभाषितम्.

SĀYAṆĪYASUBHĀṢITAM.

Similar to the work noticed under R. No. 149(*b*) *ante*.

By Sāyaṇācārya, the well-known commentator on the Vēdas. From another manuscript in the Library, it is made out that this work was compiled at the instance of Kampabhūpati, king of Vijayanagar.

Almost complete. Contains the following Paddhatis :—

धर्मपर्वस्था—

१. डम्भपद्धतिः.

२. कर्मपद्धतिः.

३. विधिपद्धतिः.

४. मृत्युपद्धतिः.

सङ्कीर्णपर्वस्था—

५. राजप्रशंसापद्धतिः.

६. आज्ञापद्धतिः.

७. वृद्धसेवापद्धतिः.

८. जितेन्द्रियपद्धतिः.

९. अजितेन्द्रियपद्धतिः.

१०. विनयपद्धतिः.

११. क्रोधप्रशंसापद्धतिः.

१२. क्रोधनिन्दापद्धतिः.

१३. लोभपद्धतिः.

१४. द्यूतपद्धतिः.

१५. मृगयापद्धतिः.

१६. मृगयानिन्दापद्धतिः.

१७. पानदोषपद्धतिः.

१८. वाक्पारुष्यम्.

१९. दण्डपारुष्यम्.

२०. सप्तव्यसनपद्धतिः.

२१. हर्षपद्धतिः.

२२. असूयासाहसमानपद्धतिः.

२३. प्रमादपद्धतिः.

२४. दिवास्वप्ननिन्दापरिवादराजवृत्तपद्धतिः.

२५. दिनचर्यापद्धतिः.

२६. करादानपद्धतिः.

२७. आत्मरक्षापद्धतिः.

२८. राज्यरक्षापद्धतिः.

२९. कण्टकशोधनम्.

३०. लोकरञ्जनपद्धतिः.
३१. कीर्तिः, अकीर्तिः.
३२. कविप्रशंसापद्धतिः.
३३. भयम्.
३४. पुत्रपद्धतिः.
३५. असत्पुत्रपद्धति.
३६. भ्रात्रसद्भ्रातृपद्धतिः.
३७. असद्भृत्यपद्धतिः.
३८. विश्वासाविश्वासपद्धतिः.
३९. मन्त्रिपद्धतिः.
४०. दुष्टमन्त्रिपद्धतिः.
४१. बुद्धिप्रशंसापद्धतिः.
४२. मन्त्रप्रशंसापद्धतिः.
४३. मन्त्रदेशः, कालश्च.
४४. सामभेदपद्धतिः.
४५. दानदण्डसन्धिपद्धतिः.
४६. सन्धेयासन्धेयपद्धतिः.
४७. सन्धिदूषणपद्धतिः.
४८. दूतपद्धतिः.
४९. दुष्टदूतचारपद्धतिः.
५०. वैरपद्धतिः.
५१. विग्रहयानपद्धतिः.
५२. निमित्तपद्धतिः.
५३. अनिमित्तासनपद्धतिः.
५४. द्वैधीभावपद्धतिः.
५५. समाश्रयराजलेखपद्धतिः.
५६. कायस्थनिन्दापद्धतिः.
५७. गायकदूषणम्
५८. स्वर्णकृन्निन्दापैशुनपद्धतिः.
५९. अधिकारिदुष्टाधिकारिपद्धतिः
६०. मित्रपद्धतिः.
६१. अमित्रपद्धतिः.
६२. कोशपद्धतिः.
६३. अर्थप्रशंसापद्धतिः.
६४. अर्थनिन्दापद्धतिः.
६५. राष्ट्रप्रशंसापद्धतिः.
६६. दुर्गपद्धतिः.
६७. सेनापद्धतिः.
६८. दुष्टसेनारथसारथिवारण-पद्धतिः.
६९. अश्वपद्धतिः.
७०. पदातिपद्धतिः.
७१. वीरपद्धतिः.
७२. वीरवादपद्धतिः.
७३. युद्धपद्धतिः.
७४. कूटयुद्धपद्धतिः.

७५. धीरपद्धतिः.
७६. भीरुपद्धतिः.
७७. मानिपद्धतिः.
७८. मानहीरवीरपत्नीप्रलापपद्धतिः.
७९. अभयदानपद्धतिः.
८०. महत्पद्धतिः.
८१. लघुकृतज्ञपद्धतिः.
८२. उदारपद्धतिः.
८३. कृपणपद्धतिः.
८४. लक्ष्मीप्रशंसापद्धतिः.
८५. लक्ष्मीनिन्दापद्धतिः.
८६. राजसेवाप्रशंसापद्धतिः.
८७. राजसेवानिन्दापद्धतिः.
८८. दारिद्र्यनिन्दापद्धतिः.
८९. आशापद्धतिः.
९०. तृष्णापद्धतिः.
९१. याच्ञापद्धतिः.
९२. सद्गुणपद्धतिः.
९३. संसर्गदोषपद्धतिः.
९४. सामान्यपद्धतिः.
९५. अन्यापदेशपद्धतिः.
९६. सङ्कीर्णपद्धतिः, कामपर्वस्था.
९७. विषयप्रतिज्ञा.
९८. पुरवर्णनपद्धतिः.
९९. वेश्याप्रशंसापद्धतिः.
१००. वेश्यानिन्दापद्धतिः.
१०१. समुद्रपद्धतिः.
१०२. पर्वतपद्धतिः.
१०३. सरित्पद्धतिः
१०४. वसन्तपद्धतिः.
१०५. मलयानिलपद्धतिः.
१०६. ग्रीष्मपद्धतिः.
१०७. प्रपापद्धतिः.
१०८. वर्षापद्धतिः.
१०९. शरत्पद्धतिः.

Beginning:

निस्पृहल(ड)म्भस्य तुलां यान्ति तु नैते शतांशस्य ।
लोभः पितातिवृद्धो जननी माया सहोदरः कूटः ॥
भ्रुकुटिरचना च विद्या पुत्रो डम्भस्य हुङ्कारः ॥

हृग्बिन्दुलाञ्छितललाटभुजोदरोरःकण्ठोष्ठपृष्ठचिबुकोरुकपोलजानुः ।
चूडाग्रकर्णिकटिपाणिविराजमानदर्भाङ्कुरः स्फुरति मूर्त इवैष डम्भः ।

End:

सौधतोरणविटङ्कवासिनां दृश्यतां मदवशात्कलापिनाम् ।
यामिनीषु तटितो विरेजिरे दीपिका इव पयोददर्शकाः ॥

Colophon:

इति सायणीयसुभाषिते वर्षापद्धतिः ।

स्नपयित्वा वसुमतीं जीमूतकलशोदकैः ।
प्रावृड्ढताम्बरं स्वच्छं गृहीत्वा शरदागता ॥

* * * *

नीतोऽस्मि येन महतीं सलिलेन वृद्धिं
संयोजितश्च सततं गुरुणा फलेन ।
तच्छोष्यता (ते) दिनकृतेत्यतिचिन्तयेव
शोकान्वितं तदपि शालिवनं विपाण्डु ॥

Fol. 4*b* is blank.

R. No **798.**

Paper. 9½ × 7⅛ inches. Foll. 217. Lines, 13 in a page. Dēvanāgarī. Good.

A photographic copy of the paper MS. found in the Royal Library at Berlin and described under No. 720 (chambers 553) of Verzeichnis der Sanskrit and Prakrit Handschriften (der Koniglichen Bibliothek zu Berlin) of A Weber.

महाभाष्यदीपिका.

MAHĀBHĀṢYADĪPIKĀ.

A commentary on the Mahābhāṣya of Patañjali noticed under No. 1285 of the D.C.S. MSS, Vol. III: by Bhartṛhari.

Wants beginning.

Breaks off in the 7th Āhnika of the first Pāda of the first Adhyāya.

Beginning:

पनार्थं वैदिकानां पृथगुपादानम् । प्राधान्यस्यापि हि सामान्येऽप्यन्तर्भूतस्य पृथगुपदेशो दृश्यते—ब्राह्मणा आयाता वसिष्ठोऽप्यायात

इति । प्रथमा(मं) लौकिकानामित्येवमुक्ते लौकिकशब्दसामान्यमपि विशेष(:) प्रतिपद्येत । भाषाशब्दानामेवेदमनुशासनं न वैदिकानाम्; यस्मात्ते हि नियतसंवेशाः प्रतिनियतप्रातिशाख्याः दृष्टानुविधित्वात्तेष्विति । अत उभयोरुपादानं लौकिकानां वैदिकानां चेति ।

* * * *

Colophon:

इति भर्तृहरिटीकायां प्रथमाध्यायस्य प्रथममाह्निकम् ॥

अइउण् । अकारस्य विवृतोपदेशः स्पृष्टतादयश्चत्वार आभ्यन्तरप्रयत्नाः सवर्णाः संज्ञाप्याह प्रवृत्तौ च निवृत्तौ च व्याप्रियन्ते । तत्राकारः संवृत आकारो विवृत इति सावर्ण्यस्याभावादाकारोऽसति ग्रहणे कार्यं न प्रतिपद्येत । अतो विवृतोपदेश आश्रीयते ।

* * * *

Colophon:

इति श्रीमहोपाध्यायभर्तृहरिविरचितायां श्रीमहाभाष्यदीपिकायां प्रथमस्याध्यायस्य द्वितीयमाह्निकम् । प्रत्याहारास्समाप्ताः ॥

इति श्रीमहाभाष्यटीकायां भर्तृहरिविरचितायां तृतीयमाह्निकम् ॥

इति भर्तृहरिटीकायां चतुर्थमाह्निकम् ॥

End:

हृक्रोरन्यतरस्याम् । हरतेः प्रत्यवसानार्थतानिमित्तगत्यर्थता च करोतेरकर्मकत्वम् ॥

Colophon:

प्रथमस्य प्रथमे पादे षष्ठमाह्निकम् ॥

इग्यणस्सम्प्रसारणम् । किमियं वाक्यस्य संज्ञा? आहोस्विद्वर्णस्य?

* * * *

कथमन्त्यस्य शीभावः? शीभावो वा यावता सर्वनाम्नो नपुंसकादिति पञ्चमी । तत्रादेः परस्येति प्रभवितव्यम् ।

एवं मन्यते सर्वनाम्न इयं सम्बन्धषष्ठी, नपुंसकादिति वा विहितविशेषण.

R. No. 799.

Paper. 11×9 inches. Foll. 116. Lines, 20 in a page. Telugu and Dēvanā-arī. Good.

Restored in 1912-13 from a MS. in this library.

सिद्धसारसंहिता.

SIDDHASĀRASAṀHITĀ.

A treatise on medicine dealing with the manner of treating various ailments by the use of certain medicinal powders, drugs, etc.

Incomplete. There are many omissions in the original MS.

Beginning:

కుంబలకాయరస 2 త్తు బలతుప్ప 2 బల లక్కయష్టిమధుకద్రాక్షమం ణుశంఖపుష్పి ఆమడిరాస్త్రిముష్టిదకిమునిన.

* * * *

साध्यं तु पाण्डुामयिनं समीक्ष्य स्निग्धं घृतेनोर्ध्वमधश्च शुद्धिम् ।
सम्पादयेत्क्षौद्रघृतप्रगाढैः हरीतकीचूर्णमयैः प्रयोगैः ॥
पिबेत् घृतं वा रजनीविपक्वं पत्रीफलं तैल्वकमेव वापि ।
विरेचनद्रव्यकृतं पिबेद्वा योगांश्च वैरेचानिकान् घृतेन ॥
विधिस्निग्धेऽथ वातोत्थे तिक्तशीतसुपैत्तिके ।
श्लैष्मिके कटुरूक्षोष्णः कार्यो मिश्रस्तु मिश्रके ॥
वातिके चाभयालेह्यः पिप्पली मधुकं बला ।
पयसा च प्रयुञ्जीत यथादोषं यथाबलम् ॥
द्विशर्करं त्रिवृच्चूर्णं पलार्धं पैत्तिकः पिबेत् ।

* * * *

उपन्यासः—

चिकित्सितं पापविनाशनार्थं चिकित्सितं धर्मविवृद्धये च ।
चिकित्सितं चोभयलोकसाधनं चिकित्सितान्नास्ति परं तपश्च ॥

इति वचनादवश्यकर्तव्या प्राणाचार्यैश्चिकित्सा, चतुर्विधपुरुषार्थसाधनत्वात् । ननु

अर्थं विना भिषक्कर्म कुर्वतो धर्म उत्तमः ।
तं विक्रीणाति योऽर्थाय स . . . रत्नविक्रयी ॥

End:

भूयातं दुरितं शुभाशुभयुतो वैषम्यसाम्ये सुधी-
रेतं तथ्यमहा . . मुनिवरैः भव्याजधर्माशुभिः ।

रामटकद्वयटङ्कणमेकं भास्करभावितपत्ररसैकम् ।
स्थावरजङ्गमकृत्रिमदोषं सर्वविषं क्षणमात्रविनाशम् ॥

Foll. 10*b*—12*b*, 30*b* to 31*b*, 4·*b*—44*b*, 66*a*—68*b*, 90*a*—92*b*, 98*b*—100*b*, 104*b*, 107*b*—108*b*, 109*b*—112*b* and 114 are blank.

R. No. **800.**

Paper. 11 × 9 inches. Foll. 118. Lines, 20 in a page. Dēvanāgarī. Good.

Restored in 1912–13 from the MS. in the Library noticed under R, No. 749 *ante*

प्रमाणसङ्ग्रहः.

PRAMĀṆASAṄGRAHAḤ.

Incomplete.

R. No. **801.**

